Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ोएच.डी) उपाधिकृते

प्रस्तुतो महाशोधप्रबन्धः

**संशोधनविषयः**

# काश्यपशिल्पग्रन्थानुसारेण वास्तुविद्याया मूर्तिनिर्माणविषयस्य च समीक्षात्मकमध्ययनम्

प्रस्तुतकर्ता

प्रफुल्लः पुरोहितः

उपाध्यापकः, बरोडासंस्कृतमहाविद्यालयः

महाराजा सयाजीराव विश्वविद्यालयः, वडोदरा

**मार्गदर्शकः**

**प्रो. डॉ. मुकुन्द ला. वाडेकरः**

निर्देशकः प्राच्यविद्यामन्दिरम्,

महाराजा–सयाजीराव–विश्वविद्यालयः,

वटपत्तनम्

**वर्षम् २०१२**

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# प्रतिज्ञापत्रम्

काश्यपमहर्षेः प्राचीनवाङ्मये विविधशास्त्रेषु बहुमूल्यं प्रदानं वर्तते। काश्यपशिल्पं नामकस्तस्य वास्तुशास्त्रशिल्पविषये च बृहत्कायः संस्कृतग्रन्थः संप्राप्यते। शैवागमप्रभावितेऽस्मिन् ग्रन्थे वास्तुशास्त्रस्य मूर्तिकलाया दृष्ट्या च महत्त्वपूर्णं विवरणं प्राप्यते। तस्य वास्तुशास्त्रस्य मूर्तिकलायाश्च दृष्ट्याध्ययनपूर्वकं नारदादिविरचितवास्तु–शिल्पग्रन्थैः साकं तुलनया समीक्षाया मम महाशोधप्रबन्धस्य मुख्यो विषयः। तदर्थं ग्रन्थस्यास्य प्रकाशितग्रन्थस्यानुसारेण सुसूक्ष्ममध्ययनं विधाय नैकवास्तुग्रन्थैः साकं तुलना मया प्रस्तुता।

अत्र शपथपूर्वकमुद्घोष्यते यत्–अस्मिन् महाप्रबन्धे मया विविधानां प्रकाशितानां मूलभूतानां विविधभाषानुवादसहितानां तथा चाधारग्रन्थानां ग्रन्थकाराणां, पुस्तकानां लेखकानां कोशग्रन्थानां च प्रमाणभूतायाः सामग्र्याः सम्यक्तया विवेकबुद्ध्या सुयोग्यस्थानेषु समुपयोगः कृतः, तस्य यथास्थाने सन्दर्भग्रन्थसूच्यां टिप्पण्यां च ऋणनिर्देशः कृतोऽस्ति। तथापि महाप्रबन्धे सर्वं मम प्रतिपादनं, ॅङ्टेंष्कर्षा निर्णयाश्च सम्पूर्णतया मौलिकाः स्वकीयाश्च सन्ति। एतादृशमध्ययनं तुलना समीक्षा च केनाप्यद्यावधि न विहितेति मम संशोधनं नावीन्यपूर्णं ज्ञानवर्धकं चास्तीति सविनयं–हृदयपूर्वकं निवेद्यते ।

दिनाङ्कः ï २७-१२-२०१२
स्थानम् –वडोदरा

प्रफुल्लः पुरोहितः
**संशोधनकर्ता**

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सत्यं शिवं सुन्दरम्

# Oriental Institute

**The Maharaja Sayajirao University of Baroda**
**Vadodara-390001**

---

## मार्गदर्शकप्रमाणपत्रम्

### शैक्षणिकवर्षम् २००७-२०१२

इदं प्रमाणीक्रियते यत् **श्री. प्रफुल्ल पुरोहित**द्वारा महाराजा–सयाजीराव–विश्वविद्यालयस्य वाचस्पति (पीएच.डी.) इत्युपाध्यवाप्तये प्रस्तुतोऽयं महाशोधनिबन्धः–

काश्यपशिल्पग्रन्थानुसारेण वास्तुविद्याया

मूर्तिनिर्माणविषयस्य च समीक्षात्मकमध्ययनम्।

तस्य मौलिकं स्वतन्त्रं च संशोधनमस्ति। तेन मम निर्देशन इदं संशोधनकार्यं निष्ठापूर्वकं कृतम्। महानिबन्धश्च प्रस्तुतः।

दिनाङ्कः–२७-१२-२०१२
स्थलम् – वडोदरा

**मार्गदर्शकः**
**प्रो.डॉ.मुकुन्द ला. वाडेकर**
निर्देशकः, प्राच्यविद्यामन्दिरम्,
महाराजा–सयाजिराव–विश्वविद्यालयः, वटोदरम्
वाचस्पतिनिर्देशकः संस्कृतमहाविद्यालयः,
म.स.विश्वविद्यालयः, वटपत्तनम् (गुजरात)

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# प्राक्कथनम्

प्रथमत एवाहं संस्कृतमहाविद्यालयस्य छात्रत्वेन संस्कृताध्ययने प्रवृत्तोऽस्मि। साहित्यशास्त्रे तथा धर्मशास्त्रे आचार्यपदवी मया महाविद्यालयतः प्राप्ता। भाग्यवशान्मया तत्रैवोपाध्यपकत्वेनाध्यापनकार्यं प्रारब्धम्। आधुनिककाले वास्तुशास्त्रस्य शिल्पशास्त्रस्य चातीव महत्त्वं वर्तते। बरोडासंस्कृतमहाविद्यालये परम्परागतशास्त्रैः साकं वास्तुशास्त्रस्याध्यापनं विशारद-शास्त्री-आचार्यकक्षासु प्रारब्धम्। अत एव महाविद्यालयेऽध्यापनकार्यं कुर्वता मया महर्षिमहेशयोगिवैदिकविश्वविद्यालयतः स्थापत्यवेदाचार्यस्य पदवी सम्प्राप्ता। तेन च ममास्मिन् विषये रुचिः प्रवर्धमानासीत्। वास्तुशास्त्रे संशोधनं कर्तुं ममेच्छा सञ्जाता। वास्तुशास्त्रस्य नैके ग्रन्थाः सन्ति। किन्तु काश्यपशिल्पं नामको ग्रन्थो बहुप्रसिद्धो नास्ति। अतस्तस्य समीक्षात्मकं तुलनात्मकमध्ययनं कर्तुं मम मार्गदर्शकैः प्रो.डॉ.मुकुन्द लालजी वाडेकरमहोदयैः मह्यं सूचितम्। प्राच्यविद्यामन्दिरस्थे ग्रन्थागारे आनन्दश्रमसंस्थानतः प्रकाशितः काश्यपशिल्पग्रन्थो जीण-शीर्णावस्थायां मया सम्प्राप्तः। तस्याध्ययनार्थं प्रतिकृतिकरणमपि दुष्करमासीत्। सौभाग्येन मया आनन्दाश्रमसंस्थापुनातः पुनर्मुद्रितावृत्तिः सम्प्राप्ता क्रीता च। अध्ययनं चास्य मया प्रारब्धम्। ग्रन्थोऽतीव कठिनः, क्वचित् त्रुटितः, क्वचिद् भ्रष्टः, क्वचिदशुद्धश्च वर्तते। सम्पादकेन बहु परिश्रमपूर्वकं सम्पादनेऽपि नैकस्थानेष्वशुद्धोऽनाकलनीयश्च वर्तते। तस्य पठनं कुर्वता मया ज्ञातं यत् तस्य मराठीभाषायामनुवादः डॉ.र.पु.कुलकर्णी महोदयेन कृतः, स मया बहु प्रयत्नेन सम्प्राप्तः। एतस्य ग्रन्थस्याध्ययनं मया मम गुरुवर्याणां साहाय्येन कृतम्। अत्रेदं विनिविद्यते यत् स ग्रन्थो मत्कृतेऽतीवोपयुक्त आसीत्। किन्तु मूलग्रन्थस्याशुद्धत्वेन पाठभ्रष्टत्वेन च कुलकर्णीमहोदयानां संस्कृतापेक्षया तन्त्रज्ञानस्य विशेषज्ञानत्वेन नैकस्थानेषु विपप्रतिपत्तिरनुवादकार्येऽपि दृश्यते। मया यथामति यथाशक्यं काश्यपशिल्पस्य समीक्षात्मकमध्ययनं तस्य च नैकग्रन्थैः सह तुलनां कृत्वा प्रबन्धोऽयं प्रस्तुतः।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वर्याणां मार्गदर्शकानां दिन-प्रतिदिनं सम्यङ्मार्गदर्शनं कार्यपूर्णतायां बहु मूल्यमस्ति। विषयचयनात् प्रारभ्यान्तपर्यन्तं प्रत्येककार्ये तैः सुष्ठुतया मार्गदर्शनं कृतं, तदर्थं तेषां भूरि उपकारभारं स्मरामि। महाविद्यालयस्य पूर्वप्राचार्याणां श्री. योगेश ओझा महोदयानां तथा च साम्प्रतिकप्राचार्याणां डॉ.रवीन्द्रकुमार पण्डामहोदयानां भूरिश उपकारभारं स्मरामि, यतो हि तैर्मह्यं कार्यपूर्णतायां सहकारः प्रदत्तः। एवमेव संस्कृतमहाविद्यालयस्यान्यप्राध्यापकानां मित्रवर्याणां च सहकारप्रदानार्थमुपकारभारं स्मरामि। प्राच्यविद्यामन्दिरस्य ग्रन्थागारस्य श्री.दिगम्बर काशीकरमहोदयस्य पुस्तकानांमादानप्रदाने सहकारार्थं धन्यवादान् स्मरामि।

दि.२७-१२-२०१२ — प्रफुल्लः पुरोहितः

स्थानम्-वडोदरा — संशोधकः

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

## यानुक्रमणिका

प्रथमं प्रकरणम् पृ.सं. १ तः ७५

प्रस्तावना

वास्तुशास्त्रम्, शिल्पशास्त्रम्, कालक्रमिकेतिहासश्च, वास्तु, शिल्पम्, वास्तुस्तथा शिल्पम्, देवशिल्पी विश्वकर्मा, दानवशिल्पी मयः, ऋग्वेदे विश्वकर्मणो विवेचनम्, दानवशिल्पी मयः अन्ये वास्तुशास्त्रीया आचार्याः, मत्स्यपुराणम्, अग्निपुराणम्, बृहत्संहितायाम्, मानसारः, सनत्कुमारवास्तुशास्त्रे, विश्वकर्मवास्तुशास्त्रे, वास्तुपुरुषः, वास्तुशास्त्रस्येतिहासः, वैदिकवाङ्मयम्, वैदिकसंहितासु वास्तुशास्त्रम्, गृहम्, ग्रामस्तथा पुरः, ब्राह्मणग्रन्थाः, सूत्रग्रन्थाः, सैन्धवस्थापत्यम्, दुर्गम्, रक्षाप्रकारः, श्रमिकावासगृहाणि, धान्यशाला, मोहनजोदडो, दुर्गभागः, अवम-नगरस्यावशेषाः, मार्गाः, नागरिकभवनानि, निर्मलनगरव्यवस्था, लौकिकसाहित्यम्, वाल्मीकिरामायणम्, नाट्यशास्त्रम्, महाभारतम्, पुराणम्, मत्स्यपुराणम्, अग्निपुराणम्, गरुडपुराणम्, स्कन्दपुराणम्, विष्णुधर्मोत्तपुराणम्, शुक्रनीतिः, अष्टाध्यायी, अर्थशास्त्रम्, पालिसाहित्यम्, आगमग्रन्थाः, तन्त्र-साहित्यम्, बृहत्संहिता, अन्यसंस्कृतसाहित्यम्,

२. द्वितीयं प्रकरणम् पृ.सं. ७६ तः ९९

काश्यपस्य काश्यपशिल्पग्रन्थस्य च परिचयः

कश्यपः, धर्मशास्त्रकाररूपेण कश्यपः, काश्यप अकृतव्रणः, काश्यपः कणादः, ज्योतिषसंहिताकारः काश्यपः, काश्यपस्य छन्दःशास्त्रम्, काश्यपः कृषिशास्त्रस्यापि प्रवर्तकः, काश्यपो भक्तिसूत्रप्रवर्तकः, काश्यपगीता, काश्यपपरिवर्तः, काश्यपो नामको बौद्धभिक्षुः,

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

श्यपाप्री, काश्य(पा)रण्यमाहात्म्यम्, काश्यपीयवैखानसम्, काश्यपशिल्पम्, काश्यपसंहिता, काश्यपशिल्पम्, काश्यपशिल्पग्रन्थस्य परिचयः,

३.तृतीयं प्रकरणम् पृ.सं. १०० तः २३१

काश्यपशिल्पग्रन्थानुसारेण वास्तुविद्याया अध्ययनम्।

प्रस्तावना, भूमिपरीक्षा, वर्णानुसारं शुभा भूमिः, भूमिकर्षणम्, दिक्परिच्छेदनम्, प्रासादवास्तु, वास्तुपदमण्डलम्, वास्तुपुरुषोत्पत्तिः, वास्तपुरुषस्याङ्गे स्थिता देवताः, प्रथमेष्टका, मण्डपः, भित्तिः, स्तम्भः, पाषाणस्य वर्गीकरणम्, स्तम्भः– द्वारस्तम्भः, उपपीठम्, उपपीठस्य निर्गमनम्, प्रतिभद्रम्, प्रतिसुन्दरः, सौभद्रम्, कल्याणिका, अधिष्ठानम्, दण्डः, निर्गमः, प्रतिबन्धः, पादबन्धः, प्रतिवक्त्रम्, प्रतिक्रमः, अम्भोजकेसरम्, पुष्पपुष्कलः, श्रीबद्धान्तः, मञ्चबन्धः, श्रेणीबद्धः, अब्जबन्धः, वप्रबन्धः, प्रतिसुन्दरः, श्रीकण्ठान्तः, करीरबन्धः, कलशबन्धः, श्रीकरः, सुन्दर-अम्बुजम्, नलिनकान्तम्, श्रीसौन्दर्यम्, स्कन्दकान्तः, अम्बुजकान्तः, नालप्रतिष्ठा, नालस्थापना, नालमानं, स्तम्भः, बोधिका, फलिका, घटः, बोधिकाया उच्चता, वेदिकालक्षणम्, जालकलक्षणम्, जालकस्य षड् प्रकाराः, तोरणम्, वृत्तस्फाटितम्, स्तम्भतोरणविधिः, द्वारतोरणम्, स्तम्भतोरणम्, कुम्भस्थलम्, द्वारविन्यासः, कम्पद्वारम्, प्रस्तरलक्षणम्, गलभूषणलक्षणम्, शिखरलक्षणम्, नासिकालक्षणम्, क्षुद्रनासी, प्रासादलक्षणम्, संख्यावाचकशब्दाः, हस्तः, मानसूत्रलक्षणम्, विकल्पहर्म्यम्, छन्दहर्म्यमानम्, जातिहर्म्यम्, आयादिलक्षणम्, नागरादिविमानम्, नागरः, द्राविडः (प्रथमः प्रकारः), द्राविडविमानस्य द्वितीयः प्रकारः, द्राविडप्रासादस्य तृतीयः प्रकारः, वेसरविमानम्, गर्भविन्यासः, एकतलभवनम्, द्वितलम्, रुद्रकान्तम्, स्वस्तिबन्धम्, कल्याणसुन्दरम्, पाञ्चालम्, विष्णुकान्तम्, विश्वकरम्, मंगलम्, गान्धारम्, मनोहरम्, शिवकान्तम्, कुबेरकान्तम्, त्रितलम्, स्वस्तिकम्, रुद्रकान्तम्, शिवकान्तम्, विष्णुकान्तम्, शुद्धाभिधानम्, विमानाकृतिः, ब्रह्मकान्तम्, हस्तिपृष्ठम्, भद्रकोष्ठम्, वृत्तकूटम्, श्रीकण्ठः, गान्धारम्, श्रीविशालम्, श्रीभोगाढ्यम्, चतुर्भूमिः, सुभद्रः, ब्रह्म,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

्, श्रीकान्तं तथा श्रीविशालम्, कूटादिलक्षणम्, पञ्चतलविधानम्, ब्रह्मकान्तम्, भद्रकान्तम्, जनार्दनम्, अतिभद्रम्, सर्वतोभद्रम्, वीरभद्रम्, षड्भूमिः, अम्बुजासनम्, सुशांकरसदनम्, भद्रलीनकम्, शिवभद्रम्, नागेन्द्रम्, सप्तभूमिः, समुज्ज्वलम्, श्रीविशालम्, श्रीकान्तम्, श्रीप्रियम्, रुद्रकान्तम्, वृत्तभद्रम्, सुवृत्तम्, शिवभद्रम्, भद्रपञ्जरम्, वसुभूमिः, शिवछन्दम्, वागीशम्, अष्टभागम्, पर्वतम्, कैलाससदनम्, नवभूमिः, ललितभद्रकम्, ब्रह्मकान्तम्, प्रादेशम्, सौष्ठिकं तथा श्रीवर्धनम्, सुपद्मम्, कृतवर्धनम्, वृत्तगेहम्, दशभूमिलक्षणम्, एकादशतलम्, ब्रह्मकान्तम्, विजयम्, सर्वार्हकम्, इन्द्रकान्तम्, गणिकाशालकम्, इन्द्रकान्तम्, कर्णविशालम्, द्वादशतलम्, त्रयोदशतलम्, षोडशतलम्, ब्रह्मकान्तम्, सारस्वतगृहम्, प्रादेशम्, श्रीकरम्, पर्वतीकम्, सुशांभवम्, मूर्धेष्टका, पूजाविधिः, मूर्धेष्टका स्तूपिश्च, प्राकारः, तृतीयप्राकारः, प्राकारस्य भित्तिः, उत्तर-प्रस्तरादिः, पदानुसारव्यवस्था, मण्डपलक्षणम्, अन्तराललक्षणम्, आभासमण्डपः, छन्दमण्डपः, जातिमण्डपः, मण्डपस्य स्तम्भाः, मण्डपस्यावयवाः, प्रथमो मण्डपः, द्वितीयो मण्डपः, तृतीयो मण्डपः, चतुर्थो मण्डपः, पञ्चमो मण्डपः, सप्तमो मण्डपः, अष्टमो मण्डपः, नवमो मण्डपः, दशमो मण्डपः, प्रथमो मण्डपः, द्वितीयो मण्डपः, तृतीयो मण्डपः, चतुर्थो मण्डपः, द्वादशमण्डपः, त्रयोदशमण्डपः, चतुर्दशमण्डपः, वर्गाकारो मण्डपः, गोपुरलक्षणम्, गोपुरविस्तार, गोपुरद्वारदीर्घता, गोपुरोच्चता, द्वितलतो सप्ततलपर्यन्तं गोपुर वर्णनम्, गोपुरस्यालंकाराः, गोपुरप्रकाराः,

४. चतुर्थप्रकरणम्

काश्यपशिल्पग्रन्थानुसारेण मूर्तिनिर्माणविषयस्याध्ययनम्। पृ.सं-२३२ तः ३३६

परिवारदेवताः, सप्तमातृकाश्च, प्रतिमालक्षणम्, नन्दीलक्षणम्, अनललक्षणम्, वीरभद्रो विनायको वा, सप्तमातृकालक्षणम्, ब्राह्मी, ईश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, विनायकलक्षणम्, षण्मुखलक्षणम्, ज्येष्ठादेव्या लक्षणम्, दुर्गालक्षणम्,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पितरः, वैवस्वतः/यमः, रोहिणीलक्षणम्, निऋति, अप्सरालक्षणम्, वरुणस्य लक्षणम्, ऋषेः लक्षणम्, मरुत् लक्षणम्, रुद्रस्य लक्षणम्, चन्द्रः, क्षेत्रपालः, राजस-क्षेत्रपालः, ईशः, भास्करलक्षणम्, अनन्तः, अर्कः (सूर्यः), अभयः, गौरी, शर्वः, ब्रह्मा, शिवः, भृगु, एकाक्ष, सरस्वती, लक्ष्मीः, कुबेरः, कालाग्नि रुदः, श्रीकण्ठः, नागदेवः, भीमः, शिखण्डः, मरुद्गणः, उग्रः, शनैश्चरः, मूर्तिपीठः, लिङ्गलक्षणम्, चलं अचलं चलाचलं लिङ्गम् च।, शिलालक्षणम्, शिलापूजनम्, लिङ्गमानम्, शिरोवर्तनम्, लिङ्गपूजा, लक्षणोद्धारः, प्रतिमालक्षणम्, शिवस्य विभिन्न मूर्तयः, आयादि, काललक्षणम्, उत्तमदशतालः, नासिका लक्षणम्, मध्यमदशतालविधानम्, अधमदशतालविधानम्, उत्तमं नवतालं विधानम्, मध्यमनवतालविधानम्, अधमनवतालविधानम्, अष्टतालविधानम्, सप्ततालविधानम्, पिण्डिकालक्षणम्, पीठिकालक्षणम्, सकलस्थापनाविधिः, सुखासनमूर्तिः, सोमस्कन्देश्वरः, देवी, स्कन्दः, उमास्कन्दः, चन्द्रशेखरः, वृषवाहनमूर्तिलक्षणम्, नृत्तमूर्तिलक्षणम्, गङ्गाधरमूर्तिः, त्रिपुरान्तकमूर्तिलक्षणम्, कल्याणमूर्तिलक्षणम्, अर्धनारीश्वरलक्षणम्, गजहामूर्तिलक्षणम्, पाशुपतमूर्तिलक्षणम्, कङ्कालमूर्तिलक्षणम्, हर्यर्धहरमूर्तिलक्षणम्, भिक्षाटनमूर्तिलक्षणम्, चण्डेशानुग्रहमूर्तिलक्षणम्, दक्षिणामूर्तिलक्षणम्, कालहामूर्तिलक्षणम्, लिङ्गोद्भवलक्षणम्, वृक्षसंग्रहणम्, वृक्षलिङ्गभेदः, उत्तमवृक्षाः, वृक्षदोषाः, पूजा, शूललक्षणम्, शूलस्थापना, रज्जुबन्धलक्षणम्, मृत्संस्कारलक्षणम्, कल्कसंस्कारलक्षणम्, वर्णसंस्कारः,

५. पञ्चमं प्रकरणम् पृ.सं-३३७ तः ३८५

काश्यपशिल्पस्य तुलनात्मकं समीक्षात्मकं चाध्ययनम्।

तौलनिकमध्ययनं-काश्यपशिल्पस्य वास्तुशिल्पविचाराणां नारदशिल्पशास्त्रसमराङ्गणसूत्रधार-विष्णुधर्मोत्तरादिग्रन्थोक्तविचारैः साकं तुलना। अध्ययनस्य फलितं, मूल्यांकनम्, गुणदोष-विवेचनं, उपसंहारः।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पृ.सं-३८६ तः ३९५

उपसंहार:

समग्रस्याध्ययनस्य फलं, आधुनिककालेऽध्ययनस्योभ्यासस्योपयुक्तता, अध्ययनस्य महत्त्वं, प्रथम एव प्रयत्नः, प्रथमवारमेवैतादृशं तौलनिकं विवेचनात्मकं चाध्ययनं। विचारस्य प्रायोगिक्युपयोगिता। सिद्धान्तानां चिन्तनं, निष्कर्षाः।

परिशिष्टानि

१ काश्यपशिल्पस्याध्यायानां विषयानुक्रमणिका श्लोकसंख्या च पृ.सं-३९७-३९९

२ काश्यपशिल्पे वर्णितदेवतानां सूचिः। पृ.सं-४००-४०१

४ उपयुक्तानि विषयसंबधीनि चित्राणि। पृ.सं-४०२-४०३

५.मानविषयकं तथा उपयुक्तानि कोष्टकानि। पृ.सं-४०४-४०५

७ पारिभाषिकशब्दानां सूचिः। पृ.सं-४०६-४०९

८.सन्दर्भग्रन्थसूचिः। पृ.सं-४१०-४१७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# प्रथमं प्रकरणम्

# प्रस्तावना

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# प्रकरणम्

## प्रस्तावना

वास्तुशास्त्रम्, शिल्पशास्त्रम्, कालक्रमिकेतिहासश्च-

संस्कृतवाङ्मये यथा नानाविधानि शास्त्राणि समस्तस्य ब्रह्माण्डस्य वर्णने विपुल-विचार-वैभवानि सन्ति, तथैव वास्तुशास्त्रस्य विचारेऽपि सुसमृद्धानि विद्यन्ते । वास्तुशास्त्रमेकं सुपरिचितं प्राचीनं विज्ञानं वर्तते, यस्मिन्नस्माकं सांस्कृतिकनिधीनां भवननिर्माणविधीनाञ्च समुल्लेखो वर्तते । पञ्चमहाभूतानामेव सदुपयोगेन मानवः स्वजीवनं सुविधासम्पन्नं कर्तुं शक्नोति । दिगनुसारेण भवनस्य स्थितिविन्यासस्य प्रभावः स्पष्टरूपेण मानवजीवने निपतति । आदिकालादृषयस्तेषां प्रभावानामनुशीलनं कृत्वा भाविसमाजस्य सुखसमृद्ध्यर्थं विशिष्ट-नियमानां निर्धारणं कृतवन्तः । तज्ज्ञानमेव वास्तुशास्त्ररूपेण प्रथितमभूत् सर्वत्र विश्वे ।

वास्तुशास्त्रस्य समुद्गमः स्थापत्यवेदादभवत् । अथर्ववेदस्याङ्गभूतं वस्तुतो वास्तुशास्त्रम् । वास्तुशास्त्रे मानवजीवनस्य दैनिकक्रियकलापानां तथा विचारधाराया एकं प्रतिरूपं दृश्यते । पुराणेषु वर्णितायां गृहनिर्माणकलायां तत्कालीनसमाजस्य समृद्धिस्तथा बौद्धिकविकासस्य परिचयो द्रष्टुं शक्यते ।

वास्तुशास्त्रं मूलतो विज्ञानस्य विषयः । पृथ्वी-अग्नि-जल-वायु-आकाशादीनां पञ्चतत्त्वानां प्रभावः । वास्तुशास्त्रदृष्ट्या निर्मितानां गृहाणां रचना पर्यावरणमभिलक्ष्यैव भवति। यथा क्रमेण पृथ्वी-अग्नि-जल-वायु-आकाशादीनां तत्त्वानां सन्निवेशो वास्तुशास्त्रे महत्त्वपूर्णं स्थानं विन्दति ।

वैदिकसंहिताब्राह्मणश्रौतसूत्रादि - ग्रन्थाऽऽलोडनेन निश्चयो भवति यद् वास्तुशास्त्रस्य विकासो यज्ञवेदीनिर्माणशास्त्राच्छुल्ब-सूत्रात्समजायत । वास्तुशास्त्रे प्राचीन-भवननिर्माणविधीनाञ्च समुल्लेखो वर्तते ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वास्तुशब्दस्य सामान्या समुत्पत्तिर्वस्तुशब्दात् । एतेन प्रकारेण किमपि निर्माणं द्रव्य-काष्ठ-इष्टिका-पाषाण-धातु- इत्यादीनां निर्माणप्रक्रियामागच्छति, तदा वास्तुसंज्ञया व्यवहारो भवति । वी. गणपतिस्थपति-अनुसारेण वर्तमानवास्तु-विज्ञान-अर्न्तगत मूर्तिशिल्पं, वास्तुशिल्पं, छंद:शास्त्रं,संगीतविद्या नृत्यशास्त्रम्-एतेषां गणना भवति ।[१] वास्तुशास्त्रं गृहविषयकं शास्त्रं वर्तते । गृहनिर्माणे भूमिलक्षणं,भूमिपरीक्षणं,दिग्ज्ञानं- मासनक्षत्रादिविचार:- वास्तुशास्त्रस्य विषयोऽस्ति । वास्तो:-गृहस्य पति:-वास्तोष्पतिरित्युपच्यते । वास्तोरर्थ:-भवनम्,भूखण्डो वा गृहनिर्माणस्य स्थानम् ।[२] मनुष्यवसतियोग्यं स्थानं वास्तु स्मर्यते ।

वास्तुपदस्य निष्पत्ति: संस्कृतस्य 'वस् निवासे' धातो: सञ्जातास्ति। यस्यार्थो निवासकरणं विद्यते। 'वसन्ति प्राणिनो यत्र' अर्थात् प्राणिनां निवासस्थानं 'वास्तु' इति पदेनाभिधीयते। अनया दृष्ट्या प्राणिनो यत्र निवसन्ति तेषामर्थे तदेव वास्तु वर्तते। जलचराणां कृते जलमेव वास्तु, पक्षिणामर्थे तेषां नीडमेव वास्तु-यथा 'वेश्मभूर्वास्तुस्त्रियाम्' (अमरकोष: - काण्डम्-२, पुरवर्ग: १९) कोषानुसारं गृहस्य कृते नियतभूमिरेव वास्तु निगदितम्। शब्दार्थभानौ, पद्म- चन्द्रकोशे, शब्दस्तोममहानिधौ, शब्दार्थचिन्तामणौ, इत्यादिषु ग्रन्थेषु वास्तुपदार्थ: 'वासयोग्या भूमि:' अथवा गृहनिर्माणयोग्या भूमि: - इत्थं रूपेण स्वीकृत:। इत्थं

---

१वास्तुपुरुष का ज्योतिर्भौतिकी पक्ष" विज्ञानभारतीप्रदीपिका,वास्तुशास्त्र विशेषांक-अंक-२.सं.२,१९९६, २८ (भारतीय साहित्य तथा शिल्प में विश्वकर्मा, डॉ.ईश्वरशरण विश्वकर्मा,पृ-१२९

२ Sanskrit English Dictionary-M-Monior Williams-P-548-49,Dictionary of Indian Architceture.P.K.Acharya.P-548,संस्कृत हिन्दी कोष-वामन शिवराज आप्टे,पृ.६२३,अ.को.२-३-१९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ास्तु विद्यते। अथ च वास्तु अर्थात् भवनसम्बन्धि वास्तुशास्त्र कथ्यते। अपि तु भारतीयपरम्परायां वास्तुशास्त्रम्-अर्थात् निर्माण-अभियान्त्रिकी (Science of Architecture) ऋषिभिर्मनीषिभि: परमोत्कृष्टज्ञानद्वारा आविर्भूतमेव स्वीक्रियते।

वास्तोर्व्यापकार्थस्तस्य च क्षेत्रम्

वास्तुशब्दस्य सामान्य: मर्यादितश्चार्थो निवासयोग्या भूमिर्वा भवनं वर्तते । परन्तु वास्तुशास्त्रीयग्रन्थेषु वास्तोर्विषयो गहनो व्यापकश्चास्ति। आचार्यविश्वकर्मणा प्रोक्तं यथा ï

देवतानां नराणाञ्च गजवाजिनामपि।

निवासभूमि: शिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।

विश्वकर्मवास्तुशास्त्रम् – ७.१

यत्रार्थेन विज्ञाप्यते यत् ï देवा:, मनुष्य:, गज:, धेनु:, अश्वादय: पशवो यत्र निवसन्ति तदेव वास्तुपदेनोदीर्यते।

एतदतिरिक्तं मानव: स्वकीयसुविधार्थं भवननिर्माणं येषां केषामपि वस्तूनामुपयोग:, तद्वस्त्वपि वास्तु भवति। विश्वकर्मवास्तुशास्त्रानुसारेण इष्टिका, शिला, वृक्ष:, कीलादीनि सर्ववस्तूनि वास्तुसंज्ञावन्ति भवन्ति। यथा ï

इष्टिका च शिला दारुरयकीलादयोऽप्यमी।

वास्तुकर्मणि चान्यत्र वास्तुसंज्ञमुदीरितम्।।

विश्वकर्मवास्तुशास्त्रम् – ७.६१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्त्रस्य भूमेः, हर्म्यस्य, प्रासादस्य, यानस्य, पर्यङ्कस्य, शयनस्य चादीनां सङ्कलनं जातम्।

धराहर्म्यादि यानं च पर्यङ्कादिचतुर्विधम्।

धराप्रधानवास्तु स्यात्तत्तज्जातिषु सर्वशः।।

मानसारः.३.२

वस्तुतस्तु मयमते भूमिरेव प्रधानं वास्तुरस्ति-इत्थं भणितम्। एतेषां वस्तूनां निर्माणं यद् भवति तेषामुत्पत्तिस्थानं भूमिरेवास्ति। अन्यथा यदि कथयामश्चेत् समेषामेतेषां वस्तूनामाधारो 'धरा' विद्यते।

इत्थमुपयुक्तिविवेचनस्याधारेण वास्तुपदस्य व्युत्पत्तिः 'वस्तुशब्देनापि स्वीकार्यास्ति। कस्मिन्नपि निर्माणे निर्माण-द्रव्याणि इष्टिकाकाष्ठादीनि नूतननिर्मितौ परिणीतानि भवन्ति तदा तानि 'वास्तु' इति संज्ञया व्यवह्रियन्ते।

कौटिल्येनापि स्वकृतार्थशास्त्रे वास्तुशब्दस्य प्रयोगोऽतीव विशदार्थे विहितोऽस्ति। तन्मतानुसारं गृहस्य क्षेत्रम्, आरामः, बन्धः, सेतुः, भवनं, तडागः, पुष्करिण्यादीनि स्थानानि वास्तुशब्देन व्यवह्रियन्ते। यथा ï

'गृहं क्षेत्रमारामः सेतुबन्धस्तडागमाधारो वा वास्तु'।

अर्थशास्त्रम्-.३.८

इत्थं विस्तृतार्थे वास्तुद्वारा विज्ञाप्यते यत् सामान्यजनस्य निवासभवनमेव न, अपि तु राजभवनं, प्रासादः, ग्रामः, नगरं, रथ्या, मार्गः, प्रकारः, परिखा, मन्दिरं, मण्डपः, यज्ञवेदी,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible] स्तूपादीनि निर्माणानि सन्ति। यत् मानवनिवासाय, अभीष्टजनानां, देवानां वा निवासस्थानादिरूपेण भवति। अतो वास्तोरर्थो न केवलं गृहम्, अपि तु 'गृहादिः' सञ्जातः। मानसारमयमतादिषु समराङ्गणसूत्रधारस्य पूर्ववर्तिषु तथा शिल्परत्नादिषु परवर्तिषु वास्तुशास्त्रीयग्रन्थेषु वास्तुशब्दार्थः क्षेत्रं, भवनं, प्रासादः, राजहर्म्यं, देव-मन्दिराणि, देवप्रतिमाः, यावत् मर्यादितोऽस्ति, किन्तु समराङ्गणसूत्रधारे नगरात्, निवासात्, सभायाः, वेश्मतः, आसनादप्यधिकं देशवर्णनपर्यन्तं विवर्धते। यथा-

देशः पुरं निवासश्च सभा वेश्मासनानि च।

यद्यदीहशमन्यच्च तत्तच्छ्रेयस्करं मतम्।।

वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।

तस्माल्लोकस्य कृपया शास्त्रमेतदुदीयते।।

समराङ्गणसूत्रधारः, .१.४.५

संक्षेपेण वास्तोर्विशदार्थे मानवनिवासस्य देवनिवासस्य वा सुखसुविधानाञ्च सूक्ष्मातिसूक्ष्मचिन्तनं समाविश्यते।

भारतीयस्थापत्यानुसारं वास्तु-विनियोजना समस्तभूमण्डलं गृहीत्वा प्रचलति। भारतीय-सूक्ष्मेक्षिकया स्थापत्यनिर्माणस्याखिलं भूमण्डलमेव न, अपि तु समग्रविश्वमेव प्रतिपाद्यविषयोऽस्ति। भारतीये स्थापत्ये समस्तविश्वस्य चिन्तनं वर्तते। किमपि निर्माणं, वास्तु, कापि योजनापि वास्तु। अत एवोच्यते भारतीयशिल्पस्थापत्यस्य विशाला विस्तृता व्यापकीभूता दृष्टिर्वर्तते।

शिल्पम् —:

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...नय:, महात्मानश्चासन् । तैर्वेदविद्याप्रमुखा अनेका विद्या:, कला:, अनेकानि शास्त्राण्यपि प्रणीतानि सन्ति । विद्यास्वैका शिल्पविद्या, कलास्वैका शिल्पकलापि भवति । शिल्पकलामधिकृत्य कानिचित् शास्त्राण्यपि विरचितान्यासन् । वास्तुशास्त्रमपि शिल्पकलाया अङ्गभूतमस्ति।

इदं शिल्पशास्त्रं शिवविष्णु-ब्रह्म-स्कन्द-गणेश-पार्वती-लक्ष्मी-सरस्वती-काल्यादिमूर्ति-निर्माणसहितं तत्तद्देवतालय-प्रासाद-हर्म्य-गृहशाला-वापी-कूप-तडागाद्यनेकप्रकारकवास्तु-निर्माणप्रकारप्रतिपादकं शास्त्रम् । अस्य द्वितीयं नाम वास्तुशास्त्रमिति वसन्ति प्राणिनो यत्र तन्नाम वास्तु तद्विषयकं शास्त्रं नाम वास्तुशास्त्रम् ।

कलाकौशल्यादिकं कर्म शिल्पमुच्यते । तत्र चोक्तम् अमरकोशे द्वितीयकाण्डे शूद्रवर्गे शिल्पकर्म कलादिकर्म चेति, अत्रादिशब्देन सुवर्णकारगृहकारादीनां कर्म ग्राह्यमिति । शिल्पमधिकृत्य प्रणीतं शास्त्रमपि शिल्पशास्त्रमिति उच्यते । तच्च शिल्पं लक्षणं वास्तु विज्ञानामलंकारघटनं,माल्यग्रथनम् काचवलयादिकाराणामालेख्य करणं, कुम्भकाराणां घटनिर्माणं शिल्पशास्त्रमेव । तत्र यै: कारुकर्मोपजीविकासाधनत्वेन परिगृहीतं ते शिल्पिन एवोच्यन्ते । शिल्पानामनेकविधत्वादनेकविद्या: सन्ति । तत्र केचित् तच्छिल्पविशेषस्य नियतमङ्गीकरणात्स्थपति: सुवर्णकार:,कुम्भकार:,कुविन्दक:-इत्यादिकं च तत्तज्जातीयत्वेन व्यवह्रियन्ते । शिल्पे नानाविधान्नपानादिग्रामगृहच्छादनादै: सर्वस्य वस्तुजातस्य संग्रहो भवतीति।

शिल्पशब्दस्य प्रथमप्रयोग ऋग्वेदे (९.५.६.) प्राप्यते यथा-

सुशिल्पे बृहती मही पवमानो वृषण्यति ।

नक्तोषासा न दर्शते ।

शिल्पशब्दस्य प्रयोग: पुन: शुक्लयजुर्वेदे (४.९.)- ऋक्सामयो: शिल्पे स्थस्ते ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्रष्टुं शक्यते ï

आथर्वणाङ्गिरस शिल्प काश्यपो होवाच पिप्लादमहामतिम्।

षोडशतापिनी ये होताद्गातृभिः वास्तोष्पतिर्ज्ञेयः ।। १ ।।

टीकाकारो महीधरः शतपथब्राह्मणस्य प्रमाणं ददाति ।यथा ï

यद्वै प्रतिरूपं तच्छिल्पम् ।शिल्पे चातुर्ये तद्रूपे भवतः।[3]

शीलयति शीलतीति वा शिल्पं यत् कुम्भकारादिकर्म इत्युञ्चादिवृत्तिः- इति निघण्टुः । सायणभाष्ये शिल्पशब्दश्चाश्चर्यकरं कर्म ब्रूते । तच्च शिल्पं द्विविधं देवशिल्पं मानुषशिल्पं चेति,नाभानेदिष्ठादीनि यानि शिल्पानि सन्ति तानि देवानि प्रीतिहेतुत्वाद्देवशिल्पानीत्युच्यन्ते, एतेषामेव देवशिल्पानामनुकृतिसदृशरूपाणि मनुष्यलोके शिल्पमधिगम्यते प्रतीयते ।

शिल्पं हास्मिन्नधिगम्यते य एवं वेद, (ऐ.ब्रा.६.५.१.२) शिल्पं कौशलं नानाविधं प्राप्यते ।ऐतरेयब्राह्मणे-शिल्पानि शंसन्ति ।देवशिल्पान्येतेषां वै शिल्पानामनुकृतीह शिल्पमधिगम्यते – हस्ती कंसो वासो हिरण्यमश्वतरीरथः शिल्पम् ।ऐतरेयब्राह्मणे देवशिल्पस्य व्याख्यायां सायणः- नाभानेदिष्ठादीनि यानि शिल्पानि सन्ति तानि देवानां प्रीतिहेतुत्वाद्देवशिल्पानि-इत्युच्यन्ते । शिल्पप्रयोजनम् ऐतरेयब्राह्मणे (६.५.१.३) आत्मसंस्कृतिर्वाव शिल्पानि च्छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते । कौषीतकिब्राह्मणे (२९.५) त्रिवृद् वै शिल्पं नृत्यं गीतं वादित्रमिति । काश्यपशिल्पे निवेदने- कलाकौशल्यादिकं कर्म शिल्पमित्युच्यते ।[4]

---

३ शतपथब्राह्मण-३.२.१.५
४ का.शि.नि.पृ.सं.१

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

क्षणया शिल्पशब्दे नोच्यते । शिल्पशब्दस्तु पुनः शील समाधौ ।

तस्मिन् काले केचन शिल्पकारा जन्मना केचन कर्मणा जायन्ते ।वस्तुतस्तस्मिन् समये स्थपतीनां कृते शिल्पज्ञानं रेखाज्ञानमावश्यकमासीत् ।

यो वास्तुविद्यां जानाति शिल्पज्ञानं जानाति ,स प्रतिमानिर्माणं कर्तुं शक्नोति ।

नानाविधानां वस्तूनां यन्त्राणां कल्पसंपदम् ।

धातूनां साधनानां च वास्तूनां शिल्पसंज्ञितम् ।। इति ।।[६]

शिल्पसंहितायां दश शास्त्राणि द्वात्रिंशद्विद्याश्चतुषष्टिश्च कला भवन्ति ।(का.शि.)[७]

विविधाः कलाः

भारतीयपरम्परानुसारं विविधानां कलानां विविधग्रन्थेषु गणना प्राप्यते। वात्स्यायनस्य कामसूत्रे तथा शुक्रनीतिसारे चतुषष्टिकलाः परिगणिताः। प्रबन्धकोषानुसारं द्विसप्ततिकलाः सन्ति। ललितविस्तरानुसारं ८६ कला भवन्ति। वास्तुशास्त्रस्य विषयस्य सम्बन्धस्तैः साकं वर्तते। अत एव तासां विविधकलानां परिगणनं सङ्कलनं चात्र विधीयते। अत्रेदं विचारणीयं यत् एतासु कलासु केषाञ्चन कलानां वास्तशास्त्रे शिल्पशास्त्रे चान्तर्भावो भवति।

कामसूत्रानुसारं चतुषष्टिकलाः[८]

(१)गीतम्
(२)वाद्यम्
(३)नृत्यम्
(४)आलेख्यम् (चित्रकला)

---

५ का.शि.ऊ.पृ.सं.२
६ का.शि.ऊ.पृ.सं.२
७ का.शि.ऊ.पृ.सं.३
८ कामसूत्रम्, १-अधिकरणम्, सू-१६, पृ.सं-५२ तः ६२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible]

(७)पुष्पास्तरणम्

(८)दशन-वसनाङ्गरागः

(९)मणिभूमिकाकर्म

(१०) शयनरचनम्

(११) उदकवाद्यम्

(१२) उदकाघातः

(१३) चित्रयोगाः

(१४) माल्यग्रथनविकल्पाः

(१५) शेखरकापीडयोजनम्

(१६) नेपथ्यप्रयोगाः

(१७) कर्णपत्रभङ्गाः

(१८) गन्धयुक्तिः

(१९) भूषणयोजनम्

(२०) ऐन्द्रजालाः

(२१) कौचुमारयोगाः

(२२) हस्तलाघवम्

(२३) विचित्रशाकयूषभक्ष्यविकारक्रिया

(२४) पानकरसरागासवयोजनम्

(२५) सूचीवानकर्माणि

(२६) सूत्रक्रीडा

(२७) वीणाडमरुकवाद्यानि

(२८) प्रहेलिका

(२९) प्रतिमाला

(३०) दुर्वाचकयोगः

(३१) पुस्तकवाचनम्

(३२) नाटकाख्यायिका-दर्शनम्

(३३) काव्यसमस्यापूरणम्

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(३६) तक्षणकला
(३७) वास्तुविद्या
(३८) रूप्यरन्तपरीक्षा
(३९) धातुवादः
(४०) मणिरागाकरज्ञानम्
(४१) वृक्षायुर्वेदयोगाः
(४२) मेषकुक्कुटलावकयुद्धविधिः
(४३) शुकसारिकाप्रलापनम्
(४४) उत्सादने संवाहने केशमर्दने च कौशलम्
(४५) अक्षरमुष्टिकाकथनम्
(४६) म्लेच्छतविकल्पाः
(४७) देशभाषाविज्ञानम्
(४८) पुष्पशकटिका
(४९) निमित्तज्ञानम्
(५०) यंत्रमातृका
(५१) धारणमातृका
(५२) सम्पाठ्यम्
(५३) मानसी काव्यक्रिया
(५४-५५)अभिधानकोशः छन्दोज्ञानम्
(५६)क्रियाकल्पः
(५७)छलितकयोगः
(५८)वस्त्रगोपनानि
(५९)द्यूतविशेषा
(६०)आकर्षकक्रीडा
(६१)बालक्रीडनकानि
(६२)वैनायिकीनां विद्यानां ज्ञानम्
(६३)वैजयिकीनां विद्यानां ज्ञानम्

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नम्

शुक्रनीतिसाराधारेण ६४ कला:[९]

(१)हावभावादिसंयुक्तं नर्तनम्
(२)अनेकवाद्यविकृतौ तद्वादने ज्ञानम्
(३)स्त्रीपुंसौर्वस्त्रालंङ्कारा:।
(४)अनेकरूपाविर्भावकृतिज्ञानं
(५)शय्यास्तरणसंयोगपुष्पादि:
(६)द्यूताद्यनेकक्रीडा:
(७)अनेकासनसन्धानै रतेर्ज्ञानम्
(८)मकरन्दासवादीनां मद्यादीनां कृति:
(९)शल्लगूढाहृतौ सिराव्रणव्याधेर्ज्ञानम्
(१०) हीनादिरससंयोगान्नादिसंपाचनम्
(११) वृक्षादिपशवारोपपालनादिकृति:
(१२) पाषाणधात्वादिदृतिभस्मकरणम्
(१३) यावदिक्षुविकाराणां कृतिविज्ञानम्
(१४) धात्वोषधीनां संयोगक्रियाज्ञानम्
(१५) धातुसांकर्यपार्थक्यकरणम्
(१६) धात्वादीनां संयोगापूर्वविज्ञानम्
(१७) क्षारनिस्कासनज्ञानम्
(१८) पदादिन्यासत: शस्त्रसंधाननिक्षेप:
(१९) संध्याघाताकृष्टिभेदैर्मल्लयुद्धम्
(२०) अभिलक्षिते देशे यन्त्राद्यस्त्रनिपातनम्
(२१) वाद्यसंकेततो गूहरचनादि:
(२२) गजाश्वरथ-गत्या युद्धसंयोजनम्
(२३) विविधासन-मुद्राभिर्देवतातोषणम्
(२४) सारथ्यम्

९ शुक्रनीति:, अ.४, ६७ त १०१,पृ.सं-३३९-३४६

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

क्षा

णधातुभाण्डादिसक्रिया

(२७) चित्राद्यालेखनम्

(२८) तटाकवापीप्रासादसमभूमिः

(२९) घट्याद्यनेकयन्त्राणां वाथ्यसनां कृतिः

(३०) हीनमध्यादिसंयोगवर्णाद्यै रञ्जनम्

(३१) जलवायु-अग्निसंयोगनिरोधैः क्रिया

(३२) नौकारथादियानानां कृतिज्ञानम्।

(३३) सूत्रादिरज्जूकरणविज्ञानम्।

(३४) अनेकतन्तुसंयोगैः पटबन्धः।

(३५) रत्नानां वैद्यादिसदसज्ज्ञानम्।

(३६) स्वर्णादीनां याथार्थ्यविज्ञानम्।

(३७) कृत्रिमस्वर्णरत्नादिक्रियाज्ञानम्।

(३८) स्वर्णाद्यलंकारकृतिः।

(३९) लेपादिः सत्कृतिः

(४०) चर्मणां मार्दवादिक्रियाज्ञानम्।

(४१) पशुचर्मांगनिर्हारज्ञानम्।

(४२) दुग्धदोहादिघृतान्तविज्ञानम्।

(४३) कञ्चुकादीनां सीवने विज्ञानम्।

(४४) जले बाह्वादिभिस्तरणम्।

(४५) गृहभाण्डादेर्मार्जने विज्ञानम्।

(४६) वस्त्रमार्जनम्।

(४७) क्षुरकर्म

(४८) तिलमांसादिस्नेहानां निस्कासने कृतिः।

(४९) सीराद्याकर्षणे ज्ञानम्।

(५०) वृक्षाद्यारोहणे ज्ञानम्।

(५१) मनोकूलसेवायाकृतिज्ञानम्।

(५२) वेणुतृणादिपात्राणां कृतिज्ञानम्।

(५३) काचपालादिकरणविज्ञानम्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

संहरणम्।

...ास्त्रकृतिज्ञानम्।

(५६) गजाश्ववृषभोष्ट्राणां पल्याणादिक्रिया।

(५७) शिशो: संरक्षणे धारणे क्रीडने ज्ञानम्।

(५८) अपराधिजनेषु युक्तताडनज्ञानम्।

(५९) नानादेशीयवर्णानां सुसम्यग्लेखने ज्ञानम्।

(६०) ताम्बूलरक्षादिकृतिज्ञानम्।

(६१) आदानम्।

(६२) अश्वकारित्वम्।

(६३) प्रतिदानम्।

(६४) चरक्रिया।

प्रबन्धकोषानुसारं द्विसप्ततिकला:[१०]

(१)लिखितम्।

(२)गणितम्।

(३)गीतम्।

(४)नृत्यम्।

(५)पठितम्।

(६)वाद्यम्।

(७)व्याकरणम्।

(८)छन्द:।

(९)ज्योतिषम्।

(१०)शिक्षा।

(११)निरुक्तम्।

(१२)कात्यायनम्।

(१३)निघण्टु:।

(१४)पत्रच्छेद्यम्।

---

१० संस्कृत ग्रन्थों में कला-विद्या और क्रीडा, पृ.सं-८५-८७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(१७)आयुध्याभ्यासः।

(१८)गजारोहणम्।

(१९)तुरगारोहणम्।

(२०)तपःशिक्षा।

(२१)मन्त्रवादः।

(२२)यन्त्रवादः।

(२३)रसवादः।

(२४)खन्यवादः।

(२५)रसायनम्।

(२६)विज्ञानम्।

(२७)तर्कवादः।

(२८)सिद्धान्तः।

(२९)विषवादः।

(३०)गारुडम्।

(३१)शाकुनम्।

(३२)वैद्यनम्।

(३३)आचार्यविद्या।

(३४)आगमः।

(३५)प्रासादलक्षणम्।

(३६)सामुद्रिकम्।

(३७)स्मृतिः।

(३८)पुराणम्।

(३९)इतिहासः।

(४०)वेदः।

(४१)विधिः।

(४२)विद्यानुवादः।

(४३)दर्शनसंस्कारः।

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

(४६)इन्द्रजाल:।
(४७)पातालसिद्धि:।
(४८)धूर्तसम्बलम्।
(४९)गन्धवाद:।
(५०)वृक्षचिकित्सा।
(५१)कृत्रिममणिकर्म।
(५२)सर्वकरणी।
(५३)वश्यकर्म।
(५४)पणकर्म।
(५५)चित्रकर्म।
(५६)काष्ठघटनम्।
(५७)पाषाणकर्म।
(५८)लेपकर्म।
(५९)चर्मकर्म।
(६०)यन्त्रकरसवती।
(६१)काव्यम्।
(६२)अलंकार:।
(६३)हसितम्।
(६४)संस्कृतम्।
(६५)प्राकृतम्।
(६६)पैशाचिकम्।
(६७)अपभ्रंशम्।
(६८)कपटम्।
(६९)देशभाषा।
(७०)धातुकर्म।
(७१)प्रयोगोपाय:।
(७२)केवली विधि:।

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

ललितविस्तरानुसारं कलाः[११]

(१)लंघितम्।
(२)प्राक्चलितम्।
(३)लिपिमुद्रासंख्यागणना सालम्भ धनुर्भेदाः।
गणना। संख्या। सालम्भ। धनुर्वेदः।
(४)जवितम्।
(५)प्लवितम्।
(६)तरणम्।
(७)इश्वस्त्रम्।
(८)हरितग्रीवा।
(९)रथः।
(१०)धनुष्कपालः।
(११)अष्वपृष्ठम्।
(१२)स्थैर्यम्।
(१३)स्द्याम्।
(१४)सुसौर्यम्।
(१५)बाहुव्यायाम्।
(१६)अंकुशग्रहपाशग्रहा।
(१७)उद्यानिनिर्माणम्।
(१८)अपयानम्।
(१९)मुष्ठिबन्धः।
(२०)शिखाबन्धः।
(२१)छेद्यम्।
(२२)भेद्यम्।
(२३)तरणम्।
(२४)स्फालनम्।

११ संस्कृत ग्रन्थों में कला-विद्या और क्रीडा, पृ.सं-८७-९०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(२७)शब्दबेधित्वम्।
(२८)दृढप्रहारित्वम्।
(२९)अक्षक्रीडा।
(३०)काव्यव्याकरणम्।
(३१)ग्रन्थरचितम्।
(३२)रूपम्।
(३३)रूपकर्म।
(३४)अधीतम्।
(३५)अग्निकर्म।
(३६)वीणा।
(३७)वाद्यनृत्यम्।
(३८)गीतपठितम्।
(३९)आख्यातम्।
(४०)हास्यम्।
(४१)लास्यम्।
(४२)नाट्यम्।
(४३)विडम्बितम्।
(४४)माल्यग्रथनम्।
(४५)संवाहितम्।
(४६)मणिराग:।
(४७)वस्त्रराग:।
(४८)मायाकृतम्।
(४९)स्वप्नाध्याय:।
(५०)शकुनिरुतम्।
(५१)स्त्रीलक्षणम्।
(५२)पुरुषलक्षणम्।
(५३)अश्वलक्षणम्।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(५६)अजलक्षणम्
(५७)मिश्रितलक्षणम्।
(५८)कैटभेश्वरलक्षणम्।
(५९)कोषः।
(६०)निगमः।
(६१)पुराणम्।
(६२)इतिहासः।
(६३)वेदाः।
(६४)व्याकरणम्।
(६५)निरुक्तम्।
(६६)शिक्षा।
(६७)छन्दः।
(६८)यज्ञकला।
(६९)ज्योतिः।
(७०)सांख्यम्।
(७१)योगः।
(७२)क्रियाकल्पः।
(७३)वैशेषिकम्।
(७४)वेशिकम्।
(७५)अर्थविद्या।
(७६)बार्हस्पत्यम्।
(७७)आश्चर्यम्।
(७८)आसुरम्।
(७९)मृगपक्षिरुतम्।
(८०)हेतुविद्या।
(८१)जतुयन्त्रम्।
(८२)मधूच्छिष्टकृतम्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(८५)पत्रकच्छेद्यम्।
(८६)गन्धयुक्ति:।

अनया परिगणनया ज्ञायते यत् विविधप्रकाराणां विज्ञानतन्त्रज्ञानामाधुनिककालसदृशं ज्ञानं प्राचीनग्रन्थेष्वासीत्। वास्तुशास्त्रस्य शिल्पशास्त्रस्य च मूर्तिकला सहितं ज्ञानं बहुविस्तीणमगाधं चासीदित्यत्र नास्ति शङ्कालेशोऽपि।

वास्तुस्तथा शिल्पम्

उत्तरीयभारते स्थापत्यग्रन्थानां कृते वास्तुशास्त्रं दक्षिणभारते शिल्पशास्त्रं शब्दस्य प्रयोगो विधीयते। उभयोरपि शब्दयो: क्षेत्रे भेदोऽस्ति । डॉ.डी.एन.शुक्लमहोदयेन शिल्पकला[१२] वास्तुशास्त्रस्याङ्गरूपेण स्वीकृतास्ति। परन्तु डॉ.पी.के.आचार्यानुसारं वास्तुशास्त्रं,शिल्पशास्त्रान्तर्गतमस्ति।[१३] स भृगुसंहितामुद्धरन् लिखति यत् महर्षिभृगुणा शिल्पशास्त्रस्य कृषिशास्त्रं, जलशास्त्रं, खनिजशास्त्रं, नौकाशास्त्रं, अग्नियानशास्त्रं तथा वास्तुशास्त्रादीनि दशोपशास्त्राणि लिखितानि सन्ति।

डॉ.शुक्लमहोदयानां कथनानुसारं वास्तुशब्द: शिल्पादधिक: पुरातनोऽस्ति। ऋग्वेदे सर्वप्रथमो भवनवाचिनो वास्तुशब्दस्य प्रयोगो विहितोऽस्ति। यत् शास्त्रं भवनसम्बन्धिव्याख्यां विदधाति तदेव वास्तुशास्त्रं कथ्यते। प्राचीनकालेऽथर्ववेदस्योपवेदरूपेण स्थापत्यवेदोऽप्यासीत्। अनन्तरं स्थापत्यशास्त्रं, वास्तुशास्त्रं, शिल्पशास्त्रञ्च त्रीण्यपि समानार्थकानीव।[१४]

यतो ऋग्वेद: संसारस्य प्राचीनतमसाहित्यरूपेण गौरवान्वितमस्ति। तत्र वास्तुशब्दस्य प्रयोग: भवनार्थक: कृत:। किन्त्वेवमुच्यते यत् वास्तुशब्दो वस्तु इति शब्दद्वारा निर्मितोऽस्ति वा

---

१२ भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४
१३ भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४
१४ भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.५

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

…ाधारेण डॉ. शुक्लस्य मतं युक्तिसङ्गतं प्रतीयते। तत्कथनानुसारं मानसारमयमतादयो दक्षिणभारतीयग्रन्था यद्यपि वास्तुशास्त्रस्यैव प्रतिपादनं विदधते परन्तु शीर्षकं वास्तुशास्त्रस्य स्थाने शिल्पशास्त्रं प्रदीयन्ते। तथापि वास्तुशास्त्रस्य शिल्पशास्त्रस्य च व्यापकत्वस्य क्षेत्रे भेदोऽस्ति। तन्मतानुसारं प्राधान्येन व्यपदेशा भवन्ति- इति न्यायात् दक्षिणभारतीयपरम्परायां वास्तुशास्त्रीयग्रन्था अपि शिल्पशास्त्रस्य सञ्ज्ञया परिकीर्तिताः सन्ति। दक्षिणभारतस्य वास्तुकलायां चित्रणस्याधिक्याद् वास्तु अर्थात् भवननिर्माणकलापि प्रकारान्तरेण शिल्पकला-अर्थात् मूर्तिकलाया रूपणे परिणितास्ति। अतो हेतोस्तत्रत्या  वास्तुशास्त्रीयग्रन्था अपि शिल्पशास्त्रस्य शीर्षकेनालकृंताः सन्ति।

वास्तुकलाया इतिहासोऽतीव पुरातनोऽस्ति। साधारणतः वासस्थानं निवासस्थानं वा वास्तुः कथ्यते एवं तत्सम्बन्धिनी कला वास्तुकला निगद्यते। वास्तुकला किमपि स्थलं मानवानां कृते निवासयोग्यं विधातुं कलास्ति। भवनानां विन्यासः, आकलनं, रचनाञ्च, परिवर्तनशीलसमयस्य प्रौद्योगिकी, रुच्यनुसारं मानवभावान् संतोषयितुं समस्तभेदाः, तर्कसङ्गतनिर्माणस्य कला, विज्ञानप्रौद्योगिक्योः सम्मिश्रणम्-इत्यादीनि समस्तघटकानि वास्तुकलायाः परिभाषायामन्तर्गतानि भवन्ति।

वास्तुकला ललितकलायाः सा शाखासीत्, यस्या हेतुरुपयोगिताया दृष्ट्यनुसारं सर्वोत्कृष्टं भवननिर्माणमस्ति। यस्य पर्यावरणं सुसंस्कृतं, कलात्मकरुच्यर्थमतीव प्रियं तथा सौंदर्यभावनापोषकम्, आनन्दवर्धकञ्च भवेत् । प्रकृतिबुद्धिरुचिभिर्निर्धारितानां कतिपयसिद्धानामनुसारेण रचनाकरणं वा निर्माणकार्यं कलासम्बद्धमङ्गमस्ति। पूर्वनिर्धारितां योजनां कार्यान्वयीकरणेन सह समुचितमाध्यमेन समृद्धीकरणम् यतो ह्यधिकतमेन सौकर्येण समं तत्र रोचकतायाः, सुन्दरतायाः, महत्तायाः, एकत्वस्य च सृष्टिर्भवेत् - एतदेव वास्तुकौशलमस्ति। प्रारम्भिककाले वास्तुकलायाः स्थानं मनुष्याणां मर्यादितप्रयोजनार्थमावश्यकेषु व्यवसायेषु प्रायस्तत्र तेभ्यो रक्षा-स्थानं प्रदातुमस्ति, परन्तु

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्तेर्महत्त्वकाङ्क्षायास्तथा अध्यात्मिकताया: प्रकृति: पूर्णतयाभिव्यज्यते तदा वास्तुकृतया मानवीयेतिहासे महत्वपूर्णं स्थानं भजन्ते।

प्राचीनकाले वास्तुकला सर्वासां कलानां जननी कथ्यमानासीत् किन्तु वृत्ते: परिवर्तनेन सह सम्प्रति सम्बद्धव्ययसायानां विभाजनात् तद्वत् स्थानं सुरक्षितं न प्रतिभाति। वास्तुकला सम्बन्धे एतदपि कथितमस्ति यत् भवनानामलङ्करणं विनाधिकं किमपि नास्ति। यावदैतिहासिकवास्तुकलाया: सम्बन्धोऽस्ति, तावद् आंशिकं सत्यमस्ति। पुनरपि वास्तुकला सभ्यताया चिह्नमपि प्रतिपादितम्। वस्तुत इयं वास्तुकला युगानां विकासक्रमेण साकं विकसिता, परिवर्तिता मानवानां च परिवर्तनशीलावश्यतानुसारं तेषां सुरक्षा, कार्यं, धर्म:, आनन्द: तथा चेतरयुगप्रवर्तकचिह्नानुसारिणी तदनुरूपा च सञ्जाता।

देवशिल्पी विश्वकर्मा, दानवशिल्पी मय:

वास्तुशास्त्रस्योद्भावकेषु विश्वकर्मणो मयस्य च नाम्नी सर्वाधिकत्वेन सुविख्याते वर्तते। एतयोर्विश्वकर्मा देवानां स्थपति: वा देववास्तो: प्रवर्तकरूपेण स्वीक्रियते। मयोऽसुर-वास्तो: प्रवर्तकत्वेन विश्रुतोऽभवत्। देवगणेषु या प्रतिष्ठा विश्वकर्मण आसीत्, सैव प्रतिष्ठा असुरेषु मयस्याभवत्। भारतवर्षे स्थापत्यविषयकमिदं मतद्वयं युगपद् विकसितम्। शनै: शनैस्तस्य नैकानि तत्त्वानि परस्परं सम्मिलितानि सञ्जातानि। किन्तु कतिपया मूलभूता: सहजभेदाश्चिरकालं यावद् विद्यमाना आसन्। तत्र स्थानीयाया विशिष्टताया यत्किञ्चिद् योगदानमासीत्। [१५]

ऋग्वेदे विश्वकर्मणो विवेचनम्

ऋग्वेदे सूक्तयोर्द्वयोर्विश्वकर्मण: सविशदं वर्णनं प्राप्यते। अनयोर्द्वयो: सूक्तयो ऋषिर्देवता च क्रमेण विश्वकर्मा भौवन: तथा विश्वकर्मा स्त:। वस्तुत इह सर्वशक्तिमत:, परमात्मन:,

---

१५ भारतीय वास्तुकला का इतिहास.पृ.५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विश्वकर्मा इति शब्दप्रयोगो विहितोऽस्ति। तत् परमतत्त्वं जगद्रूपब्रह्माण्डस्य, समग्रविश्वस्य निर्माणकरणाद् विश्वकर्मा कथ्यते। ऋग्वेद एनं महदाकाशात् पृथिव्याश्च परं तथा अजशब्देन प्रतिपादितम् । यथा-

परो दिव्या पर एना पृथिव्याः -ऋग्वेद-१०.८२.८५

अजस्य नाभौ, ऋग्वेद-१०.८२.०६

यजुर्वेदेऽपि विश्वकर्मण उल्लेखः प्राप्यते। यथा-

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः,

यजुर्वेद-१.८१७.२८.१७.३२.१९.७.७९.इत्यादिः

मानसरेऽभिहितं यत् विश्वकर्मा ब्रह्माण्डस्य सर्जनं नैकवारं विदधाति । यथा-

स एवायं विश्वकर्मा ब्रह्माण्डं सृजते मुहुः।

मानसारः २.२

जगदिदं यस्य कर्मास्ति, स एव विश्वकर्माभ्यधायि। तेनैव संसाररूपिणो महावृक्षस्य द्यावा-पृथिव्योर्निर्माणं कृतम्। [१६]

मत्स्यपुराणे वाल्मीकिरामायणे च सुन्दरकाण्डे यो विश्वकर्मा लङ्कपुर्यास्तथा महाभारते पाण्डवानां सभाभवनस्य निर्माता दर्शयत्, स ऋग्वेदोक्तेभ्यः सूक्तेभ्यो देवस्वरूपाद् भिन्नः, पृथग् वास्ति। यथा मत्स्यपुराणे..............

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा।

---

१६ भारतीय कला,पृ.५३

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

नजिच्चैव विशालाक्षः पुरन्दरः।।

मत्स्यपुराणे २५२.२

लोके देवस्थपतिरूपेण विश्रुतो विश्वकर्मा सम्भवत ऋग्वेदे ऋषिनाम्नोल्लेखितो विश्वकर्मा विद्यते। डॉ.शुक्लोऽपि स्थपतिविश्वकर्माणं ऋषिं देव-पुरुषं वा मन्यते। तेन मत्स्यपुराणोल्लेखितानां वास्तुशास्त्रोपदेष्टॄणां सूचिः प्रस्तूयमानेन लिखितं यत् एतेषु प्रायः सर्वे वैदिक-कालीन ऋषियो वा प्रख्याता देव-पुरुषाः सन्ति।[17] इत्थमिह विश्वकर्मणो रूपद्वयं विलोक्यते-१) समस्तब्रह्माण्डस्य स्रष्टा परमात्मा,२) ऋषिर्वा देवपुरुषः स्थपतिः।

वाल्मीकिरामायणे विश्वकर्माद्वारा निर्मिताया लङ्कानगर्या अवस्थितिः, विस्तारः, सौन्दयादिषु विषयेषु सविशदं विवरणं प्राप्यते। आदिकवेरनुसारं लङ्कां परितः खनिताः परिखाः तस्याः नगर्याः शोभां वर्धयति। तत्र पद्मोत्पलादीनां जातीनां कमलानि विकचितानि सन्ति। सा महापुरी स्वर्णमयैश्चतसृभिर्भीत्तिभिः समावृतासीत् तथा भूधरसमानोन्नतैस्तथा शरदृतोर्वारिवाहैः समानैः श्वेतभवनैः युक्तासीत्। यथा सुन्दरकाण्डे वर्ण्यते-

परिखाभिः सपक्षाभिः सोत्पलाभिरलङ्कृताम्।

काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम्।

गृहैश्च गिरिसंकाशेः शारदाम्बुदसंनिभैः।।

पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम्।

अट्टालकशताकीर्णां पताकाध्वजशोभितम्।।

तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविराजितैः।

---

१७ समराङ्गणसूत्रधारवास्तुशास्त्र-भवननिवेश.,प्र.भा.हिन्दी-अनुवाद,पृ.३

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

र्माल्लङ्कां देवो देवपुरीमिव।।

पालिता राक्षसेन्द्रेण निर्मितां विश्वकर्मणा।

प्लवमानामिवाकाशे ददर्श हनुमान् कपिः।।

वा.रा.सु.स-२.१६ तः २०

डॉ.डी.एन.शुक्लमहोदयेन समराङ्गणसूत्रधारस्य तथा अपराजितपृच्छाया आधारेण विश्वकर्मणो वंश-परम्पराया वर्णनं विदधता तेन सः प्रभासवसोः पुत्रो दर्शितोऽस्ति।[१८]

तन्मतानुसारं विश्वकर्मा सूक्ष्मकलायाः, स्थापत्यकलायाः, शिल्पकलायाः, चित्रकलाया निर्माणपक्षस्य, सौन्दर्यपक्षस्य च कुशलज्ञाताभवत्। स एकोऽतिप्रसिद्धो यान्त्रिकोऽप्यभवत्। येन भूमौ, समुद्रे, वियति चलायमानि यानानि निर्मितान्यासन्। वाल्मीकिरामायणे द्वयोः प्रकारयोः विमानानामुल्लेखोऽस्ति। आकाशमार्गेण गम्यमानो रथस्तथा भवनम्। लङ्काधिपते रावणस्य समीपे यत् पुष्पकं नामकं महद् विमानमासीत् तस्यापि निर्माणं विश्वकर्मणा विहितमासीत् । यथा

प्रासादैश्च विमानैश्च लङ्का परमभूषिता।

वा.रा.यु.स.३०.२२

तत्र विशेषमहाभूतानि प्रयुक्तान्यासन्, यानि देवानां समीपेऽपि नासन्। तद् विमानं वायुपथि प्रतिष्ठितं भूत्वा आदित्यमार्गस्य तारासदृशं दर्शयन् गतिकुर्वाणमासीत्। तत् मारुततुल्यं शीघ्रगामि आसीत्। प्रायो दशहोराकालावधौ लङ्कातोऽयोध्यामागच्छदासीत्। तन्निर्वाहकाः सहस्रभूतगणा अभवन्। एते भूता अर्थात् वायुः, अग्निः, आपश्चादयो

---

१८ स.सू.वा.शा.-भवननिवेश.प्र.भा.हिन्दी-अनुवाद,पृ.८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तस्य दिव्यविमानस्य निर्माणमादिदेवब्रह्मार्थं कृतमासीत्। ब्रह्मणा इदं कुबेरायादायि । एवं कुबेरादिदं रावणः हठाद् बलादगृह्णात्।

दानवशिल्पी मयः

भारतीयवास्तुकलाया इतिहासे मय एकमत्यन्तमहत्त्वपूर्णमभिधानमस्ति। पूर्वपृष्ठेषु मत्स्यपुराणोद्धृतवचनेषु वास्तुशास्त्रोपदेशकेषु मयस्यापि गणना कृतास्ति। मानसारे प्रदत्तवर्णनानुसारं मयस्योत्पत्तिर्ब्रह्मणो दक्षिणवदनाद् जातासीत्। ब्रह्मण इतरवदनत्रयात् क्रमेण विश्वकर्मणः, मनोः, त्वष्टुश्चोत्पत्तिः समभवत्। इत्थं प्रतिभाति यत् मयेन सूत्रग्रहणे विलक्षणं नैपुण्यं समर्जितम्। अतो मयपुत्राः सूत्रग्राहिणः पदेनाभिधीयन्ते। ध्यातव्यमस्ति यत् सूत्रग्राही वस्तुत एका पारिभाषिकी सञ्ज्ञास्ति ।यथा मानसारे.....

दक्षिणे मयः -मानसारः,.२.६

पूर्वानने विश्वकर्मा जातः, उत्तरस्य मुखे त्वष्टा

पश्चिमे तु मनुः स्मृतः। .२.५-६

मयस्य तनयः सूत्रग्राहीति परिकीर्तितः मा..२.९

वास्तुकलासम्बन्धिषु नैकेषु मुद्रितामुद्रितग्रन्थेषु मय इति शब्दप्रयोगः प्राप्यते। यथा ï मयमते, मयमतशिल्पशास्त्रविधाने, मयमतशिल्पशतिकायां, मयशिल्पे, मयवास्तौ, मयवास्तुशास्त्रे तथा मयमतवास्तुशास्त्रादिषु। डॉ. कान्तिचन्द्र पाण्डेयमहोदयस्य मतानुसारं कालान्तरे मय इति नाम्नी जातिरेका समभवत् यस्याः स्वकीयैका विशिष्टसंस्कृतिरभवत्। यस्याः प्रसारो मध्य-अमेरिकादेशपर्यन्तमासीत्। यत्र पुरातत्त्वसम्बन्धि-उत्खनने हनुमतः, गणेशस्य, इन्द्रादीनां मूर्तयः प्राप्ता अभवन्।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ण्डे पञ्चाशत्तमात् सर्गतस्त्रिपञ्चाशत्तमसर्गपर्यन्तं भूगर्भे वर्तमानगिरिदुर्गस्य विशदं मनोहारि वर्णनं विहितं वर्तते, यस्य सृष्टिर्दानवशिल्पिना मयेन स्वकीयलोकोत्तरशक्तिभिः कृतासीत्। आदिकविना महर्षिवाल्मीकिना लङ्कानगरीं विश्वकर्मणा निर्मितां दर्शयित्वा रावणस्य भवनसौन्दर्यविषयकमुल्लेखितमस्ति, यत् तद् भवनं सर्वाङ्गीणरमणीयत्वे एतादृशमधिकं विलक्षणमासीत् यत् तत् स्वयं मयेन तन्निर्माणं स्वेन हस्तेन कृतमभवन्।

मयस्य मायाविहितं गिरिदुर्गविचिन्वताम्।

वा.रा.कि.५२.१५

महाभारतेऽपि महास्थपतिमयस्य वास्तुकौशलं बहुशः प्रशंसितम्। तेन पाण्डवानां विलक्षणं सभाभवनं निर्मितम्। विश्वकर्मणा रचितं स्फटितखचितं भवनं भूमिगतस्थानं जलयुक्तसरोवरमिव प्रतिभासत। जलसरोवरञ्च भूस्थानमिव प्रतीयते। द्वाराणि चोद्घाटितानि बद्धानीव बद्धानि चोद्घाटितानीव प्रतीयन्ते। राजसभानुकरणं साधारणा मनुष्यजातेर्जनाः कर्तुं न शक्नुवन्ति स्म । तत्र देवासुरमानवसम्बन्धिचित्राणि पाषाणोष्टिकारङ्गादिभिः प्रकटितान्यभवन्।

स्फटिकं स्थलमासाद्य जलमित्यभिशङ्कया।

स्ववस्त्रोत्कर्षणं राजा कृतवान् बुद्धिमोहितः।

ततः स्फाटिकतोयां वै स्फाटिकाम्बुजशोभिताम्।

पापीं मत्वा स्थलमिव सवासाः प्रापतज्जले।।

म.सभा.प.४७.३,४,६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...नवेशकं विशेषज्ञं दर्शयन् कथ्यते यत् तेन ब्रह्मणा वरदानमुपलभ्य एतादृशानि विचित्रदुर्गाणि निर्मितान्यभवन्, येषु त्रीणि द्वाराणि समभवन्, त्रिषु च द्वारेषु त्रीणि नगराण्यवस्थितान्यासन्। अट्टालिकोद्यानादिसमस्तसमुचितव्यवस्था द्वारा त्रीणि नगराणि वैभवसौन्दर्यसुखसुविधासु स्वर्गमलकापुरीं पराभावयन्।[१९]

भारतीये स्थापत्ये आचार्यद्वयोः (मयविश्वकर्मणोः) सम्बन्धे विदुषां विमतैक्यं प्रतीयते। अधिकांशत उत्तरीयपरम्पराया मयश्च दक्षिणीयपरम्परायाः प्रतिनिधिरासीत्। किन्तु केषाञ्चित् कोविदानां मतानुसारं समस्तभारतवर्षे वास्तुकलाया द्विधा भिन्ना भिन्ना परम्परा न भवति किन्तु एकैव परम्परा प्रचलिता प्रसिद्धासीत्। एतद्विषये प्रो.सी. लाल महोदयस्य, डॉ.पी.कुमार महोदयस्य चाभिधानमस्ति यद् भारतीयवास्तुकलाया आर्यानार्यावर्गयोर्वास्तविक-स्वरूपस्याप्रतिपत्तेः परिणामोऽस्ति। द्राविडस्य प्रपञ्चस्तु डॉ. ग्रियर्सन नाम्ना पाश्चात्यविदुषा भारतवर्षे विभाजनबीजान्युप्तुं विरचितोऽभवत्। अनेन स्वमतं पोषयितुं रामायणवर्णिताया लङ्कापुर्या भवनानामुल्लेखो विहितोऽस्ति, या आदिकविना विश्वकर्मणा निर्मितां प्रदर्श्य एतदपि लिखितं यद् रावणस्य नगरी मयद्वारा निर्मिता इव प्रतीयते। इत्थं विज्ञायते यद् विश्वकर्मा उत्तरभारतीयसंस्कृतेस्तथा वास्तुकलाया आचार्यः कथ्यते, स लङ्कापुर्या अपि निर्माताभवत्। एषां त्रयाणां स्थानानां वास्तुकलायां साम्यमस्ति। एतस्मात् स्पष्टमेतत् वर्तते यद् भारतीयवास्तुकलायां नैव परम्पराद्वयमासीत्, न च बह्वीनां शैलीनां प्रचलनमभवत्। नासीच्च विश्वकर्मा उत्तरभारतीयपरम्पराया मयश्च दक्षिणपरम्परायाः प्रतिनिधिः। यदि विश्वकर्मा पृथग्रूपेणोत्तरीयायाः परम्परायाः प्रतिनिधिर्मन्यते तर्हि तेन निर्मितलङ्कानगर्या निर्माणविषये सङ्गतिर्नैव जायते। परन्त्वत्र वाल्मीकिर्विश्वकर्माणं लङ्कापुर्यां निर्मातारं दर्शयित्वा पुनरिदं कथनीयं यद् रावणस्य नगर्या भवनानि मयेन निर्मितानीव प्रतीतान्यभवन्। अतो यत्र विश्वकर्मणः स्थापत्यपरम्पराया विस्तारः संसूच्यते, तत्र विश्वकर्मणो मयस्य चोभयोः पृथक्

---

१९ म.पु.अ.१२९.४०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तया द्वयोरेकैव परम्परा भवेत्तर्हि वाल्मीकिना स्पष्टतयाभ्यधायि यद् लङ्कापुर्या निर्माणं विश्वकर्मणा व्यधायि। अत्र तस्य कथनस्य काप्यवश्यका नैव प्रतीयते यद् रावणस्य नगर्या भवनानि मयेन निर्मितानि प्रतीतान्यभवन्। अतः सम्भवोऽस्ति यद् विश्वकर्मणा मयासुरस्य वास्तुशैली अनुकृता भवेत्। पं. भगवद्दत्तेन दैत्या असुरा वा अमितप्रज्ञा दर्शिताः सन्ति। तन्मतानुसारं मायायाम् अर्थात् ते विज्ञानकलायां विज्ञानक्षेत्रे वा अतीव योग्या निपुणा ज्ञानसम्पन्नाश्चासन्।

अन्ये वास्तुशास्त्रीया आचार्याः

पुराणादिषु प्राचीनेषु ग्रन्थेषु सङ्कलितानां वास्तुशास्त्रोपदेशकानां विस्तृतसूचिभि-र्वास्तुशास्त्रस्य परम्परायाः प्राचीनता स्वयमेव सिद्धा वर्तते। अत्र मत्स्यपुराणे, अग्निपुराणे, मानसारे, सनत्कुमारवास्तुशास्त्रे तथा विश्वकर्मवास्तुशास्त्रे प्रदत्तनामुल्लिखितानां वास्तुविद्याचार्याणामुल्लेखो विधीयते।

मत्स्यपुराणम्

| | | |
|---|---|---|
| (१) भृगुः | (२) अत्रिः | (३) वसिष्ठः |
| (४) विश्वकर्मा | (५) मयः | (६) नारदः |
| (७) नग्नजित् | (८) विशालाक्षः | (९)पुरन्दरः |
| (१०) ब्रह्मा | (११) कुमारः | (१२)नन्दीशः |
| (१३)शौनकः | (१४) गर्गः | (१५) वासुदेवः |
| (१६)अनिरुद्धः | (१७) शुक्रः | (१८) बृहस्पतिः |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सिष्ठश्च विश्वकर्मा मयस्तथा।

नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः।।

ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।

वासुदेवोऽनिरुद्धश्च तथा शुक्रो बृहस्पतिः।।

अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः।।

मत्स्य. २५२.२-८

अग्निपुराणम्

अग्निपुराणे इतोऽप्यधिका विस्तृता सूचिः प्रदत्तास्ति, यस्यां पञ्चाशदाचार्याणां परिगणनं विधीयते।

| | |
|---|---|
| (१) हयशीर्षः (हयशीर्ष-तन्त्रे) | (२)त्रिलोकमोहनः (त्रैलोक्यमोहनतन्त्रे) |
| (३)विभवः (वैभवतन्त्रे) | (४) पुष्करः (पौष्करतन्त्रे) |
| (५) प्रह्लादः (प्रह्लाद-तन्त्रे) | (६) गर्गः (गार्ग्यतन्त्रे) |
| (७) गालवः | (८) नारदः (नारदतन्त्रे) |
| (९) सम्प्रश्नः | (१०) शाण्डिल्यः (शाण्डिल्यतन्त्रे) |
| (११) विश्वकः (वैश्वकतन्त्रे) | (१२) सत्यः (सत्यतन्त्रः) |
| (१३) शुनकः (शौनकतन्त्रे) | (१४) वशिष्ठः (वाशिष्ठतन्त्रे) |
| (१५) ज्ञानसागरः | (१६) शम्भुः (स्वायम्भुतन्त्रे) |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(१८) तार्क्ष्यः

(१९) नारायणः (नारायणिकातन्त्रे) (२०) अत्रि (आत्रेयतन्त्रे)

(२१) नरसिंहः (नरसिंहतन्त्रे) आनन्दः (२२) आनन्दः

(२३) अरुणः (अरुणतन्त्रे) (२४) बौद्धायनः

(२५) ऋषिः (आर्षेयतन्त्रे)

व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्यया।
हयशीर्ष तन्त्रभावं तन्त्रं त्रैलोक्यमोहनम्।।
वैभवं पौष्करं तन्त्रं प्रह्लादङ्गार्ग्यगालवम्।
नारदीयञ्च सम्प्रश्नं शाण्डिल्यं वैश्वकं तथा।।
सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरम्।
स्वायम्भुवं कापिलञ्च तार्क्षं नारायणीयकम्।।
आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम्।
बौधायनं तथार्षं तु विश्वोक्तं तस्य सारतः।।

अ.पु.३९.२-५

बृहत्संहितायाम्[२०]

२० भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.२५ (बृहत्संहिता, अ.५३ तथा ५७)

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

३) पराशरः। (४) कश्यपः। (५) विश्वकर्मा। (६) मयः (७) मनुः। इत्यादीनां नामानि सूच्यन्ते।

मानसारः

मानसारे वास्तुशास्त्रीये वास्तुविद्याचार्याणां सूचिरतिविस्तृता प्राप्यते। अस्मिन् द्वात्रिंशदाचार्याणां परिगणना क्रियते। येषां नामानि निम्नाङ्किंतानि सन्ति। यथा- (१) विश्वकर्मा। (२) विश्वेशः। (३) विश्वसारः। (४) प्रबोधकः। (५) वृत्तः। (६) मयः (७) त्वष्टा। (८) मनुः । (९) नलः। (१०) मानवित्। (११) मानकल्पः। (१२) मानसारः। (१३) प्रष्टा (१४) मानबोधः। (१५) विश्वबोधः। (१६) नयः। (१७) आदिसारः। (१८) विशालः। (१९) विश्वकश्यपः। (२०) वास्तुबोधः। (२१) महातंत्रः। (२२) वास्तुविद्यापतिः। (२३) पाराशरीयकः। (२४) कालयूपः। (२५) चैत्यः। (२६) चित्रकः। (२७) आवर्यः। (२८) साधकसारसहितः। (२९) भानुः। (३०) इन्द्रः। (३१) लोकज्ञः। (३२) सौरः।

यथा मानसारे श्लोकाः

विश्वकर्मा च विश्वेशो विश्वसारः प्रबोधकः।

वृत्तश्चैव मयश्चैव त्वष्टा चैव मनुर्नलः।।

मानविन्मानकल्पश्च मानसारो बहुश्रुतः।

प्रष्टा च मानबोधश्च विश्वबोधो ना (न) यश्च तथा।।

आदिसारो विशालश्च विश्वकाश्यप ए(श्चै) व च।

वास्तुबोधो महातन्त्रो वास्तुविद्यापतिस्तथा।।

पाराशरीयकश्चैव कालयूपो महाऋषिः (हर्षिश्च)।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

चित्रकः आ(श्चा) वर्यः साधकसारसंहितः।।

भानुश्चेन्द्रश्च लोकज्ञः सौराख्यः शिल्पिवित्तमः।

तदेव (ते एव) ऋषयः प्रोक्ता द्वात्रिंशत् संख्यया।।

मानसारः ६८.५.९.

सनत्कुमारवास्तुशास्त्रे[२१]

(१)ब्रह्मा। (२) इन्द्रः। (३) यमः। (४) भार्गवः। (५) अङ्गिरसः। (६) गौतमः। (७) गार्ग्यः (८) मनुः। (९) व्यासः। (१०) भृगुः। (११) विश्वकर्मा। वास्तुशास्त्रीयग्रन्थेषु उपर्युक्तानि नामानि प्राप्यन्ते।

विश्वकर्मवास्तुशास्त्रे

अगस्त्यः, नन्दी, नारदः, बृहस्पतिः, तिम्यलोकः, काश्यपः, लोकदर्शकः, कात्यायनः, मरीचिः, चित्रतोयकः, पालकाप्यः, पुण्डरीकः, दीर्घदर्शी, पुनर्वसुः, योगसारादि।

अगस्त्यो भगवान्नन्दी नारदश्च महामुनिः।

बृहस्पतिस्तिम्यलोकः काश्यपो लोकदर्शकः।।

कात्यायनः पुण्डरीको दीर्घदर्शी पुनर्वसुः।

योगसारो महातेजा ये चान्ये मुनिपुङ्गवाः।।

विश्वकर्मवा.शा. १८

21 भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.२६ (वास्तुशास्त्र, भाग १, हिन्दू साइन्स् ऑफ् आर्किटेक्चर, पृ.६४)

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ग्रन्थे पृथक् पृथग् वास्तुविद्याचार्याणामुपदेशकानां नामानि प्रदीयन्ते। इतोप्यधिकं डॉ.शुक्लमहाभागेन प्राचीनवास्तुशास्त्रोपदेष्टृणां विवरणं प्रदीयमानेन तन्निर्मितेषु केषुचित् वास्तुशास्त्रीयग्रन्थेषु तदनुरूपं वर्णनं प्राप्यते।[२२]

रूपमण्डने प्राप्तलेखानुसारं मत्स्यपुराणस्य सूचेरपेक्षया अग्निपुराणस्य मानसारस्य च सूचयो भ्रष्टाः काल्पनिकास्तथा एतासु पुनरूक्तिदोषाश्च सन्ति। एतेषु आचार्येषु केचित् ज्ञानविज्ञानयोरधिष्ठातारो देवाः, केचिद् वैदिकाः, पौराणिका ऋषयः, केचिदसुराः, केचित् सामान्याः शिल्पज्ञा आचार्याः सन्ति। एतत्कथनस्य लक्ष्यं वर्तते। देव-ऋष्यादीनां नामद्वारा वास्तुशास्त्रस्यापौरुषेयत्वस्य सिद्धीकरणमस्ति।[२३].

वास्तुपुरुषः

वास्तुपुरुषः कोऽस्ति इति विषये एका आख्यायिकास्माकं शास्त्रेषु वर्तते यत् भगवतो ब्रह्मणो द्वौ मानसपुत्रावास्ताम् । एको महर्षिर्नारद एवं द्वितीयो वास्तुपरुषः । महर्षिर्नारदः सात्विक एवं वास्तुपुरुषस्तामसगुणयुक्त आसीत् ।देवानां कृते त्रासदायक एवञ्च भयजनकः आसीत् । सर्वे देवास्त्रस्ता भूत्वा ब्रह्माणं प्रति जग्मुः । ब्रह्मापि तेषां वृत्तात्तं श्रुत्वा उपायमकथयत् ï यदहमपि त्रस्तोऽस्मि। अतो भवद्भ्यो रोचते तदेव कुरुत ।इति श्रुत्वा सर्वे देवा प्रत्यागताः ।

एकदा स वास्तुपुरुष एकाकी स्वर्गे स्वस्थाने उपाविशत्। तदा सर्वे देवाः सम्मिल्य तं वास्तुपुरुषं स्वर्गाद् बहिः पृथ्वीं प्रति दूरीकृतवन्तः स्थिताः। तदा स वास्तुपुरुषः स्वर्गाद् बहिर्मृत्युलोकं प्राप्याधोमुखोऽपतत् ।तस्य शिर ऐशान्याम् एवं पादौ नैऋत्यकोण आस्ताम् । तदनन्तरं तेन वास्तुपुरुषेण स्वपितरं प्रार्थना कृता यदहं बहिर्निष्कासितः ।किन्तु मया कुत्र वासः कर्तव्यः। एवं किं मम भोजनम् ? तदा शक्रादिदेवैर्वरः प्रदत्तो यत् ï यत्र यत्र नूतनगृह

२२ वास्तुशास्त्र.भा.१.हिन्दु साइन्स ओफ आर्किटेक्चर.पृ.३.
२३ रूपमण्डनम् देवतामूर्ति.प्र.भू.पृ.१०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

, तत्राग्निकोणे ईशानकोणे वा तव वासो भविष्यति। एवं तत्र होमकार्ये यद्यद्द्रव्याहुतिर्भविष्यति तदन्नं तव भोजनं भविष्यति । तदारभ्य अद्यावधि मृत्युलोके वास्तुपूजनं भवति वास्तुपूजनात् नूतनगृहादिस्थाने निवसतां जनानां सुख-शान्ति-सम्पत्तिप्राप्तिर्भवति ।

वास्तुशास्त्रस्येतिहासः

साहित्याधारेण तथा पुरातात्त्विकाधारेण भारतीयवास्तुकलाया इतिहासस्त्रिषूपखण्डेषु विभज्यते।

(१)वैदिकवाङ्मयम् (२) सैन्धवस्थापत्यम् (३) लौकिकं साहित्यम् ।

लौकिकसाहित्यान्तवर्तिनः स्थापत्यग्रन्थाः स्थापत्यविशेषाः कथ्यन्ते। वैदिकसाहित्येन कतिपयलौकिकसाहित्येन च सम्बन्धिनो ग्रन्था अस्थापत्यविशेषाः कथ्यन्ते। कथमत्र यत्र-तत्र प्रसङ्गवशात् स्थापत्यकलाया उल्लेखः कृतोऽस्ति।[२४]

वैदिकवाङ्मयम्

वैदिकवाङ्गमयमेकं विशालं वाङ्मयमस्ति, यत्र संहिता, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदः, वेदाङ्गानि, सूत्रादीनि च समाविश्यन्ते। यत् स्थापत्यस्य विविधान्यङ्गानि सम्यक्तया प्रकाशयति। संहिताश्चतस्रः सन्ति, ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। एतेषु चतुःषु वेदेषु विद्यमानविषयान् स्पष्टयितुं पुरातनकाले ऋषिभिः पृथक्-पृथक् शास्त्राणि विरच्य

२४ भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.३२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

यतो हि वैदिकवाङ्मयं विशालसाहित्यभण्डारः सञ्जातः। केचिद् विद्वांसोऽथर्ववेदस्योपवेद- रूपेणाथर्ववेदादतिरिक्तं स्थापत्यवेदमपि स्वीकुर्वन्ति। यत् स्थापत्यकलायाः प्राचीनत्वेन सह तस्य माहात्म्यं द्योतयति।

वैदिकसंहितासु वास्तुशास्त्रम्

वेदेष्वपि वास्तुशास्त्रविषयका विविधा विषया मन्त्रेषु विविधस्थानेषु दृष्टिपथमायान्ति ।ते च प्राचीनमहर्षीणां तद्विषयकज्ञानस्य द्योतका एव दरीदृश्यन्ते ।वैदिकवाङ्मये उपवेदेषु आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, स्थापत्यवेदः अर्थात् शिल्पवेदस्य महती चर्चा दृश्यते ।शिल्पशास्त्रमेव क्रमशो विकासं प्राप्य वास्तुशास्त्ररूपेण प्रसिद्धिं प्राप्तम् । संहिताब्राह्मणारण्यकोपनिषद्रूपस्य वैदिकवाङ्मयस्य परम्परया विकसितमेतच्छास्त्रमद्यापि अधुनातनवैज्ञानिकानां कृते आश्चर्यं जनयति । ऋग्वेदे विविधमण्डलस्य नानाविधसूक्तेषु नैकेषु वास्तु-वास्तव्य-शब्दानां स्पष्टतयोल्लेखा दरिदृश्यन्ते ।ते केचन मन्त्रा यथा-

नपाता शवसो.....वास्तु – अधि क्षितः ।[२५]

ता वां वास्तून्युष्मसि गमध्यै ।[२६]

नमो वास्तव्याय च वास्तुपाय च।[२७]

वास्तोष्पतिदेवतायाः स्तुतिपरं सूक्तमेकं (७.५४.१-३) मन्त्रत्रयसंयुतं संप्राप्यते ï

वास्तोष्पते प्रति जानीह्यस्मानत्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।।

---

२५ ऋग्वेदः ८,२५,५
२६ ऋग्वेदः १,१५४,६
२७ शु,यजु,१६,३९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

गो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।

अजरास: सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ।।

वास्तोष्पते शग्मया संसदा ते सक्षीमहिरण्यवा गातुमत्या ।

पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभि: सदान: ।।

सप्तमे मण्डलेऽतोऽन्तरसूक्तेऽपि प्रथममन्त्रे तथा चाष्टमण्डले मन्त्र एकस्मिन् वास्तोष्पतिदेवता पुन: स्तूयते यथा ï

अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् ।

सखा सुशेव एधि न: ।। ऋग्वेद: ७.५५.१

वास्तोष्पते ध्रुवा स्थूणाऽसत्रं सोम्यानाम् ।

द्रप्सो मेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ।।

ऋग्वेद:८.१७.१४

अयं वास्तोष्पते इति ऋग्वेदे सप्तममण्डले चतु:पञ्चाशत्तमे सूक्ते प्रथमो मन्त्र: । तैत्तिरीयसंहितायामपि (३.४.१०.१) मन्त्रोऽयं प्राप्यते ।अस्य मैत्रावरुणिर्वसिष्ठ ऋषि:। त्रिष्टुप् छन्द: ।वास्तोष्पतिर्देवता ।

अत्र वास्तुशब्द: समायाति ।अथ किं नाम वास्तु ? इत्यत्र व्याकरणदृष्ट्या वस् धातो: प्रयोगो वर्तते ।वास इत्यर्थबोधे वास्तुशब्दो वर्तते ।

सर्वेषामस्माकं जीवने वास्तोरतीव महत्त्वम् । वैदिका ऋषयोऽपि तस्य महत्त्वं तदधिष्ठातृदेवताया वास्तोष्पतेर्महत्त्वं सुष्ठुतया जानन्ति स्म । अत एव सूक्तेऽस्मिन्

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

हितानां सर्वेषामारोग्यार्थं क्षेमप्राप्तये च वसिष्ठ-ऋषिणा मन्त्रात्रेषु स्तूयते । वास्तुपूजन वास्तुशान्तिकर्मणि च प्रयुज्यमाना एते मन्त्रा वास्तुप्रसन्नतापादकाः सन्तः सर्वेषां कृतेऽतीवमहत्त्वपूर्णाः।

अथर्ववेदे वास्तुविद्याया अपेक्षाकृतमधिकं ज्ञानं प्राप्यते । अथर्ववेदे वास्तुशास्त्रीयशब्दानां प्रयोगा लभ्यन्ते । यथा ï वंशा (BEAM) स्थूणादिः। अथर्ववेदस्य शालानिर्माणसूक्तं महत्वपूर्णं वर्तते ।[२८]

ऋग्वेदकालत आरभ्य वास्तुविद्याया विकासक्रमस्याविच्छिन्नरूपरेखा द्रष्टुं शक्यतेऽत्र। भवननिर्माणे जलवायुविद्युतोषधिवृक्षाणामप्यवधानं विशेषेण क्रियते यथा ऋग्वेदे कथितम् ï

तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधिर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः ।

ऋग्वेदः-७.५३.२

जलपूत्यर्थं कूपस्य खननं जलसिञ्चनमपि ऋग्वेदे वर्णितम् । यथा

इष्कृताहावमवतं सुवरत्रं सुषेचनम् ।
उद्रिणं सिञ्चे अक्षितम् ।

ऋग्वेदः -१०.१०१.६

वेदेषु वर्णितं रथशास्त्रमपि वास्तुशास्त्रस्येकं महत्त्वपूर्णमङ्गम्। (ऋग्वेदे-७.३.३.९ १.३८.१२,१०.६३.१०)

---

२८ अथर्ववेदः,का-३, सू, १२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दुर्गे दुरोणे कृत्वा न यातां पुरु सहस्रा शर्वा नि बर्हीत् ।

ऋ.४.२८.३

अपरस्मिन् मन्त्रे शस्त्रसुसज्जितानां लोहस्वर्णसंयुक्तानामायसीनगराणां निर्माणमपि वेदेन कथितम् ï

पुरः कृणुध्वमायासीरधृष्टा

मा वः सुस्रोच्चमसोदृंहता तम् ।। ऋग्वेदः -१०.१०१.८

ऋग्वेदे गृहस्य पर्य्यायरूपेण पुरस्य प्रयोगो दृश्यते। (ऋ.वे.१.५.३.७,५८.८,३.१५.४) तत्रापि कुत्रचित् दुर्गपर्य्यायरूपेण पुरस्य प्रयोगः दृष्टिपथमायाति। शतप्राकारस्य पुरस्य महापुरस्य प्रयोगो प्राचीनभारतीयदुर्गनिर्माणकौशलस्य स्वाक्षरं वहति। (ऋ.वे.१.१६६.८, ७.१५.१४,- तै.सं,६.२.३.१,ऐ.ब्रा.१.३२.२) कुत्रचित् पुरमिदं प्रस्तरमयं बहुषु स्थलेषु दारुमयं पुरं निर्मितम्। ऋग्वेदे अश्ममय्याः पुरोऽर्थः सामान्यतः प्रस्तरमयत्वेन सूच्यते। परन्तु Macdonell, Keith च तस्य इष्टकामयत्वम् (Sundried bricks) इत्यर्थं समर्थयतः।[२१]

साङ्केतिकरूपेण वैदिककाले गृहनिर्माणस्य सूचना लभ्यते। गृहं दमो वा गृहस्य पर्य्यायौ। गृहस्य पक्षाः पार्श्वाभिधायकाः। गृहप्रवेशार्थं द्वारं निर्मितम्। द्वारस्य संस्थानं (frame work) आतृरूपेण परिचितम् ।

शतभुजायुक्तानां नगराणामुल्लेखोऽपि ऋग्वेदे ï

---

२१ A.A.Macdonell,A.B.Keith,Vedic Index of Names and Subjects,Vol.1,London,1912,p.538.

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भिस्तमभिह्रुतरेधात्

पूर्भि: रक्षता मरुतो यमावत ।ऋग्वेद: — १.१६६.८

वास्तुनिर्देशका बहव: शब्दा: गृह - गेह ï दम ï दुर्य ï दुरोण ï दुर्योण ï क्षय ï धामन् ï पस्त्या ï सदन - शाला ï हर्म्य ï छर्दि ï अयातन ï ओकस् ï इत्यादयो वेदेषु प्रयुज्यमाना दरीदृश्यन्ते ।तेषामुदाहरणानि यथा ï

बृहन्तं मानं वरुण स्वधाव:

सहस्रद्वारं जगामा गृहं ते ।ऋग्वेद: ७.८८.५

गृहानेमि मनसा मोदमान: ।शु.यजु.३.४१

गेहाय - शु. यजु. ३०.९

गेह्याय - शु.यजु.१६.४४

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।

वर्धमानं स्वे दमे ।।शु. यजु. ३.२३

प्रजावतीषु दुर्यासु दुर्य ।ऋग्वेद: ७.१.११

या ते धामानि हविषा यजन्ति.....

अवीरहा प्रचरा सोम दुर्यान् ।।शु.यजु.४.३७

निदुर्योण आवृणङ्मृघ्रवाच: ।ऋग्वेद: ५.२९.१०

रेवती रमध्वम् ।अस्मिन्योनावस्मिन् गोष्ठेऽस्मिन्क्षये ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शु.यजु.३.२२

विश्वान्यभि धामानि - शु.यजु.३.२२

निषसाद धृतव्रतो वरुणः पस्त्या ३ स्वा ।

साम्राज्याय सुक्रतुः ।। ऋग्वेदः १.२५.१०

ये ह्यर्म्येष्ठा शिशवो न शुभ्राः । ऋग्वेदः.७.५३.१६

प्रनोयच्छतादवृकं पृथुच्छर्दिः । ऋग्वेदः १.४८.१५

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मि -

न्नायतने प्रजया पशुभिर्भूयात् ।। शु.यजु.५.२८

ऋग्वेदे वास्तुविद्यायाः प्रवर्तकत्वेन अगस्तस्य तथा वशिष्ठ- ऋर्षेरुल्लेखो दृश्यते । ऋभूणामश्विनौ-देवतयोश्च वास्तुविद्यासम्बन्धो दरीदृश्यते।

अथर्ववेदे गृहनिर्माणस्य उपमितां परिमितामिति शब्दयोः प्रयोगो वर्णितो दृश्यते ।

उपमितां प्रतिमितामथो परिमितामुत ।

शालाया विश्ववाराया नद्धानि विचृतामसि ।।

अथर्ववेदः ९.३.१

हविर्धानमग्निशालं पत्नीनां सदनं सदः ।

सदो देवानामसि देवि शाले ।। अर्थववेदः ९.३.७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

धारेण Zimmer[30] गृहनिर्माणस्य सामान्यपद्धतिं परिचाययति। साधारणतया चत्वारः स्तम्भा भित्तेरुपरि निर्मिताः। ते उपमित् इति नाम्ना परिचिताः। स्तम्भोपरि वेश्मस्थूणाः (beams) स्थाप्यन्ते। ते प्रतिमितः सन्ति। ततः स्तम्भसंयोजनार्थं वेश्मस्थूणाः (cross-beams) परिमिता वर्द्धयन्ते। तत उच्छ्रायोपरि (ridge) पञ्जर (ribbing) रूपेण बद्धा वंशा (bamboos) विषुवन्तो भवन्ति। ततस्तृणपटलेन गृहाच्छादनं भवति। प्राकारस्य येन तृणपटलेनाच्छादनं भवति तस्य पलद इति नाम ज्ञायते। वैदिकयुगादेव वेदिकानिर्माणं यज्ञकुण्डनिर्माणत आरभ्य अद्यावधि भव्यप्रासादनिर्माण पर्यन्तं इयं परम्परा अक्षुण्णा दृश्यते । अथर्ववेदे गमनागमनयुक्ता चक्रधु परिणद्धायाः शालाया वर्णनमपि प्राप्यते । या हस्तिनीव पद्वतिर्वर्तते ।

तृणैरावृता पलदान् वसाना

रात्रीव शाला जगतो निवेशनी।

मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वतिः ।

अथर्ववेदः -९.३.१७

अथर्ववेदे कक्षस्यान्तर्भागेषु बहुमूल्यवस्तुसंग्रहार्थं संग्रहकक्षं कोशगृहं चापि वर्णितम् ï

कुलायेऽधि कुलायं कोशे कोशः समुब्जितः।

अथर्ववेदः – ९.३.२०

तत्र नानाकक्षयुतानां द्विपक्षा चतुष्पदादीनां शालानां विवरणं प्राप्यते ।

अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निगर्भ इवाशये ।

---

30 H.Zimmer,Altindisches Leben,p.153quoted in The Cultural Heritage of India,Vol.VI,Ramkrishna Misson Institute of Culture,Calcutta,1991.

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

अथर्ववेद: – ९.३.२१

शालायां पुष्पिणीर्दूर्वा जलस्योत्स: पुण्डरीकवान् ह्रदो भवति यथा ï

आयने ते परायणे दूर्वा रोहतु पुष्पिणी:।

उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान् ।।

अथर्ववेदे -६.१०६.१

भवनानां निर्माणं जलप्रपातस्य समुद्रस्य समीपे वा तडागस्य मध्येऽपि भवति यथाï

अपामिदं न्ययनं समुद्रस्य निवेशनम् ।

मध्ये ह्रदस्य नो गृहा: पराचीना मुखा कृधि ।।

अथर्ववेद: ६.१०६.२

भवनं हिमेन शीतलं भवितव्यम् । भवने हिमस्य वेष्टनं व्यापनं वा शीतगृहाणां निर्माणज्ञानं प्रकटयति ।

हिमस्य त्वा जरायुणा शाले परिव्ययामसि ।

शीतह्रदा हि नो भुवोऽनिष्कृणोतु भेषजम् ।।

अथर्ववेद: -६.१०६.३

एतेन सिध्यति यदथर्ववेदे उच्चवास्तुविज्ञानं निहितमस्ति।

तैत्तिरीयसंहितायामयस्मयी रजताहरिणी नगरीणामुल्लेखो विद्यते। (तै.सं.६.२.३) तत्र काम्पीलायोध्ये नगर्यौ नाम्नी प्राप्येते। तैत्तिरीयारण्यके शतद्वारं शताट्टारं शतरथ्यायुक्तं नगरं

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...धानब्राह्मणे नगरनिगमग्रामगोष्ठागारा उल्लिखिताः। (सा.ब्रा.२.४.२) शतपथब्राह्मणे कौशाम्बिपरिचक्रे नाम्नि नगर्यां वर्णिते। (श.ब्रा.१३.५.४७, १२.२.२.१३) एतस्मिन् ब्राह्मणे कथितं यदुत्तरमुखीयानि भवनानि भवितव्यानि तेषु उत्तरदिशि पादौ कृत्वा शयनीयम्। (श.ब्रा.३.१.१.७) छान्दोग्योपनिषदि आवसथ सभावेश्मादिनां विशालभवनानां विवरणं प्राप्यते। (छा.उ.४.१.१, ८.१४.१) सेतुवर्णनपि अत्र प्राप्यते। (छा.उ.८.४.२) एतेन प्रतीयते यन्नदीषु सेतुनिर्माणप्रक्रिया विकसितासीत्। ऋग्वेदीयब्राह्मणेषु आवाससम्बन्धिनी विस्तृता शब्दावली प्राप्यते यथा ï आगरायतनोक - स्क्षयगृहदुरोणदुर्याधामयोनिवेश्मशाला शर्मसदस् सदनानि च। (कौ.ब्रा.१७.८, १२.५, ८.१, २३.५, २६.१७, ३.२, ४.७, १२.१२,२२.४, ऐ.ब्रा.२५.३, २९.१, ४०.३,) कौषीतकि-उपनिषदि काशीनगरी वर्णिता। (कौ.उ.४.१) वेदाङ्गेषु नगरनगरीनगरचतुष्पथनगर-निवासिनगराधिपत्यपुरग्रामनिवेशनादिनागरिकशब्दावली प्राचुर्येण प्राप्यते। (पाग.४.२.९५, वै.ध.३.१५.११, अप.६४.४.७) एतेन वास्तुकलाया विकासः परिलक्षितो भवति।

अथर्ववेदीयवास्तुसूत्रोपनिषदि स्थापत्यकलाया विवरणं प्राप्यते। तत्र षट् प्रकाराणां शिलानामुल्लेखः, यथा ï हिरण्यरेखिका,समवर्णा, ताम्रा, धातुपटिता, वज्रलब्धा, सैकता, लिकेति ।एतेषु षटषु प्रकारेषु समवर्णाशिला प्रतिमानिर्माणकार्ये समुचिता उच्यते।

संहितानुशीलनेन विज्ञायते यत् तत्कालीनः समाजः सम्पूर्णतया सुसंस्कृतोऽभवत्, तेन जीवनं सुखयुक्तं, समृद्धञ्च विधातुं गृहनिर्माणकलाया विकासो विहितः।

गृहम्

संहितासु सर्वप्रथमः ऋग्वेदः समागच्छति। ऋग्वेदे गृहशब्दः निवासस्य सदनस्याः वार्थे प्रयुक्तोऽसि । शब्दोऽयं अथर्ववेदे ब्राह्मणग्रन्थेषु चापि प्रयोजितोऽस्ति। गृहस्य कृते

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सन्ति। यथा - गयः, धामन्, दमः, सदस्, सदनम्, आयतनम्, क्षयः, ओकस्, निवेशन, वेश्म-आदयः शब्दा लभ्यन्ते।[31]

सुरणं गृहे ते, ऋग्वेदः ३.५३.६

दाशुषो गृहे, ऋग्वेदः, ४.४९.६. ८.१०.१.

ऐतरेयब्राह्मणम्, ८.२१

ऋग्वेदे वास्तोष्पतिशब्दस्योल्लेखो विहितोऽस्ति। वास्तोष्पतिशब्दस्य शाब्दिकार्थोऽस्ति ï वास्तोः (गृहस्य) पतिः (स्वामी)। विद्वद्भिः शब्दस्यास्य व्याख्या स्वकीयैः प्रकारैः कृतास्ति। कोशग्रन्थेष्वस्यार्थो इन्द्र इति दर्शितोऽस्ति। डॉ.शुक्लमहोदयेन[32] वास्तोष्पतेरर्थो भवनस्थलस्याराध्यदेवस्तथा गङ्गाप्रसाद उपाध्यायमहाभागेन[33] ईश्वरः प्रधानः शिल्पी च कृतोऽस्ति, येन गृहनिवासिनां द्विपदानां चतुष्पदानां कृते सुखसौभाग्यादीनां प्रार्थना विहितास्ति। महर्षिदयानन्देनास्यार्थो गृहनिवासी मुख्यव्यक्तिः गृहरक्षको वा कृतोऽस्ति।[34] अस्मदीयदृष्ट्या वास्तोपतेः शब्दार्थो ईश्वर एव सङ्गतार्थः प्रतीयते। स ब्रह्माण्डरूपिणो विश्वस्याधिष्ठाता स्वामी वर्तते। (ऋग्वेद. १०.५४.१.३-१०.५५.१)

ऋग्वेदसंहितायां प्रकारस्यास्य गृहनिर्माणस्य निर्देशाः प्राप्यन्ते यत्र दिवाकरस्य किरणानि बहुशः समायातानि।

तां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः। (ऋ.१.१५४.६)

---

३१ प्राचीन भारतीय कला एवं वास्तु, पृ.४७
३२ वास्तुशास्त्र, भाग १, हिन्दू साइन्स् ऑफ् आर्किटेक्चर, पृ.६८, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.३३
३३ वैदिक संस्कृति, पृ.१०५ एवं १६५, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.३३

३४ ऋग्वेद, १०.५४.१-३ तथा १०.५५.१ हिन्दी भाष्य, पृ.९०९-११, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.३३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...लानां गृहाणां वा मुखानि पूर्वदिशां प्रत्यासन्। डो. अग्रवालमहोदयः शतपथब्राह्मणमुद्हरन् गृहाभिमुखस्य सम्बन्धे विलिखति यद् देवेभ्यः पूर्वस्यां पश्चिमायां वा विन्यासोऽधिकरुचिकर आसीत्। मनुष्याणां चोत्तरस्यां दक्षिणस्यां वा विन्यासः स्वीकार्योऽभवत्। गृहाणां चोत्तरस्यां दक्षिणस्यां वा विन्यासे तेषां प्रायः पूर्वस्यामेव दिशि हि मुखानि भवन्ति।[३५]

प्राचीनवंशं हविर्धानमेतद्वै देवानां निष्केवल्यं

यत् हविर्धानं उदीची वै मनुष्याणां दिक्।

श.ब्रा.३.६.१.२३

अथर्ववेदे द्वे शालासूक्ते स्तः। यद् वर्णनं शालाया गृहनिर्माणस्य वा विवरणदृष्ट्याधिकं महत्त्वपूर्णमस्ति। अनेन वैदिकयुगस्य गृहाणामेकं सुन्दरं स्पष्टं च चित्रमस्माकं समक्षमुपस्थितं भवति। तस्मिन् युगे शालाया विषये वैदिकी भावनाधिकोन्नतासीत्। तृतीयसूक्ते प्रथममन्त्रे गृहनिर्माणं निदर्शयन् कथितं यदेवं गृहनिर्माणं प्रकर्तव्यम्। द्वाराणि सर्वाणि समानानि भवेयुस्तथा कोणानां कक्षानां च समक्षं भवेत्। सा शाला परितश्चतुरस्रस्वरूपा तथा तस्या द्वाराणि चतुर्दिशासु समीरग्रहणानुकूलानि, सुदृढबन्धनान्वितानि च स्युः। अथर्ववेदे गृहसम्बन्धिवर्णनेनानेन स्पष्टमस्ति यत् तत्काले गृहनिर्माणं प्रमाणानुसारं जायमानमासीत्। एतदवसर एव एकत्रोदीरितमस्ति यत् शाले त्वमस्मदर्थे ध्रुवा भव।

इहैव ध्रुवा प्रति तिष्ठ शालेऽ
अश्वावती गोमती सूनृतावती।
ऊर्जस्वती पयस्वत्युच्छ्रयस्व महते सौभगाय।

अथर्ववेदः. ३.१२.२

---

३५ भारतीय कला पृ.६०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…धजलादीनाञ्च समृद्धिः परिकीर्तितास्ति। वैदिकाः प्राचीनाचार्याः स्वस्य आजीविकायाः जीवनयापनस्य वा कृते कृषिपशुपालननिर्भरा अभवन्। अतस्तेषां शालायां पशूनां बृहती संख्यासीत्। तेषां शाला गवाश्वादिभिः परिपूर्णासीत्, घृतदुग्धादीनां वैपुल्यमभवत्। ते च दुग्धान्नादिभिः परिपूरितगृहद्वारा हर्षमन्वभवन्।

अथर्ववेदे चतुर्णां भेदानां प्रकोष्ठानामुल्लेखः प्राप्यते। वैदिकयुगे गृहेषु बहवः प्रकोष्ठा आसन्। तेषां भिन्नं भिन्नं प्रयोजनमभवत्। भिन्नप्रयोजनवतां प्रकोष्ठानां प्रमाणं वेदे निगदितम्।

हविर्धानमग्निशालं पत्नीनां सदनं सदः।

सदो देवानामसि देवि शाले।। अथर्व.९.३.७

मन्त्रानुसारं प्रकोष्ठानां प्रयोजनानुरूपं प्रथमे प्रकोष्ठे हविर्धान्यादीनां संग्रहोऽभवत्, द्वितीये प्रकोष्ठे गृहस्थिनो गार्हपत्याग्नेराधानं कुर्वन्तोऽभवन्, तृतीयप्रकोष्ठे पत्नीनां सदनम् अर्थात् स्त्रीणां कक्ष आसीत्। व्यतीते समये अन्तःपुरः सञ्ज्ञया विख्यातोऽभवत्। चतुर्थः कक्ष सदः अर्थात् सभायाः सदः सभासदनं वा आस्थान-मण्डप इत्यनयाभिधयाभिधीयते। वैदिकयुग एतेभ्यः कक्षेभ्योऽतिरिक्तं गवाश्वबलीवर्दादिपशूनां कृतेऽपि पृथक् स्थानमभवत्, यत्र तेषां सुचारूतया रक्षणपोषणादीनां व्यवस्थापनमभवत्।

वस्तुतो गृहं गृहस्वामिनो विश्वस्य केन्द्रं भवति। तस्य पुरश्चतुर्दिक्षु तस्य विचाराः परिभ्रमन्ति। अथर्ववेदे सामान्यात् कुटिरादारभ्य विशालभवनपर्यन्तं प्रत्येकेषां गृहाणामुल्लेखोऽस्ति। अत्र द्विपक्षा, चतुष्पक्षा, षट्पक्षा इत्यादीनां शालानां वर्णनमभवत्।

या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते।

अष्टपक्षा दशपक्षा शालां मानस्य पत्नीमग्निगर्भ इवाशये।।

अथर्व.९.३.२१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्भेऽपि वैदिकसाहित्ये दर्शितं यद् भवननिर्माणस्याधार: केवलं काष्ठं नासीत्, किन्तु मृत्तिका, इष्टिका, पाषाण:- आदयोप्यासन्। ऋग्वेदे सर्वशक्तिमन्तं परमेश्वरं वरुणं प्रार्थितं यद् मृन्मयं गृहमहं मा वसेयम्।

मोषु वरुण मृन्मयं गृहं राजन्नहं गमम्।

ऋ.७.८९.१

अथर्ववेदे पाषाणैर्निर्मितानां सदनानामुल्लखोऽस्ति। ï

अश्मवर्म मेऽसि.............अथर्व.५.१०.१.९७

अथर्ववेदस्य (३.१२,९.३) आधारेण Zimmer[36] गृहनिर्माणस्य सामान्यपद्धतिं परिचाययति। साधारणतया चत्वार: स्तम्भा भित्तेरुपरि निर्मिता:। ते उपमित् इति नाम्ना परिचिता:। स्तम्भोपरि वेश्मस्थूणा: (beams) स्थाप्यन्ते। ते प्रतिमित: सन्ति। तत: स्तम्भसंयोजनार्थं वेश्मस्थूणा: (cross-beams) परिमिता वर्द्धयन्ते। तत उच्छ्रायोपरि (ridge) पञ्जर(ribbing)रूपेण बद्धा वंशा (bamboos) विषुवन्तो भवन्ति। ततस्तृणपटलेन गृहाच्छादनं भवति। प्राकारस्य येन तृणपटलेनाच्छादनं भवति तस्य पलद इति नाम ज्ञायते। वैदिकयुगादेव वेदिकानिर्माणं यज्ञकुण्डनिर्माणत आरभ्य, अद्यावधि भव्यप्रासादनिर्माणपर्यन्तमियं परम्परा अक्षुण्णा दृश्यते । अथर्ववेदे गमनागमनयुक्ताया: परिणद्धाया: शालाया वर्णनमपि प्राप्यते । या हस्तिनीव पद्वतिर्वर्तते ।

तृणैरावृता पलदान् वसाना

रात्रीव शाला जगतो निवेशनी।

36 H.Zimmer,Altindisches Leben,p.153quoted in The Cultural Heritage of India,Vol.VI,Ramkrishna Misson Institute of Culture,Calcutta,1991.

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

व्यां तिष्ठसि हस्तिनीव पद्वती ।

अथर्ववेद: -९.३.१७

अथर्ववेदे कक्षस्यान्तर्भागेषु बहुमूल्यवस्तुसंग्रहार्थं संग्रहकक्षं कोशगृहं चापि वर्णितम् ï

कुलायेऽधि कुलायं कोशे कोश: समुब्जित:।

अथर्ववेद: – ९.३.२०

तत्र नानाकक्षयुतानां द्विपक्षा चतुष्पदादीनां शालानां विवरणं प्राप्यते ।

अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निगर्भ इवाशये ।

अथर्ववेद: – ९.३.२७

शालायां पुष्पिणीर्दूर्वा जलस्योत्स: पुण्डरीकवान् ह्रदो भवति यथा ï

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणी:।

उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान् ।।

अथर्ववेदे -६.१०६.१

भवनानां निर्माणं जलप्रपातस्य समुद्रस्य समीपे वा तडागस्य मध्येऽपि भवति यथाï

अपामिदं न्ययनं समुद्रस्य निवेशनम् ।

मध्ये ह्रदस्य नो गृहा: पराचीना मुखा कृधि ।।

अथर्ववेद: ६.१०६.२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवने हिमस्य वेष्टनं व्यापनं वा शीतगृहाणां निर्माणज्ञानं प्रकटयति ।

हिमस्य त्वा जरायुणा शाले परिव्ययामसि ।

शीतह्रदा हि नो भुवोऽनिष्कृणोतु भेषजम् ।।

अथर्ववेदः -६.१०६.३

एतेन सिध्यति यदथर्ववेदे उच्चवास्तुविज्ञानं निहितमस्ति।

तैत्तिरीयसंहितायामयस्मयी रजताहरिणी नगरीणामुल्लेखो विद्यते। (तै.सं.६.२.३) तत्र काम्पीलायोध्ये नगर्यौ नाम्नी प्राप्येते। तैत्तिरीयारण्यके शतद्वारं शताट्टारं शतरथ्यायुक्तं नगरं वर्णितम्। (तै.आ.१.३१.२) सामविधानब्राह्मणे नगरनिगमग्रामगोष्ठागारा उल्लिखिताः। (सा.ब्रा.२.४.२) शतपथब्राह्मणे कोशाम्बिपरिचक्रे नाम्नि नगर्यौ वर्णिते। (श.ब्रा.१३.५.४७, १२.२.२.१३) एतस्मिन् ब्राह्मणे कथितं यदुत्तरमुखीयानि भवनानि भवितव्यानि तेषु उत्तरदिशि पादौ कृत्वा शयनीयम्। (श.ब्रा.३.१.१.७) छान्दोग्योपनिषदि आवसथ सभावेश्मादिनां विशालभवनानां विवरणं प्राप्यते। (छा.उ.४.१.१, ८.१४.१) सेतुवर्णनपि अत्र प्राप्यते। (छा.उ.८.४.२) एतेन प्रतीयते यन्नदीषु सेतुनिर्माणप्रक्रिया विकसितासीत्। ऋग्वेदीयब्राह्मणेषु आवाससम्बन्धिनी विस्तृता शब्दावली प्राप्यते यथा ï आगरायतनोक - स्क्षयगृहदुरोणदुर्याधामयोनिवेश्मशाला शर्मसदस् सदनानि च। (कौ.ब्रा.१७.८, १२.५, ८.१, २३.५, २६.१७, ३.२, ४.७, १२.१२,२२.४, ऐ.ब्रा.२५.३, २९.१, ४०.३,) कौषीतकि-उपनिषदि काशीनगरी वर्णिता। (कौ.उ.४.१) वेदाङ्गेषु नगरनगरीनगरचतुष्पथनगर-निवासिनगराधिपत्यपुरग्रामनिवेशनादिनागरिकशब्दावली प्राचुर्येण प्राप्यते। (पाग.४.२.९५, वै.ध.३.१५.११, अप.६४.४.७) एतेन वास्तुकलाया विकासः परिलक्षितो भवति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पत्यकलाया विवरणं प्राप्यते। तत्र षट् प्रकाराणां शिलानामुल्लेखः, यथा ï हिरण्यरेखिका,समवर्णा, ताम्रा, धातुपटिता, वज्रलब्धा, सैकता, लिकेति ।एतेषु षटसु प्रकारेषु समवर्णाशिला प्रतिमानिर्माणकार्ये समुचिता उच्यते।

ऋग्वेदे तु त्रिधातुशरणं मनुष्याणां दर्शितम्।

इन्द्र त्रिधातुशरणं त्रिवरूथं स्वस्तिमत्।

छदिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः।

ऋ.६.४६.९

मन्त्रोक्तस्य त्रिधातुशब्दस्योपरि विदुषां मतैक्यं वरीवर्ति। केचन त्रिधातोरित्युक्ते इष्टिका, पाषाणः काष्ठञ्चेति। आचार्यसायणमतेन त्रिभूमिकम् अर्थात् त्रिभवनम्।[३७] महर्षिदयानन्देन सुवर्णेन रजतेन ताम्रेण च युक्तं गृहमेवार्थो विहितोऽस्ति।[३८]

ग्रामस्तथा पुरः

वैदिकयुगे आर्यजना अनवस्थिताया अवस्थाया उन्नतिं विधाय स्थापयित्वेन भिन्नेषु भिन्नेषु स्थानेषु प्रदेषेषूषुः। अतो बहूनां ग्रामाणां नगराणाञ्च सर्जनं संरचनं स्वाभाविकं प्राकृतिकं वासीत्।

आर्याणां विविधजना यदा कुत्रापि प्रदेशे स्थायिरूपेण न्यवसन् तदा स जनपद सञ्ज्ञया प्रस्थापितोऽभवत्। एषां जनपदानां स्वरूपं नगरराज्येष्ठा समानमासीत्। जनपदस्य राजधानी पुरमभिधीयते, या दुर्गस्य व्यवस्थान्विता निर्मिताभवत्। जनपदस्य सम्भ्रान्तवर्गस्य लोकाः,

---

३७ ऋग्वेद, भाग ३, पृ.५६, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४१
३८ ऋग्वेद, ६.४६.९, हिन्दी भाष्य, खण्ड ३, पृ.५४४ (७.१०१.२) के भाष्य में विचित्र गृह" खण्ड ४, पृ.१४६, ८.४०.१२ के भाष्य में तीन धारक तत्त्व-सत्त्व, रज और तम" खण्ड ४, पृ.५०६, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तोऽभवन्। कृषिमन्तः कृषीवला ग्राम्यक्षेत्रे न्यवसन्। स प्रदेशः ग्रामः इत्यभिधया विख्यातः।

वैदिकसाहित्येऽनेकत्र स्थानेषु ग्रामाणामुल्लेखः प्राप्यते। ऋग्वेदे अग्निः (विद्वान्) ग्रामरक्षकः कथितोऽस्ति।

असि ग्रामेष्वविता पुरोहितो

ऽस्ति यज्ञेषु मानुषः।। ऋ.१.४४.१०,

यजुर्वेदेऽपि ग्रामस्योल्लेखोऽभवत्। यथा ï

यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये।

यजुर्वेदः-३.४५, २०.१०

ग्रामाः प्रायो विस्तृता अभवन्। ग्रामस्य निवेशकाले जलस्य वायोश्च विचारो भवति स्म। बृहद्ग्रामास्य संज्ञा "महाग्रामः" अभवत्। शतपथब्राह्मणेन विज्ञायते यद् वैदिकयुगे केचिद् ग्रामा निकटवर्तिनोऽभवन्। केचिद् दूरस्थिता मार्गे सम्बद्धाः संयुक्ता आसन्।

स यद् ग्राम्यैः संस्थापयेत्। समध्वानः क्रामेयुः समन्तिकंग्रामयोग्रामान्तौ स्यातां नऽक्षीकि पुरुर्षव्यधाः परिमोषिण आ व्याधिन्यस्तस्करा अरण्येष्वाजायेरन्।।

शतपथब्राह्मण-१३.२.४.२

तद्यथा महापथ आनत उभौ ग्रामौ गच्छतीमं चामुं च........"।।

छान्दोग्य उपनिषद्-८-६.२

ब्राह्मणग्रन्था:

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सविशदं परिचयः प्राप्यते। एतदतिरिक्तं ग्रन्थेष्वेषु वेदीयूपादिविषयाणां सन्दर्भे विस्तृतं विवरणमुपलभ्यते। ऐतरेयब्राह्मणे "शिल्प" शब्दसम्बन्धितं ज्ञानं लभ्यते। कौषीतकिब्राह्मणे नृत्यसङ्गीतगायनैर्भेदत्रयैस्त्रिप्रकारकं शिल्पमुल्लिखितम्। वर्तमाने प्रचलितस्य कलाशब्दस्य समानार्थी प्राचीनकाले शिल्पशब्दोऽभवत्। "सैषी त्रयी विद्या यज्ञः। तस्या एतच्छिल्पं एष वर्णः।" इह आचार्यसायणेन शिल्पस्यार्थः "चित्ररूपम्" विहितो विद्यते यद्यपि कलाशब्दस्य समानार्थी वर्तते।

ब्राह्मण-साहित्ये नैकेषां प्रतिष्ठितानां प्रसिद्धानां पुराणां नगराणां नामोल्लेखोऽस्ति। यत् तत्समये तेषां विद्यमानत्वं साधयति। यथा -काम्पीलं, आसन्दीवत्, वरणावती कौशाम्बी, मष्ठारः, कारोती तथा परिचक्रा-आदि। अथा ह स्माह शाण्डिल्यः। तुरो ह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकाय.......।" (शतपथब्राह्मण-९.५.२.१५)

सूत्रग्रन्थाः

वास्तुज्ञानविषये गृह्यसूत्रेषु प्रमाणभूता अंशाः प्राप्यन्ते। वैदिकसंहिता ब्राह्मणश्रौतसूत्रादि - ग्रन्थाऽऽलोडनेन निश्चयो भवति यद् वास्तुशास्त्रस्य विकासो यज्ञवेदीनिर्माणशास्त्राच्छुल्ब-सूत्रात्समजायत। आश्वलायनगृह्यसूत्रे वास्तुविषयकानि वर्णनानि लभ्यन्ते यथा ï अवसान-भूमिपरीक्षणादिरूपं, भूमिर्विवादरहिता भवेत्, स्थानं समचतुरस्रं, आयतचतुरस्रं वा मापयेदिति, स्तंभस्थापने, गर्तविषये ï जानुमात्रं जानुप्रमाणं गर्तं कर्तव्यम्, गृहस्य पूर्वतः शयनस्थानं, उत्तरतो पाकशाला, मध्यस्थाने सभास्थानं,गृहस्य उत्तरतो सभागृहं न कुर्यात् इत्यादयो विषयाः प्राप्यन्ते। तथैवान्येषु गृह्यसूत्रेष्वपि वास्तुशास्त्रविषयका विषयाः प्राप्यन्ते यथा क्रमेण ï जैमिनीयसूत्रे वास्तुशमनं,वास्तुशान्तिर्गृहशान्तिर्वा इत्यादिकं, कौषीतकिहिरण्यकेशीयसूत्रे भूमिपरीक्षणं विहायागारकरणं,शालाकर्म इत्यादिकं, वस्तुतो गृह्यसूत्रेषु वास्तुविषयस्य अतीव महत्त्वम्। वास्तुविषये गृह्यसूत्राणि प्रधानं प्रमाणम् ।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…ा: कोश-ग्रन्था अभिधीयन्ते कोविदैः। डॉ.शुक्लवर्याणामनुसारमेतदस्माकं प्रारम्भिकं वास्तुशास्त्रमस्ति।[३९] ग्रन्थेष्वेतेषु नैकेषु स्थानेषु वास्तुशास्त्रीयशब्दा उपलभ्यन्ते। यथा ï प्राकारः, शाला, स्तम्भः- आदयः। शाङ्खायनगृह्यसूत्रेऽपि चतुर्भ्योऽध्यायेभ्यस्त्रिष्वध्यायेषु गृहनिर्माणसम्बन्धिनो नियमाः प्रतिपादिताः सन्ति। एवमेव आश्वलायनगृह्यसूत्रेऽपि चतुरध्यायेभ्यस्त्रिष्वध्यायेषु गृहनिर्माणसिद्धान्तानामुल्लेखः कृतोऽस्ति। यद्यप्येते ग्रन्थाः प्राधान्येन विभिन्नसंस्काराणां समारोहाणां विशदं विवेचनं विदधति तथापि भारतीयस्थापत्यविषयकानां सिद्धान्तानां ज्ञानं प्रददति।

बोधायनस्य आपस्तम्बस्य च शुल्वसूत्रेषूपलब्धानां कतिपयचितिनां नामानि वर्तन्ते। ताश्च भिन्ना भिन्ना आकृतिमत्यः सन्ति यथा ï

(१)चतुराश्रयश्येनः (श्येनपक्षिण आकारस्य)

(२)वक्रपक्षश्येनः (श्येनपक्षिणो वक्रपक्षस्याकृतिः)

(३)द्वयस्तपुच्छः (प्रसारितपुच्छस्याकृतिः)

(४)कङ्कचित् (कङ्कपक्षिण आकृतिः)

(५)अजलाचित् (अजला-अगाकृति)

(६)प्रागचित् (समभुजत्रिभुजाकृतिः)

(७)उभयतः प्रागचित् (भुजोपरि पुनर्भुजाकृतिः)

(८)रथचक्रितः (वर्तुलाकृतिर्गोलाकृतिर्वा)

(९)चतुराश्रयद्रोणचित् (चतुष्कोणाकृतिः)

(१०) परिमण्डलद्रोणचित् (वर्तुलयात्राकृतिः)

---

३९ वास्तुशास्त्र, भाग १, हिन्दू साइन्स् ऑफ् आर्किटेक्चर, पृ. ७१, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

:)[40]

सैन्धवस्थापत्यम्

भारतीयपुरातत्त्वविभागस्य १९२१-१९२२ ईस्वीयाब्दे सिन्धुप्रदेशस्य द्वयोर्महत्त्वपूर्णयोः (हडप्पा, मोहनजो दडो) स्थानयोरन्वेषणेन भारतीयेतिहासस्य संस्कृतेः सभ्यतायाः कलायाश्च क्षेत्रे एको नवीनोऽध्यायः परिवर्धितः। हडप्पा मोहनजोदडो चोभावपि तद् युगे महानगरावास्ताम्। तयोर्विकासे च सिन्धोस्तस्या सहायिकसरितो महत्त्वपूर्णं योगदानमस्ति। हडप्पानगरं पश्चिमपञ्जाबस्य (पाकिस्तानस्य) मौटगोमरीमण्डले रावीनद्याः प्राचीनधाराया निकटे स्थितमासीत्। मोहनजोदडो सिन्धप्रान्तस्य लरकाना (पाकिस्तान)मण्डले सिन्धुसरितः पश्चिमतटेऽवस्थितमभवत्। अनन्तरं च भारतीयग्रन्थेषु पुरसन्निवेशार्थं भूमि-चयनप्रसङ्गे यत्र प्राकृतिक-सुषमा-मण्डितं सुरम्यं क्षेत्रं प्रशस्तं प्रदर्शितम्। तत्र जलाशयस्य तटानां सरितां पुलिन-प्रान्तानामपि प्रशंसा विहितास्ति। यथा "आसिन्धुनौगमाकूला।" (शुकनीतिः, अ.११४)

नदीसङ्गमे ह्रदस्य वा विशोषस्याङ्के।

(अर्थशास्त्रम्-अधिकरणम्-२, अ.३.पृ-१०

पुरसन्निवेश-सम्बन्धिन एते सिद्धान्ता अस्माभिर्हडप्पा मोहनजोदडो मध्ये चानयोः सन्निवेशोऽपि विलोक्यते। स्थानयोरनयोरुत्खननेनोपलब्धपुरातात्त्विकानां वस्तूनामाधारेण ज्ञातमस्ति यद् ईस्वीयाऽब्दात् प्राग् प्रायः ३००० सुव्यवस्थितानां नगराणां निर्माणमभवत्। अनयोर्द्वयोः पुरयोः हडप्पासिन्धुसभ्यतायाः पश्चिमी राजधान्यभवत्। अस्याः प्रसारो जम्मूक्षेत्रस्य चिनाबनदीतटस्य माण्डां (अखनूरोपमण्डलात्) प्रारभ्य अरबसागरतटे सुरकागनदोरं यावत् वा ततोप्यऽधिकं कंदहारे मुण्डीगाकपर्यन्तमवर्तत। पूर्वस्यामस्य विस्तारो मेरठमण्डले उखलीना

४० भारतवर्ष का इतिहास (आचार्य रामदेव), भाग १, पृ.८०, वैदिक सम्पत्ति, पृ.२९८, स्वतन्त्रकलाशास्त्र, भाग १, पृ. ५९६, प्राचीन भारतीय कला एवं वास्तु, पृ ५६, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.४८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…स्य रणक्षेत्रे दोलावीरा-सुखकोटडा, काठियावाडक्षेत्रे रंगपुरम्, लोथल-सोमनाथादिस्तथाग्रे नर्मदायास्ताप्त्या मुखस्य समीपे खम्भातस्योपसागरपर्यन्तं लभ्यते। इत्थमस्याः प्रसारस्यैकं विशालं भूमिक्षेत्रं वर्तते।[४१]

वस्तुतस्तु क्षेत्रेऽस्मिन् प्रसारिता सभ्यतेयं स्वकीया काचित् स्थानीया विशेषता भवति, तथापि समानतत्त्वान्वितासीत्। विभिन्नेषु क्षेत्रेषु भौतिक-जीवनार्थं समानान्येव साधनानि प्रयुक्तान्यभवन्। आर्थिकव्यवस्थापि समनाभवत्। लिप्या अपि एकस्याः प्रयोगोऽभवत्। धार्मिकमान्यतायां चापि प्राय एकरूपतासीत्। सम्भवतो राजनैतिकप्रशासनिकमपि विस्तृतेऽस्मिन् क्षेत्रे समानमेवावर्तते।

सन्निवेशसमानता द्वावपि हडप्पा मोहनजोदडो क्षेत्रयोः। द्वयोरपि नगरविन्यासपद्धतेः श्रेष्ठोदाहरणमस्ति। डो.पृथ्वीकुमार अग्रवालस्यानुसारमनयो- र्भूमिस्थितायां रूपरेखायां प्रायः सर्वत्र साम्यं दरीदृश्यते। निर्माणमनयोः पूर्वत एव निर्धारितायां सुपरिचितायां चाभ्यस्तयोजनाप्रणालिकायामभवत्। उभावपि पुरौ भारतीयस्थापत्यस्य समानादर्शानां सिद्धान्तानाञ्चाधारेण निर्मितावस्ताम्।

## दुर्गम्

हडप्पानगरमिदं द्विधा विभक्तमभवत्-यत्र प्रथमभागो दुर्गावृतस्तथापरभागो दुर्गानावृत्तो दुर्गरहितो वासीत्। दुर्गावृत्तो भाग आकृत्या समान्तरचतुर्भुजोऽभवत्। दत्तास्ति। दुर्गस्य निर्माणं धरातलात् २०-२५ फूटपरिमितमूर्ध्वं भवति स्म। तदन्तराले राजकीयभवनानि, कर्मचारिणां निवासस्थानानि, श्रमिकाणां गृहाणि निर्मितान्यभवन्। सुव्यवस्थिता राजमार्गा योजनानुसारं निर्मिता आसन्।[४२]

---

४१ प्राचीन भारतीय कला एवं वास्तु-पृ.३
४२ प्राचीनभारतमें नगर तथा नगर-जीवन, पृ-८, प्राचीनभारतीय कला एवं वास्तु, पृ.११

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दुर्गस्य सुरक्षाहेतोर्बाह्य-प्राकारस्य निर्माणं कृतमासीत्। प्राकारश्च पूर्णोन्नतोऽभवत्। प्राकारस्य दीर्घता ४५-३५ फूटपरिमितासीत्। अन्तरालं प्रतिप्राकाराः किञ्चिदूर्ध्वं यावत् सम्पूर्णोऽभवत्। सम्भवस्तस्य पतनभयाद् ऊर्ध्वभागो तिर्यङ्निर्मितोऽभवत्।[४३] सुरक्षाभित्तावस्यां (प्राकारे) यथा स्थानमट्टालिकानां गोपुराणाञ्च निर्माणं कृतमासीत्। अस्य प्रमुखद्वारमुत्तरदिशां प्रत्यभवत्। आक्रमणाद् रक्षार्थं पश्चिमायां सुरक्षाभित्तिर्न्यूनकोणात्मिका निर्मितासीत्। सुरक्षाभित्तावारोहणार्थं सोपानानामपि योजनाकृता वर्तते।

श्रमिकावासगृहाणि

प्रथमवर्गस्य भवन-समूहे दुर्गस्य समीपेव दक्षिणां दिशं प्रति पृथक्-पृथक् पङ्क्तिषु लघु-गृहाणां निर्माणं विहितमासीत्, येषां प्रतिपत्तिः पुरातत्त्वविद्भिः श्रमिकाणां गृहरूपेण कृता विद्यते। अत्रोत्तरस्यां पङ्क्तौ सप्त दक्षिणस्या च पङ्क्तावष्टगृहाणि निर्मितान्यवर्तन्त। तेषां परिमाणस्य निर्देशः प्राप्यते। निर्माणमेतद् योजनान्वितमस्त्यतस्तत्कालीनं राजकीयनिर्माणं शासकानाञ्च बुद्धिविशदतां दर्शयति।

धान्यशाला

सिन्धुसभ्यताया युगे धान्यशालानां स्थानमत्यन्तं महत्त्वपूर्णमासीत्। मुद्रा-विहीन-युगोऽभवत्। तत्कालीनार्थिकजीवनस्याधारो वस्तुविनिमय आसीत्। धान्यशाला राजकीयकोषान्तर्वतिन्योऽभवन्, याभिर्विभिन्नानामुद्देश्यानां पूर्तयोऽभवन्। हडप्पा-नगरे रावीतटेऽवस्थिता धान्यशाला सूचयति यन्नद्या यदन्नं राजकीयकररूपेण लभ्यते, तदन्नं सौकर्यपूर्वकं निर्वोढुं शक्नुयात्।

---

४३ भारतीय वास्तु कला का इतिहास. पृ-१३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

हडप्पा-नगरे प्राप्तपुरातत्त्वशेषाणामपेक्षया मोहनजोदडो इत्यस्य नगरस्य भग्नावशेषा अतीव सुरक्षिताः प्राप्यन्ते, यतो यत्र तत्कालीनसन्निवेशस्य सम्बन्धे स्पष्टं विवरणमुपलभ्यते। सैन्धवस्थापत्येऽस्य विशिष्टं महत्त्वमस्ति। डो.पृथ्वीकुमार अग्रवालमहाभागेनोल्लिखितं यत् मोहनजोदडो इत्यत्र २० तः ७० फूटपरिमितानामुन्नतानां थूहो इत्याख्यानामुत्खनने जलस्य तलपर्यन्तमवशेषाणां सप्त तलाः प्राप्ताः सन्ति। येष्वुपरिष्टात् त्रिस्तरा उत्तरयुगस्य, मध्यभागस्य त्रिस्तरा मध्ययुगस्य, अन्तिमश्च सप्तमः पूर्व-युगस्यास्ति। आचार्यरामदेवेनापि विभिन्नेषु समयेषु नैकवाारमत्र नगरनिर्माणस्योल्लेखः कृतोऽस्ति।[४४]

दुर्गभागः

मोहनजोदडोनगरस्य दुर्गयुक्तो भागो नगरस्य पश्चिमभागोऽभवत्। भागेऽत्र राजपुरुषाणां निवासा विशिष्टानां नागरिकाणां भवनान्यपि स्थितान्यासन्। भागेऽस्मिन् अन्यानि स्मारकाण्यमिलन्। तत्र विशेषतो विशालस्नानागारः, अन्नागारः, सभाभवनादीनि-उल्लेखनीयानि सन्ति। यानि स्वकीयस्य निर्माणस्योत्कृष्टताया मौलिकयोजनायाश्च कारणाद् आकर्षणकेन्द्रमस्ति।

अवम-नगरस्यावशेषाः

अवम-पुरो मोहनजोदडोनगरस्य पूर्वो भागोऽभवत्, यत्र सामान्यजनानांमावासीयभवनान्यभवन्। अस्योत्खननात् पुरातत्त्व-सम्बन्धिनोऽवशेषाः प्राप्ताः, तेऽतीव महत्त्वपूर्णाः सन्ति। पुरस्य भागोऽयं सुनियोजितेषु खण्डेषु विभाजितोऽभवत्। येन परिष्कृतस्य नगरस्य निर्माणस्य परिचयः प्राप्यते। इह मार्गाणां महापथानाञ्च विस्तृता

४४ प्राचीन भारतीय कला एवं वास्तु-पृ-१, भारतवर्षका इतिहास भाग-२, पृ-२९३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नानां निर्माणं स्पष्टयति यत् तत्कालीनायां शासन-व्यवस्थायां नगर-नियोजनस्यातीव कार्यकुशलो विभाग आसीत्।

मार्गाः

मोहनजोदडोनगरे मार्गा जालाच्छादिताः आसन्। अत्र ये मार्गाः सन्ति ते उत्तरतो दक्षिणगामिनः, पूर्वतः पश्चिमगामिनो वा सन्ति। राजमार्गाणां निर्माणं तत्कालीनैरभियन्तृभिः स्वकीयस्य कार्यकौशलस्य श्लाघनीयः परिचयः प्रादायि।

नागरिकभवनानि

मोहनजोदडो नगरस्योत्खनेनात्रत्यानां नागरकभवनानां सम्बन्धे उत्कृष्टं ज्ञानमुपलभ्यते। अत्रोपलब्धपुरातत्त्वीयैः प्रमाणैर्विज्ञायते यत् तत्कालीनायां सभ्यतायां गृह-निर्माणस्य सुनियोजिता शैल्यविष्कृताभवत्। इह निर्मितभवनात् प्राप्तैः पुरातात्त्विकैः प्रमाणैर्देशस्यास्य सुखप्रदावासानां प्राचीनान्युदाहरणानि मन्तुं शक्यन्ते। यानि भवनानि सिद्धान्तानामाधारेण निर्मितान्यभवन्। तथापि तानि सुदृढताया निर्माणकलायाः कौशलविख्यातान्यासन्।

निर्मलनगरव्यवस्था

सिन्धुतटनिवासिनां श्रेष्ठोन्नतजीवनस्य स्वाथ्यप्रियतायाश्च प्रमाणं दूषितजलादीनां निष्कासनायोत्तमनालीनिर्माणमभवत्, एतन्निर्माणव्यवस्थायां समेषां प्रमुखमार्गाणामुपमार्गाणां निर्माणं चोभयतः कृतमासीत्। पाश्चात्यैः पुरातत्वविद्भिस्तत्कालीनानां भारतीयानामभियन्तृ‍ृणां वैज्ञानिकव्यवस्थाया अस्याः प्रचुरप्रशंसा विहितास्ति।

लौकिकसाहित्यम्

लौकिकसाहित्यिकेषु साधनेषु वाल्मीकि-रामायणम्, भरतमुनेरनाट्यशास्त्रं, शुक्रनीतिः, अष्टाध्यायी, अर्थशास्त्रं, बौद्धजातकादयः प्राचीनग्रन्थाः सन्ति। अतो विषयस्यास्य सङ्केतमात्रं

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

सम्बन्धिनी या सामग्री उपलभ्यते, तस्या ऐतिहासिकं महत्त्व वरीवर्ति। एतेषु प्रसङ्गवशाद् वास्तुशास्त्रीयं प्रमाणं मिलति। किन्तु ग्रन्था एते भारतीयवास्तुकलाया इतिहासं निर्मातुमतीव मूल्यवन्तः सन्ति। अतो हि कतिपयानामेतादृशानां वास्तुकलासन्दर्भे संक्षिप्तं विवरणं प्रस्तूयते।

वाल्मीकिरामायणम्

भारतीयपरम्परायां रामायणस्य रचनाकालस्त्रेता-द्वापरयुगयोः सन्धिकालो मन्यते, परन्तु आधुनिकविद्वद्भिरस्य मुख्यभागस्य रचनाकाल ५०० ईस्वीयाब्दपूर्वं प्रायः स्वीकृतोऽस्ति। प्रसङ्गानुरूपमत्र नगराणां प्रसादानां दुर्गादीनां विस्तृतं विवरणमुपलभ्यते। देवासुररयोः प्रधानस्थापत्यविज्ञयोः अर्थात् विश्वकर्मणो मयस्य चोल्लेखो बहुशो विहितोऽस्ति।

ग्रन्थेऽस्मिन् स्थपतिः सूत्रकर्म-विशारदः, तक्षकस्तथा वर्धकी- एतादृशानां वास्तुकलासम्बद्धानां शब्दानामुल्लेखः कृतोऽस्ति। यथा-

अथ भूमिप्रदेशज्ञाः सूत्रकर्मविशारदाः।

स्वकर्माभिरताः शूराः खनका यन्त्रकास्तथा।

कर्मान्तिकाः स्थपतयः पुरुषा यन्त्रकोविदाः।

तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः।।

वा.रा.अयो.का.सर्गः-८०,१.२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्तभूमि-अष्टभूमि-इत्याभिः शब्दैर्नैकतलवतां भवनानां ज्ञानमुपलभ्यते।

.....प्रासादैनैकभूमिः कि.का.सर्गः.३३.८

सप्तभौमाष्टभौमैश्च। सु.का.सर्गः.२.५१

भवनानां विशेषताया आधारेण विभिन्नकोट्यां समावेशो निर्दिष्टोऽस्ति। यथा - चतुःशालं, पद्मं, स्वस्तिकं, वर्धमानादीनि।

पद्मस्वस्तिकसंस्थितैः, वर्धमानगृहैश्चापि सर्वतः सुविभूषितः।।

सु.का.सर्गः-४.७-८

वाल्मीकिरामायणे चतुर्णां प्रकाराणां दुर्गाणामुल्लेखो विहितो विद्यते। यथा नादेयं, पार्वत्यं, वन्यं तथा कृत्रिमम। यथा ï

नादेयं पार्वतं वन्यं कृत्रिमं च चतुर्विधम्। यु.का.सर्गः ३,१९

रामायणे साधारणभवनात् प्रासादाच्चाधिकं धार्मिककार्यार्थं वेदी, देवतायतनं, यूपः - प्रभृतीनां शब्दानामुल्लेखो लभ्यते। एवं स्थापत्यकलाया अतीव सविस्तरं विवरणं कवित्वभाषया प्रत्येके पृष्ठे प्राप्यते।

भारतीय संस्कृत्यां ï मनुष्येषु रामायणमहाभारतयोर्महान् प्रभावः। भारतीयानां कृते द्वौ ग्रन्थावादर्शरूपौ वर्तेते । अमूल्यनिधिरूयोर्द्वयोर्ग्रन्थयो रचयितारौ वास्तुविषयाणां वर्णनं कथं विस्मरिष्यथः। रामायणमहाभारते सुपुष्टनगरनियोजना प्राप्यते। अयोध्या ï इन्द्रप्रस्थादि नगराणां निर्माणं वास्तुविज्ञानस्य चरमोत्कर्षनिदर्शनं वक्तुं शक्यते। आर्षकाव्ये रामायणे नगरीणां रचना वैज्ञानिकी नियमितयोजनानुसारिणी निश्चतपरिमापयुता राज्यसंचालनकार्येषु

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

टे समतलक्षेत्रे द्वादशयोजनान्यायता त्रीणि योजनानि च विस्तीर्णासीत्।

अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ।

मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ।।

आयता दश च द्वे च योजनानि महापुरी।

श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ।।

बा.का.सर्गः.५.६-७

रामायणे लंङ्कानगर्यपि वास्तुशास्त्रदृष्ट्या विवेचनीया वर्तते । सा नगरी पताकामालिनी रम्या उद्यानवनशोभिता चित्रवप्रा सुदुष्प्रापा उच्चैः प्रकारतोरणा शैलशृङ्गमिवोन्नतद्वारासीत्।(रा.५.४१.३१.-३३) सुन्दरकाण्डे तस्या वास्तुकला वर्णिता यथा ï

काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम्।

गृहैश्च गिरिसंकाशैः शारदाम्बुदसंनिभैः।।

पाण्डुराभिः प्रतोलिभिरुच्चाभिराभिसंवृताम्।

अट्टालकशताकीर्णां पताकाध्वजशोभिताम् ।।

तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविराजितैः।

ददर्श हनुमाँल्लङ्कां देवो देवपुरीमिव।।

सु.सर्गः.२.१६-१८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ा ï

जाम्बूनदमयैर्द्वारैवैदूर्यकृतवैदिकैः।।

वज्रस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः।

सप्तहाटकनिर्यूहैः राजतामलपाण्डुरैः।।

वैदूर्यकृतसोपानैः स्फटिकान्तरपांसुभिः।

चारुसंजवनोपेतखमिवोत्पतितैः शुभैः।।

क्रौञ्चबर्हिणसंघुष्टैः राजहंसनिषेवितैः।

तूर्याभरणनिर्घोषैः सर्वतः परिनादिताम्।।

वस्वोकसारप्रतिमां समीक्ष्य नगरीं ततः।

खमिवोत्पतितां लङ्कां जहर्ष हनुमान् कपिः।।

सु.का.सर्गः ३.८-१२

महाभारते इन्द्रप्रस्थनगरस्य वास्तुविवरणं भारतीयवास्तुविज्ञानस्य स्वर्णिमपृष्ठरूपेण गण्यते। तस्य नगरस्य वास्तुसंरचना वर्णनीया वर्तते। युधिष्ठरेणेन्द्रप्रस्थनगरनिर्माणार्थं निश्चयं कृत्वा पुण्ये दिने पवित्रदेशे शान्तिकर्मयज्ञोत्सवं च कृत्वा भूमेर्मितिमकारयत् यस्यां परिखाप्राकारराजप्रसादचत्वरगोपुरवीथ्यादिनिवेशो यथास्थानं भवेयुः।

नाट्यशास्त्रम्

नाट्यशास्त्रे भरतमुनिर्नाट्यमण्डपस्य रचनाविधेर्नियमान् निर्धारयन् तेषां महत्त्वं प्रादर्शयत्। ग्रन्थेऽस्मिन् नाट्यशालाया अथवा रङ्गशालाया निर्माणप्रसङ्गे वास्तुकला-

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ये यथा- भूमिचयनं, तस्याः परिमार्जनं, परिमाणस्य निर्धारणं, नाट्यशालाया मानचित्रं, शिलान्यासस्य धार्मिकविधिः, ब्राह्मणक्षत्रियवैश्यशूद्राणां वर्णानामाधारेण चतुर्णां स्तम्भानां रचना, भित्तिनिर्माणं, द्वारद्वययुक्तस्य प्रकोष्ठस्य रचना, रङ्गपीठं चतुःस्तम्भानामुपर्याधारितयो रङ्गपीठस्य द्वयोः पार्श्वभागयोः निर्मितिः -इत्यादिः।

ग्रन्थेऽस्मिन् भूमिचयनसन्दर्भे प्राप्तनियमानुसारं भूमिस्तदनुरूपा भवेत्। स्थानमुच्चावचं न स्यात्। स्थिरं कठिनभूमिस्थानं भवेत् अर्थात् भूमिगतजलस्रोतसा चलायमानं न स्यात्। यत्र च मृत्तिका कृष्णा, एवं श्वेता भवेत्। तत्र भूमौ नाट्यमण्डपस्य निर्माणं प्रकर्तव्यम्। यथा-

समा स्थिरा तु कठिना कृष्णा गौरी च या भवेत्।

भूमिस्तत्रैव कर्तव्यः कर्तृभिर्नाट्यमण्डपः।।

ना.शा.अ.२.२५

महाभारतम्

वर्तमानोपलब्धं महाभारतस्य स्वरूपं विद्वांसो द्वितीयशताब्द्यां पूर्णजातं मन्यन्ते। महाभारतसदृशे बृहत्काये ग्रन्थे नैकेषु सन्दर्भेषु प्राचीनभारतीयायाः स्थापत्यकलायाः सविस्तरं वर्णनमुपलभ्यते। अस्मिन् युगे वास्तुकलाया विकासश्चरमं लक्ष्यं स्पृशन्निव विलोक्यते, अपरपक्षे स्थले जलं, जले स्थलमाभासकः पाण्डवानां राजप्रासादस्य भवननिर्माणस्याद्भूतमुत्कृष्टं कलाकौशलं दर्शयति। इन्द्रप्रस्थनगरस्य सम्बन्धे यद्विवरणमुपलभ्यते, तन्नगरनिर्माणस्य योजनामुपरि प्रकाशं ददाति। निर्माणमस्य देवानां स्थपतिना विश्वकर्मणा श्रीकृष्णस्याह्वानात् खाण्डववनस्य दाहादनन्तरं सुनियोजितरीत्या हस्तिनापुरादप्यधिकं श्रेष्ठरूपेण कृतमभवत्। ग्रन्थेऽस्मिन् द्वारकायाः, मिथिलायाः, तरणवताञ्च नगराणाम् (Floating City) उल्लेखः कृतोऽस्ति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

जातमस्ति। यथा- (१) धन्वदुर्गः। (२) महीदुर्गः। (३) गिरिदुर्गः। (४) मनुष्यदुर्गः। (५) जलदुर्गः तथा (६) वनदुर्गः।

धन्वदुर्गो महीदुर्गो गिरिदुर्गस्तथैव च।

मनुष्यदुर्गोऽप्दुर्गो वनदुर्गेति तानि षट्।।

महा.शान्तिपर्व.अ.८७.५

महाभारते सभापर्वणि विभिन्नानां सभा-भवनानां वर्णनमुपलभ्यते, येभ्य इन्द्रसभा, यमसभा, वरुणसभा, कुबेरसभा, तथा ब्रह्मसभा उल्लेखनीया वर्तते।

पुराणम्

पुराण-शब्दस्य वास्तविकार्थः प्राचीनमस्ति। भारतीयपरम्परायां पुराणानां गणना वेदानाममनन्तरं भवति। पुराणेषु वर्णितवास्तुकला तत्कालीनसमाजस्य समृद्धेः, वैभवस्य चोत्कृष्टतां प्रदर्शयति। सर्वेषु पुराणेषु बहुशः पुराणस्थापत्यविज्ञानस्य विवेचनं विधीयते। एतेषु नगरनिर्माणं, ग्रामनिर्माणं, भवननिर्माणं, राजप्रासादनिर्माणं, शयनकक्षस्य, आयुधगृहस्य च निर्माणं तथा विभिन्नानां निर्माणं बहुसुचारुतया वर्णितमस्ति। अष्टादशपुराणेषु स्थापत्यकलाया वर्णनं यत्र तत्रोपलभ्यते। किन्तु केषुचित् पुराणेषु ज्ञानवर्धकं विस्तृतं वर्णनं प्राप्यते।

मत्स्यपुराणम्

मत्स्यपुराणे स्थापत्यविज्ञानस्य क्रमानुसारं वर्णनं प्राप्यते। यथा वास्तुभूतोद्भवनामकेऽध्याये वास्तुपुरुषस्योत्पत्तिः, एकाशीतिपदवास्तु-निर्णयः, भूमिपरीक्षा तथा पददेवता-विन्यासस्य विवरणं प्रदत्तमस्ति। गृहमान-निर्णयनामकेऽध्याये सर्वतोभद्र-नन्द्यावर्त-

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्ति। पुराणेऽस्मिन् २५५ अध्याये रुचक-वज्र-पुलीनक-वृत्तानां पञ्चानां महास्तम्भानां वर्णनं विहितं विद्यते। यथा ï

रूचकश्चतुर: स्यात्तु अष्टास्रो वज्र उच्यते।

द्विवज्र: षोडशास्रस्तु द्वात्रिंशास्त: प्रलीनक:।।

मत्स्य.अ.२५५.२-३

पुराणेऽस्मिन् भवननिर्माणसम्बन्धे दार्वाहरणस्य विवरणमुपलभ्यते। इतोऽप्यधिकं प्रतिमारचनाकलादीनामपि वर्णनं दृश्यते।

अग्निपुराणम्

पुराणेष्वग्निपुराणस्य स्थानं विशेषमस्ति। आचार्यबलदेवोपाध्यायानुसारं पुराणमेतद् यदि समस्तभारतीयविद्याया विश्वकोश: कथ्यते तर्हि तत्र नास्ति काप्यतिशयोक्ति:। अग्निपुराणे वास्तुशास्त्र-सम्बन्धिन: षोडशाध्याया: सन्ति, किन्तु वास्तुकलायास्तावत् सविस्तरं वर्णनं नोपलभ्यते यावत् विस्तृतं मूर्तिरचना-कलाया कृतमस्ति। अत्र वास्तुवर्णने नगरनिर्माणसम्बन्धिनो निर्देशा: सन्ति। यथा ï नगरस्य विस्तार:, तस्य प्रशस्ताकार:, नगरस्यावश्यकाङ्गानां प्राकारद्वारादीनामुल्लेख:, तथा तत्र विभिन्नानां वर्णानां व्यवसायजीविनाञ्च यथा स्थानं निवासादिकं वर्णितम्।

अन्येषु त्रयोदशाध्यायेषु मूर्तिकलाया विवेचनं वर्तते। डो. शुक्लमहोदयस्य मतेनाग्निपुराणस्य गरुडपुराणस्य च वास्तुविद्याया सम्बन्धिताध्याया: समाना वर्तन्ते।[४५]

---

४५ वास्तुशास्त्र, भाग १, हिन्दू साइन्स् ऑफ् आर्किटेक्चर, पृ.७९, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.७२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

गरुडपुराणस्य हिन्दुस्थापत्ये महत्त्वपूर्णं योगदानं वर्तते। अस्य द्वयोरध्याययोर्वास्तुकलासम्बन्धिनां विषयाणां प्रतिपादनं सञ्जातमस्ति ï तत्र विषयाः ï यथा ï राजप्रसादः, दुर्गः, उद्यानं, मन्दिरं, मठः, त्रिप्रकाराणां भवनानाम्-आवासीयानां सैनिकस्य धार्मिकस्य च वर्णनमुपलभ्यते। अत्र मूलस्य मानस्य चाधारेण विभिन्नान् प्रासादान् वैराजं, पुष्पकं, कैलासं, मालिका, त्रिपिष्टपञ्च नामभिः पञ्चवर्गेषु व्यभाजयत् । एतेभ्य एव चत्वारिंशत् प्रकाराणां प्रासादानां जन्मोद्भवं प्रादर्शयत्।

प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च मानतः।

वैराजः पुष्पकाख्यश्च कैलासो मालिकाह्वयः।।

त्रिपिष्टपञ्च पञ्चैते प्रासादाः सर्वयोनयः। गरुड.अ.४७.१९

स्कन्दपुराणम्

स्कन्दपुराणमप्येकं प्रारम्भिकं पुराणं मन्यते। इदमतीव विशालकायं पुराणमस्ति। अत्र वास्तुकलासम्बन्धिनस्त्रयोऽध्यायाः सन्ति। अस्यैकेऽध्याये नगरनिर्माणस्य सविस्तरं वर्णनं विद्यते। यथा ï

स्वयं विश्वकर्मद्वारा निर्मापितमहीनगरस्थापनवर्णनम्।

स्कन्द.माहेश्वरखण्डः-भागः-२.अ.२५

वैष्णवखण्डस्य पञ्चविंशत्यां तथा माहेश्वरखण्डस्य चतुर्विंशत्यामध्याये स्वर्णिमप्रधानानां कक्षाणां स्थानं कल्याणमण्डपस्य च निर्माणस्य वर्णनमुपलभ्यते।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विष्णुधर्मोत्तरपुराणं स्थापत्यकलाया मूर्तिकलायाश्चित्रकलायाश्च कोशग्रन्थः कथयितुं शक्यते। पुराणेऽस्मिन् त्रिचत्वारिंशदध्यायेषु वास्तुकलायाश्चित्रकलायाश्च वर्णनं विहितं विद्यते। पुराणेऽस्मिन् मानवगृहस्य, देवगृहस्य च रचनाया निरूपणं पृथक्-पृथग् वर्तते। अत्र षण्णां प्रकाराणां दुर्गाणां, तत् परितो निर्माणाधीनानां परिखानां, देवालयस्य, राजप्रासादस्य, राजमार्गाणां विभिन्नानां वणिग्जनानां, व्यवसायजीविनामापणस्य तेषां च भवनानां विशदं विवरणं कृतमस्ति। अत्र दुर्गाणां समीपस्थानामुद्यानानां वाटिकायाश्च वर्णनं विहितम्।

इह पुराणस्य २९ अध्याये गृहनिर्माणहेतोर्भूमिचयनं, पुष्प-दीपक-जलमादिद्वारा परीक्षणं, पुरभूमेश्चतुषष्टिभागेषु विभाजनं विभिन्नेभ्यो देवेभ्यः समर्पणं, गृहभूमिविभाजनम्-इत्यादिकं वास्तुकलाविषयकं विवरणं प्रदर्शितम्। यथा ï

गर्भं च कुसुमं यस्यां न ग्लानिमुपगच्छति।

न निर्वाणमाप्नोति यस्यां दीपश्च भार्गव।।

उदकं च तथा यस्यां शीघ्रं राम न जीर्यते।

सा प्रशस्ता क्षितिस्तस्यां निवेशं कारयेद्बुधः।।

विष्णुधर्म.खण्डः२,अ.२९.६-७

चतुःषष्टिपदं कृत्वा वास्तुपूर्वं यथाविधि।

चतुःषष्टिविभागेन कल्पयित्वा समन्ततः।।

विष्णुधर्म.खण्डः२,अ.२९.१२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

३० अध्याये वृक्षारोपण-सम्बन्धिनां नियमानामपि वर्णनं वर्तते, यत्र गृहपतेर्गृहस्य वाम-भागे उद्यानरचनाया निर्देशः प्रदत्तोऽस्ति।

वामभागे तथोद्यानं कुर्याद्वासगृहाच्छुभम्।

विष्णुधर्म.खण्डः-२, अ.३०.३

संक्षेपेणात्र निर्माणकार्यस्य गृहस्य, देवालयस्य, दुर्गस्य सौविध्यानुरूपं सूक्ष्मेक्षिकया वास्तुकलायाश्चान्वितं वर्णनं व्यधायि।

शुक्रनीतिः

यद्यपि शुक्रनीतिर्मुख्यतो राजनीतेः प्रख्यापको महत्त्वपूर्णो ग्रन्थोऽस्ति। तथाप्यत्र स्थापत्यकला-विषयिकी चर्चा प्राप्यते। ग्रन्थेऽस्मिन् शुक्राचार्येण राजधानीनगरस्य चित्रं यदुपस्थापितं तदाधारेणाभिधातुं शक्यते, तत्कालीनस्य भारतवर्षस्य सभ्यता, निवेशकला वा बहून्नतायां श्रेष्ठतायां वाभवत्। इह राजधानी-नगरस्य आकारस्य, तदावश्यकानां विविधनामङ्गानां-प्राकारस्य, परिखायाः, राजसभाभवनस्य, उद्यानस्य, उपवनस्य, धर्मशालानां, राजप्रासादस्य, तस्य च रचनाविधेः, गोशालायाः, अश्वशालायाः -आदीनां वर्णनमुपलभ्यते। यद्यपि ग्रन्थेऽस्मिन् राजभवनस्य, वास्तुविज्ञानविषयस्य चोल्लेखोऽस्ति तथप्यधिकं विशदं सूक्ष्मविवेचनं प्रतिमानिर्माणविधेर्वर्तते। यस्योद्देश्यं ध्यान-योगस्य सिद्धिरस्ति।

ध्यानयोगस्य संसिद्धये प्रतिमालक्षणं स्मृतम्।

शुक्रनीतिः, अ. ४.७१

दुर्गनिर्माणमपि पर्वतात् दूरं परिखाभिस्तथा आयुधादियुक्तं भवेदेवं प्रदर्शितम्।

अष्टाध्यायी

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

न्थोऽष्टाध्यायी, यस्य रचनाकाल ईस्वीयाब्दात् पूर्वं पञ्चमशताब्दीमामनन्ति विद्वांसः। स च स्थापत्यकला-सम्बन्धिनमुत्तमं परिचयं प्रददाति। ग्रन्थेऽत्र कापिशी, तक्षशिला, हस्तिनापुरः, सङ्काश्यः, काम्पिल्यः- आदीनामनेकेषां नगराणां सविशदमुल्लेखः प्राप्यते। अनेन विज्ञायते यत् पाणिनिकाल एव स्थापत्यकलाया नगरयोजनायाश्च पूर्णविकासः समभवत्।

पुरनिवेशात् प्राग् यत्र यत्र वप्रः, प्राकारः, पुरद्वारं, राजप्रासादो वा सन्निविशेत्, तत्र तत्र पूर्वमेव चिह्नं कारयेत्। तद् नगरमापनसञ्ज्ञया प्रसिद्धम्।

यद्यप्यष्टाध्याय्यां प्राकारशब्दस्य प्रयोगो नास्ति किन्तु कात्यायनेन प्राकारीयो देशस्तथा प्राकारीयेष्टका -इत्यादीनां शब्दानां प्रयोगो विहितः। पाणिनिना देवपथ- शब्दस्य प्रयोगः कृतः। अर्थशास्त्रसमीक्षात्मकेनाध्ययनेन देवपथः प्रशस्तोन्नतपथवाची वर्तते। स मार्गमिन्द्रकोशस्याट्टालिकायाश्च पृष्ठे प्राकारमुपरि भवति स्म।

प्राकारेषु द्वाराणां निर्माणं भवति स्म। पाणिनिना नामकरणावसरे विलिख्यते, यथा ï अभिनिष्क्रामति द्वारम् (अष्टाध्यायी.४.३.८६) माथुरं कान्यकुब्जद्वारम् (पाणिनिकालीन भारतवर्ष, पृ.१४५) अर्थात् द्वारमिदं मथुरानगराभिमुखं स्यात्। परम्परेयं पश्चात् भारतवर्षे विद्यमानासीत्। इतोऽप्यधिकं बहुत्र वास्तुशास्त्रसम्बद्धं विज्ञानमत्राष्टाध्याय्यां यत्र तत्रान्वेषणेन लब्धुं शक्यते।

अर्थशास्त्रम्

कौटिल्यार्थशास्त्रे प्राचीनभारतीया स्थापत्यकला-सम्बन्धिनी महत्त्वपूर्णा सामग्री उपलब्धास्ति। ग्रन्थेऽस्मिन् प्रदत्तया वैज्ञानिकपरिभाषया स्पष्टमस्ति यत् कौटिल्यस्य युगे वास्तुविज्ञानमतीव विख्यातमभवत्। अर्थशास्त्रे भवनानि तेषाञ्च निर्माणकला मनोरञ्जनस्थलानि-उपवनानि, सेतुबन्धः, सरोवरः- इत्यादीनां कृते वास्तुसञ्ज्ञा प्रयोजितास्ति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ाराम: सेतुबन्धस्तटाकमाधारो वा वास्तु।

अर्थशास्त्रम्.अधिकरणम्.३ ,अ.८

नगरनिर्माणावसरे कौटिल्येन बाह्याक्रमणात् नगरस्य सुरक्षार्थं सीमा-दुर्गाणामपि निर्देश: कृतोऽस्ति। एतेषामेव दुर्गाणामन्तराले जनपदानां देशस्य चान्तरिकव्यवस्थाया: सुरक्षाहेतोर्नगराणां स्थापनाभवत्।

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत्.....अर्थशास्त्रम्,अधिकरणम्-२, अ.३

स्थानीयनगराणां निर्माणं विशिष्टयोजनाया आधारेण भवति स्म। यस्य भूभागस्य योजना पूर्वत: कृता भवति। अर्थशास्त्रे वास्तुप्रशस्तदेश:, नदीसङ्गमस्तथा ह्रद:-एतत्सदृशै: शब्दै: स्पष्टं भवति यत् कस्यापि नगरस्य निर्माणात् पूर्वं वास्तुविद्याविशारद: शिल्पी भूमिपरीक्षणं कुरुते स्म, तत्रत्यस्य जलपरीक्षणं विशेषतो महानदीनां तटं, जलाशयानां तटं विलोक्य नगराणां मानचित्रं विरचयन्ति स्म।

अर्थशास्त्रे राजनिवेशस्य सन्निवेशप्रसङ्गे यथोचितेमेवाभिहितम्-यथा-

त्रय: प्राचीना राजमार्गस्य उदीचीना इति वास्तुविभाग:। चतुर्दण्डान्तरा रथ्या:। राजमार्गद्रोणमुखस्थानीयराष्ट्रविपीतपथा: संयानीयव्यूहश्मशान-ग्रामपथाश्चाष्टदण्डा:। चतुर्दण्ड: सेतुपनपथ:। द्विदण्डो हस्तिक्षेत्रपथ:। पञ्चारत्नयो रथपथश्चत्वार: पशुपथो द्वौ क्षुद्रपशुमनुष्यपथ:। अर्थशास्त्रम्.अधिकरणम्-२, अ.६

राजभवने विभिन्नकलाकृतिविषयेऽपि यथा राज्ञो निवासगृहे सुविधाप्रसङ्गे सम्पूर्णसूक्ष्मदृष्ट्या निर्दिष्टं यथा ï

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ये वासगृहं, मूढभित्तिसारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वाऽसन्नकाष्ठचैत्यदेवता पिधानद्वारनेक-सुरङ्गासञ्चारं प्रासादं वा गूढभित्तिसोपानं, सुषिरस्तम्भप्रवेशासारं वा, वासगृहं यन्त्रबद्धतलावपातं कारयेद् आपत्प्रतीकारार्थम्। आयादि वा कारयेत्। अर्थशास्त्रम्.अधिकरणम्-१, अ.१९

पुरातत्त्वान्वेषणेनोपलब्धा अवशेषा अपि साधयन्तीदं पाटलिपुत्रादीनां तत्कालीनानां नगराणां निर्माणमप्यर्थशास्त्रादिग्रन्थोक्तनिर्देशानुसारमेव सञ्जातं भवेत्।

पालिसाहित्यम्

विद्वद्भिर्जातकयुगस्य काल ईस्वीयाब्दस्य द्वितीयशताब्द्यां वा तृतीयशताब्द्यां स्वीक्रियते। बौद्धजातकं तथान्ये कतिपयाः पालिग्रन्थाः स्थापत्य-विषयकाभिः कृतिभिः परिपूर्णाः सन्ति। तत्र युगे स्थापत्यविषयकान् यान् स्वरूपान् व्युल्लेखयत् तेषां भग्नावशेषा अद्याप्युपलभ्यन्ते। जातकग्रन्थेषु वर्णितैः, वर्तमानोपलब्धैस्तत्कालीनै- भग्नावशेषैरेतत् कथयितुं शक्यते यत् तस्मिन् युगे स्थापत्यकला उच्चस्तरीयाभवत्।

आचार्यवासुदेवशरण-अग्रवालमहाभागेनापि पालिदीघनिकायादुपलब्धानां पञ्चविंशतिशिल्पिनां सूचेरुल्लेखः कृतः वर्तते यत्र वत्थु-विज्जा (वास्तुविद्या), वत्थुकम्म (वास्तुकर्म) वत्थु-परिकम्म (वास्तुपरिकर्म) इत्येतेषां चर्चा विद्यते।[४६]

जातकग्रन्थेषु नैकेषामन्येषां प्रासादानामपि वर्णनमस्ति। यथा विमान- राजभवन- वासघर- इत्यादिसंज्ञावन्तः सन्ति। एतेषु स्तम्भः, कूटागारः, किङ्किणीजालः, ध्वजः, उद्यानं, पुष्करिणी -आदीन्यभवन्। एको वा नैकतलात् प्रासादा एकभूमिकः, द्विभूमिकस्तथा नवभूमिकः -आदीभिः सञ्ज्ञाभिः कथ्यन्ते स्म।

---

४६ भारतीय कला-पृ.७७, भारतीय वास्तुशास्त्र का इतिहास, प्र.अ.पृ.८१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

आगमग्रन्था वास्तुकलाया मूर्तिकलायाश्च सम्बन्धे पारिभाषिकज्ञानेन परिपूर्णाः सन्ति। यद्यप्यागमस्तन्त्रश्चैकस्यां परम्परायां समानौ वर्तेते, शिवस्य शक्तेश्चाराधनायां सम्बन्धं धारयतः। शिल्पशास्त्रं प्रति आगमानां योगदानं पुराणेभ्योऽप्यधिकं विस्तृतं व्यावहारिकञ्चास्ति। डो.कान्तिचन्द्रपाण्डेयमतेन हडप्पा मोहनजोदडो इत्यत्रोपलब्धा भग्नावशेषाः शैवधर्मप्रेरिताः प्रतिपद्यन्ते, यद्यपि शैवागमेषु वास्तुकलाया मूर्तिकलायाश्च सम्बन्धितोल्लेखास्तावत् पुरातना न सन्ति-परन्तु तेषां रचनाविधिरतीव प्राचीनोऽस्ति।

शैवागमानां सङ्ख्या द्वानवतिर्वर्तते। येषु केचिदागमाः पूर्वोक्तानुसारं वास्तुकला-सम्बन्धिता ग्रन्थाः सन्ति। अंशुमद्भेदागमे, वैखानसागमे, कारणागमे चान्येष्वागमग्रन्थेषु धार्मिककृत्यैः सार्धं नगराणां, मन्दिराणाञ्च निर्माणविधेः स्थापत्यकलासमन्वितं निरूपणं वर्तते।

तन्त्र-साहित्यम्

तन्त्र-साहित्यमपि प्राचीनं साहित्यमामनन्ति कोविदाः, यत्र शिल्पकलाया निरूपणमुपलभ्यते। अग्निपुराणे परिगणितानां पञ्चविंशतितन्त्राणां सूचेरूल्लेखः पूर्वमेव कृतः। हयशीर्षे, पञ्चरात्रे, अत्रिसंहितायाञ्च प्रतिपादिताः केचिद्विषयाश्चिन्तनीयाः सन्ति। अन्यतन्त्रग्रन्थेषु यथा दीप-तन्त्रे, महानिर्वाण-तन्त्रे शारदातन्त्रे शिल्पसम्बन्धिनी तान्त्रिकी व्याख्या कृतास्ति।

बृहत्संहिता

बृहत्संहिता यद्यपि गुप्तकालस्य प्रसिद्धः खगोलशास्त्रिणा वराहमिहिरेण विरचितः खगोलविद्याया ग्रन्थोऽस्ति किन्त्वत्र स्थापत्यविज्ञानस्यापि निरूपणं दृश्यते। ग्रन्थेऽस्मिन् जलविद्या-अश्वविद्या-वर्षाविद्या-छन्दःशास्त्रादीनां विषयाणां संक्षिप्तविवरणं वैज्ञानिकरीत्या विहितमस्ति। भारतीयस्थापत्यस्योद्भवं विकासञ्च प्रति ग्रन्थस्यास्यासामान्यं योगदानं वर्तते।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

थापत्यकलायै मूर्तिकलायै च समर्पिता: सन्ति। यथा वास्तुविद्याया: प्रासादलक्षणाध्याय:, प्रतिमालक्षणाध्याय:, वनसम्प्रवेशाध्याय:, प्रतिमाप्रतिष्ठापनाध्याय: । ग्रन्थेऽस्मिन् स्थापत्यकलाया: सम्बन्धिता: सर्वेऽध्याया: स्थापत्यविज्ञानस्य परिभाषया सहैव प्रारभ्यन्ते। ग्रन्थेऽत्र गृहसम्बन्धिनां वस्तूनां यथा-शय्यासनादीनां निर्माणसम्बन्धितं निरूपणं सम्पूर्णेऽध्याये कृतम्। यत्र विजयसार:- स्पन्दन-हरिद्रा- देवदारु- अञ्जन -आदीनामुल्लेखो विधीयते। यथा ï

असनस्पन्दनचन्दनहरिद्रसुरदारुतिन्दुकीशाला:।

कश्मर्यञ्जनपद्मकशाका वा शिंशपा च शुभा:।।

बृहत्संहिता, अ.७९.१

ग्रन्थकारेण प्रतिमानां विस्तृतं विवरणं वैज्ञानिकरीत्या प्रदत्तम्।

अन्यसंस्कृतसाहित्यम्

संस्कृतस्यान्येषु ग्रन्थेषु भारतीयवास्तुकलाया: विशदं स्पष्टञ्च वर्णनं प्राप्यते। शूद्रकेण विरचिते मृच्छकटिके वसन्तसेनाया भवनवर्णनम्, कालिदासकृतमेघदूते विशालाया: (उज्जयिन्या:), अलकापुर्याश्च वर्णनम्, माघ-कृते शिशुपालवधे द्वारकापुर्या:, युधिष्ठिरस्य, कृष्णस्य च भव्यस्य विशालस्य च राजप्रासादस्य सभाभवनस्य च वर्णनम्, बाणभट्ट-रचिते हर्षचरिते नैकेषां प्रकोष्ठानां, कादम्बर्य्यां दर्शकभवनस्य, तपस्विकुटीरस्य, सूतिकागृहाणां प्रासादानाञ्च रोचकं वर्णनं भारतीयवास्तुकलाया उत्कृष्टावस्थायाश्चित्रणं विदधाति। सूतिकागृहवर्णनं यथा कादम्बर्य्याम् ï

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ालाशून्येनासक्तबहुपुत्रिकालङ्कृतेन विविधनवपल्लानिवहानिरन्तरनिचितेन.....सर्वतोरक्षापुरुषैः परिवृत्तं सूतिकागृहमदर्शत्। कादम्बरी, पूर्वभागः-पृष्ठम्-२९५-८०

राजभवन-वर्णनम्

क्रमेण च यामावस्थितीभ......स्फीतमपि भ्रमन्नग्नलोकं राजकुलं विवेश। कादम्बरी.पूर्वभागः, पृष्ठम्-३३२-५०

व्यतिक्रम्याभ्यन्तरावस्थितम् कादम्बरी.पूर्वभागः, पृष्ठम्-३५८

उपर्युक्तग्रन्थावलोकनेन विज्ञायते यत् प्राचीनकाले स्थापत्यकलान्तर्गतं नगरनिर्माणं, प्रासादनिर्माणमित्यादीनां वास्तुकलायां सविशेषं स्थानमभवत्।

वास्तु-शिल्पशास्त्रम्

वास्तुशास्त्रस्य विविधा विषया वेदे-रामायणे-महाभारते-पुराणेषु-साहित्ये च सम्प्राप्यन्ते तेषां विषये किञ्चित् निवेदनं पूर्वं कृतम्। वास्तुशास्त्रस्य शिल्पशास्त्रस्य वा नैके स्वतन्त्रा ग्रन्थाः सन्ति। समराङ्गणसूत्रधारः-अपराजितपृच्छा-मयमतं-मानसारः-विश्वकर्मप्रकाशः-वास्तुमण्डनादिका मण्डनविरचिता नैके ग्रन्थाः, क्षीरार्णवः-दीपार्णवः, शिल्परत्नाकरः-मनुष्यालयचन्द्रिका-मानसोल्लासः-वास्तुमञ्जरी-वास्तुसौख्यं-प्रमाणमञ्जरी-युक्तिकल्पतरुः-इत्यादीनां केवलं नामोल्लेख एवात्र विस्तरभयात् क्रियते। एतेषु वास्तुशास्त्रस्य मूर्तिविज्ञानस्य च विविधानां विषयाणां विवेचनं विस्तारपूर्वकं सप्रमाणं विवेचनं प्राप्यते। काश्यपशिल्पमपि तेष्वेकतमो महत्त्वपूर्णो दुर्लक्षितो ग्रन्थो वर्तते। एतेषु ग्रन्थेषु प्रायेण भूमिः (गृहं), प्रासादः (राजप्रासादो देवप्रासादश्च) यानानि-स्थलयानं जलयानं वायुयानं, शयनानि आसनानि च, नगररचना, ग्रामरचना, मार्गाः महामार्गाः, जलाशयानि, उद्यानानि-इति सर्वोपुयक्ता विषया विवर्णिताः सन्ति। अस्य शास्त्रस्य मुख्योद्देशः सर्वेषां सुखं स्वास्थ्यं च भवेत्। पर्यावरणरक्षा च

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to
Unlimited Pages and Expanded Features

क्षणं भवेत्। शत्रुतो विविध दुर्गरचनाभिः रक्षणं स्यात्। प्राचीनकाले-यज्ञयागादीनां कृते यज्ञशाला गृहशाला वेदीनिर्माणं च क्रियते स्म। आधुनिककाले अपि योग्यवास्तोर्निर्माणं स्यात्, यस्मिन् सूर्यप्रकाशः शुद्धवायुः पवित्रं जलं समीचीनं वातावरणं भवेत्, येन च सर्वेषां स्वास्थ्यं शारीरिकं मानसिकं च सुयोग्यं स्यात्, इति सर्वकल्याणस्य मार्गदर्शनं वास्तुशास्त्रद्वारा भवेदिति काश्यपादिमहर्षीणां प्रयोजनमासीत्।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# ीयं प्रकरणम्

# काश्यपस्य काश्यपशिल्पग्रन्थस्य च परिचयः

## द्वितीयं प्रकरणम्

काश्यपस्य काश्यपशिल्पग्रन्थस्य च परिचयः

### प्रस्तावना

प्रस्तुतशोधनिबन्धस्य विषयः काश्यपशिल्पसम्बद्धो वर्तते। काश्यपमहर्षिणा विरचितमथवा तन्नाम्ना विख्यातं शिल्पशास्त्रं काश्यपशिल्पनाम्ना व्यवह्रियते। कश्यपस्यापत्यं पुमान् काश्यपः। कश्यपमहर्षेर्वंशो वेदकालतः प्रसिद्धः। प्राचीनवाङ्मये वेदात् प्रारभ्य काश्यपवंशस्य विवरणं प्राप्यते। काश्यपवंशीयाः काश्यपगोत्रजाः कथ्यन्ते। समग्रे प्राचीनसाहित्ये कश्यप-काश्यपस्य वैविध्यपूर्णं प्रदानमस्ति। कश्यं पिबति-इति कश्यपः। कश्यशब्दस्य विविधा अर्थाः सन्ति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ति कश्यपः। कश्यशब्दस्य वायुपुराणे (६५.११४-११५) मद्यमित्यर्थः। शरीरमिन्द्रियाणामधिष्ठानं तस्योपभोक्ता जीव एव कश्यपः। इत्यध्यात्मिकोऽर्थोऽपि प्राप्यते। प्राचीनचरित्रकोष- न्यू केटलोगस् केटलोगोरम्-इत्यादिषु ग्रन्थेषु काश्यपविषयकं वैदिकं पौराणिकं च विवरणं तथा तस्य समग्रे संस्कृतसाहित्ये किं प्रदानं वर्तते, इति विषये विस्तृतं विवरणं सम्प्राप्यते। काश्यपशिल्पस्याध्ययनात् पूर्वं काश्यपस्य जीवनस्य प्रदानस्य च विषये यथोपलब्धा सामग्री प्रस्तूयते। यतो हि काश्यप एतादृशो महत्त्वपूर्णो महर्षिरस्ति, तस्य नाम्नः प्रसिद्धेश्च समुपयोगः केनापि काश्यपवंशीयेन लिखितेऽस्मिन् शिल्पग्रन्थे कृतः। अत इदं काश्यपशिल्पनाम्ना प्रसिद्धम्।

कश्यपः-

कश्यपो मारीच ऋग्वेदे मन्त्रद्रष्टृरूपेण वर्तते। (ऋ.१.९९, ८.२९, ९.६४, ६७. ४-६, ९१-९२, ११३-११४) )[४७] ऋग्वेदे वत्सारस्य कृते अवत्सारः, नैध्रुवस्य कृते निध्रुविः, अन्ये भूतांशः, रेभस्तथा वित्रिः - इत्यादयः कश्यपा इति।[४८] कस्यापि विस्तृतकुलस्य नाम। प्रजापतिद्वारा उत्पन्नाः सर्वाः प्रजाः कश्यपकुलोत्पन्नाः। (श.ब्रा.७५.१.५)-[४९] तैत्तिरीय-आरण्यके एतत् सर्वसाधारणं पैतृकं नाम। (तै.आ. २१८, १०.१.८) अगस्त्यपरशुरामयोरिव एषोऽपि दक्षिणस्य निवासी मन्यते।[५०] - श्रीमद्भागवते कलायाः पुत्ररूपेण कश्यपस्योल्लेखः प्राप्यते। कला मरीचि-ऋषेः पत्नीरासीत्। तस्याः पुत्रद्वयं कश्यपस्तथा पूर्णिमा। (भा.३.२४.२२)[५१]- वंशब्राह्मणे अग्नेः शिष्यः। तस्य शिष्यो विभाण्डकः। (वं.ब्रा.२), )[५२]- जैमिनीय-उपनिषद् -ब्राह्मणग्रन्थे "त्र्यायुषम्" मन्त्र आयुवृद्धयर्थं प्रार्थनासमये निर्देशोऽस्ति।

---

१. प्रा.च.को.पृ.सं-१३१
२. प्रा.च.को.पृ.सं-१३१
४९. प्रा.च.को.पृ.सं-१४१
५०. प्रा.च.को.पृ.सं-१४१
५१. प्रा.च.को.पृ.सं-१२२
५२. प्रा.च.को.पृ.सं-१२२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तथा मन्त्रकाररूपेणापि कश्यपस्योल्लेखो बृहदारण्यक-उपनिषदि प्राप्यते। (बृ.उ. २.२.४)[५३] - अस्य वसिष्ठेन सह गाढः सम्बन्ध आसीत्। सप्तर्षिष्वेकस्तथैव प्रजापतिष्वेक आसीत्।[५५] किन्तु सप्तर्षि-सूच्यां कश्यपस्य स्थाने भृगोस्तथा मरीचेर्नामोल्लेखः प्राप्यते।

धर्मशास्त्रकाररूपेण कश्यपः-

अष्टादश-उपस्मृतिकारेष्वेकः। (स्मृतिचन्द्रिका, १, सरस्वतीविलास, पृ-१३) तथैव पाराशरधर्मसूत्रेऽपि धर्मशास्त्रस्य कर्ता - इत्युल्लेखः कृतोऽस्ति। किन्तु याज्ञवल्क्यस्मृत्यामस्य निर्देशो नास्ति।[५६] - काश्यपस्मृतिनामक एकः स्वतन्त्रो ग्रन्थोऽस्ति। ग्रन्थे गृहस्थानां कर्तव्यं तथा विभिन्नप्रकाराणां प्रायश्चित्तादिकार्याणि वर्णितानि। कश्यपनामकस्य धर्मशास्त्रकारस्योल्लेखो बौधायनसूत्रे लभ्यते। (१.२.२०) किन्तु स तथैष भिन्नभिन्नोऽस्ति समानो वैतद्विषये निश्चिता सूचना प्राप्ता नास्ति।[५७] व्याकरणाचार्यः पाणिनिनास्योल्लेखः कृतोऽस्ति। (८.४.६७) कश्यपः शिल्पकारस्तथा शिक्षाकारोऽप्यासीत्।[५८] चरकसंहितायां कश्यपस्य नाम्ना केचन पाठा लभ्यन्ते। भूतप्रेतादिविषयेष्वपि केचन मन्त्राः सन्ति।[५९] अष्टादशज्योतिषकारेष्वैकः। अस्य कश्यपसंहिता प्रसिद्धास्ति। अस्यां संहितायां प्रायः १५०० श्लोकाः सन्ति। ग्रन्थेऽस्मिन् सूर्योपरि प्राप्तचिह्नानां तथा दूरवीक्षणादियन्त्राणामुल्लेखोऽस्ति।[६०]

काश्यप अकृतव्रणः

---

५३. प्रा.च.को.पृ.सं-१२२
५४. प्रा.च.को.पृ.सं-१२२
५५. म.अनु.१४१
५६.प्रा.च.को.पृ.सं-१४२
५७.प्रा.च.को.पृ.सं-१४२
५८.प्रा.च.को.पृ.सं-१४२
५९.प्रा.च.को.पृ.सं-१२८
६०.प्रा.च.को.पृ.सं-१४२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ज्ञायते। यतो हि विष्णुपुराणे (३.६.१९) वायुपुराणे (६१.५६.५८) तथा चान्द्रवृत्त्यां (३.३.७१)- इत्यादिषु पुराणसंहिताकाररूपेण वर्तते। चान्द्रवृत्त्यां तु काश्यपीयपुराणसंहिताया निर्देशो वर्तते।[६१]

काश्यपः कणादः

वैशेषिकसूत्राणां प्रणेता कणादो वर्तते। तस्यैकं नाम काश्यप इति श्रूयते।

ज्योतिषसंहिताकारः काश्यपः

ज्योतिषशास्त्रस्याष्टादशप्रवर्तकेषु काश्यपस्य ज्योतिषसंहिताकाररूपेण वर्णनं वर्तते। अस्य ग्रन्थस्य संपादनपूर्वकमध्ययनं दीपक आरभडिया महोदयेन मम गुरोः प्रो.एम.एल.वाडेकरमहोदयस्य मार्गदर्शनेन कार्यं कृतं वर्तते। काश्यपपटलः, काश्यपसिद्धान्तः, काश्यपजातकम् - इति विविधा ज्योतिषग्रन्थाः समुपलभ्यन्ते। बलभद्रविरचिते होरारत्ने काश्यपजातकस्योद्धरणं प्राप्यते।[६२]

काश्यपस्य छन्दःशास्त्रम्

काश्यपः छन्दःशास्त्रस्यापि प्रवर्तकः। छन्दसां नाम्नां विषये तथा च यतिविषये तस्य भिन्ना विचारा आसन्। पिङ्गलस्य छन्दःसूत्रे (७.१०.३४.९), अग्निपुराणे (अ.३३६-२२) केदारकृतवृत्तरत्नाकरे च काश्यपस्य छन्दप्रवर्तकत्वेन समुल्लेखो वर्तते। वसन्ततिलका छन्दसः नाम तेन सिंहोन्नता - इति निर्दिष्टम्।[६३]

काश्यपः कृषिशास्त्रस्यापि प्रवर्तकः

---

६१. N.C.C. Page-१४४
६२. N.C.C. Page-१४६
६३. N.C.C. Page-१४५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वर्तक:। तेन रचितं कृषिशास्त्रं ज्ञायते। काश्यपस्य काम्यपशुसूत्रमपि प्राप्यते। मूलशान्तिविषयको ग्रन्थ: काश्यपेन लिखित:। वटोदरग्रन्थागारे लभ्यते। ओमकारसर्वेश्वरनामको ग्रन्थ: काश्यपेन लिखित उपलभ्यते। काश्यपेन लिखितस्य सुवर्णतन्त्रं नामको ग्रन्थो भाण्डारकरप्राच्यविद्यामन्दिरे पूनानगर्य्यां वर्तते।[६४]

काश्यपो भक्तिसूत्रप्रवर्तक:

शाण्डिल्यभक्तिसूत्रेषु (२.१.३) भक्तिसूत्रप्रवर्तकत्वेन काश्यपस्य निर्देशो वर्तते।[६५]

काश्यपगीता

महाभारते वनपर्वणि (३१-३५-५२) काश्यपगीता नाम्नी एका गीता वर्तते। तस्यां गीतायां युधिष्ठिरो द्रौपदीं क्षमाविषयकं विवेचनं प्रस्तौति।

काश्यपपरिवर्त:

बौद्धधर्मस्य महायानसूत्रेषु ४३ तमो रत्नकृतसंघस्य काश्यपपरिवर्तो नामको ग्रन्थो वर्तते। अत्र काश्यप: प्रवक्ता वर्तते तथा च बुद्धस्य शिष्योऽपि। अस्य ग्रन्थस्य प्रथमं चीनभाषायां भाषान्तरं १७८-१८४ खिस्ताब्दमध्येऽभवत्।[६६]

काश्यपो नामको बौद्धभिक्षु:

---

६४. N.C.C. Page-१४५
६५. N.C.C. Page-१४५

६६. N.C.C. Page-१४६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

१२०० शताब्द्यां समभवत्। तस्य बालबोधना नाम्नी चान्द्रव्याकरणस्य वृत्तिवर्तते सा तु श्रीलङ्कामध्येऽतिप्रसिद्धा। अन्यत्र तस्या उल्लेखो महाभाष्यकारेण कृतः।[६७]

काश्यपसंहिता/काश्यपपाञ्चरात्रम्

पञ्चचरात्रागमस्य भारद्वाजसंहितायां १०८ संहितानां निर्देशो वर्तते। तासु संहितासु काश्यपसंहिता एकतमा वर्तते।[६८]

काश्यपाप्री

काश्यपाप्री नामक एको ग्रन्थः, यस्मिन् वैदिक आप्रिसूक्तविषयकं विवेचनं वर्तते।[६९]

काश्य(पा)रण्यमाहात्म्यम्

काश्यपारण्यमाहात्म्यं नामकः पौराणिको ग्रन्थो वर्तते। स तु स्कन्दपुराणस्य सनत्कुमारसंहिताया भागोऽस्ति।[७०]

काश्यपीयवैखानसम्

काश्यपसंहिता नामकः वैखानसग्रन्थो वर्तते, तत्र त्रीणि काण्डान्यासन्। सत्यकाण्डं, तर्ककाण्डं, ज्ञानकाण्डं च। सर्वे मिलित्वा ६४००० श्लोका आसन्। अधुना केवलं ज्ञानकाण्डस्य १०८ अध्यायाः सम्प्राप्यते। अस्य समयः प्रायेण ८०० तः १००० खिस्ताब्दं वर्तते।[७१]

---

६७. N.C.C. Page-१४६
६८. N.C.C. Page-१४९
६९. N.C.C. Page-१४९
७०. N.C.C. Page-१४९
७१. N.C.C. Page-१४९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

काश्यपशिल्पं- अंशुमत्काश्यपीयं- इत्यादयः काश्यपग्रन्थाः शिल्पशास्त्रस्य सन्ति। शैवागमस्य २८ आगमग्रन्था बहुप्रसिद्धाः। तेषु अंशुमदागमं वर्तते। तदेव काश्यपशिल्पमिति विद्वांसो मन्यन्ते।

काश्यपसंहिता

काश्यपसंहिता अथवा काश्यपीयं नामको विषतन्त्रविषयको ग्रन्थो वर्तते। तस्मिन् मन्त्रद्वारा विषनिराकरणस्य प्रयोगा वर्णिताः।[७२]

काश्यपस्योल्लेखो नारदीयशिक्षायां (१.४.११) नाट्यदेवस्य भारतीयभाष्ये वा सरस्वतीहृदयालङ्कारे, संगीतरत्नाकरे त्रिषु श्लोकेषूल्लेखः (११.२.३१) आर.ए.शास्त्री महोदयेन स्वदिनदर्शिकायां (३.२३९) लिखितोऽस्ति।

काश्यपशिल्पम्-

काश्यपस्य तथा काश्यपशिल्पग्रन्थस्य वास्तुशिल्पकारेषु स्थानमतिमहत्त्वपूर्णमस्ति। काश्यपशिल्पग्रन्थस्य कर्ता कश्यप ऋषिः।[१] तत्र काश्यपेति विशेषणात्। कश्यपेन प्रोक्तं काश्यपं तच्च तच्छिल्पं चेति। अयं चर्षिर्विष्णोर्नाभिकमलात्समुद्भूतस्य ब्रह्मणो नप्ता यज्ञे सोमरसपानात्कश्यपेत्यभिधानं प्राप्तवान्। तदुक्तं मार्कण्डेयपुराणे ï

ब्रह्मणस्तनयो योऽभून्मरीचिरिति विश्रुतः।

कश्यपस्तस्य पुत्रोऽभूत्कश्यपानात्स कश्यपः।।

काश्यपशिल्पग्रन्थस्य परिचयः

७२. N.C.C. Page-१४९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…श्यपशिल्पं नामको ग्रन्थ आनन्दाश्रमसंस्थानात्पुनानगरात् प्रकाशिताऽभवत्। काश्यपशिल्पं नामको ग्रन्थोऽयं वझे उपाधीयुक्तेन श्रीकृष्णरायेन तथा श्रीमाता अनंत आप्टेद्वारा संशोधितो वर्तते। ग्रन्थेऽस्मिन् वास्तु/शिल्पशास्त्रस्य विषये चर्चा कृतास्ति। प्रत्येकप्राणिनः सुखसाधनाय जनानामुपकाराय वास्तुशास्त्रस्य विषये कश्यपो देवाधिदेवमपृच्छत्। भगवता शङ्करेण जिज्ञासुं कश्यप-ऋषिं ज्ञानं वितीर्यते। तदनन्तरं कश्यप-ऋषिणा सुबोधप्रदवाक्यैर्विस्तारपूर्वकमनुष्टुप्छन्दे गीर्वाणगिरायां रचना कृता।

काश्यपशिल्पनामके ग्रन्थे ८८ अध्यायाः सन्ति। अत्राध्यायस्थाने पटलशब्दस्य प्रयोगो वर्तते। यथा प्रथमः पटलः, द्वितीयः पटलः-इत्यादिः। ........कश्यपसंहिता नामको ग्रन्थो संपादकेन मद्रासंस्कृतपुस्तकालयाद् लब्धस्तथैव गुजरात-सौराष्ट्र-मालवदेशेषु केचन खण्डा लब्धाः। तेषां सर्वेषामुपयोगं कृत्वा ग्रन्थस्य ग्रन्थकारेण प्रकाशनं विहितम्। तथापि ग्रन्थस्य पाठो नैकस्थानेषु त्रुटितः, अशुद्धः, भ्रष्टो वर्तते। तेनार्थनिर्धारणे काठिन्यमनुभूयते। यद्यपि डॉ.आर.पी.कुलकर्णीमहोदयेन मराठी-अनुवादकरणे प्रयत्नः कृतः तथापि मूलग्रन्थस्य पाठस्य शुद्धसंपादनाभावात् नैकसन्दर्भेष्वर्थनिर्धारणं दुश्चप्रचं प्रतिभाति। मयापि यथामति समुपलब्धग्रन्थानां समुपयोगं कृत्वार्थनिर्धारणे प्रयत्नः कृतः। बहुप्रयासेन सुसंगतं विवेचनं प्रस्तुतम्। यद्यपि मूलपाठोऽनुष्टुप्-छन्दोयुक्तः, तथापि श्लोकेष्वार्षप्रयोगा दरीदृश्यन्ते। केवलं छन्दोबद्धग्रन्थाः स्मरणार्थमतीवोपयुक्ताः सन्ति। तथा च ग्रन्थलेखनेऽपि ग्रन्थकाराय सारल्यं प्रतिभाति।

वास्तुशास्त्रीयग्रन्थेषु काश्यपशिल्पमत्यंतं महत्त्वपूर्णो ग्रन्थोऽस्ति। ग्रन्थस्य कालनिर्णयोतीव कठिनः, कुत्राप्यस्योल्लेखो न प्राप्यते। बृहत्संहितायां तथा विश्वकर्मप्रकाशे वास्तुशास्त्र-आचार्याणामावल्यां कश्पस्योल्लेखो विद्यते। अन्यत्र कश्यपस्योल्लेखो नास्ति। अयं ग्रन्थो अंशुमद्भेदागमरूपेणाप्युपलभ्यते। शैवागमस्यैकतममागममिदम्। काश्यपशिल्पस्य समयविषये कथनमतीव कठिनमस्ति। ग्रन्थेऽस्मिन् शैवप्रभावः स्पष्टतया दृश्यते। किन्तु जैन-

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्रायेणान्ये ग्रन्थकारा जैन-बौद्धमूर्तीनां विषये लिखन्ति। जैनशब्दस्य प्रयोगः केवलमेकस्मिन् स्थाने एव काश्यपशिल्पे वर्तते। (सन्दर्भ आपवो) नवग्रहाणां तथा दशावतारमूर्तीनां केशवादि -विष्णुमूर्तीनां विशिष्टं विवेचनं नास्ति। काश्यपशिल्पसमये प्रायेणैतेषां बहु प्रचारो नासीत्। प्राचीनसमये शैवधर्मस्य लिङ्गपूजायाश्च विशेषेण प्रचारो दृश्यते। गणेशस्यापेक्षया विनायकस्य विवेचनमत्र प्राप्यते। शिवपार्वत्या साकं स्कन्दमूर्तेर्विशेषमहत्वं वर्तते, न तथा शिवपुत्रगणेशस्य। नन्दीपूजाया महत्त्वं शिवेण साकं निष्चप्रपंच दरीदृश्यते । बृहत्संहितायां नैकवारं काश्यपस्योल्लेखो वर्तते। एतत् सर्वं ग्रन्थस्य प्राचीनत्वं प्रायेण बृहत्संहिता पूर्वकालत्वं सूचयति। बृहत्संहिताया भट्टोत्पलटीकायां काश्यपस्य वास्तुशिल्पमूर्तिविषयकाः सन्दर्भाः प्राप्यन्ते। प्रायेण काश्यपशिल्पस्य बहु प्रचारो दक्षिणभारते स्यात्, इत्यपि प्रतीयते। महाराष्ट्रे गुर्जरे च स्कन्दपूजाया अनन्तरकाले बहु प्रचारो नास्ति।

काश्यपशिल्पस्य प्रथमाध्यायस्य प्रारम्भो मङ्लश्लोकेन भवति। मङ्लश्लोके ग्रन्थकारो महादेवं प्रणमति। तदनन्तरं ग्रन्थसंदर्भे कश्यप-महादेवसंवादः - गृहारम्भः ï तिथिः ï मासाः ï नक्षत्राणि ï राशिः - लग्नविचारः - गृहस्थानम् ï वीथिविचारः ï भूमिपरीक्षा ï वर्णानुसारं शुभभूमिः ï बलिःï अधिग्रहणम् ï भूमिकर्षणं ï दिक्परिच्छेदनम् ï वास्तुपूजा ï पदविन्यासः, बलिः ï इत्यादिविषयाणां चर्चा वर्तते। प्रथमेऽध्याये पञ्चसप्ततिश्लोकाः सन्ति।

द्वितीयेध्याये द्वात्रिंशत्श्लोका वर्तन्ते। अध्यायेऽस्मिन् प्रसादवास्तुः ï पदविन्यासः ï वास्तुपुरुषोत्पत्तिः ï वास्तुपुरुषस्याङ्गेषु स्थितदेवतानां वर्णनं प्राप्यते।

वास्तुपदविन्यासो वास्तुविद्याया अत्यन्तं महत्त्वपूर्णमङ्गं विद्यते। यदा वयं ग्रामस्य नगरस्य राजप्रासादस्य गृहस्य वा निर्माणार्थं चिन्तयामः, तदा प्रप्रथमं महत्त्वपूर्णं कार्यं वास्तुपदविन्यासस्य करणीयम्। वास्तुपदविन्यासे विभिन्नदेवतानां (ऊर्जा)स्थाननिर्धारणं कुर्वन्ति। तेषां स्थानानि पदमिति कथ्यते। प्रत्येकपदस्यैको देवो भवति। स पद-देवता कथ्यते।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सारं पदनिर्माणं करणीयम्। यथा जलस्य स्थानमाप आपवत्सस्य वा पद एव भावितव्यम्। गृहस्वामेः स्थानं कस्मिन् पदे, पुत्रस्य पुत्र्या विद्यायाश्च स्थानं कुत्र ? - इत्यादि विषयाणां निर्धारणं पदविन्यासस्याधारेणैव कर्तुं शक्यते। अतो वास्तुपदविन्यास एका महत्त्वपूर्णा प्रक्रियास्ति।

तृतीयाध्यायस्य प्रारंभो वास्तुहोमेन भवति। वेदीनिर्माण-पूजन-हवनादीनां वर्णनं ग्रन्थकारेण कृतमस्ति। अध्यायेऽस्मिन् अष्टादशश्लोकाः सन्ति।

चतुर्थेऽध्याये प्रथमेष्टका ï भूमिः ï विभिन्नसूत्राणि ï मण्डपः ï भित्तिः- स्तम्भः ï पाषाणानां वर्गीकरणम् ï प्रथमेष्टकायाः पूजनम् - द्वारस्तम्भादीनां चर्चा विहिता वर्तते। एकपञ्चाशत्श्लोकाः सन्ति।

पञ्चमेऽध्याय उपपीठस्य चर्चा कृतास्ति ग्रन्थकारेण। भवनस्य वा स्तम्भस्याधोभागमुपपीठं कथ्यते। तस्योर्याधिष्ठानादीनां निर्माणं भवति। उपपीठानामनेके प्रकारा भवन्ति। तस्य रचनानुसारं नाम निर्धारणं भवति। भिन्न-भिन्नदेवानां मन्दिराणां कृत उपपीठस्य प्रयोगं कुर्वन्ति।

षष्ठेऽध्याय उपपीठ-निर्गम-प्रतिभद्र-प्रतिसुन्दर-कल्याणिकादीनां वर्णनमस्ति।

काश्यपशिल्पस्य सप्तमे पटले नाल-लक्षणस्य विषये चर्चा विद्यते। सम्पूर्णेऽध्याये नाल-लक्षणस्य, नालस्य मान-विषये, आकृति-विषये, नालस्य विधिपूर्वकं स्थापनादिविषये चर्चा कृतास्ति।

स्तम्भलक्षणो नामकोऽष्टम-पटलोऽस्ति। पटलेऽस्मिन् स्तम्भः, स्तम्भ-शब्दानां पर्यायवाचिशब्दाः - यथा ï स्तम्भः, तलिपं, चरं, जंगमं, स्थाणुः, स्थूणादिः। स्तम्भस्य मानं, स्तम्भस्य दीर्घता-उन्नता, भिन्न-भिन्नस्तम्भाः यथा ï विशाल-स्तम्भः, निखातस्तम्भः,

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

, चन्द्रकान्तः, रुद्रकान्तः, शिवच्छन्दः, व्यालपादुकः, गजपादः, शुण्डुपादः, पिण्डपादः, छत्रखण्डः, श्रीकण्ठः, श्रीवज्रादिः।

नवमे पटले बोधिका-फलिका-घटादीनां लक्षणं तथा मान-आकारविषये वर्णनं प्राप्यते।

दशमे पटले वेदिका-लक्षणं तथा तस्यास्तिस्रः प्रकाराः - कनिष्ठा-मध्यमा-उत्तमा च। वेदिकायाः सुशोभनम् -इत्यादिविषयाणां चर्चा विहिता।

जालकविधानस्य वर्णनमेकादशे पटले प्राप्यते। जालकलक्षणम्, प्रकाराः - गोनेत्र-हस्तिनेत्र-नन्द्यावर्त-ऋजुक्रिया-पुष्पकर्णसकर्ण-इत्यादिः। प्रकाराणां लक्षणानि, जालके छिद्रं न करणीयम्, कुत्र कथं स्थापनीयम् - इत्यादिविषये महर्षिकश्यपेन वर्णनमकृतमस्ति।

तोरण-कुम्भलतालक्षणं द्वादश-पटले वर्तते। तोरण-लक्षणेन सह त्रयप्रकाराणां वर्णनं, यथा ï पत्रतोरणं-मकरतोरणं-चित्रतोरणम्।

त्रयोदशपटले वृत्तस्फाटितालक्षणं वर्ण्यते। चतुर्दशपटले स्तम्भतोरणविधिस्तथा लक्षणस्य चर्चा कृतास्ति। कुम्भस्थल-लक्षण-नामके पञ्चदशेऽध्याये कुम्भस्थल-लक्षणस्य विषय उल्लेखो दृश्यते। वृत्तस्फुटितलक्षणस्य षोडश-पटल ऋषिणा वर्णनं कृतमस्ति। सप्तदशे पटले द्वारविन्यासस्य लक्षणस्योल्लेखो वर्तते। एतत् कार्यं सुनक्षत्रे शुभे वारे शुभहोरामुहूर्ते करणीयम्। प्रासद-मण्डप-गोपुरादीनां कृतेऽपि द्वारविन्यासोऽतीव महत्त्वपूर्णो वर्तते। द्वारविन्यासस्यानन्तरमष्टादश-पटले कम्प-द्वारस्य (वातायनस्य) लक्षणं प्रदत्तम्। कम्प-द्वारं कुत्र कथं करणीयमिति वर्णनं प्राप्यते। नवदश-पटले प्रस्तरस्य लक्षणं, मानं, दीर्घतादिकं-इत्यादीनां विषयाणां चर्चा विहितास्ति। गलभूषण-लक्षणं विंशति-पटले वर्तते। नागर-पद्धत्यां चतुष्कोणं, द्राविड-पद्धत्यां गलमष्टकोणं तथा वेसरे वृत्ताकारं भवति। अतो गलस्याकारस्तत्पद्धत्यनसारं स्वीकरणीयः। एकविंशेपटले शिखर-लक्षणस्य वर्णनं लभ्यते। शिखरोऽपि नागर-द्राविड-वेसरे तस्य पद्धत्यनुसारमेव करणीयः। द्वाविंशे पटले नासिका-लक्षणं

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...त्रिंशे पटले प्रासदस्य लक्षणं, मानं, पर्यायवाचिशब्दानां वर्णनं प्राप्यते। प्रासद-सदन-सद्म-हर्म्य-धाम-निकेतन-मन्दिर-भवन-वास-गेह-दिव्य-विमान-आश्रय-आस्पद-आधार-प्रतिधिष्ण्यादिकाः प्रासादस्य (हर्म्यस्य) पर्यायवाचिशब्दाः सन्ति। हस्तद्वारा मानं तथा कीदृशः हस्तस्य प्रयोगः- इत्यादीनां वर्णनमृषिणास्मिन् पटले कृतमस्ति। मानसूत्रादिनामके चतुर्विंशपटले विशेषरूपेण भिन्न-भिन्नप्रकाराणां भवनानां मानसूत्र-लक्षणानि प्रदत्तानि सन्ति। चतुस्तलादाराभ्य द्वादश-तलपर्यन्तं भवनं छन्द-हर्म्यं कथयति। अत्र भवनानां मानविषये चर्चा कृताऽस्ति - यथा प्रथमतलस्य भवनस्य मानं, द्वितीयतलस्य भवनस्य मानम्-इत्यादिः।

आयादि-लक्षणनामके पञ्चविंशपटल आय-व्ययादेस्तथा नागरादिमानस्य विषये चर्चा कृतास्ति। आयः सर्वदा व्ययादधिको भवेत्। यथा देहिनां देहं वात्त-पित्त-कफैर्निर्मितमस्ति, तथैव विश्वस्य सात्त्विक-राजस-तामसगुणाः प्रदर्शिताः सन्ति। तदनुसारं देशो गुणधर्मानुसारं विभाग-त्रये विभक्तोऽस्ति। हिमालयादारभ्य विन्ध्याञ्चल-पर्वतपर्यन्तं वसुन्धरा सात्त्विकी, विन्ध्याञ्चलसमीपात् कृष्णावेण्णानदीपर्यन्ता भूमी राजसी कथ्यते। कृष्णा-वेण्णातः कन्याकुमारीपर्यन्तं भूमिस्तामसी। सात्त्विक-प्रदेशे नागरपद्धतिः। तामस-प्रदेशे वेसरपद्धतिस्तथा राजस(द्राविड)देशे यत्र कामदेवस्य पूजा भवति, तत्र राजस(द्राविड)पद्धतिः।

काश्यपशिल्पस्य षड्विंशपटले सम्पूर्णो गर्भविन्यास-विधिर्वर्णितोऽस्ति। प्रासादो गेहं च देहः कथ्यते। तथैव वास्तुं गर्भः कथ्यते। सर्वविधप्रयत्नैर्गर्भन्यासः करणीयम्। मनुष्याणां कृते गर्भन्यासस्य नाम श्रीपर्णस्तथा देवालयानां कृते श्रीकरनामको गर्भविन्यासो भवति। गर्भविन्याससमये पूजा-होमादिकं शुभनक्षत्रे वारे मुहूर्ते चावश्यं करणीयम्।

सप्तविंशपटलादारभ्यैकचत्वारिंशत्पटलपर्यन्तमेकतः षोडशतलपर्यन्तं वर्णनमृषिणा कश्यपेन काश्यपशिल्पे विहितमस्ति। शुभाशुभलक्षणपरीक्षणानन्तरमेव भवननिर्माणं विधेयम्। सूर्यादिग्रहाणां स्थितिग्रहदशा-योगादीन् सम्यग्विचार्यानुकूलसमये भवनस्य निर्माणं कर्तव्यम्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...धिपतयो निवसन्ति, इयं प्राचीना मान्यता वर्तते। अतः शुभमुहूर्ते कार्यारम्भः करणीयः। भवनानां दैर्घ्यं, भवनानां परिमाणं, स्तम्भानां परिमाणं, भित्तिः, सज्जीकरणम् - इत्यादीनां वर्णनं प्राप्यते।

द्विचत्वारिंशत्पटले मूर्धेष्टकाविधानं लभ्यते। अत्र मूर्धेष्टकायाः स्थापना कथं करणीया -इति सम्पूर्णा विधिः प्रदत्तोऽस्ति। पूजा-होम-दानादीनामुल्लेखोऽपि कृतोऽस्ति। परिमाण-आकारस्याप्युल्लेखोऽस्ति।

काश्यपशिल्पस्य त्रिचत्वारिंशत्पटले प्राकारलक्षणस्य प्रतिपादनं कृतमस्ति। अस्मिन् पटले त्रिनवतिश्लोकाः सन्ति। प्राकारस्योपयोगः शालाया वा प्रासादस्य रक्षायास्तथा शोभायाः कृते भवति। प्राकारस्य हस्तपरिमाणः, प्राकारस्य भित्तिः, भिन्न-भिन्नभवनानुसारमाकारः, दैर्घ्यम्-उन्नता, भवने पदानुसारं कस्मिन् स्थाने किं करणीयम्, यथा ï अग्निपदे महानसः, नैर्ऋत्यकोणे शास्त्रागारः, वायुकोणे शयन-स्थानम्, ईशान-कोणे योगशाला, आग्नेय-दक्षिण-दिशाया मध्यभागे सूतिकागृहं (प्रसूतिगृहं) नैर्ऋत्यस्यैवं पश्चिमस्य मध्यभागे ग्रन्थालयः, प्राकारस्य बहिर्भागस्य रचना-इत्यादिः।

चतुश्चत्वारिंशत्पटले मण्डपस्य लक्षणं प्रददाति। प्रासादे एकतलस्य मण्डपोऽस्ति चेत् स मुखमण्डपः कथ्यते। देवप्रासादस्य कृतेऽष्टदिक्षु मुखमण्डपो भवति। प्रासादस्य पुरतश्चत्वारो मण्डपाः करणीयाः। हस्तत्रयादारभ्य द्वौ-द्वौ हस्तौ वर्धयित्वा नवदशहस्तपर्यन्तमाभासमण्डपो नव प्रकाराणां भवति। छन्दोमण्डपः, जातिमण्डपः, मण्डपस्य स्तम्भाः, चतुर्दश मण्डपानां प्रकाराः, चतुरस्रमण्डपः, आयताकारमण्डपादीनां वर्णनमकृतमस्ति। (आयताकारमण्डपस्य चतुर्दशप्रकाराः सन्ति।) पटलेऽस्मिन् सप्तनवतिः श्लोकाः सन्ति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

लक्षणं वर्णयति। तस्य द्वारशोभा-द्वारशाला-द्वारप्रसादः-द्वारहर्म्य-द्वारगोपुरम् - इति क्रमेण नामानि सन्ति। प्रथमतलादारभ्य सप्ततलपर्यन्तं गोपुरस्य वर्णनं प्राप्यते। गोपुरस्यालंकारादीनां वर्णनमपि प्राप्यते। पञ्चचत्वारिंशत्पटले १४४ श्लोकाः सन्ति।

परिवारनामके षड्चत्वारिंशत्पटले सम्पूर्णपरिवारस्य विधिस्तथाष्ट-षोडश-द्वात्रिंशत्परिवार-देवतानां क्रमेण चर्चा कृतास्ति। अन्तर्मण्डले सम्पूर्णपरिवारस्य योजना करणीया। अन्तर्हारायामष्ट परिवारदेवता भवन्ति। षोडश परिवारदेवता यदि भवन्ति चेत् मध्यहारपर्यन्तं योजना करणीया। द्वात्रिंशत्परिवार-देवाः सन्ति, तर्हि चतुर्थप्राकारपर्यन्तं योजना करणीया। मूलप्रासादस्य पूर्वदिशमारभ्य देवतानां स्थापनायाः क्रमेण प्रारंभः करणीयः। यथा ï पूर्वस्यां नन्देः स्थापना, आग्नेयकोणेऽग्नेः, दक्षिणदिशायामग्निदुग्धस्य वा गणेशस्य स्थापना करणीया। यद्येकैव मूर्तिरस्ति चेत् दक्षिणे नैऋत्यां वा विघ्न-विनायको गणेशो भवति। कुमारः कार्तिकेयः पश्चिमदिशायाम्। वायव्यदिशायां ज्येष्ठागौर्य्या मूर्तेः स्थापना। उत्तरस्यां केशवस्य स्थानं भवति, अथवा तत्र कात्यायनी भवेत्। ईशान-दिग्भागे सूर्यस्य मूर्तिः, अथवा प्रतिमायाः पीठं (पृष्ठभागो) भवति। पश्चिमा दिगिन्द्रस्य। आग्नेय्यामीशानदिशायां स्थापिता मूर्तयः पश्चिमाभिमुखा भवन्ति। विष्णोर्मुखं पूर्वं दिशायाम्। उत्तरदिशायां दुर्गायाः, अथवा तस्या मुखं दक्षिणदिशायां करणीयम्। सौम्यमुद्रायुक्ता सप्तमातृका यद्युपदिशायां भवन्ति चेत्, तासां मुखं पश्चिमदिग्भागं प्रति भवति। सप्तमातृकाया वामभागे स्थापितस्य गणेशस्य मुखं पूर्वदिशां प्रति करणीयम्। वीरभद्रः-विनायकःï सप्तमातृका- ब्राह्मी-ईश्वरी-कौमारी-वैष्णवी-वाराही-इन्द्राणी-चामुण्डा - इत्यादीनां लक्षणानि प्रदत्तानि सन्ति। पटलेऽस्मिन् पञ्चाशितिश्लोकाः सन्ति।

काश्यपशिल्पे विनायललक्षणनामको सप्तचत्वारिंशः पटलोऽस्ति। अस्मिन् पटले एकत्रिंशत्- श्लोकाः सन्ति। अस्मिन् पटले कश्यप-ऋषिणा विनायकस्य

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्ति। शरीरस्यावयवानां मानं तथैव सम्पूर्णशरीरस्य दध्यमुन्नती – इत्यादीनां वर्णनमस्ति।

काश्यपशिल्पे परिवारविधिरष्टचत्वारिंशत्पटले वर्णितः। देव्या देवानां च लक्षणानि प्रदत्तानि सन्ति। यथा पटलस्यारम्भः षणमुखलक्षणाद् भवति। ज्येष्ठादेवी-विष्णुः-अश्विनौ-पितरः ï वैवस्वतः ï रोहिणी ï निर्ऋतिः-अप्सराः-वरुणः-मरुत्-रुद्रः-भास्करः-सरस्वती-लक्ष्मीः – इत्यादीनां विस्तृतं लक्षणानि प्रदत्तानि सन्ति।

एकोनपञ्चाशत्तमपटले लिङ्गलक्षणस्य वर्णनं प्राप्यते। पटले शताधिक-पञ्चाशीतिश्लोकाः सन्ति। अत्र शिवलिङ्गस्य लक्षणं प्रदर्शितम्। संसारः, विषयाः, प्राणिनस्तथा सृष्टिः सम्पूर्णरूपेण यस्मिन् लयीभवति तल्लिङ्गं कथ्यते। संसारे निष्कलः, शान्तः, वाणीमनोऽतीतः, सर्वभूतानां मुक्तिदायकः, स्वात्मानः श्रेष्ठः, सर्वत्र व्याप्तः, रहस्यात्मकः-एतादृशः लोकानां प्रमुखोऽस्ति। तस्मादेव सृष्टिकाले शान्तितत्त्वस्योद्भवोऽभवत्। तत् शान्तेः शक्तिरुत्पन्ना। तया नादस्योत्पत्तिरभवत्। नादात् बिन्दोरुत्पत्तिर्जाता। नादं सादाख्यमुच्यते। सः बिन्दुमानेन विख्यातः। बिन्दुनैवेश्वरस्य जन्माभवत्। ईश्वरात् महादेवः, तस्मात् सृष्टिः, सृष्ट्या विष्णुः। तेन प्रासादाः, विशेषरूपेण त्रयो देवाः, त्रिंशद् ऋषयः, त्रिशतम् दानवाः, योनयश्च। सृष्टेरुत्पत्तिर्दर्शितवान्। सृष्ट्याः प्राक् त्रयो निष्कलाः (ईश्वरः, महादेवस्तथा नादः) सन्ति। नाद एवं बिन्दोर्मिश्रणं शिवः कथ्यते। लिङ्गस्याकृतिं वा नादमवगच्छन्तु। लिङ्गं शिवमयं भवति। विश्वस्य संकटनिवारणाय सर्वप्राणिहिताय देवादीनां हितार्थाय, ध्यानपूजानिमित्तकं योनिरेवं लिङ्गं, तेन सदाख्यस्य वा तत्त्वस्योदयोऽभवत्। सर्वेषामुत्पत्तेः कारणमभवद् लिङ्गम्। लिङ्गस्य त्रयः प्रकाराः सन्ति। चलं-अचलं-चलाचलं च। लिङ्गनिर्माणाय शिलालक्षणं-शकुनं-वर्ज्यशिला-शिलानां प्रकाराः ï बालशिला-युवतीशिला-वृद्धशिला-शिलापूजा तथा लक्षणोद्धारादीनां वर्णनं प्राप्यते।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पञ्चाशत्तमपटले चतुरधिकं द्विशतं श्लोकाः सन्ति। पटलस्य प्रारंभः प्रतिमालक्षणद्वारा भवति। अचलं-चलं-चलाचलं चेति प्रतिमायास्तिस्रः प्रकाराः सन्ति। मृत्तिका-वालुका- इत्यादिना तदनुसारं चाचलायाः प्रतिमाया निर्माणं भवति। पाषाणः-दारु-धातु-रत्नद्वारा निर्मिता प्रतिमा चलाचला ख्याता। लोहेन यस्या निर्माणं भवति सा प्रतिमा चलप्रतिमा उच्यते। अर्धचित्रं चित्रं चित्राभासमिति त्रिधा विभक्ताः प्रतिमाः। शरीरस्यार्धभागस्य च प्रतिबिम्बं दृश्यते तद् अर्धचित्रम्। सर्वावयवसंयुक्तं प्रतिबिम्बं चित्रं भवति। वस्त्रे भित्त्यां च यद् बिम्बं दृश्यते तत् चित्राभासमित्युच्यते। लोहस्यापेक्षया सुवर्णस्य प्रतिमा उत्तमा, रजतस्य मध्यमा तथा ताम्रस्य प्रतिमा कनिष्ठा भवति। शङ्करस्य प्रतिमायाः षोडशप्रकाराः प्रदर्शिताः। अनन्तरं सर्वेषां मानं, पूजाविधिः,काललक्षणं, यवैरेवमङ्गुलैर्मानं तथा उत्तम दश तालादीनां वर्णनं कृतमस्ति।

काश्यपशिल्पे मध्यमदशतालविधानं नामैकपञ्चाशत्तमे पटले ५९ श्लोकाः सन्ति। मध्यमदशताले स्त्रीमानं वर्णयति। सरस्वती-दुर्गा-उमा-भूमिः-सप्तमातृकाः लक्ष्मीः -ज्येष्ठा -शङ्करः ï ब्रह्मा-रथे विष्णुः - शक्तिः -एतेषां मध्यमतालस्य मानादीनां वर्णनमस्ति।

काश्यपशिल्पे दशतालं नाम द्विपञ्चाशत्तमे पटले चतुश्चत्वारिंशत् श्लोकाः सन्ति। पटले कनिष्ठदशतालानां वर्णनं कृतमस्ति। चन्द्र-सूर्य-अश्विनी-ऋषि-गुह-आर्य-षण्मुख - चण्डेश - क्षेत्रपालकादीनां रचना अधम-दशतालेन कारयेत्। पटले उपर्युक्तदेवतानां सर्वेषामवयवानां निर्माणे मानस्य चर्चा कृतास्ति।

त्रिपञ्चाशत्तमे पटले उत्तमं नवतालं वर्णितम्। पटले नव श्लोकाः सन्ति। वसोरष्ट मूर्तयः- कुबेरः ï लोकपालः-एतासां तथान्यदेवतानां मूर्तिनिर्माणमुत्तमनवतालेन करणीयम्। प्रत्येकावयवानां मानलक्षणं प्रदत्तमस्ति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ञ्चाशत्तमे पटलेऽष्ट श्लोकाः सन्ति। पटले यक्ष ï अप्सरस् समुदायः ï अस्त्रमूर्तिः - मरुद्गणादीनां चर्चा विहितास्ति। एताः सर्वा मूर्तयो मध्यमनवतालेन निर्मातव्याः। प्रतिमाया उन्नता अष्टोत्तरशत-भागे विभाजनीया । अत्रोपर्युक्तदेवतानां मूर्तेर्मान- विषये निर्देशः कृतोऽस्ति।

काश्यपशिल्पेऽधमनवतालं नाम पञ्चपञ्चाशत्तमे पटले षड् श्लोकाः सन्ति। तत्राधमनवतालस्य लक्षणानां वर्णनं कृतमस्ति। विद्याधरगणः ï असुरः ï पितरः ï सिद्धाः-गन्धर्वाः -इत्यादीनां निर्माणं नवताले करणीयम्।

काश्यपशिल्पेऽष्टतालं नामके षट्पञ्चातमे पटले सप्त श्लोकाः सन्ति। पटलेऽष्टतालविधानस्य वर्णनं प्राप्यते। पटले येषामुल्लेखो नास्ति तेषां मानं दशतालानुसारं करणीयम्।

सप्ततालं नाम सप्तपञ्चाशत्तमः पटलोऽस्ति। पटलेऽस्मिन् सप्तश्लोकैः सप्ततल-विधेर्वर्णनं लभ्यते। अत्र पिशाच-मूर्तेर्मानविषये तथा तस्या अवयवानां मानविषये चर्चा कृतास्ति।

अष्टपञ्चाशत्तमे पटले पिण्डिकालक्षणं वर्णयति। कश्यप-ऋषिणा विरचिते पटलेऽस्मिन् पञ्चाशत् श्लोकाः सन्ति। पटले नागरादीनां लिङ्गानां पीठलक्षणादारभ्य सकललक्षणपर्यन्तं वर्णनं कृतमस्ति। पटले प्रथमश्लोकतः षट् श्लोकपर्यन्तं नागरपीठस्य वर्णनमस्ति। पीठानां चत्वारोऽलङ्काराः सन्ति यथा ï पद्मपीठं-भद्रपीठं-वेदिका तथा वेदीपीठम्। तदनन्तरमुपर्युक्तचतुर्णां पीठानां वर्णनं कृतमस्ति। वेदिकापीठस्य तिस्रः प्रकाराः सन्ति। यथा पद्मपीठं, भद्रपीठं, वृत्तपीठं परिमण्डलं वा। पीठत्रयाणामवयवानां कल्पनाधिष्ठानुसारं करणीया। चतुरस्रं पीठं जयं ददाति, योन्याकारं पीठं प्रजाया वृद्धिं करोति। धनुराकारं पीठं शान्तिदायकं तथा त्रिकोणाकारं पीठं शत्रोर्नाशं करोति। वृत्ताकारं समृद्धिदायकम्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…्रकोणपीठं रोगनाशं करोति इति क्रमेण पीठानां फलं प्रदत्तम् । यदि पीठानां जीर्णोद्धारः करणीयः, तर्हि पीठानां रचना पूर्ववत् करणीया।

काश्यपशिल्पे पीठलक्षणोद्धारनामैकषष्टित्तमः पटलोऽस्ति। अस्मिन् पटले चतुस्सप्तति श्लोकाः सन्ति। पटलेऽस्मिन् विशेषरूपेण पादशैलादिलक्षणं वर्णयति। नागर-वेसर-द्रविड-पद्धत्यानुसारं लक्षणं, पुष्पैरलंकरणम्, स्थण्डिल-पूजा-मणिरेखादीनां वर्णनं प्राप्यते।

षष्टितमे पटले सकलस्थापनाविधेर्वर्णनमस्ति। अस्मिन् पटले त्रयोदश श्लोकाः सन्ति। अत्र विष्णोः प्रतिमायाः स्थापनाविधिं वर्णयति। विष्णोर्मूर्तिः कथं कुत्र स्थापनीया तथा कस्यां दिशायां, कस्मिन् पदे -द्वारशोभादीनां वर्णनमस्ति।

एकषष्टितमे पटले सुखासन-मूर्तेर्विवरणं कृतमस्ति। पटलेऽस्मिन् ५९ श्लोकाः सन्ति। आसन-मूर्ती राजसभावे भवति तथा भद्रपीठे सुखासन-मूर्तिर्भवति। अत्र पादो हस्तो जानुर्मुखं हस्तस्य मुद्रा, जटा, मुकुटम् ï इत्यादिकं कथं करणीयं तथा तेषां मानविषये चर्चास्ति।

सोमस्कन्देश्वरनामके द्विषष्टितमे पटलेऽनुष्टुप्छन्दोयुक्ताः षड्त्रिंशत् श्लोकाः सन्ति। पटलेऽस्मिन् सोमस्कन्देश्वरस्य लक्षणं वर्णयति। शंकरस्य कृते सुखासनं यथोपर्युक्तपटले प्रोक्तं तथैवात्र करणीयम्। देवस्य वामभागे पार्वतीदेवी सुखासने, देव्या आभूषणानि, स्कन्दस्य लक्षणं, देव्या एवं देवस्य मध्ये स्कन्दस्य लघुमूर्तेः स्थापना, मुद्रा, उमास्कन्देन सह शङ्करस्य स्थापना- इत्यादीनां वर्णनं महर्षिणा कश्यपेन कृतमस्ति।

त्रिषष्टितमे पटलेऽस्मिन् चन्द्रशेखरमूर्तेर्विषये वर्णनं लभ्यते। केवलं शङ्करः, गौरीसहितः शङ्करः, तथा आलिङ्गनं कुर्वन् इति तिस्रः प्रकारा वर्णिताः। केवलं मूर्तिः समपाद-मुद्रायां स्थान-सहिता भवेत्। समभङ्गं त्रिभङ्गमभङ्गमिति मुद्रया सहितं, मानं, वामहस्तस्याभयमुद्रा, दक्षिणहस्तस्य वरदमुद्रा, जटा, मुकुटः, आभूषनादीनां लक्षणं प्रदत्तमस्ति। काश्यपशिल्पे चन्द्रशेखरमूर्तिलक्षणं नामके पटले द्विषष्टि श्लोकाः सन्ति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ःषष्टितमे पटले वृषवाहनमूर्तिलक्षणं प्रतिपादितमस्ति। पटले नवदशश्लोकमहोषणा कश्यपेन वृषवाहनमूर्तेर्लक्षणानि प्रदत्तानि सन्ति।

काश्यपशिल्पे नृत्तमूर्तिलक्षणं नाम पञ्चषष्टितमः पटलोऽस्ति। पटलेऽस्मिन् षण्णवतिः श्लोकाः सन्ति। पटलेऽस्मिन् नृत्यं कुर्वन् शङ्करस्य मूर्तेर्लक्षणं प्रस्तुतम्। भगवतः शङ्करस्योत्साहवर्धनाय दुर्गादेव्या जन्माऽभवत्। सर्वलोकहिताय, देवानां कष्टनिवारणाय वा दुःखसमाप्तिहेतवे, राज्ञस्तथा राष्ट्रस्योन्नत्यर्थं शङ्करो नृत्यं करोति। नृत्यानामष्टादश प्रकाराः। तेषु नव नृत्यानां लक्षणं वर्णयति। पूर्वोक्तानुसारं मूर्तेर्मानं भविष्यति। सर्वेऽवयवा उत्तमदशतालानुसारं, डमरुकं, डमरुकस्य मानं, भुजंगवलयं, जटा, अलङ्कृतो मुकुटः, यज्ञोपवीतं, पद्मपीठस्य मानं, शूलपाशः, खड्गादीनां वर्णनं पञ्चषष्टितमे पटले लभ्यते।

षट्षष्टितमे पटले गङ्गाधरमूर्तिलक्षणं वर्णयति। पटले द्वादश श्लोकाः सन्ति। संक्षेपेण गङ्गाधरस्य वर्णनं कृतमस्ति। गङ्गाधरस्य मानम्, आलिङ्गनं, जटा, जाह्नव्या संयुतः, अलङ्कारादीनां वर्णनं वर्तते।

सप्तषष्टितमे पटले त्रिपुरान्तकमूर्तेर्लक्षणानि वर्णयति। त्रिपुरान्तकमूर्तेरष्ट प्रकाराः सन्ति। काश्यपशिल्पे त्रिपुरान्तकमूर्तिलक्षणं नामके सप्तषष्टितमे पटलेऽष्टचत्वारिंशत् श्लोकाः सन्ति। अभङ्गं. समभङ्गम्, अतिभङ्गं चेति त्रिधा विभक्ता। मूर्तेर्मानं, बाणः, त्रिपुरान्तकमूर्तिः, अतिभङ्गा उत्तमा, समभङ्गा मध्यमा, अभङ्गा अधमा, पार्वत्या मूर्तिः, बाणः, परशुः, खड्गं, धनुषम् -आदीनां वर्णनं वर्तते।

काश्यपशिल्पेऽष्टादश श्लोकैः कल्याणमूर्तेर्लक्षणानि प्रदत्तानि सन्ति। अष्टषष्टितमस्य पटलस्य प्रारंभो मूर्तेर्लक्षणाद् भवति। मानं, जटामुकुट- अलङ्कारयुक्तं, परशुः, कृष्णमृगः, प्रजापतिः, रुद्राक्षमाला, विष्णोर्मूर्तिः, होमकुण्डं, हस्ते शंखः, चक्रम्- इत्यादिकं कुत्र कथं भवेत्- इत्यादीनां वर्णनं प्रस्तुतं पटलेऽस्मिन्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नामैकोनसप्ततितमे पटले नव श्लोकाः सन्ति। अर्धनारीशमूर्तिस्तु चतुर्भुजा, षड्भुजा, द्विभुजा च भवति। वामभागे पार्वती, दक्षिणभागे माहेश्वरः, वामभागे तथा दक्षिणभागे के अवयवाः, दक्षिणनेत्रं रौद्रं, वामनेत्रं शीतलम्- इत्यादिविषये महर्षिणा कश्यपेन प्रोक्तमस्ति।

सप्ततितमे पटले गजहामूर्तिलक्षणं वर्तते। पटलेऽस्मिन् पञ्चदश श्लोकाः सन्ति। चत्वारो हस्ता वा अष्ट पादाः, गजस्य मस्तकं, ललाटं, पृच्छं, देवी इत्यादीनां कल्पनां कृता । एतादृशी मूर्ती राज्ञां विजयदात्री भवति।

एकसप्ततितमे पटले पाशुपतमूर्तिलक्षणस्य वर्णनं प्राप्यते। पटले दशश्लोकाः सन्ति। चन्द्रशेखर-मूर्तिवत् समपत्स्थानकं प्रोक्तमस्ति। त्रिनेत्रं, चतुर्बाहुः, महाधनुः, शूलं, अभयमुद्रा, रुद्राक्षमाला, अलङ्काराः, प्रहसितं मुखम्, सर्पः, यज्ञोपवीतम्, रक्तनेत्रं, खड्गं, पाशुपातं, बलिपूजादीनां विषये चर्चा कृतास्ति। अन्ते वदति यदेतादृशी रौद्रप्रतिमा नैव कारयेत् ।

काश्यपशिल्पे द्विसप्ततितमे पटले कङ्कालमूर्तिलक्षणं प्रदत्तम्। कङ्कालमूर्तिलक्षणं नामके द्विसप्ततितमे पटले षड्षष्टिश्लोकाः सन्ति। कङ्कालमूर्तेः पादे पादुका, कङ्कालमूर्ती रक्षार्थं परिवारार्थं मोक्षार्थं च विधीयते। मूर्तिः स्थापनायाः कृते तथा गमन-मूर्तिरुत्सवस्य कृते। दारोः, लोहस्य, सुधायाः, वालुकायाः, शिलायाः, मृत्तिकायाः, चित्रे वा कुर्यात्। डमरुकं, पात्रं वामकरे, जटा, नानारत्नैर्विभूषितं, व्याघ्रचर्मादीनां वर्णनं प्रस्तुतम्। शङ्करस्य ऋषिः- देवः,- गान्धर्वः- सिद्ध- विद्याधरादिकाः पूजां कुर्वन्ति। मार्ग-मार्जनम्, जलसेचनम्, स्तोत्रपाठं, पुष्पवृष्टिं च कुर्वन्ति। ऋग्यजुःसामाथर्वणो वारंवारं स्तुतिं कुर्वन्ति। पञ्चवाद्यानां रवः -यथा चर्मबन्धः, कासं, वीणा, छिद्रयुक्तं वाद्यं, शङ्खध्वनिः -इत्यादयः। नारदादिका जयवाद्यं कुर्वन्ति। चन्द्र-सूर्य-दिव्ययोषितः सेवन्ते। कश्यप-शिवयोः संवादद्वारा कङ्कालमूर्तेर्लक्षणानां ज्ञानं भवति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नाम त्रिसप्ततितमो पटलोऽस्ति। पटलेऽस्मिन् हयधहरमूतिराजव, स्वास्तिक, स्थानं, समपादकस्थानं चेति प्रकारेण भवति। वामभागे केऽवयवाः, कीदृशा अलङ्काराः, वस्त्राणि, मुकुटं तथा दक्षिणभागे केऽवयवाः, कीदृशा अलङ्काराः, वस्त्राणि, मुकुटादीनां वर्णनं कृतमस्ति । चक्रं, शंखः, जटादीनां लक्षणानि प्राप्यन्ते।

पटले भिक्षायाचनार्थमटन् महेश्वरस्य मूर्तेर्वर्णनमस्ति। काश्यपशिल्पे भिक्षाटनमूर्तिलक्षणं नामकेऽनुष्टुप्छन्दोयुक्ता एकादश श्लोकाः सन्ति। भिक्षाटनमूर्तिः पादुकायुक्ता पादुकारहिता वा भवति। सर्वाभरणसंयुक्ता, कटिनागविभूषिता, यज्ञोपवीतयुता, वामहस्ते, दक्षिणहस्ते च क्रमेण मृग-मुखं, डमरुकं, शिखिपिच्छं, भिक्षापात्रं, त्रिपुण्ड्र एवंरूपा भिक्षाटनमूर्तिः पद्मपीठे भवति। शेषलक्षणानि कङ्कालमूर्तिवद् भविष्यन्ति। एतानि वस्तूनि वर्णितानि चतुःसप्ततितमे पटले ।

काश्यपशिल्पे पञ्चसप्ततितमे पटले विशेषेण चण्डेशानुग्रहमूर्तेर्लक्षणानां विवरणं प्रस्तौति महर्षिः कश्यपः। पञ्चसप्ततितमे पटले चत्वारः श्लोकाः सन्ति। अत्र उमासहितस्य शङ्करस्य मूर्तिर्भवति। दक्षिणहस्तोऽभय मुद्रायाम्, अधोभागे चण्डस्य मूर्त्युपरि हस्तः, हृदयाञ्जलिसंयुतौ हस्तौ, सुखासन उपविष्टः, सुवर्णवर्णयुक्तश्चण्डेशो भवति। अत्र देवीदेवेश्वरयोर्मध्ये स्कन्दमूर्तेः स्थापना न करणीया।

काश्यपशिल्पे दक्षिणामूर्तिलक्षणं नाम षट्सप्ततितमः पटलोऽस्ति। पटलेऽस्मिन् त्रिंशत् श्लोकाः सन्ति। अक्षमाला, जटामण्डलम्, नागः, सर्वाभरणभूषितम्, यज्ञोपवीतम्, त्रिनेत्रं, रुद्राक्षः, व्याघ्रचर्म, नारदः, जमदग्निर्वसिष्ठो भृगुर्दक्षिणे, ज्ञानमुद्रा, पृष्ठे वृक्षः, सर्पेण विभूषितः, ऋषिभिः संसेवितः शिवः – एतादृशी योगमूर्तिः प्रसिद्धास्ति। इत्यादिकं दक्षिणामूतिशिवस्य वर्णनं प्राप्यते।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ं नामकः सप्तसप्ततितमः पटलोऽस्ति। पटले पञ्चदश श्लोकाः कालहामूर्तिलक्षणानि प्रदत्तानि सन्ति। तत्र पद्मपीठोपरि स्थितमुद्रायां, त्रिनेत्रस्य, जटामुकुटमण्डितस्य, चतुर्भुजस्याष्टभुजस्य वा, शूल-परशु-खड्ग-नमस्कारमुद्रा-विकीर्ण केशादीनां वर्णनं प्राप्यते।

लिङ्गोद्भवलक्षणं नामाष्टसप्ततितमे पटले पञ्च श्लोकाः सन्ति। लिङ्गाकार-चन्द्रशेखरमूर्तिवत्, पितामहःविष्णुश्चांजलिमुद्रायां, लिङ्गं रक्त-श्याम-हिरण्यादिवर्णस्य, एतादृशी लिङ्गोद्भवस्य मूर्तिर्भवति।

काश्यपशिल्पे वृक्षसंग्रहणं नामैकोनाशीतितमः पटलोऽस्ति। पटलेऽस्मिन् त्रयस्त्रिंशत् श्लोकाः सन्ति। अस्मिन् पटले देवी-देवतानां मूर्तेर्निर्माणार्थं कीदृशस्य काष्ठस्य वृक्षस्य चोपयोगो भवति तद्विषये वर्णनं क्रियते। स्त्रीलिङ्गं-पुरुषलिङ्गं-नपुंसकलिङ्गमिति वृक्षाणां त्रयो भेदाः सन्ति। चन्दन-चम्पक-रक्तचन्दन-चाल-खादिर-सोमशीर्ष-अर्धनारीशिव-राजात-मयूरक-पद्मक-कुटज-सप्तपर्ण-सत्त्वकादिवृक्षाः शूलयोग्याः सन्ति। अतस्तेषां शूलस्य कृत उपयोगः करणीयः। दोषयुक्तवृक्षाणां प्रयत्नेन त्यागः करणीयः। शुभपक्षे नक्षत्रे वासरे पूजादीनां वर्णनं प्राप्यते।

काश्यपशिल्पे शूललक्षणं नामाशीतितमः पटलोऽस्ति। पटलेऽस्मिन् त्रिचत्वारिंशत् श्लोकाः सन्ति। पटले शूललक्षणं, प्रमाणम्, अवयवानुसारं प्रमाणं, स्थानकमूर्तेः प्रमाणम्, आसनमुद्रामूर्तेः शूलस्य लक्षणं, प्रमाणम्, उपशूलादीनां वर्णनं कृतमस्ति।

एकाशीतितम पटले त्रिपञ्चाशत् श्लोकाः सन्ति। काश्यपशिल्पे शूलपाणिलक्षणं नामैकाशीतितमः पटलोऽस्ति। कर्षणानन्तरं भूमौ शुभमासे, वासरे सुलग्नके शूलस्य स्थापना, अङ्कुरार्पणं, वर्गाकारो मण्डपः,चतुर्द्वारम्, अग्निकुण्डम्, विधिना होमः, मूर्तयः, गर्भन्यासः,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नुसारं विधिना शूल-मूलस्य स्थापनादिवर्णनं प्राप्यते। अध्यायऽस्मिन् शूलपूजन स्थापना तथा केन प्रकारेण कर्तव्या- इति चर्चा कृतास्ति।

रज्जुबन्धलक्षणनामको द्व्यशीतितमः पटलोऽस्ति। पटलेऽस्मिन् सप्तविंशतिश्लोकाः सन्ति। शूलं वस्त्रेण पुटीकरणस्य क्रियाया वर्णनं प्राप्यते। अष्टबन्धस्य सिद्धता, अष्टबन्धस्य लेपः, वस्त्र-संवेष्टनस्य विधिः, अष्टादश नाड्यः,मूलमन्त्रेण रज्जुबन्धनं करणीयम्-इति वर्णितम्।

त्र्यशीतितमे पटले मृत्तिकास्थिरीकरणार्थं चर्चा महर्षिणा कश्यपेन कृतास्ति। पटलेऽस्मिन् षड्विंशतिश्लोकाः सन्ति। मृत्तिकायास्तिस्रः प्रकाराः, वनस्पतिनां मिश्रणं, व्यासः, धान्यमिश्रणं, मृत्तिकाया लेपः- इत्यादीनां वर्णनं प्राप्यते।

कल्कसंस्कारलक्षणं नामकश्चतुरशीतितमो पटलोऽस्ति। पटलेऽस्मिन् कल्क-सिद्धता विषये चर्चां करोति महर्षिः कश्यपः। मृत्तिकाया मिश्रणं मर्दनं च, भस्मवत् सूक्ष्मता, विभिन्नरीत्या कल्कस्य सिद्धता, लेप-सिद्धता, मूर्तेरुपरि लेपनादिविषये ज्ञानं भवति। अस्मिन् पटले षोडशश्लोकाः सन्ति।

वर्णसंस्कारनामकः पञ्चाशीतितमः पटलोऽस्ति। पटलेऽस्मिन् अनुष्टुप्छन्दोयुक्तास्त्रयस्त्रिंशत् श्लोकाः सन्ति। पटलेऽस्मिन् वर्णानां विषये चर्चयति महर्षिः कश्यपः। वर्णानामुत्पत्तिः, वर्णानां प्रकाराः, वर्णान् वर्णैः सह योजयित्वा नूतनवर्णानामुत्पत्तिः, ब्राह्मणादीनां कृते वर्णाः, विष्णु-महेश्वर-गौरी-रौद्रादीनां कृते वर्णाः, अनेकप्रकाराणां वर्णानां रचनादिविषये वर्णनं लभ्यते।

काश्यपशिल्पे वर्णलेपनं नामको षडशीतितमो पटलोऽस्ति। पटलेऽस्मिन् नवविंशतिः श्लोकाः सन्ति। वर्णसंस्कारानन्तरं महर्षिः कश्यपो वर्णलेपनस्य चर्चां करोति। वर्णलेपनस्य त्रिप्रकाराः, को वर्णः कुत्र कथं लेपनीयः- इत्यादीनां चर्चा विहिता।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नाम सप्ताशीतितमः पटलोऽस्ति। पटलेऽस्मिन् अनुष्टुप्छन्दायुक्ताः पञ्चचत्वारिशत् श्लोकाः सन्ति। अत्र विशेषरूपेण भक्तानां लक्षण-विषये वर्णनं लभ्यते। भक्तानां पदं चतुर्विधं, सालोक्यं,सामीप्यं,सायुज्यं,सारूप्यं चेत्यादीनां वर्णनं लभ्यते।

ग्रामलक्षणं नामकोऽष्टाशीतितमः पटलोऽस्ति। पटलेऽस्मिन् गृहविन्यासलक्षणस्य वर्णनं कृतमस्ति।

Your complimentary
use period has ended.
Thank you for using
PDF Complete.
Click Here to upgrade to
Unlimited Pages and Expanded Features

# ीयं प्रकरणम्

# काश्यपशिल्पग्रन्थानुसारेण

# वास्तुविद्याया अध्ययनम्।


## तृतीयं प्रकरणम्

## काश्यपशिल्पग्रन्थानुसारेण वास्तुविद्याया अध्ययनम्।


प्रस्तावना–

भारतीयाचार्याः शास्त्रान्तरेष्विव गृहनिर्माणविद्यायामपि दत्तश्रद्धाः शास्त्रविधीन् अनुसृत्य निर्मितेषु गृहेषु निवसन्त ऐश्वर्यसम्पन्ना अरोगाश्च भवेयुः – इति शास्त्रमेतदनुशास्ति। अतो जना गृहनिर्माणं वास्तुविद्यानुसारं कुर्वन्ति। भूमिः, प्रासादः, यानं, शयनमेतेषु चतुर्षु प्रकारेषु मुख्यं वस्तु भूमिरेव भवति। अन्यानि वस्तूनि तस्यां भूमावुत्पन्नानि सन्ति। प्रासादादीनि वास्तूनि सन्ति, तानि वस्तुनो (भूम्या) आधारेण स्थितानि भवन्ति। सर्वे जन्तव आतपवृष्ट्यादिभ्य

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मेच्छन्ति। केचन जन्तवो नीडेषु, केचन बिलेषु, अपरे केचन गुहादिषु च निवसन्ति। आदिमनुष्या गुहास्ववसन्। कालान्तरे वासार्थं कुटिरगृहहर्म्यादीनि मनुष्यैर्निर्मितानि।

अस्मिन् तृतीय-प्रकरणे विविधाध्यायेषु समागतानां वास्तुविद्याविषयाणां विवेचनं भूमिः, गृह-देवप्रासाद-राजप्रासादनिर्माणं, अनेकतलप्रासादवर्णनं, तेषां आकारमानादि विषयाः, गोपुरं, मार्गाः, महामार्गाः, प्रत्येकस्य विषयस्य स्पष्टीकरणं, निर्णयः, महत्त्वम् - इत्यादीनां काश्यपशिल्पाधारेणाध्ययनं कर्तुं प्रयत्नं कृतवानस्मि।

भूमिपरीक्षा

भूमेर्ग्रहणात् पूर्वं भूमेर्वर्णस्य परीक्षणं क्रियते। कीदृशी भूमिर्ब्राह्मणादिवर्णानां कृते सुखावहा भविष्यति - इत्यारभ्य प्रकरणस्य प्रारंभो भवति। भूमिमध्य एकहस्तपरिमाणं भूमिं खात्वा पुनर्वालुकया गर्तं पूरयेत्। यदि गर्तः पूर्णं भवति, तथापि वालुकावशिष्टा भवति, तर्हि सा भूमिरुत्तमा। गर्तं पुरयामः, तदा तदा वालुकावशिष्टा न भवति, तदा सा भूमिर्मध्यमा। गर्तं पूरयामः, तदा वालुका न्यूना भवति, तर्हि सा भूमिरधमा। प्रथममुत्तमा भूमिः स्वीकरणीया। यद्युत्तमा भूमिर्नास्ति चेत्, मध्यमा भूमिः स्वीकरणीया। शिवभवनस्य कृतेऽधमभूमेरुपयोगो न करणीयः।[७३]

वर्णानुसारं शुभा भूमिः

श्वेतवर्णयुक्ता भूमिर्ब्राह्मणानां कृते श्रेष्ठास्ति। रक्ताभूमिः क्षत्रियाणां कृत उत्तमास्ति। पीतवर्णयुक्ता भूमिर्वैश्यानां कृते श्रेष्ठास्ति। शूद्राणां कृते कृष्णवर्णयुक्ता भूमिरुत्तमास्ति। (का.शि.अ.१.श्लो.३९) निम्नवर्गाणां कृते सर्वा भूमिरुत्तमा भवति। किन्तु श्रेष्ठवर्गाणां

---

७३ का.शि.१.३७-३८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मनुष्याणां गृहाणां कृते वर्णानुसारं भूमिर्ग्राह्या।[७४] यथा कोष्टके ï

| भूमि: | वर्ण: |
|---|---|
| श्वेता | ब्राह्मण: |
| रक्ता | क्षत्रिय: |
| कृष्णा | शूद्र: |
| पीता | वैश्य: |

भूमिकर्षणम्

भूमिकर्षणे बलीवर्दद्वययुक्तेन हलेन मन्त्रोच्चारणपूर्वकं तिलसर्षपमुद्गांश्च वापयेत्। भूमौ त्रिरात्रिपर्यन्तं बीजाङ्करो भवति, तदा सा भूमिरुत्तमा। रात्रिचतुर्भ्यां बीजाङ्कुरो भवति तदा सा भूमिर्मध्यमा। पञ्चरात्र्यनन्तरं बीजाङ्कुरो भवति तदा सा भूमिरधमा। अधमां भूमिं परिवर्जयेत्।[७५] यत्र निर्माणं करणीयम्, तत्र धेनूनां वास: १-२ वा ३ रात्रिपर्यन्तं कारयेत्।[७६]

दिक्परिच्छेदनम्

गृहनिर्माणार्थं परिगृहीताया भूमे: समीकरणं प्रथमं कार्यम्। भूमेर्मध्यभागे पाषाणं स्थापयित्वा गोमयालेपनं कृत्वा दिक्परिच्छेदनं करणीयम्। गोमयेन लेपनं कृत्वा तत: समीकृतभूमे: शङ्कुस्थापनं करणीयम्। शङ्कु: पञ्चदशाङ्गुलविस्तृतो भवति।

---

७४ का.शि.१.३९-४०
७५ का.शि.१.५५-५६
७६ का.शि.१.५८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भागस्य भवति। शङ्कुः कठोरकाष्ठस्य भवेत्। स सुवृत्तो (वर्तुलो) भवेत्। ततः शङ्कुदर्घ्ययुगलसम्मितं कृत्वा भूमौ वृत्तमारचयेत्। तद्वृत्तमध्ये तं शङ्कुं निवेशयेच्च। पूर्वाह्णान्ते शङ्कुच्छाया वृत्तरेखायां यत्र पतति, तत्राङ्कनं कुर्यात्। एवमपराह्णेऽपि। एवं तत्राङ्कनद्वयं स्यात्। अङ्कनद्वयमध्यगतं भागं त्रिधा विभज्य यो भागः प्रथमदिनबिन्दोः समीपमागच्छति, तमपराह्णाङ्कितबिन्दुना सह योजयित्वा रेखां रचयेत्। क्षेत्रस्य मध्य आरचितेयं रेखा पूर्वपश्चिमरेखा भवति। (इयं "ब्रह्मसूत्र"नाम्ना व्यवह्रियते। ) पूर्वपश्चिमरेखायामेकैकं बिन्दुमाधारीकृत्यान्योन्यमन्तर्गतं वृत्तयुग्ममारचयेत्। तदा वृत्तसङ्गमेन मत्स्यचिह्नं जायते। मत्स्यजठरमार्गेणारचिता तिर्य्यग्गता रेखा दक्षिणोत्तराशाप्रभवा भवति। (इयं रेखा "यमसूत्र"नाम्ना व्यवह्रियते।) अपच्छाया यावदङ्गुलमपसारयेत्। वृत्तस्य कुब्जस्य च षड्भागान् कुर्यात्। एको विभाग एकमङ्गुलं कथ्यते। सूर्यस्य गतिर्मीनराश्यामुत्तरदिशां प्रति २८ वा २७ अंशोपरि भवति, ततस्तस्य वेगः कन्याराशेः प्रवेशपर्यन्तं न्यूनो भवति। मीनराशेः २८ अंशतर्मिथुनराशेः २७ अंशपर्यन्तं प्रत्येकराशिमर्धाङ्गुलपरिमाणमपच्छाया मिलति। ततो मिथुनराशेः २८ अंशतः कन्याराशेः २७ अंशपर्यन्तं प्रत्येकराशेरर्धाङ्गुलोऽपच्छाया न्यूना करणीया। कन्याराशेः २८ अंशादपच्छायामर्ध-अर्धाङ्गुलप्रमाणमधिकां कुर्यात्। यदा सूर्यो धनूराश्यां प्रविशति तदा तावत् तां राशिं २७ अंशं यावदपच्छायाधिका करणीया, ततो मीनराशिपर्यन्तं न्यूना करणीया। कृत्तिकानक्षत्रात् पूर्वदिशां निस्कास्य तदनुसारमपच्छाया सम्यगस्ति वा नेत्यधिकं न्यूनं वा कृत्वा पश्येत्। उपर्युक्तानुसारमपच्छायां सम्यक् कृत्वा सूत्रं प्रसारयेत्। अपच्छायां प्रातर्वा सन्ध्यासमये समीकरणीया। पूर्वपश्चिमादिदिशायां तां प्रमाणसूत्रद्वारा योजयेत्। पुण्याहवाचनं कृत्वा प्रासादस्याकारानुसारं भूमेः खननं करणीयम्। यदि प्रासादो विशालो भवति, तदैकाशीतिपदं करणीयम्। प्रत्येकपदे वास्तोः समानरीत्या पूजा करणीया। एवं परीक्षितायां भूमौ दिक्शोधनं विधाय शास्त्रोक्तशुभमुहूर्त्तेषु देवार्चनपूर्वकं भवनप्रसादीनामारम्भः कर्तव्यः। गृहाणि, प्रासादाश्च एतादृग्रीत्या निर्णीतां

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ानि। पुरातननगरसूत्रणमपि दिशमनुसृत्य कृतमिति द्रष्टुं शक्यते।

प्रासादवास्तु

वास्तुपदविन्यासो वास्तुविद्याया अत्यन्तं महत्त्वपूर्णमङ्गमस्ति। यदा कस्यापि नगरस्य ग्रामस्य राजप्रासादस्य निवासस्यावासस्य च निर्माणार्थं प्रारंभो भवति, तदा प्रप्रथमं महत्त्वपूर्णं कार्यं वास्तुपदविन्यासोऽनिवार्यो भवति। शुभकालनिर्णयान्तरं भूमिपूजनं विधेयम्। ततो वास्तुं कल्पयेत्। भूमेर्विभिन्नभागेषु विभाजनं कर्तव्यम्। विभाजितः प्रत्येकभागः पदं कथ्यते। प्रत्येकपदस्यैका देवता भवति, सा पददेवता कथ्यते। तेषु ९×९ अर्थात् एकाशीतिपदम्-नवनवकैरेकाशीतिसंख्यायाः पदविन्यासः परमशायिकपदविन्यासोऽपि कथ्यते।[७८] तस्य वर्णनं, वास्तुपरुषस्योत्पत्तेर्वर्णनम्, वास्तुपुरुषस्य विविधभागेषु स्थितदेवतानां वर्णनमत्र प्राप्यते।

वास्तुपदमण्डलम्

प्रासादस्य दीर्घतायास्तथा विस्तारस्य नव-नव भागेषु विभाजनं करणीयम्।

---

७७ का.शि.१.६० तः ७०
७८ का.शि.२. १

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पूर्वा　　　　विदारी

उत्तरा　　　　दक्षिणा

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ईशानः | पर्जन्यः | जयन्तः | महेन्द्रः | आदित्यः | सत्यः | भृशः | अन्तरिक्षः | अग्निः |
| दितिः | आपः | आपवत्सः | स | म | री | सवित्रः | सावित्रः | पूषा |
| अदितिः | | | | | | | | वितथः |
| ऋक् | | | | | | | | राक्षसः |
| सोमः | | पृथ्वीधरः | | ब्रह्मा | | विवस्वान् | | यमः |
| भल्लाटः | | | | | | | | गन्धर्वः |
| मुख्यः | रुद्रजयः | रुद्रः | | | | इन्द्रजयः | इन्द्रः | भृङ्गराजः |
| नागः | | | | | | | | मृषा |
| वायुः | पापक्षयः | रोगः | शोषः | वरुणः | पुष्पदन्तः | सुग्रीवः | दौवारिकः | निऋतिः |

पापराक्षसी　　　　पश्चिमा　　　　पूतना

८१ पदानां वास्तुमंडलम् ।

पूर्व-पश्चिमं देश-सूत्रं कथ्यते। तथैव उत्तर-दक्षिणम्। एकाशीतिपदेषु नवपदान् ब्रह्माऽधिकरोति। पूर्वभागे समरी, दक्षिणे विवस्वान्, मित्रः पश्चिमभागे, उत्तरे पृथ्वीधरः, एते षड्-षड् पदस्य देवता ब्रह्मणं प्रति पश्यन्ति। ईशानकोणे आपः-आपवत्सौ तिष्ठतः। सवित्र-सावित्रावाग्नेयदिशायां राजेते। नैऋत्य इन्द्रः, इन्द्रजयः, रुद्रस्तथा रुद्रजयो वायव्यदिशायां तिष्ठति। एते द्विपादौ देवौ। पूर्वभागे ऐशान्यां पर्जन्य-जयन्त-महेन्द्र-आदित्य-सत्य-भृश-अन्तरिक्षाः सन्ति। अग्नि-पूषा-वितथ-राक्षस-यम-गन्धर्व-भृंगराज-मृषा दक्षिणे सन्ति। पश्चिमे निर्ऋति-दौवारिक-सुग्रीव-पुष्पदन्त-वरुण-शोष-रोग-पापक्षयाः सन्ति। वायु-नाग-मुख्य-भल्लाट-सोम-ऋक-अदिति-दिति-इति एते सर्वे बहिर्भाग एकपदा देवाः सूच्यन्ते। चरकी-विदारी-पूतना-पापराक्षसी - इति ईशानादिषु कोणेषु बहिर्भागे पदरहिताः सन्ति। एवं रीत्या नवचत्वारिंशद् देवतानां वर्णनं कृतम्।[७९]

---

७९ का.शि.२. २ तः १२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features




वास्तुपुरुषः ।

विंशतिसूत्रेण (दश पूर्व-पश्चिमदिशायां तथा दश उत्तर-दक्षिणदिशायां) वास्तुमूर्तिं (वास्तुपुरुषं) दर्शयति। स अधोमुखं कृत्वा शयनं करोति। नासिकाभूमिं प्रत्यस्ति। एतादृशी वास्तुमूर्तिर्बद्ध्वा स्थापितास्ति। वास्तुमूर्तिं कया रीत्या बद्ध्वा शयनं कारितवान्। देवासुरयोर्मध्ये यद् युद्धमभवत्, तस्य युद्धस्य वर्णनं कृत्वा दर्शयतु तथा तत्कालीनस्य महायुद्धस्य वर्णनं करोतु। महाजलाद् बहिरागत्य, अत्यंन्तं विशालकायः, भूताकारोऽसुरो देवैः सह युद्धमकरोत्। सर्वदेवतानामायुधैरसुरं जेतुमसम्भव आसीत्। अतः सर्वैः देवैर्मिलित्वा तं भूतमधोमुखं शयनं कारितम्। अनन्तरं विंशतिसूत्रेण भूतं बद्ध्वैकस्मिन् स्थाने स्थापितम्। स वास्तुपुरुष

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…त्र सा अधोमुखी न भवति, तत्र सर्वाणि दु:खानि ददाति। अतः सर्वत्र वास्तुमूर्ति-अनुसारं स्थापना करणीया। सर्वदु:खनिवारणाय, सफलताप्राप्त्यर्थं वास्तुहोमं बलिं च कुर्यात्। ब्रह्मादिदेवतानां तृप्त्यर्थं होम-बलिः करणीयः। ते तृप्ता भवन्ति, तेन वास्तुपुरुषस्य नाशो भवति । अतः सर्वप्रयत्नेन ब्रह्मादिदेवतानां बलिं दद्यात्। ब्रह्मादिदेवतानां स्व-नामोच्चारणेन वास्तुहोमः करणीयः।[८०]

वास्तपुरुषस्याङ्गे स्थिता देवताः

वास्तुपुरुषस्य शिर ऐशान्यां न नैऋत्यां भवति। अग्निस्तथा वायुः कूर्परौ जानुनि च भवति। नेत्रस्थाने दिति-पर्जन्यौ, अदिति-जयन्तौ कर्णे, कृकाटिकायां आपः, आपवत्सः स्कन्धे, नाभिसूत्रे ब्रह्मा, अण्डकोशे इन्द्र-इन्द्रजयौ, इन्द्रजयः लिङ्गेऽपि, पादौ निर्ऋतिः दिशायाम् स्तनसूत्रे समरी तथा पृथ्वीधरः विराजेते, कुक्षिपार्श्वे विवस्वान् तथा मित्रः, सावित्र ऊर्वोर्हस्तस्य तले च। ऊरुप्रकोष्ठस्य (भुजायाः) मध्यभागे सावित्रः। वामभागे रुद्रस्तथा रुद्रजयः। महेन्द्राद् अन्तरिक्षपर्यन्तं वामहस्तः, कूर्परे जानौ च अग्निर्भवति। पूषातो भृङ्गराजपर्यन्तं जङ्घाया दक्षिणभागो भवति। दौवारिकतः पापयक्ष्मापर्यन्तं जङ्घाया दक्षिणेतरे भागे, वामजानुस्तथा कूर्परे वायुर्भवति, नागतो दितिपर्यन्तं वामभागो भवति। चतुष्कोणे कर्णसूत्रस्याग्रभागो भवति। अधोमुखं कृत्वा वास्तुमूर्तिर्भवति। पूर्वोक्तानुसारं बलिं दत्त्वा वास्तोः संकल्पः कर्तव्यः। एतेन प्रकारेण प्रासादवास्तोः वर्णनं कृतम्। अग्रे वास्तुहोमस्य वर्णनम्।[८१]

---

८० का.शि.२, १३ तः २१
८१ का.शि.२, २२ तः ३२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | देवनाम |
|---|---|
| ऐशान्यां | शिर: |
| कर्पूरौ-जानु | अग्नि:, वायु: |
| नेत्रम् | दिति, पर्जन्य: |
| कर्णम् | अदिति,जयन्त: |
| आप: | कृकटिका |
| स्कन्धे | आपवत्स: |
| नाभिसूत्रे | ब्रह्मा |
| अण्डकोश: | इन्द्र:, इन्द्रजय: |
| लिङ्गम् | इन्द्रजय: |
| पादौ | निऋति दिग्भागे |
| स्तनम् | समरी, पृथ्वीधर: |
| कुक्षि | विवस्वान्, मित्र: |
| ऊर्वोर्हस्तस्य तले | सावित्र |
| ऊरुप्रकोष्ठस्य(भुजाया:)मध्यभागे | सावित्र: |
| वामभागे | रुद्रस्तथा रुद्रजय: |
| वामहस्त: | महेन्द्राद् अन्तरिक्षपर्यन्तं |
| कर्पूरे जानौ च | अग्नि: |
| जङ्घाया दक्षिणभागो | पूषातो भृङ्गराजपर्यन्तं |
| जङ्घाया दक्षिणेतरे भाग | दौवारिकत: पापयक्ष्मापर्यन्तं |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वायु:

वामभाग: नागतो दितिपर्यन्तं

प्रथमेष्टका

प्रथमेष्टका स्थापनाविषये चर्चा विहितास्ति। प्रासाद-मण्डप-प्राकार-साल-गोपुर-परिवार देवतानां (मन्दिरम्) सदनम् - इत्यादीनां निर्माणाय प्रथमाया इष्टकाया: स्थापना करणीया।

द्विविधा भूमिर्भवति। स्निग्धा अस्निग्धा, तैललिप्ता, लघुपाषाणयुक्ता, खनने कठिना, यस्यां न्यूना वालुका, एतादृशी भूमि: सुस्निग्धा विख्याता। एकाञ्जलिपर्यन्तं खनने तोययुक्ता, खनने सरला भूमि:- अस्निग्धा उच्यते। यदि भूमि: स्निग्धा भवति चेत् ,प्रासादस्य विस्तारस्य प्रत्येकस्य हस्तद्वयं कृते भूमेरेकहस्तपर्यन्तं खननं प्रथमेष्टकाकृते करणीयम्। (प्रासादस्य ५० हस्तस्य विस्तारस्य कृते २५ हस्तपर्यन्तं भूमे: खननं करणीयम्।)

अस्निग्धा भूमिर्यथा स्निग्धभूम्यां तोयमागच्छति तावत्पर्यन्तं खननं करणीयम्। गर्तं जलेन सह वालुकया पूरयित्वा गजस्य पादवत् शिरस आकारयुक्त- वालुकायामधिकं जलं विक्षिप्य भूमे: कुट्टनं कृत्वा जलेन समीकरणीयम्। एतेन प्रकारेण प्रासादस्य गर्तं पूरयेत्। पश्चात् पृथक्-पृथक् मानसूत्रस्य सूत्रं पातयेत्। प्रथम-द्वितीयमानसूत्रं स्थापयेत्। तृतीयमानसूत्रमधिष्ठानस्य बहि:सीमायां , चतुर्थं सूत्रमुपपीठस्य सीमां दर्शयितुं स्थापयेत्। प्रथमं मानसूत्रं प्रथमेष्टकाया मर्यादां तथा द्वितीयं प्रकृतेर्मर्यादां दर्शयितुमस्ति। पञ्चमं होमसूत्रं, षष्ठं प्रतिसूत्रं भवति। क्रमेण सूत्रषट्कं कर्तव्यम्।[८२]

मण्डप:

सूत्रस्योत्तरं प्रति नवहस्तप्रमाणा षोडशस्तंभयुक्ता द्विजैर्विभूषिता प्रपा भवति। (प्रपा सामान्यतो ब्रह्मस्थाने भवति, यत्र जलकुण्डं भवितुं शक्नोति।) सा वन्दनवारेण, दर्भमालाभि:,

---

८२ का.शि.४, १ त: १०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पस्य त्रिषु भागेष्वेकस्य भागस्य विस्तारो वेदिकाया भवति। वेदिकाया उच्चता एकहस्तपर्यन्तं भवति। दर्पणवत् पूर्णरूपेण समतलं भवेत्, परितोऽग्निकुण्डमस्ति। एतादृश्या महाशालायाः कल्पना करणीया। अग्निकुण्डं क्रमेण वर्गाकारं, वृत्ताकारं, पद्माकारं, वज्राकारं (अष्टकोणी) भवति। अग्निकुण्डस्य विस्तारस्तथागाधता एकहस्तप्रमाणा तथा स सामान्यतस्तिस्रो मेखलायुक्तो भवति। वेदीं गोमयेन लेपनं कृत्वा पञ्चगव्यं विकीर्यते। वेदीं पिष्टचूर्णेन (अक्षतस्य चूर्णेन) अलङ्कृत्य विप्रभोजनं कारयेत्। उच्छिष्टं स्वच्छं कृत्वा वास्तुहोमः करणीयः। पश्चात् पर्यग्निकरणं कृत्वा प्रोक्षणं वा कुशानां प्रसारणं कर्तव्यम्। वेदिकायां अष्ट -द्रोण शालयस्तथा तस्यार्धभागमक्षताः, तस्यार्धभागस्तिलान् स्वीकृत्य स्थण्डिलं कल्पयेत्, स्थण्डिलस्य परितः दर्भ-पुष्पान् स्थापयेत्। पाषाणस्य प्रासादस्य कृते पाषाणस्य, एवं काष्ठस्य प्रासादस्य कृते काष्ठस्य प्रथमेष्टका भवेत्, विपरीतं न करणीयम्। पाषाणस्येष्टका पुल्लिङ्गपाषाणेनैव करणीया। द्वारस्य अधोभागे यत्र प्रथमेष्टका स्थापनीया तत्र विशेषरूपेण स्त्रीलिङ्गपाषाणस्येष्टका भवेत्। नपुंसकपाषाणैः कदापि शिखरस्य निर्माणं न करणीयम्।[८३]

भित्तिः, स्तम्भः

यादृशः पाषाणः (शिला) उपलब्धो भवति तेन भित्तिस्तम्भादीनामुच्चतां कुर्यात्। पाषाणस्य मानं नव अङ्गुलादारभ्य अङ्गुलद्वयं वृद्धिं कृत्वा षोडश भवनस्य कृते एकोनचत्वारिंशदङ्गुलं भवति। इदम् विस्तारस्य स्थूलताया मानमस्ति।[८४]

पाषाणस्य वर्गीकरणम्

प्रथमतः षोडशपर्यन्तं भूमिक्रम उच्यते। इष्टकाया उपरि वालुका, वालुकोपरि पुंलिङ्गादिलिङ्गस्य रेखायाः परीक्षा करणीया। (अत्र शिलायाश्चयनं परीक्षा च भवति।

---

८३ का.शि.४, ११ तः २०
८४ का.शि.४, २१ तः २२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कानि चिह्नानि सन्ति, एतत् सर्वं शिलायाश्चयनस्य आधारोऽस्ति।) विषम तथा ऋजुरेखायाः पाषाणं पुलिङ्गं कथ्यते। समसंख्या तथा समसंख्यावत् कण्ठसदृशं दृश्यते, स पाषाणो नपुंसकलिङ्गो भवति। भिन्नबिन्दुकलादीनि लोकपालसमन्वितो भवति तादृशः पाषाणस्त्यक्तव्यः। केवलं दोषहिनपाषाणस्यैव प्रयत्नेन संग्रहः करणीयः। यस्याग्रभाग ईषदुन्नतोऽग्रभागतः, तथा यस्य पाषाणस्याग्रभागोऽधो भवति स भूतदांशक कथ्यते। यस्य पाषाणस्याग्रभागः पूर्वाभिमुखो भवति, सः पाषाणो ब्राह्मणस्य कृते उपयुक्तोऽस्ति। यस्य पाषाणस्य शीर्षं पूर्व-उत्तरं प्रति भवति, स वैश्यानां कृते उपयुक्तो भवति। एक-पाषाणस्य मूलसमीपे द्वितीयस्याग्रभागो भवेत्, तेन प्रकारेणेष्टका वा पाषाणः स्थापनीयः। पाषाणान् पञ्चगव्य-गन्धोदकैः स्नाप्य प्रथमरात्रिस्तत्राधिवसेत्। पवित्र(शिव)ब्राह्मणकुलोत्पन्नः, शिवदीक्षासमन्वितः, सर्वलक्षणसम्पन्नः, वेदाध्ययने रतः, जलेऽवगाहनं कृत्वा भस्मस्नानं समाचरेत्। नूतनवस्त्राणि धारयित्वा, शिरे उष्णीशमेवं सर्वप्रकारस्य सुगन्धयुक्तानुलेपनं कृत्वा पञ्चाङ्गेष्वाभूषणानि धारयित्वा, कवचं महामन्त्रमुक्त्वा, पदार्थानेकत्रीकृत्य, इष्टकां स्वच्छां कुर्यात्। सुवर्णेन कार्पास-सूत्रेण वेष्टकां वेष्टयित्वा स्थण्डिलस्य कर्णिकाया बहिः स्थापयेत्। (स्थण्डिलं कमलाकारवत् मत्वा मध्यभागं कर्णिकामवगच्छतु) इष्टकायाः परितः "ल"अक्षरं लिखेत्, दक्षिणभागेऽपि लकारो लेखनीयः, पश्चिमभागेऽपि ल-अक्षरः लेखनीयः, उत्तरभागं प्रति यकारमक्षत-चूर्णेन लिखित्वा वस्त्रे वेष्टनं कृत्वा, प्रत्येकशिलां क्रमेण पूर्व-पश्चिम-उत्तर-दक्षिणदिशं प्रति तथा शेषभागस्याग्रभाग उत्तरं प्रति भवेत्। (ल-अक्षरः पृथ्वीतत्त्वं तथा य-अक्षरो वायुबीजं कथ्यते।) नव संख्यकान् नूतनकुम्भान् सूत्र-वस्त्रेणालङ्कृत्य गन्धेन पूजयित्वा, कुशगुच्छान् वा सुवर्णकमलं स्थापयित्वा मध्यभागतः प्रारम्भं कृत्वा क्रमेण स्थापयेत्। मध्यकुम्भे सादाख्यं परितः लोकपालान् (अष्टकुम्भेषु) तेषां मन्त्रैर्ध्यानं कृत्वा गन्धादिद्वारा पूजयेत्। प्राज्ञो नैवैद्यं दत्त्वा होमं समाचरेत्। अग्निकार्यार्थं प्रदर्शितं तदनुसारमग्निध्यानादिकं कुर्यात्। पलाश-औदुम्बर-अश्वत्थ-वट-इन्दु(कर्पूर)-आदीनां समिधया सम्यङ्मन्त्रेण मूलमन्त्रेण च होमं दद्यात्। अघोरमन्त्रेण चरुः, नेत्रमन्त्रेण तिलाः, तथा

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शताहुती- र्दद्यात्। एतेन प्रकारेण विशेषद्रव्येण व्याहृत्या सहाहुतीदद्यात्। रात्रौ जागरणं, प्रातः- जलेऽवगाहनं कृत्वा समाचरेत्। पश्चादिष्टका कलशं तथाग्निं क्रमेण भूमौ पूरयेत्। जलादिरम्यदानैस्तथा राष्ट्रमन्त्रैर्होमयेत्। शिष्टमग्न इत्यादिमन्त्रैः पूर्णाहुतिं समाचरेत्। स्थापकः स्थपतेर्वस्त्रं, सुवर्णमुद्रिकादिं दत्त्वा पूजयेत्। पश्चात् शुभमूहुर्ते सभाया द्वारस्य स्थानं निश्चित्य द्वारस्य दक्षिणे स्तम्भस्य मूलसमीपे वा स्तम्भद्वयस्य मध्ये स्थपतिरिष्टकां वा पाषाणं क्रमेण स्थापयेत्।[८५]

स्तम्भः- द्वारस्तम्भः

प्रासादस्य वा मण्डपस्य निर्गमन-प्रदक्षिणाक्रमेण प्रासादस्य भित्तिः, एवं च गोपुरस्य प्रवेशद्वारेऽप्रदक्षिणाक्रमेण, तथैव गोपुरस्य भित्तेरन्तः स्थापयेत्। ईशानदिशायां प्रति इष्टकायाः पुरतः, तथैव (नैऋत्ये) मूलं मूलेन सह भवेत् तादृशी रचना करणीया। आग्नेये वा वायव्य एकेष्टकाया अग्रभागो द्वितीय-इष्टकाया मूलेन सह भवेत् तादृशी रचना करणीया। पञ्चवारं ब्रह्मण उच्चारणं कृत्वा पूर्वदिशामारभ्य प्रथमेष्टकां स्थापयेत्। मध्ये सुवर्णकमलेन सह पञ्च मृद्भिर्लेपनं कृत्वा कलशं जलेन सह पूरयेत्। कुम्भपूरणसमये तस्य जलं प्रदक्षिणाक्रमेण भ्रमति चेत् शुभदायकं भवति। यदि विपरीतक्रमेण भ्रमति तर्हि अशुभं भवति। तथाप्यप्रदक्षिणक्रमेण भ्रमति चेत् शान्तिहोमं कारयेत्।[८६]

उपपीठम्

भवनस्य वा स्तम्भस्याधोभागमुपपीठं कथ्यते। तस्योपर्यधिष्ठानादीनां निर्माणं भवति। उपपीठस्यानेके प्रकाराः सन्ति। तस्योत्कीर्णकानुसारं नामनिर्धारणं भवति। भिन्न-भिन्नदेवतानां

---

८५ का.शि.४,२३ तः ४५
८६ का.शि.४, ४६ तः ५०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भिन्नप्रकाराणामुपपीठानां प्रयोगो भवति। उपपीठस्योच्चताधिष्ठानस्योच्चता सदृशी, अथवा त्रिपादं सार्धा च भवेत्। पञ्चभागेषु त्रयो भागाः, सपादो भागः, एकसार्धभागः, पादोनद्विगुणं, विशेषरूपेण द्विगुणितं भवेत्। एवमुच्चताया अष्ट प्रकाराः सन्ति।[८७]

उपपीठस्य निर्गमनम्

अधिष्ठानस्योचताया दशभागेषु विभाजनं कुर्मश्चेत् एकम्, द्विः, त्रिः, चत्वारः पञ्च वा भागस्याधिष्ठानस्य पादुकस्य च निर्गमनं भवति। उपपीठस्य निर्गमस्य पञ्च प्रकाराः सन्ति। उपपीठस्य निर्गमनं स्तम्भस्य बहिर्निर्गच्छतीति ज्ञातव्यम्। अयं निर्गमः स्तम्भस्य सदृशो (स्तम्भस्य विस्तारसदृशो) द्विगुणितो त्रिगुणितो वा भवेत्। जगती नीव्रतुल्यः (अधिष्ठानस्य) उपान(पादुका)सदृशो वा भवति। उपपीठस्य निर्गमनस्य च पञ्चभेदाः सन्ति । सभादीनां पादस्य बहिर्भागे निर्गमनस्यैको दण्डो भवति। एकदण्डमारभ्य नवदण्डपर्यन्तम्, उपानस्य (पादुकायाः) निर्गमनं प्रथमं त्रित्रिदण्डस्य वर्धनम् - इति त्रयः प्रकारा भवन्ति। पादुकाया निर्गमनं त्रिः, षड् तथा नव दण्डानां भवति। उपपीठस्योच्चता द्वादशभागेषु विभज्यते, तद्द्युपानस्य भागद्वयं, एकः पद्मभागः, द्वितीयः कम्पमुच्यते। कण्ठस्य पञ्चभागाः, कम्पं वा अब्जं प्रथमवत् (प्रत्येकस्यैकं भागं) कुर्यात्। वाजनस्यैको भागः, कम्पस्याप्येको भागो भवति। एवंप्रकारेणाष्टाङ्गानि भवन्ति। अम्बुजं विना षडङ्गानि, कम्पेनाम्बुजमानं तु योग्यं भद्रोपपीठकमुच्यते। ऊर्ध्वकम्पं विना (पद्मद्वयं) पञ्चाङ्गमुपपीठं कथ्यते।[८८]

---

८७ का.शि.५, १-२
८८ का.शि.५, ३ तः ११

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features




प्रतिभद्रः ।




प्रतिसुन्दरः ।

प्रतिभद्रम्

उपपीठस्योच्चतां सप्तविंशतिभागेषु विभज्य, पादुकोच्चताया भागद्वयं, तथैव पङ्कजः, कम्पस्य एको भागः, गलस्योच्चता द्वादशांशं भवति। उत्तरे एकभागः, तत्सममूर्ध्वं कमलं, कपोतस्य त्रयो भागाः, आलिङ्गस्य एको भागः, उपरितस्त्रयभागेषु भागद्वयं, तथा पानस्यैको भागः- एतादृशं प्रतिभद्रं कथ्यते।[८९]

प्रतिसुन्दरः

पादुकस्योच्चताया भागद्वयं, कमलस्योच्चताया भागद्वयम्, कम्पस्यैको भागः, अन्तरितस्यैको भागः, प्रतेर्भागद्वयं, वाजनस्यैको भागः, गलमानमष्टांशं, कम्पस्यैको भागः,

८९ का.शि.५, १२-१५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भागः, आलिङ्गस्यैको भागः, तथान्तरितस्यैकभागः, प्रतितुङ्गं द्विभागः, वाजनं चकभागम्, - इयं सप्तविंशतिर्भागस्योपपीठं प्रतिसुन्दरमुच्यते।[९०]

सौभद्रम्

उपपीठस्योच्चताया एकविंशतिभागेषु विभाजनं कर्तव्यम्। उपानस्य भागद्वयं, तावत्युच्चता कमलस्य भवति। कण्ठस्यैको भागः, पद्मस्यैको भागः। महापदं द्विभागेन तथा पद्ममंशेन कारयेत्। एकभागस्य कम्पः, कण्ठोऽष्टभागस्य, कम्पस्यैको भागस्तथान्ये पद्मं-कम्पं कुर्यात्। कम्पस्यैको भागः। तत् सौभद्रं कथ्यते।[९१]

कल्याणिका

उपानस्य भागद्वयं, कन्धर-कमलस्य भागद्वयं, कमलस्य भागद्वयं, तत्समं पट्टिकाद्वयं, वर्तुलस्य भागद्वयं, कम्पस्यैको भागो भवेत्। गलस्योच्चतायाः सप्त भागाः, कम्पस्यैको भागः, कमलस्य भागद्वयं, महापट्टी द्विभागायाः, कमलस्यैको भागः, कम्पस्यैको भागः - एतेन प्रकारेणोपपीठस्य पञ्चविंशतिभागेषु विभाजनं करणीयम्। इदं कल्याणिका नामकमुपपीठमुच्यते। कल्याणिका सर्वधामसु पूजितास्ति। एतेन प्रकारेणोपपीठानां वर्णनं कृतमस्ति। अङ्गस्य निर्गमः प्रवेशो वाधिष्ठानस्य विधानानुसारं भवति। भूत-व्याल-सिंह-मकर-पत्रजाति - इत्यादिनोपपीठस्य गलस्य भागसहितं सुशोभनं करणीयम्। प्रत्यङ्गं मकर-कमलेनाच्छादितं वा रुद्धं मस्तकं भवेत्। कमलोपरि किमपि कार्यं न करणीयम्। तस्य कृतेऽधिष्ठानोक्तमाचरेत्। उपपीठस्य सर्वं दर्शितमस्ति।[९२]

अधिष्ठानम्

---

९० का.शि.५.१६-१९
९१ का.शि.५, २०-२२
९२ का.शि.५,२३-३०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…णी-भुवन-पृथ्वी-भूमि - इत्यादिपर्यायवाचिशब्दाः सन्ति। भवन-विस्तारस्य बाहभागोऽधिष्ठानस्य निर्गमनम्, कूटादेर्निर्गमनस्य समानं भवति। पीठोपरि स्थिरमधिष्ठानस्य निर्गमनम्, पीठस्याधः स्थितस्य होमस्य निर्गमनवद् भवति। तस्मात्प्रकृतिनीव्रं च सूत्रपातं तु कारयेत्। (होमोऽधिष्ठानस्याध उपपीठरूपेण भवेत्, स पादुकाया अधोभागो होमः कथ्यते। अथवा प्रथमेष्टकाया मानं ध्यानेन कुर्यात्। प्रथमेष्टकातः प्रकृतिपर्यन्तं घनभित्तिं प्रकल्पयेत्। प्रकृतेरुच्चता एकहस्त, हस्तद्वयं त्रिहस्ता वा भवति। तस्योपर्याकृतेर्निर्माणं न करणीयम्। तस्योच्चतायाश्त्रयः प्रकाराः सन्ति। उत्तम-मध्यम-अधमेति। षडङ्गुलादारभ्य षट्-षड् अङ्गुलं वर्धयेत्। प्रकृति-स्थलमन्तर्मण्डलं कथ्यते। (प्रकृतेरन्त-भागोऽन्तर्मण्डलनाम्ना प्रसिद्धोऽस्ति। ) एतेन प्रकारेण प्रकृतेर्निर्माणं कृत्वा तस्योपरि होमस्य निर्माणं करणीयम्। होमस्य निर्गमनं, भित्ति-स्तम्भस्य विस्तारो द्विगुणितं वा त्रिगुणं भवति। अथवा होमस्य निर्गमनमर्धं ततोऽप्यर्धं बलानुसारं भवति। होम-प्रकृतेर्निर्गमनं दण्डद्वयं वा त्रिदण्डं भवति। अथवा निर्गमनमायादिसूत्रानुसारं कुर्यात्। होमनीव्रं समं प्रोक्तं वा द्विगुणितं भवेत्। होमस्योपरि गन्धमानेन कमलं कल्पयेत्। प्रवेशः कमलस्यान्तः, तस्योच्चता समं भवति। उपानं कमलस्योच्चताया अर्धं भवति। अधिष्ठानमुपानस्योपर्युपपीठसहितमुपपीठरहितं भवति। सोपानानां कृते प्रकृतेरुपरि होमं कल्पयेत्। तस्योपरि तरतालम् (अधिष्ठानम्) उपपीठसहितं रहितं वा भवति। होमस्योपरि कमलं न स्थापयेत्, विनाधारं कमलपर्णवत् पादुकाया निर्माणं करणीयम्। प्रकृतिः समसूत्रे भवेत्। प्रासादस्य होमः, उपानादिनिर्गमनं वा अन्तप्रवेशः -एतेन सूत्रेण करणीयम्। अधिष्ठानस्योच्चता स्तम्भस्ययोच्चताया अर्धं वा स्तम्भस्योच्चतासदृशस्तथा स्तम्भस्योच्चताया अष्टभागेषु षड् भागा भवन्ति।[९३]

दण्डः

---

९३ का.शि. ६.१४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दण्ड उच्यते।[९४]

निर्गम:

निर्गमस्य पञ्चप्रकारा: सन्ति। एकदण्डादारभ्य अर्ध-अर्धदण्डवर्धनं कृत्वा त्रिदण्डपर्यन्तं भवति। स्तम्भस्य बहिर्भागे वा निर्गमनस्य भागत्रयं कृत्वा उपानस्य विस्तारस्यैको भागो भवति, तथा शेषं जगतेर्विस्तारो भवति। आमुदावंशस्यैको भागो भवति, तथा तस्य निर्गमनं जगतेर्निर्गमनवद् भवति। कुमुदस्यान्तभागपर्यन्तं पट्टस्यैको भागो भवति। तथैव तस्य कर्णस्यान्तर्गमनं भवति। सर्वेषामम्बुजानां तु नीव्रं तुङ्गसमं भवेत्। कम्पस्यान्य-भागस्य निर्गमनस्योच्चतैकचतुर्थांशो भवति। महावाजनस्य निर्गमनं तस्योच्चतावद् अथवा द्विगुणितमुच्ताातां पादोनभाग: सदृश: सुदृढो निर्मातव्य:। जन्मादिपञ्चवर्गेष्वन्तपर्यन्तं वा द्वारपर्यन्तं, वा स्थलपर्यन्तमधिष्ठानस्योच्चता भवेत्। उपान-जगती-कम्प-खण्ड-पट्टिकादि-अधिष्ठानस्य पञ्चप्रकारा: प्रसिद्धा: सन्ति। प्रतेरुपरि द्वार-जलधारा-स्थल-अप्रतिबद्धादिकं कारयेत्। तदर्थमुपानत: प्रतिपर्यन्तं, शरीरस्य मध्यभागे खण्डं न करणीयम्। प्रतिषु खण्डं भवेत् चेत् सर्वदु:खानां कारणं भवति। अत: सर्वप्रयत्नेन प्रतेरङ्गे कदापि छेदनं न करणीयम्। अधिष्ठानस्य प्रतिबद्ध: पादबन्ध:- इति प्रकारद्वयं वर्तते। सर्वप्रतिबन्धेषु कुमुदो वृत्ताकार: दर्शित:। पादबन्धप्रकारस्याधिष्ठानस्य कुमुदोऽष्टकोणो भवति। प्रतिबन्ध-पादबन्धयो: सङ्करं करोति चेत् कर्तुर्नाशो भवति। यदि प्रासादस्य निर्माणं प्रतिबन्धोपरि (अधिष्ठाने) भवति चेत्, अनेकप्रकाराणां सङ्करो भवितुं शक्यते। कूट-कोष्ठादिप्रतिबद्धाप्रकारेण भवति चेत् शुभावहा। प्रासादस्य (अधिष्ठानस्य) पादबन्धप्रकारस्यास्ति चेत् कूट-कोष्ठादिकं तथैव भवेत्। तेषु सङ्करो भवति चेत् शुभं नास्ति। अधिष्ठानस्य प्रकारवत् निर्माणमस्ति चेत् कूट-कोष्ठादिकं तत्सदृशं भवेत्। यथा अधिष्ठानं वृत्ताकारमस्ति, तर्हि कूट-कोष्ठादिकं वर्तुलाकारं भवितव्यम्।

९४ का.शि. ६.१५

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

कोष्ठादिकमप्यष्टकोणं भवेत्। यदि विपरीतमस्ति चेत् वास्तो राष्ट्रस्य तथा नृपस्य नाशो भवति, अतः सङ्करो मा भवेदिति सर्वथा प्रयत्नः करणीयः।[९५]

प्रतिबन्धः

अधिष्ठानस्योच्चताया एकविंशतिभागेषु विभाजनं करणीयम्। यथा :-

उपानम् ï १, जगती ï ७, कुमुदः ï ६, अलिङ्गः - १, त्रिपट्टः ï १, प्रतिः ï २, वाजनः ï १, उपानरहितं, शेषभागं पूर्ववत्। एतादृशो जगती नामकः -प्रतिबन्धो भवति। (अत्र आहत्य नवदशभागाः भवन्ति, भागद्वयं न्यूनमस्ति।)[९६]

पादबन्धः

अधिष्ठानं पादबन्धनाम्ना प्रसिद्धमस्ति। अधिष्ठानस्योच्चतायाः २५ भागेषु विभज्य रचना भवति। इदमधिष्ठानमुपानं विनापि भवितुं शक्नोति। यथा ïपादुकाया उच्चता ï १, जगत्याः -८, कुमदस्योच्चता ï ७, कम्पस्योच्चता ï १, गलस्योच्चताया भागत्रयम्, ऊर्ध्वकम्पस्यैको भागः, महापट्टी ï ३, कम्पः -१, [९७]

प्रतिवक्त्रम्

---

९५ का.शि.६.१६ तः २९
९६ का.शि.६.३० तः ३२

९७ का.शि.६.३३-३४-३५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तिवक्त्रमस्ति। अस्य नानाभेदैश्च वर्णनं कृतमस्ति। अधिष्ठानस्योच्चताया एकविंशतिभागान् कृत्वा ï यथा ï पादुका ï १, कमलं सार्ध -एक- भागः , कम्पः ï अर्धांशः, जगती ï ७, कुमदः ï ६, अलिङ्गः - १, त्रिपट्टः ï १, प्रतिः ï २, वाजनन्- १, [९८]

प्रतिक्रमः

इदमधिष्ठानं प्रतिक्रमनाम्ना ख्यातम्। प्रतिक्रमं सर्वदेवालयानां कृते योग्यमस्ति। उपर्युक्तानुसारमुपानमेकभागस्य न किन्तु भागद्वयस्य भवति। अलिङ्गस्य भागद्वयं, तथा शेषमुपर्युक्तानुसारं भवति। उपानस्योपरि कमलं वा कम्पं त्यजेत्। (प्रतिक्रमं प्रतिवक्त्रस्यैको भागोऽस्ति) (उपानं ï २, अलिङ्गः - २,)[९९]

अम्भोजकेसरम्

अम्भोजकेसरं पादबन्धस्यैकः प्रकारोऽस्ति। अधिष्ठानस्योच्चतायाः षड्विंशतिभागाः करणीयाः। यथा ï उपानस्यैकभागः, दलस्य भागद्वयम्, कम्पस्यैको भागः करणीयः, जगत्या उच्चतायाः षड्भागाः, दलस्यैकभागः. खण्डस्यैको भागः, एकेन भागेन कमलम्, कुमुदस्योच्चताया भागत्रयम्, पद्मस्यैको भागः, कम्पस्यैको भागः, कण्ठस्य भागद्वयम्, कण्ठतुङ्गस्यैको भागः, दलस्यैको भागः, महापट्टेर्भागद्वयम्, दलस्यैको भागः, कम्पस्यैको

---

९८ का.शि.६.३६-३७-३८
९९ का.शि.६.३९-४०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ठानमष्टकोणं भवेत्। (अत्र षड्विंशतिभागाः करणीयाः, किन्त्वाहत्य नवविंशतिभागा भवन्ति। कुमुदस्य गणनां न कुर्मश्चेत् षड्विंशतिर्भवन्ति।)[100]

पुष्पपुष्कलः

पुष्पपुष्कलः पादबन्धस्यैवैकः प्रकारोऽस्ति। अधिष्ठानस्योच्चतामेकोनविंशे भागे विभाजिते यथा ï उपानम् ï १, कमलम् -३, कम्पः ï अर्धभागेन, जगतेः ४, अम्बुजमर्धभागेन, दलस्यार्धो भागः, पद्मस्यार्धभागः, पट्टस्य भागत्रयम्, पद्मस्यार्धभागः, कम्पस्यार्धभागः, खण्डस्योच्चता सार्ध-एकभागः, कम्पस्यैको भागः, पट्टिकायाः सार्ध-एकभागः, अम्बुजस्य सार्ध-एकभागः, कम्पस्यार्धभागः, (अत्राहत्य विंशतिर्भागा भवन्ति)।[101]

श्रीबद्धान्तः

श्रीबद्धान्तः प्रतिबन्धस्य प्रकारोऽस्ति। श्रीबद्धान्तस्य विभाजनं द्वात्रिंशद् भागेषु भवति यथा – उपोपानं ï २, उपानं ï १, कमलं ï ७, कण्ठः ï १, पद्मं ï १, कुमुदः ï ४,दलम् १, कम्पः ï १, गलम् ï ३, कम्पः ï १, (ऊर्ध्वकम्पस्य कल्पनां कुर्यात्) कपोतः ï ४, आलिङ्गं ï १, अन्तरितः ï १, प्रतिः ï २, वाजनं ï २,।[102]

मञ्चबन्धः

मञ्चबन्धः प्रतिबन्धस्य प्रकारोऽस्ति। अधिष्ठानस्योच्चताया अष्टविंशतिभागेषु विभाजनं करणीयम्। यथा – उपानं ï १, जगती ï ६, कुमुदः ï ५, कम्पः ï १, गलं ï ३, कम्पः ï १, पद्मं ï १, कपोतः ï ३, आलिङ्गं ï १, अन्तरितः ï १, प्रतिः ï २, वाजनं ï २,

---

१०० का.शि.६, ४१ तः ४५
१०१ का.शि.६.४६ तः ५०
१०२ का.शि.६.५१ तः ५५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ा।)[103] (उपर्युक्तानुसारमालिङ्गस्योपरि, (पृष्ठभागे) विंशतिभागेषु विभज्य श्रीकान्तानुसारं रचनीयम्। प्रतिबन्धस्य भिन्न-प्रकारो मिलति।)

श्रेणीबद्धः

श्रेणीबद्धस्याधिष्ठानस्योच्चतां षड्विंशतिभागेषु विभज्य ï यथा ï पादुका ï १, दलम् ï २, कम्पः ï १, जगती ï ६, घटः ï ४, कम्पः ï १, पद्मं ï २, कम्पः ï १, (गलं ï २, मराठीपुस्तके) वाजनं ï १, कमलं सार्ध -एकः, कम्पः ï १, (अत्र षड्विंशतिभागा न भवन्ति)[104]

अब्जबन्धः

प्रतिबन्धस्याब्जबन्धः प्रकारोऽस्ति। सिंह-गजादिद्वारा विभूषितं कृत्वा पादबन्धस्य भेदो भवति। अधिष्ठानस्योच्चतामष्टादशभागेषु विभज्य ï यथा ï पादुका सार्धांशा, कम्पोऽर्धांशः, कमलं ï ५, गलं ï १, पद्मं ï १, कुमुदः ï ३, दलं ï १, आलिंगं ï १, त्वरितः (अन्तरितः) ï १, प्रतिः ï २, वाजनं ï १,।[105]

वप्रबन्धः

वप्रबन्धः पादबन्धस्य प्रकारोऽस्ति। सर्वगृहाणां कृते शुभोऽस्ति। अधिष्ठानस्य द्वाविंशतिर्भागाः करणीयाः। यथा ï पादुका ï २, अब्जं ï १, कम्पः ï १, जगती ï ५,

---

१०३ का.शि.६,५६ तः ५९
१०४ का.शि.६.६१ तः ६४
१०५ का.शि.६. ६५ तः ६८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कण्ठः ï २, कम्पः ï १, दलं ï १, महापट्टी ï २, कम्पः ï १,।[१०६]

प्रतिसुन्दरः

अस्यां महापङ्क्तिकामानं कपोतवत्, कपोतस्योपरि कम्पः, तस्योपर्येकभागस्य त्रिपट्टो भवति। प्रतेरुच्चताया भागद्वयम्, वाजनस्यैको भागः, एवं रीत्या षड्विंशतिभागयुक्तः प्रतिसुन्दरः कथ्यते)[१०७] (मराठीपुस्तके पादुकातो महापट्टिकापर्यन्तं मानस्य गणनां कृत्वा आहत्य प्रतिसुन्दरस्य षड्विंशतिर्भागा भवन्ति।)

श्रीकण्ठान्तः

श्रीकण्ठान्तः प्रतिबन्धस्यैवैकः प्रकारोऽस्ति। अधिष्ठानस्योच्चतायास्त्रयोविंशतिर्भागान् कृत्वा ï यथा- उपानं ï १, पद्मं ï १, कम्पः ï १, पट्टिका ï १, कम्पः ï १, पद्मं ï १, कण्ठः ï १, अम्बुजं ï १, कुमुदः ï ३, पद्मं ï १, आलिङ्गं ï १, त्रिपट्टः (शिवभागः ï १) ï १, प्रतिः ï २, वाजनं ï १, एवम् क्रमेण करणीयम्। (अत्र त्रयोविंशतिभागा न किन्तु सप्तदश भवन्ति)[१०८]

करीरबन्धः

करीरबन्धः प्रतिबन्धस्य प्रकारोऽस्ति। करीरबन्धो द्वाविंशतिर्भागेषु विभज्यते यथा ï उपानं ï १, पद्मं ï १, कम्पः ï १, पट्टिका ï २, कम्पः ï १, गलं ï १, पद्मं ï १, कुमुदः ï ३, पद्मं ï १, आलिङ्गं ï १, त्वरितः (अन्तरितः) ï १, (अत्रापि द्वाविंशतिर्भागा न

---

१०६ का.शि.६, ६९ तः ७२
१०७ का.शि.६, ७३-७४
१०८ का.शि. ६.७५ तः ७८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ा। मराठीपुस्तके आकृत्यां सप्तदशविभागा भवन्ति। )

(मराठीपुस्तके आकृत्यां प्रतिः-२ तथा वाजनं-२ प्रदत्तमस्ति)[१०९]

कलशबन्धः

कलशबन्धः प्रतिबन्धस्य प्रकारोऽस्ति। कलशबन्धस्य चतुर्विंशतिभागा भवन्ति। यथा ï पादुका ï १, पद्मं ï १, कम्पः ï १, कम्पः ï १, कण्ठः ï २, कम्पः ï १, पट्टिका ï १, कम्पकः ï १, दलं ï २, गलं ï १, अम्बुजं ï १, कुम्भः -३, दलं ï १, आलिङ्गगं -२, त्रिपट्टं ï १, प्रतिः ï २, वाजनं ï १, (अत्रापि चतुर्विंशतिर्भागा न किन्तु त्रयोविंशतिर्भागा भवन्ति।)[११०]

श्रीकरः (श्रीकान्तः?)

श्रीकरः (श्रीकान्तः?) प्रतिबन्धस्य प्रकारोऽस्ति। अधिष्ठानस्य चतुर्विंशतिभागा भवन्ति। यथा ï पादुका ï १, कमलं ï १, अब्जं ï १, जगती ï ६, पद्मं ï १, कण्ठः ï १, पद्मं ï १, कलशः ï १, कमलं ï १, (अत्रापि चतुर्दशभागाः सन्ति, चतुर्विंशतिभागा न भवन्ति।)[१११] (शिल्परत्ने १९,३३-३४) २१ विंशतिभागाः श्रीकान्तस्य सन्ति। मयमते पादबन्धस्य प्रकारो दत्तः अस्ति। (म.१४.३२)

सुन्दर-अम्बुजम्

पादबन्धस्य प्रकारोऽस्ति सुन्दर-अम्बुजम्। सुन्दर-अम्बुजस्य चतुर्विंशतिभागा भवन्ति।यथा ï पादुका ï २, उपोपानं ï १, दलं ï ६, कण्ठः ï १, अब्जं ï १, खण्डः ï

---

१०९ का.शि. ६.७९ तः ८२
११० का.शि. ६.८३ तः ८६

१११ का.शि.६.८७ तः ९०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कण्ठः ï ३, दलं ï १, पट्टिका ï २, दलं ï १, कम्पः ï १,।[११२]

नलिनकान्तम्

नलिनकान्तं नामकः प्रकारः सर्वदेवानां प्रियोऽस्ति। नलिनकान्तस्याष्टाविंशतिभागा भवन्ति। यथा ï पादुका ï २, दलं ï ४, गलं ï १, अम्बुजं (भागद्वयं) ï ३, पट्टिका ï २, पादुका ï १, जगती ï ४, पद्मं ï १, कण्ठः ï १, पत्रं ï १, कुमुदः ï ३, पद्मं ï १, कम्पः ï १, त्रिपट्टः ï १, प्रतिः ï २, वाजनं ï २, (मराठीपुस्तके दलं ï ३, वाजनं ï १) अत्रापि विभाजनमष्टाविंशतिभागेषु न भवति, किन्तु ३० भागा भवन्ति।)[११३] (मराठीपुस्तके त्रिपट्टे च प्रश्नार्थो वर्तते।)

श्रीसौन्दर्यम्

श्रीसौन्दर्यं त्रयोविंशतिभागेषु विभज्यते ï यथा ï पादुका ï सार्धांशं, उपोपानं ï सार्धत्रिः, पद्मं ï १, कण्ठः ï १, उद्वेपनं ï १, कुमुदः ï ३, पद्मं ï १, अपमानकम् ï १, कण्ठः ï २, पट्टिका ï १, पद्मं ï १, आलिङ्गं ï १, त्रिपट्टः ï १, प्रतिः ï ३, वाजनं ï १,।[११४]

स्कन्दकान्तः

---

११२ का.शि.६.९१ तः ९३
११३ का.शि.६.९४ तः ९८
११४ का.शि.६.९९ तः १०३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...न्दो वा नामकः प्रतिबद्धस्य प्रकारोऽस्ति। स्कन्दकान्तश्चतुर्विंशतिभागेषु विभज्यते ï यथा ï उपानं ï १, दलं ï २, कम्पः ï १, जगती ï ६, कुमुदः ï ४, पद्मं ï १, कण्ठः ï १, कमलं ï १, वाजनं ï २, पद्मं ï १, आलिङ्गं ï १, त्रिपट्टः ï १, प्रतिः ï २, वाजनं ï १, (अत्र पञ्चविंशतिभागा भवन्ति, मराठीपुस्तके कुमुदस्य त्रयो भागाः प्रदत्ताः, का.शिल्पे कुमुदस्य चत्वारो भागाः सन्ति।)[११५]

अम्बुजकान्तः

अम्बुजकान्तः पादबन्धस्य प्रकारोऽस्ति। अम्बुजकान्तस्य त्रयोविंशतिभागाः करणीयाः। यथा ï उपानं ï १, अम्बुजं ï ६, कण्ठः ï १, कमलं ï १, घटः ï ४, पद्मं ï १, कम्पः ï १, कम्पः ï १, कन्धरः ï २, कम्पः ï १, कमलं ï १, कपोतः ï ३, आलिङ्गं ï १, (मराठीपुस्तके घटः ï ३, का.शिल्पे ï ४ भागाः।)[११६]

नालप्रतिष्ठा, नालस्थापना

निर्माल्यलक्षणं यथाप्रतिबन्धे प्रतेरन्तभागे (उपरि) भिन्नप्रकारे (अधिष्ठानस्य) पट्टिकाया अन्ते, गलान्ते, कुमुदे, वप्रस्यान्ते, पादुकाया अन्तभागे छिद्रं करणीयम्। तथा तस्योपरि गलस्य निर्माणं करणीयम्। नालस्योच्चतायाः पञ्च प्रकाराः सन्ति। द्वादश-अङ्गुलादारभ्य (२२.८ से.मी.) त्रयस्त्रयोऽङ्गुलं वर्धयित्वा चतुर्विंशति- (४५.६.से.मी) अङ्गल-पर्यन्तं भवति। नाल-उच्चताया एतन्मानं भित्तेर्बहिर्भागस्यास्ति। गर्भगृहे नालस्योच्चतोपर्युक्तानुसारेणार्धा भवति भित्तेर्भागं त्यक्त्वा वा भवति। गर्भगृहस्यान्तर्भागे तथा

---

११५ का.शि.६.१०४ तः १०८
११६ का.शि.६.१०९ तः ११२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...स्य विस्तारः पञ्च प्रकारेण भवति। अष्ट-अङ्गुलादारम्याङ्गुलद्वयमङ्गुलद्वय वर्धनं कृत्वा षोडशाङ्गुल-पर्यन्तं भवति।[117]

नालमानं

उच्चता - १२ १५ १८ २१ २४

विस्तारः ï ८ १० १२ १४ १६

नालस्याग्र भागस्य विस्तारो मूलविस्तारस्य पञ्चभागेष्वेको भागस्त्रिभागेष्वेको भागो वा भवति। छिद्रं नालस्योच्चतायास्त्रिषु भागेष्वेको भागो भवति। छिद्रस्याग्रभागो मूलादुन्नतो भवेत्। नालस्य मध्यभागो निम्न-उन्नतो न करणीयः। मूलादग्रभाग उन्नतो भवेत्। मूले हंसस्याकृतिः, गजस्योष्ठसदृशी यथा दर्शने सुन्दरं भवेत्, तादृशी रचना करणीया। व्यालः सिंहस्तथा भूतस्य रचनैतेन प्रकारेण करणीया, यथा नालं धारयित्वा स्थिताः स्युः। एवंरीत्या सौम्यनालीं प्रासादस्य मध्ये करणीया। नालस्य विधिना गन्धोदकैः संपूज्य प्रसन्नतापूर्वकं स्थापना विधेया। नालं सुधया गुडतोयैश्च सुदृढं कृत्वा द्विदलसमानायाः पुल्लिङ्गशिलाया उपयोगः करणीयः।[118]

स्तम्भः

स्तम्भस्य पर्यायवाची शब्दा यथा - स्तम्भः, तलिपं, चरं, जङ्गमम्, स्थाणुः, स्थूणं, पादः इत्यादयः सन्ति। स्तम्भस्योच्चता प्रासादस्योच्चतानुसारं भवति। स्तम्भस्योच्चताधिष्ठानाद् द्विगुणिता भवति। स्तम्भस्य तल-विस्तारः षड्भागस्य वाधिको भवति। स्तम्भस्य विस्तारः स्तम्भ-उच्चताया दश- नव-अष्टभागेषु विभाजनं कृत्वैको भागो भवति। एतन्मानं काष्ठ-

---

११७ का.शि.७.१ तः ५

११८ का.शि. ७.६ तः १३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ानं यथा - कुड्यस्तम्भस्य विस्तारोऽर्धं ï त्रिभागो वा चतुर्थभागो न्यूनो भवति। (उपर्युक्तकाष्ठस्य मानानुसारमत्र कुड्यस्तम्भेऽर्धं त्रिभागो वा चतुर्थभागो न्यूनो भवति। कुड्यस्तम्भस्य विस्ताराय सर्वमानेषु श्रेष्ठमानस्य प्रयोगः करणीयः।[११९]

प्रतेरुत्तरसीमापर्यन्तं विशालस्तम्भ उच्यते। उपानत उत्तरस्यान्तपर्यन्तं निखातस्तम्भः कथ्यते। स्तम्भस्य मूलविस्तारः, स्तम्भस्योच्चतायाः सप्तभागेष्वेके भागः, नवभागेष्वेको भागः, दशभागेष्वेको भागः, एकादश-द्वादशभागेष्वेको भागो भवति। स्तम्भस्योपरिभागस्य विस्तार (स्तम्भस्याधोभागस्य विस्तारात्) एकभागं न्यूनो भवति। एवंप्रकारेण प्रथमतलतः षोडशतलपर्यन्तं कुर्यात्।[१२०]

मूलादग्रो वर्गाकारस्तथा कुम्भमन्थादियुक्तः स्तम्भो ब्रह्मकान्तस्तथाष्टकोण-स्तम्भो विष्णुकान्तः कथ्यते। षड्कोणयुक्त इन्द्रकान्तस्तथा षोडशकोणयुक्त- श्चन्द्रकान्तो भवति। कण्ठस्य मानानुसारं मूलं वाग्रभागं प्रकल्पयेत्। (स्तम्भस्याधोभागं तथोपरिभागं त्यक्त्वा शेषभागः कण्ठः कथ्यते।)[१२१]

स्तम्भस्याग्रभागो मूलो वा वर्गाकारः, मध्य अष्टकोणाकारः, षोडशकोणो वा, वृत्ताकार-स्तथा कुम्भमण्डादिसंयुतो विहीनो वा भवति, स रुद्रकान्तः कथ्यते। मूलस्यापेक्षयाग्रभागो विशालः, मध्यभागोऽष्टकोणयुक्तस्तथा मण्डकद्वयं भवति चेत्, स स्तम्भो रुद्रकान्त उच्यते। मूलतोऽग्रभागपर्यन्तं वर्तुलः, कुम्भमण्डादियुक्तः, तन्मध्येऽष्टकोणोऽस्ति चेत् स रुद्रकान्तः कथ्यते। (मध्यभागेऽष्टकोणस्तथाधोपरि, भागद्वये भूषित-मण्डकं भवति। अधोभागे वर्गाकारः,

---

११९ का.शि. ८.१-२ तः ६,१/२
१२० का.शि. ८. ६.१/२ तः ९
१२१ का.शि.८.१०-११

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ये समानः (अधः, मध्ये, उपरि) भवति, तादृशः स्तम्भः शिवच्छन्दनाम्ना प्रसिद्धः। स्तम्भोऽयं शिवमन्दिराणां कृते उपयुक्तो वर्तते।[122]

स्तम्भस्य मूल-पद्मासनस्योच्चतैक-सार्ध-एको वा दण्डद्वयं भवति। तस्य द्विगुणितं पद्माकारपत्रस्य विस्तारं कारयेत्। एतस्य मध्ये (कमलस्य मध्यभागः) कर्णिकायाः स्थापना चरणे (नाल-समीपे) करणीया। कुम्भ-मुण्डकायेष्टाकृती रचनीया। पद्म-पादुकान्तस्य तले चक्रवाकं रचयेत्। पत्र-स्तम्भस्य मध्ये व्यालस्य निर्माणं करणीयम्। अयं व्यालपादुकः कथ्यते।[123]

स्तम्भस्य मूलं गजस्य पादसदृशमस्ति चेत्, स गजपादः कथ्यते। स्तम्भस्य मूले बिम्बं कुर्यात्। इच्छानुसारमाकृती रचनीया। कुम्भमण्डादियुक्तं भवति, अतस्तस्य नामैतेन प्रकारेण भवति। उच्चता वृत्ताकारा, गज-शुण्डवत्, कुम्भ-मण्डादिसंयुतोऽस्ति चेत्, स शुण्डपाद उच्यते। (गजस्य शुण्डवदुन्नतां प्रति गच्छति तदा विस्तारो न्यूनो भवति।) उपर्युक्तानुसारं मुक्तादामैरलंकृतश्चेत् पिण्डिपाद उच्यते।[124]

स्तम्भाग्रभागस्य कर्णस्य मानं चतुरश्रं भवेत्, तस्याधोभागेऽर्धदण्डस्योच्चताया अष्टकोण-कमलं भवेत्, तस्याधोभागे मण्ड-अष्टकोणं भवेत्, तस्याधोभागेऽर्धदण्डस्य कमलं, तस्याधोभागे एकदण्डस्य वर्गाकारः पूर्ववत् छत्रं वा, मूलं वर्गाकारोऽस्ति चेत् छत्रखण्डं कथ्यते।

उपर्युक्तानुसारं स्तम्भे मध्यमपट्टोऽष्टकोणो भवेत्, स श्रीकण्ठ उच्यते। मध्यमपट्टः षोडशकोणयुक्तोऽस्ति चेत्, स श्रीवज्रस्तम्भ उदाहृतुम्। मूलादग्रपर्यन्तं वर्गाकारः, त्रिपट्ट-क्षेपण-सहितो भवति चेत्, स क्षेपणस्तम्भो भवति। अयं पट्ट-पत्रादिशोभितो भवति।

---

१२२ का.शि. ८,१२ तः १६
१२३ का.शि.८.१७ तः १९
१२४ का.शि.८.२० तः २२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

् कृत्वा, स्तम्भस्य मध्ये एकभागस्य शिखां कुर्यात्, तर्हि विशेषस्तम्भ उच्यते। स्तम्भमूलं स्तम्भस्य मानस्य च कमलं कल्पयेत्।[125]

बोधिका

बोधिकाया विस्तारोऽधोभाग-विस्तारात् सपाद-एको भवति चेत्, श्रेष्ठा बोधिका कथ्यते। स्तम्भमूलस्य विस्तारस्य समानो भवति चेत्, मध्यमस्तथाग्रभागस्य सदृशं विस्तारयुक्ता बोधिका कनिष्ठा उच्यते। यावदुन्नता तावद् विस्तारो भवति। विस्तारः पञ्चदण्डस्य भवति, सैवोत्तमा बोधिका प्रसिद्धास्ति। यस्या उन्नता विस्तारस्य द्वित्र्यंशा चतुर्दण्डा विस्तारास्ति चेत् सा मध्यमा। यस्या उन्नता विस्तारस्यार्धं तथा त्रिदण्ड-विस्तारा भवति सा कनिष्ठा ज्ञेया।[126]

बोधिकायास्त्रिभागेष्वेको भागोऽर्धपट्टिकायाः। मध्यभागे तरङ्ग-लतादिद्वारा सुशोभिता भवति। तस्योपर्येकभागस्य मुष्टिबन्धो भवति। एतस्मिन् भागेष्वेकस्य, पादोनस्य वार्धदण्डस्य छाया भवति। छाया-मुष्टिबन्धो अर्थात् मुष्टि-आकारसदृशो दृश्यते। ऊर्ध्वाधस्तथा पट्टिकाया अधश्छायाया आकारं कल्पयेत्। मध्ये पट्टत्रिभागैकमथवा विस्तारस्यार्धपट्टिर्द्वयोर्मध्ये यत् स्थानं रिक्तं भवति तत्तरङ्ग-स्थानमुच्यते। मध्यपट्टे सूक्ष्मरूपेण कार्यं पत्रादिद्वारालङ्कृतं भवति। पार्श्वयोस्तु तरंगः परस्परं पूरको भवति। बोधिकाया अग्रभागस्य विस्तारः, बोधिकाया उपरि भागस्य विस्तारस्य दशभागेषु नव भागो वा पादोनगुणितो वा बोधकाया मूलस्य विस्तारं यावद् भवति। बोधिकाया षड्भागान् कृत्वा कण्ठस्य मध्यभागे पट्टिकया सह ऊर्ध्वं पद्मस्यैकं भागं कल्पयेत्। अधो पद्मं द्विभागेन, तस्योपर्येकभागस्य पट्टो भवति। अधोभागे कमलस्य मध्ये तरङ्गं कल्पयेदिति क्रमेण करणीयम्। कमलस्य मुकुलाकार-भागोऽग्रादधोभागं प्रति भवेत् तथा निर्माणं करणीयम्। अग्रभागो बहिर्भवेत् वा कमलस्य छायानुसारं केवलं बहिर्भाग

---

१२५ का.शि.८.२३ तः २८
१२६ का.शि.९.१ तः ४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मुष्टिबन्धस्याग्रभागस्य पार्श्वे व्यालादिं हस्तयोराधारेण दद्यात् तथा रचयेत्, अथवा मकर-व्याल-पट्टिकादिद्वारा सुशोभितं कुर्यात्। रत्नैर्बद्धया, वल्लिका-चित्रादिद्वारा ग्रस्तया पट्टिकया सार्धं, बोधिकाया मध्य एकदण्डमानस्य तरङ्गो भवति। चतुष्कोणस्य समीपे पट्टो भवति। विस्तारस्तथोन्नतायां कोणे वृत्ताकारो भवति। एवं नानाचित्रैरलंकृता भवति, सा चित्रबोधिका कथ्यते। पत्रादिद्वारा चित्रिता बोधिका पत्रबोधिका। महासमुद्रस्य तरङ्गसदृशो दृश्यते तथा तरङ्गानां कल्पनां कुर्यात्। बोधिकाया निर्गमनस्य भित्तिस्तम्भ एकचतुर्थांशस्य वार्धस्य पादोनभागस्य वा भवति। क्रमेण वर्गाकारोऽष्टकोणो वर्तुलस्य (स्तम्भस्य) कृते भवति। बोधिकाया अग्रभागस्योपरि वर्गाकारो वीरकण्ठो भवति। तस्य विस्तारो दीर्घता च स्तम्भसमा तथोच्चता स्तम्भस्य पादोनभागस्य भवति। सर्वप्रकारकस्तम्भस्य वीरकण्ठो वर्गाकारो भवति।[१२७]

फलिका

त्रिदण्डमानस्य फलिका कनिष्ठा, सार्धत्रिदण्डयुक्ता फलिका मध्यमा, चतुर्दण्डविशाला फलिका उत्तमा भवति। फलिकाया विस्तारः कुम्भकर्णसमो भवेत्। सर्वासां फलिकानामुन्नता पादोनदण्डं भवति। तस्योच्चतायास्त्रिभागं कृत्वोर्ध्वभागं फलिकासन्धिरुच्यते। तस्याध एकं भागं कृत्वाधोभाग एकभागस्य कमलं भवति, अथवा तस्याकारो नागपत्रवद् भवति। सर्वासां फलिकानामुच्चताया अर्धभागो वर्गाकारो भवति। एतादृशी फलिकाया रचनां कृत्वा तस्या अधोभागे घटं कुर्यात्।[१२८]

घटः

घटस्योच्चतायाश्चत्वारः प्रकाराः सन्ति-यथा द्विदण्डः-पादोनद्विदण्डः-सार्धदण्डः-सपाददण्डश्च । घटस्य नामानि यथा ï प्रियदर्शनः-सौम्यः-चन्द्रकान्तः-श्रीधरश्च। हृद्भागे

१२७ का.शि. ९.५ तः २०
१२८ का.शि.९.२१ तः २५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कलशस्योच्चतायाश्चत्वारो भागाः, कण्ठस्यैको भागः, मुखस्यैको भागः, तथा पद्मैकेन भागेन कारयेत्। अधस्तादर्धभागस्य पार्श्वे वृत्तं न भवेत्। उपरिभागे उच्चताधिका भवेदिति क्रमेण घटनिर्माणं करणीयम्। कण्ठस्य तथा स्तम्भस्य विस्तारः समानो भवेत्। घटस्योपरि कण्ठस्य मुखं विशेषरूपेण स्तम्भस्यङ्पेक्षया विस्तारेणाधिकं भवेत्। घटस्य विस्तारः स्तम्भ-कर्णस्य विस्तारवत् कथितः। तस्याधो मूलसमीपे लसुनस्य कल्पनां कुर्यात्।[१२९]

बोधिकाया उच्चता

बोधिकाया उच्चता, स्तम्भस्योच्चतायाः पञ्चचत्वारिंशद् भागान् कृत्वा कुर्यात्, येन मूलस्य भागद्वयं भवति। उपर्येकसाकं द्वाविंशतिभागा भवन्ति। बोधिकाया उच्चतायाश्चत्वारो भागाः, वीरकण्ठस्य चत्वारो भागाः, फलिकाया उच्चतायाः पञ्चभागाः, मध्ये मूलस्यैको भागः, घटस्योच्चतायाश्चत्वारो भागाः, कण्ठस्यैको भागः, मुखस्योच्चतैकेन भागेन, पद्मस्यैको भागः, घटस्याधोभागे वर्तुलमर्धार्धं कर्तव्यम्। लसुनं-कमलं-लता-मुक्तामालादिभिः पूर्ववदलङ्करणीयम्। एतानि सर्वाणि स्तम्भस्याभूषणानि सन्ति।[१३०]

वेदिकालक्षणम्

वेदिकामधिष्ठानस्योपरि तथा स्तम्भमूले प्रकल्पयेत्। वेदिका भित्तेरधोभागो भवति। तस्या उच्चता स्तम्भमूलस्योच्चता समा भवति। प्रस्तरस्योपर्यपि वेदिका रचनीया। सार्धैकदण्डमानस्य वेदिका कनिष्ठा, दण्डद्वयस्य वेदिका मध्यमा, त्रिदण्डस्य वेदिका उत्तमा मन्यते। अन्यप्रकारेण वेदिकाया उच्चताया वर्णनं यथा ï स्तम्भस्योच्चतायाः षड् ï सप्त ï

---

१२९ का.शि.९.२६ तः ३२
१३० का.शि.९.३३ तः ३७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

या उच्चताया भवेत्। एवंप्रमाणेन श्रेष्ठा ï मध्यमा - कनिष्ठा भवति। स्तम्भमूल-पार्श्वाद् वेदिकाया उच्चता भवति। प्रथमतलगृहेषु, तलस्तम्भस्योच्चतां सप्तभागेषु विभज्यैको भागो वेदिकाया उच्चता भवति। गलस्य (स्तम्भस्य) उच्चताया अर्धोभागो वेदिकाया उच्चता भवति। (स्तम्भस्य) त्रिचतुःपञ्चभागान् कुर्मश्चेत्, तस्यैको भागो वेदिकाया उच्चता भवति। क्रमेण श्रेष्ठा-मध्यमा-कनिष्ठा भवति। वेदिकाया उच्चता षडंशास्ति चेद्, गलस्योच्चतायास्त्रयो भागा भवन्ति। गलस्योपरि कम्पस्यैको भागः, तथा कमलमेकस्य भागस्य भवति। तस्योपरि कम्पस्यैको भागो भवेत्। वेदिकायाः सप्त-अष्ट भागाः सन्ति, तर्हि गलस्योच्चता चतुर्षु पञ्चसु वा भागेषु भवेत्। कम्पं ï पद्मं ï कम्पं वा पूर्ववत् कल्पयेत्, अथवा कण्ठानुसारं मूल एकभागस्य कम्पस्य कल्पना करणीया। शेषं कण्ठस्य प्रोक्तं, तत् कम्परहितं भवति। कमलस्योच्चता सार्धद्विर्वा भागद्वयं भवेत्। वेदिकायाः कमलं ï पर्वतं ï सुपत्रैश्चित्राङ्कनं करणीयम्। सर्वासां वेदिकानां कण्ठं स्तम्भैः सुशोभितं कुर्यात्। वेदिकास्तम्भस्य निर्गमनं कुड्यस्तम्भस्य विस्तारसमं भवेत्। प्रस्तरस्योपरि वेदिकायाः प्रवेशः स्यात्। वेदिका-स्तम्भस्य प्रवेशः, गर्भभित्तेस्त्रिषु चतुर्षु पञ्चसु भागेष्वेको भागो भवति। वेदिकाया उच्चताया एकभागं न्यूनं कृत्वा शेषं भवति। प्रस्तरस्योपरि वेदिकाया आकारो नागर-पद्धत्यां वर्गाकारो भवति। द्राविड-वेसरपद्धत्यां वेदिकाया आकारोऽष्टकोणीयो भवति। वेसरपद्धत्यां हर्म्ये वेदिकाया अग्रभागस्योपरिभागोऽष्टकोणीयो भवति।[१३१]

जालकलक्षणम्

स्तम्भस्य गले (कण्ठे) जालकस्य स्थानमुच्यते। प्रासादस्य महावास्तोश्च मध्यभागे केवलं जालकं भवति। स्तम्भात्स्तम्भं जालकं न करणीयम्। जालकस्य योजना वेदिकाया उपरि कर्तव्या। जालकस्य कृते कदापि वेदिकायां छिद्रं न करणीयम्। एतत् सर्वविनाशस्य कारणं भवति। अतो जालकस्य कृते वेदिकायां छिद्रं न भवेत् तथा रचनीयम्। जालकस्य

---

१३१ का.शि. १०, १ तः १६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्विदण्ड-मानं भवति, मध्यमजालके त्रिदण्डं तथा उत्तमजालकाय चतुर्दण्डमानं प्रोक्तमस्ति। जालकस्योच्चता तस्य विस्तारसदृशी, अथवैकैकदण्डवर्धनं कृत्वा विस्तारस्य द्विगुणिता भवति। तज्जालकमुत्तमं मन्यते। जालकस्योच्चता विस्तारश्च यथायोग्यः समुचितो भवेत् तथा स्वीकरणीयम्। स्तम्भविस्तारस्यार्धमानं जालकस्य स्तम्भस्य वा कम्पः स्थूलो वा विस्तारस्यार्धो पादोनभागो वा भवेत्। जालकस्य निर्माणे मध्ये छिद्रं वर्ज्यमस्ति। स्तम्भाः समसंख्यायां तथा कम्पो विषमसंख्यायां भवेत्।[१३२]

जालकस्य षट् प्रकाराः

गोनेत्रः, हस्तिनेत्रः, नन्द्यावर्तः, ऋजुक्रिया, पुष्पकर्णस्तथा सुकर्णः - इति जालकस्य षट् प्रकाराः। दीर्घकण्ठस्य समीपे छिद्रं भवति, स गोनेत्रः कथ्यते। वर्गाकारं भूत्वा कर्णस्य समीपे छिद्रं भवति, स हस्तिनेत्र उच्यते। यस्मिन् छिद्रं पञ्चकोणं भूत्वा प्रदक्षिणाक्रमेण, नन्द्यावर्तानुसारेण पुष्प-रचना भवेत्, तन्नन्द्यावर्तं स्मृतम्। स्तम्भकम्पौ समानौ, तदा जालकमपि समानं भवति। तदा ऋजुक्रिया कथ्यते। नन्द्यावर्तसदृशी आकृतिः, छिद्रं पुष्पकण्ठवद् नालवद् वा भवति, स पुष्पकर्णस्तथा सुकर्णो जालको कथ्यते। जालकस्य स्तम्भद्वयं तथा द्वारं भित्तेर्मध्यभागाद् बहिर्भवेत्, द्वारमेकं वा द्वयं भवितुं शक्नोति, द्वारं घाटनोद्घाटनाक्षमं भवति। सभादीनां जालकं स्तम्भस्यार्धोच्चतोपरि भवेत्। लोह-काष्ठ-

---

१३२ का.शि.११, १ तः ८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

यस्मिन् स्थाने यद् द्रव्यमुचितं तत् स्थाने तस्य प्रयोगः कर्तव्यः।[133]

तोरणम्

स्तम्भस्योच्चतां दशभागेषु विभज्य चरणस्योच्चतायाः सप्त भागाः स्वीकरणीयाः। शेषभागत्रयं झषभाग उच्यते। स्तम्भस्योच्चतां नवभागे विभाज्य चरणोदयस्य मानं षड्भागं तथा शेषा झषस्योच्चता भवति। स्तम्भस्योच्चतामष्टभागेषु विभज्यते, तर्हि चरणोदयस्य पञ्चभागाः, अवशिष्टास्त्रयभागाः कम्पस्य (झषस्य?) उच्चता भवति। तोरणस्य विस्तारश्चतुर्विधः। स्तम्भस्योच्चतायाश्चतुः ï पञ्च - षड् ï सप्त भागपर्यन्तं बहिर्भवति। सम्भवतः स्तम्स्य विस्तारस्य ४-५-६-७ गुणितं प्रसादमण्डपादीनां मध्यभागे तोरणं भवति। अतोऽनेन विधिना भित्त्या बहिस्तोरणं कर्तव्यम्। तोरणं त्रिविधं भवति। पत्रतोरणम्, मकरतोरणम्, चित्रतोरणं च। अर्धचन्द्रमिवाकारं तथा पत्राणां हारेण विभूषितं पत्रतोरणं ख्यातम्। पञ्चमुखमिवाकारं तथा पार्श्वे मकरमुखयुक्तं, मध्ये नद्या नानाफललतादिद्वारालङ्कृतं, गोलाकारं मकरतोरणं कथ्यते। उपर्युक्तानुसारं मध्यभागे तलं नदी वा, द्वयोः पार्श्वे मकरस्य मुखं कुर्यात्। तथैव भूत-विद्याधर-सिंह-व्यालï हंसादिना तथा मुक्त-मालया, भिन्न-भिन्नच्छत्रैः, रत्नैर्विभूषितं तोरणं चित्रतोरणं प्रोच्यते। अन्तरालस्य अधस्तोरणस्य योजना करणीया। द्वयोः पार्श्वभागे करण्डपक्षी भवति। एवंप्रकारेण कुम्भस्य - कुम्भलताया निर्माणं कर्तव्यम्। पूर्वानुसारं प्रयत्नेन सन्धेरुपरि बोधिकां न स्थापयेत्। स्तम्भतोरणानुसारमुपरि तोरणालयो भवति।[१३४]

वृत्तस्फाटितम्

---

१३३ का.शि.११,९ तः १४
१३४ का.शि.१२.१ तः १२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…ासः) षडङ्गुलादारभ्य (११.४.से.मी.) अङ्गुलद्वयं अङ्गुलद्वयं वर्धयित्वा (३.८.से.मी.) षोडशाङ्गुल(३०.४.से.मी.)पर्यन्तं भवति। तस्य निर्गमनं विस्तारार्धं, विस्तारो द्वात्रिंशत्सु भागद्वयं त्रयं वा भवति। वृत्ताकारो भवति तथा तोरणस्तम्भं यावत् तस्य विस्तारो भवति। तोरणस्तम्भोपरि कन्धरेण सहितं शुकनासान्वितं भवति, अथवा वृत्ताकारः कर्णकूटस्य आकृत्याः सदृशं भवति। (शुकनाशी प.२२/ कर्णकूटः प. ३१) स्तम्भविस्तारस्य चत्वारो भागा भवन्ति चेत् द्विभागं चरणोदयं भवति। प्रस्तरस्योच्चतैको भाग एवमेको भागः शुकनासेर्भवति। तथैव कूटस्य मानं स्यात्, यथा मानं दर्शितं तदनुसारं करणीयम्, तदनुसारमन्तरमञ्चं वा कुर्यात्। वृत्तस्फाटितो वृत्ताकारस्तथा लतादिभिर्भूषितो भवति। (अन्तरमञ्चः - प.२५) वृत्ताकारः स्फाटिकः स्तम्भस्य तोरणस्य - कुम्भलताया हारस्य वा विस्तारे कर्तव्यः। विशेषरूपेण हर्म्यादीनां स्तम्भस्य मध्ये करणीयः।[१३५] अयमेव विषयः पुनः षोडशाध्याये शब्दशः पुनः प्राप्यते।

स्तम्भतोरणविधिः

स्तम्भस्योच्चताया दशभागे विभाजनं भवति, तदा नवभागस्य शुद्धद्वारं भवति। यदि स्तम्भस्य नवभागान् कुर्मः, तर्हि द्वारमानमष्टभागेषु भवति। स्तम्भस्य षड्भागाः, तर्हि द्वारस्य मानं सार्धपञ्चभागाः, भवङ्गस्योच्चताधोभागे तथोपरि स्तम्भमानस्य सार्धद्विभागा भवन्ति। द्वारस्याधो-उपरि यत् काष्ठं भवति, स भवङ्गः कथ्यते। भागोऽयं भित्त्यां भूम्यां वा भवति। शुद्धद्वारस्य विस्तारः शुद्धद्वारस्योच्चताया अर्धांशो भवति। शुद्धद्वारस्यार्धभाग एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवाङ्गुलान् योजयित्वा न्यूनं वा कृत्वा द्वारविस्तारस्य नवदश

---

१३५ का.शि.१३,१ तः ८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तम्। द्वारस्योच्चता त्रिप्रकारेण भवेत्। सर्वेषामपि हर्म्यणां द्वाराणि मध्यभागे प्रकल्पयेत्।

द्वारयोगस्य विस्तारो द्वारस्तम्भस्य विस्तारसदृशस्तस्यार्धो वा उच्यते। तस्य स्थौल्यं विस्तारादर्धांशं भवति। द्वारयोगस्य स्थौल्यमष्टांशमधिकं, सार्धैकं त्रिपादं वा भवति। द्वारयोगस्योच्चतायाश्चत्वारो भागान् कृत्वा उत्तमाग्र एको भागो भवति। ऊर्ध्वभागस्य त्रिभागान् कुर्यात्। बहिर्भागे कमलस्य निर्गमनं भवति तथा भूतारोऽधो भवेत्। द्वारारोहस्य समानः पतङ्गस्य विस्तारो भवति किन्तु विना कमलम्। भुवङ्ग-पतङ्गयोर्मध्यभागो वलयसहितो भवति। भुवङ्ग-पतङ्गौ ताम्रस्य लोहस्य वा वलयानां कीलैर्दृढतार्थं बद्धं कुर्यात्। तस्य व्यासो विस्तारस्त्रिभागैकं शिखायोगस्य भवति। यदि भुवङ्गादीनां योजने पाषाणोऽस्ति चेत्, भुवङ्ग-पतङ्गयोः शिखा तस्योच्छिद्रपर्यन्तं गच्छेत्। तस्यानुसारमुत्तमरीत्या दृढतापूर्वकं निर्माणं कृत्वा शुभनक्षत्रे वासरे होरामुहूर्ते योगे च योगस्य कार्यं करणीयम्। योगं संस्थाप्य शान्तिहोमः कर्तव्यः। भित्तेर्विस्तारस्य द्वादशभागान् कुर्यात्, पञ्चभागा बहिः, आभ्यन्तरे सप्तभागाः सीमापर्यन्तं, सीमासमीपे योगस्य मध्यभाग आगमिष्यति। योगस्य विस्तार आभ्यन्तर एवं बहिः समानो भविष्यति। सर्वालंकारसंयुक्तं पञ्च-षड्-सप्तभागेषु द्वितोरणाग्रकं भवेत्। शेषं पादोदयं ख्यातम्। वर्गाकारमष्टकोणं वृत्ताकारं च - इति त्रिप्रकारकं तोरणद्वयं भवति। कुम्भमण्डादिसंयुक्तं तथा पोतिकासहितं रहितं वा वीरकाण्डं भवति। कुड्यस्तम्भस्य विस्तारः सार्धं त्रिपादं समं वा, तावद् विस्तारयुक्तं तोरणमङ्घ्रिविशालं नामकं कथ्यते। उत्तरं-वाजनं-कमलं-क्षुद्रवाजनम्- इत्यादि क्रमेण कर्तव्यम्। उत्तरस्योच्चता तोरणाङ्घ्रिसदृशा त्रिपादं वा भवति। तस्यार्धं वाजनस्य, वाजनस्यार्धं गलमानं भवति। क्षेपणं गलार्धं, क्षुद्रवाजनं तस्यार्धं भवति। वीरकाण्ड उत्तरोपरि पोतिकोपरि वा भवति। सन्धेः स्थानमुत्तरमेवं वीरकण्ठस्य सन्धेः समीपे भवति। अधः प्रति गतस्याग्रस्य समीपे मकरं कुर्यात्। तोरणस्याग्रभागस्य भित्तिः स्तम्भविस्ताराधं भवेत्। कुड्यस्तम्भस्य विस्तारसदृशस्तोरणाग्रस्य विस्तारो भवेत्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ण्डं तोरणाग्रस्य विस्तारो भवति। एवंप्रकारेण तोरणाग्र-विस्तारस्य चत्वारः प्रकारा भवन्ति।...

द्वारतोरणम्

द्वारस्योच्चता तथा विस्तारसदृशो द्वारतोरणस्य स्तम्भो भवति। उत्तरं वाजनमुत्कीर्णं कृत्वा कमलमष्टमंगलं च पञ्चवक्त्राढ्यफलकं प्राग्विधिना कुर्यात्। वक्त्राख्य-मकरतोरण-चित्रतोरणस्य समानं द्वारतोरणं रचनीयम्। वक्त्र-स्थाने पत्रतोरणं भवितुं शक्नोति। मध्योर्ध्वभागे पार्श्वे शूलसहितं दर्पणं, जलपूरितः कुम्भः, वृषभः, चामरयुग्मम्, श्रीवत्सं, मध्ये स्वस्तिकः, शङ्खः, दीपश्च - एतान्यष्टमङ्गलानि सन्ति। शेषं पार्श्वे रचनीयम्। लोह-काष्ठ-पाषाणेन द्वारतोरणं कर्तव्यम्।[१३७]

स्तम्भतोरणम्

स्तम्भस्योच्चतां त्रिधा विभज्य, द्विभागं चरणोदयं भवति। स्तम्भं पोतिकारहितं सर्वाङ्गसंयुक्तं करणीयम्। उत्तर-वाजन-अब्ज-क्षेपण-निम्नवाजनं तदूर्ध्वं नानापत्रैर्चित्रितं झषकर्णं भवति। (झषकर्णïं प.१२.२) एतत् तोरणं मकरतोरणं, तथापि कण्ठस्योपरि कमलं भवेत्। सर्वालंकारसंयुक्तं सुशोभितं तोरणं स्तम्भतोरणमुच्यते। स्तम्भस्य मध्यान्तराले, हारान्तरयोर्मध्ये कर्णप्रसादयोर्मध्ये शालामध्यान्तराले वा सर्वगृहेषु स्तम्भतोरणं कर्तव्यः।[१३८]

कुम्भस्थलम्

स्तम्भमूले वेदिकाया ऊर्ध्वे पद्मासनं कल्पयेत्। स्तम्भस्य विस्तारः सदृशस्तस्योच्चता भवति। कमलस्य स्तम्भस्य च विस्तारः सपादगुणितो भवति। पद्मोच्चमष्टभागे

---

१३६ का.शि. १४.१ तः २५
१३७ का.शि.१४.२६ तः २९
१३८ का.शि.१४.३० तः ३५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ूर्ध्वे कमलस्योच्चता समं कुम्भस्योच्चता भवति। कुम्भ-विस्तारस्य द्विगुणितं तस्योच्चता, कुम्भमुखे वलिमण्डलैर्युक्तस्य स्तम्भस्योर्ध्वभागो भविष्यति। कुम्भमुण्डादिसंयुक्तस्तथा वीरकाण्डरहितः स्तम्भो भवति। फलकस्योपरि कुम्भेन सह पद्मस्य कल्पनां कल्पयेत्। एतेन प्रकारेण कुम्भो वा कुम्भलतां रचयेत्। अन्यप्रकारैर्यथा पूर्वानुसारं सन्धेरूर्ध्वं वीरकाण्डं प्रकल्पयेत्। पोतिकारहिता यत्नेन कुम्भलता स्मृता। स्तम्भतोरणानुसारमूर्ध्वं तोरणालयं कर्तव्यम्। एवं कुम्भलता त्रिविधोच्यते।[139]

द्वारविन्यासः

अत्रापि सप्तदशपटले ये श्लोकाः सन्ति, ते प्रायेण चतुर्दशपटलोक्तैः साकं शब्दतोऽर्थतो वा समानतां भजन्ते। स्तम्भोच्चतां दशधा विभज्यमाने शुद्धद्वारं नवांशकं भवति। स्तम्भस्याष्टभागान् कुर्मश्चेद् द्वारस्याष्टभागा भवन्ति। स्तम्भस्याष्टभागाः, तर्हि द्वारस्य सप्तभागाः, स्तम्भस्य षड्भागास्तर्हि द्वारस्य सार्धपञ्चभागा भवन्ति। भवङ्गस्याधोर्ध्वं स्तम्भोच्चतायाः सार्धद्विभागमुच्यते। शुद्धद्वारस्य विस्तारस्तस्योच्चताया अर्धा भवति। शुद्धद्वारोच्चताया अर्धे भागे एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवाङ्गुलं योजयित्वा न्यूनं कृत्वा वा द्वारस्योच्चताया एकोनविंशतिभेदाः भवन्ति। द्वारं त्रिधा भवेत्। सर्वप्रकाराणां भवनेषु द्वाराणि मध्यभागे योजयेत्। द्वारयोगस्य विस्तारो द्वारस्तम्भस्य विस्तारसमो वा सपाद-सार्धैक उच्यते। तस्य स्थौल्यं विस्तारस्यार्धं भवेत्। द्वारयोगस्य स्थौल्यम् एक-अष्ट-सार्धैक-पादोनगुणितं भवति। द्वारयोगस्योच्चतां चर्तुषु भागेषु विभज्यते, तदोत्तम एकोऽग्रभागो भवति। ऊर्ध्वभागं त्रिभागेषु विभज्यमाने, बहिः कमलस्य निर्गमनं भवति। भूतारस्तस्याधो भवति। द्वारयोगस्य समानः पतङ्गस्य विस्तारो भवति, किन्तु तत् कमलं विना भवति। भुवङ्ग-पतङ्गयोर्मध्यभागे वलयसहितं भवेत्। भुवङ्ग-पतङ्गौ ताम्रस्य वा लोहस्य कीलैर्दृढतार्थं बद्धं कुर्यात्। तस्य व्यासस्य त्रिभागैकस्यैकः कोणो भित्त्यां भवेत्। यदि भुवङ्गादीनां योजनस्य भागः पाषणस्य

---

१३९ का.शि.१५.१ तः १५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तस्य छिद्रपर्यन्तं भवेत्। एवं दृढीकृत्वा सुनक्षत्रे-वासरे-होरायां-मुहूर्त-योगे योगस्थापनायाः कार्यं करणीयम्। योगस्थापनां कृत्वा पूर्णशान्तिहोमं कुर्यात्। भित्तेर्व्यासस्य द्वादशभागान् कृत्वा, पञ्चभागा बहिरेवं सप्तभागाः सीमासमीपे, योगः मध्ये, योगस्य विस्तार आभ्यान्तरे बहिश्च समानो भविष्यति। सर्वालंकारैर्विभूषितं पञ्च-षड्-सप्तभागेषु तोरणद्वयस्याग्रभागो भवेत्। द्वारपट्टिका कवाटस्य दक्षिणे तथा द्वारपट्टेर्विस्तार-स्त्रि-चत्वार-पञ्चाङ्गुलं भवेत्। निर्गमनं द्वारपट्टेस्त्रिभागैकं भवति। निर्गमनं कवाट-निर्गमन-सदृशं द्विगुणितं वोदाहृतम्। द्वारपट्टिकायाः पार्श्वे, निर्गमनाभ्यान्तरे, किन्तु मध्यभागे, लोहस्य वलया भवन्ति। तान् दृढतार्थं कीलैर्बन्धनं करणीयम्। कवाटस्य बहिराभ्यान्तरे च लोहस्य काष्ठस्य वा त्रिमङ्गलं भवेत्। तस्य निर्गमनं तस्योच्चताया अर्धं भवेत्। कवाटो यत्र परस्परं मिलति, तं भागं लोहेन काष्ठेन वा दृढं कुर्यात् तथार्गलया सह कवाटः सरलतया घटनोद्घाटनक्षमो भवेत्। सर्वावयवान् दृढीकृत्य द्वारं मध्यसूत्रे भवेत्। प्रासदमण्डपगोपुरादिष्वपि द्वारं कल्पयेत्। इति।[१४०]

कम्पद्वारम्

कम्पद्वारं प्रासादस्य मण्डपस्य च चतुर्दिक्ष्वुपदिशासु भवति। प्रासाद-मण्डपयोर्मध्येऽन्तराल आकाशं प्रति मुखं वागच्छेदिति, एतादृक्स्थाने कम्पद्वारस्य योजना करणीया। वस्त्रद्वीतकृतं पङ्क्तिव्यासयुक्तं विशालं स्थलादुत्तरसीमान्तं कम्पद्वारं भवेत्। भुवङ्ग-पतङ्ग-योगादिकं पूर्वोक्तानुसारं कल्पयेत्। स्थौल्यस्याभ्यान्तरे दृढीकृत्वा बद्ध्वा च (कम्पस्य आभ्यान्तरे) योजयेत्। योगविस्तारस्य स्थौल्ययुक्तः, स्तम्भस्योच्चता तथा मूलाग्रेण

---

१४० का.शि.१७,१ तः २१

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

स्तम्भं दृढीकृत्वा भुवङ्ग-पतङ्गयोश्छिद्रं स्थापयेत्। अन्तरस्तम्भस्य सङ्ख्या चत्वार-षड्-अष्ट-दश-द्वादश-चतुर्दश-षोडश वा कल्पयेत्। अन्तरस्तम्भस्यान्तरमेतादृशं भवेत् , तदन्तराद् गमनागमनं शक्यं न भवेत्। अन्तरस्तम्भस्य स्थापना कवाटयोगानुसारं कर्तव्या। प्रत्येककम्पद्वारस्य योजना, कवाटादिना सह करणीया। कवाटे द्वे वा त्रयो व्योमग्रासा भवेयु:। गजोऽपि चेष्टयितुमसमर्थो भवेत्, तादृशं सुदृढं द्वारं रचनीयम्।[१४१]

प्रस्तरलक्षणम्

मञ्चमानं स्तम्भादर्धं स्तम्भस्योच्चताया अर्धांशं वा। प्रस्तरस्योच्चतामेकविंशतिभागेषु विभज्यते तदोत्तरं त्रिभागस्य, वाजनमेकभागस्य तथा भूतमालाया उच्चतायास्त्रिभागा उत्तमा:। भूतमालोपरि वाजनस्यैको भाग:। कपोतस्योच्चताया: सप्त भागा:। आलिङ्गस्यैको भाग:। अन्तरितस्यैको भाग:। प्रतेर्भागत्रयं। वाजनमेकभागस्य भवति। अन्यप्रकारेण प्रस्तरस्योच्चताया एकविंशतिभागान् कृत्वा यथा ï उत्तरं -३, वाजनं ï १, वलभी ï ३, वाजनं ï १, कपोतं ï ६, आलिङ्ग: ï १, अन्तरितं - एको भाग:, प्रते: -२, तथा वाजनस्यैको भागो भवेत्। एवं प्रकारेण तलोच्चता उक्ता। स्तम्भात् पोतिकाया निर्गमनसदृशं बोधिकादुत्तरपर्यन्तं निर्गमनं भवति। वाजनस्योत्तरपर्यन्तं निर्गमनस्य सदृशी वाजनस्योच्चता भवति। वाजनस्य बहिर्वल्लभे-निर्गमनं, वल्लभेरुच्चता सदृशं वा त्रिपादं वा तदर्धं वाधो वाजनस्योच्चतावन्निर्गमनं भवति। वाजनं पश्चात्, कपोतस्य निर्गमनं होमनिर्गमनसदृशमुपानस्यान्तपर्यन्तं वा जगतेरन्तपर्यन्तं भवति। वाजनस्यापेक्षया कपोतस्य निर्गमनमर्धाशम् - एकं वा सार्धैकदण्डं भवति। वाजनात् कपोतस्य निर्गमनं वालम्बनमेकसमानं भवति। कपोतं गोपानसहितं गोपानरहितं वा भवति। बहि:स्तम्भस्य प्रमाणसदृश: कुलिङ्गप्रतिरुच्यते। आलिङ्गस्यान्तरितस्य वा

---

१४१ का.शि. १८.१ त: १०

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

भवति। वाजनस्य निर्गमनं वाजनस्योच्चतायाः सदृशं भवति। उत्तराग्रस्य नीव्रकमेकदण्ड-सार्धं-त्रिदण्डं वा भवति। वाजनस्यान्तर्गमनं तथा रचनीयं तदुत्तरं सौन्दर्यप्रदानं कर्तुं शक्नोति। उत्तरं प्रति वलभी वृत्ताकारा हंसादिद्वाराविभूषिता वा करणीया। नानापत्रैर्लतादिभिश्च कपोतं कर्णपालिका चालङ्करणीया। प्रत्यग्रस्योर्ध्वभागे मकरीबन्धः प्रतिसिंहादिद्वारा विभूषितो भवेत्।[१४२]

गलभूषणलक्षणम्

ऊर्ध्वभागस्योच्चताया मानं गलस्य मानं भवति। अथवा तस्योच्चताया अर्धांशं गलस्य मानं भवति। उच्चतायास्तृतीयांशश्चतुर्थांशो वा पञ्चमो भागोऽथवा शेषभागो वेदिकाया उच्चता भवति। शेषभाग इत्युक्ते वेदिकां विहाय गलस्योच्चता भवति। वेदिकाया उच्चतायाश्च चत्वारः ï पञ्च - षड् ï भागान् कारयति चेत् गलोच्चता क्रमेण त्रि - चत्वारः ï पञ्च भागा भवन्ति। स्तम्भस्य वेदिकायां यावत् प्रवेशो भवति, तावत् स्तम्भस्य प्रवेशो गलस्य मध्ये भवति। स्तम्भस्य प्रवेशो गलस्य मध्ये त्रिपादस्तदर्धो वा भवति। एवं भिन्न-भिन्नरीत्या कर्तुरिच्छानुसारं रचयेत्। नागरपद्धत्यां कण्ठो वर्गाकारः, द्रविडपद्धत्यां गलमष्टकोणं, वेसरपद्धत्यां वर्तुलाकारं भवति। गलस्य मानं पद्धत्यनुसारं भवेत्। प्रत्येकदिशि भद्रेण सह नासिका वा नकुलस्तम्भः स्यात्। गलस्योच्चता षोडश भागाः सन्ति, तर्हि गलस्योच्चता षोडश। उत्तरोच्चं त्रिभागं भवति। वाजनं गलस्यैको भागः, भागद्वयं वा, भिन्न-भिन्नं मानं, अथवा वाजनस्योच्चताया एको भागो भवति। उत्तरगलस्य निर्गमनमर्धं (तस्योच्चतायाः), वाजनस्य (निर्गमनं) पूर्वोक्तानुसारं भविष्यति। गलोच्चताया द्वादशभागान् करोति, तदोत्तरोच्चं त्रिभागं, वाजन-उच्चताया एको भागः, तदर्धं मुष्टिबन्धः, मध्यभागः सार्धैकभागो भवति। कमलस्योच्चता त्रिभागः, पट्टिकाया एको भागो भवति। सार्धांशं दण्डकस्योच्चता, वर्णपट्टिकाया एको भागो भवति। तस्योद्र्ध्वं

१४२ का.शि.१९,१ तः १६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ादीनां निष्क्रान्तं तस्योच्चताया समं भवेत्। गलस्योपरि तथा शिखरात् पद्मपर्यन्त यो भागोऽस्ति स भागो गोपानमुच्यते।[१४३]

शिखरलक्षणम्

शिखरस्योच्चतोर्ध्वभवनस्य स्तम्भ-सदृशी भविष्यति। अथवार्धांशं शिखरस्योच्चता भवति। तस्य निष्क्रान्तं वलभी-वाजनयोर्निर्गमनादेक-सार्धैकाशं-दण्डद्वयमधिकं भवति। आधार-निर्गमनसदृशं भवति। वलभीतः कपोतपर्यन्तमुच्चता तस्य निर्गमनसदृशी भवति। शीर्षस्योच्चता कपोतोर्ध्वं वलभीवाजनैः समा भवति। शिखरस्य मध्यभागस्य विस्तारः कम्पस्य निर्गमन-सदृशो भवति। अथवा कम्पसदृशः, पादोनोऽर्धांशो वा- एवं मानं चतुर्विधम्। शिखर-विस्तारं पञ्चभागैर्विभजति, तदा फलिकाया विस्तारस्य भागत्रयं, शिखरस्योपरि वलिकस्थानं शिखरस्य पञ्चमो भागो भवति। शिखरस्योच्चतायाश्चतुर्भागसमाप्तिनन्तरं फलिका गोलाकारा भवेत्। त्रि-चतुः-पञ्चाङ्गुलं वलिकं तथा तावन्मण्डलं भवति। तस्योच्चताया एकचतुर्थांशमाभ्यान्तरवर्तुलस्य स्थौल्यं भवति। द्वौ वा समसंख्यायाः शिखरस्य परितो वृत्तं कल्पयेत्। वलिकस्याधो ऊर्ध्वं तस्योच्चताया अर्धोच्चता युक्तं वेत्रं भवति। वलिक-विस्तारस्य पञ्चभागान् करोति चेत् पद्मस्योच्चता भागद्वयं भवति। शिखरस्य मानान्तं पद्मस्योच्चता प्रदर्शिता। पद्मस्योच्चतायास्त्रिभागैकं करोति, तदैको भागः कुम्भस्याधोऽवलग्नकस्य भवति। अवलग्नकस्य त्रिभागेष्वेको भागः कुम्भस्योपरि स्थितः कन्धरस्य (गलस्य) भवति। कन्धरस्य त्रिगुणं कुम्भस्य (पालेः) वा तस्य तृतीयांशः कूश्मलस्य (कुड्मल?) भवति। कन्धरस्यापेक्षया कुम्भस्य (पाले;) मध्यभागस्य विस्तारो बहु विशालो भवति। वलिकान्तं पश्चात् शीर्षमध्यभागस्य विस्तारो न्यूनातिन्यूनं कुर्यात्। मध्याद् वाजनपर्यन्तं विस्तारः क्रमेण न्यूनं कुर्यात्। तेन कपोतनीव्रान्तं क्रमेण विस्तारस्य वृद्धिर्भविष्यति। शिखरस्योच्चताया अर्धं पद्मस्योच्चताया अर्धांशं वा स्तूपेरुच्चता भवति। स्तूपेरुच्चतां द्वाविंशतिभागेषु विभजति, तदा

१४३ का.शि. २०.१ तः ११

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

...स्यार्धोभागस्तावदूर्ध्वकम्पस्यैवं पद्मस्यैकं भागं कुर्यात्। घटस्योच्चतायाः पञ्चभागाः, कम्पस्यार्धो भागः, पद्मस्यैको भागस्तथा कम्पस्यार्धो भागो भवति। कुम्भस्य (पालिकायाः) पञ्चभागाः, कुम्भस्य भागद्वयं, पद्मस्यैको भागः, पालिकाया एको भागः, पद्मस्यार्धांशं तथा शेषं कुश्मलस्य। शिखराकृतिवत् कुम्भः फलिका तथा कुश्मलो भवति।



चतुरस्रं शिखरम् ।



वर्तुलाकारं शिखरम् ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



आयताकारशिखरम् ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features




शिखरम् ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...डपद्धत्यामष्टकोणं, वेसरपद्धत्यां वर्तुलाकारं भवेत्। एवरीत्या क्रमेण शिखरस्याकारो भवति। नानापत्रलताभिः शिखरं सुशोभितं करणीयम्।[१४४]

नासिकालक्षणम्

शिखरोपरि तस्योच्चता समं ललाटनासिका भवति। शिखरविस्तारस्य त्रिचतु:पञ्चभागस्य विस्तारयुक्ता नासिका क्रमेणोत्तमा मध्यमा, अधमा च भवति। महानासी तु विख्याता त्रिविधा। नासिकाया नीव्रकं शिखरसमं त्रिपादमर्धं वा भवति। तस्योच्चता शिखरोच्चताया एकतृतीयांशम्, एकचतुर्थांशं न्यूना भवति। उच्चताया अर्धापि नासिकाया उच्चता भवति। ऊर्ध्वं शक्तिध्वजस्योच्चता नासिकापेक्षया अर्धोच्चता ï त्रिचतुर्थांशं ï त्रिभागैकं वा भवति। तच्छक्तिध्वजोच्चतां भागत्रये विभज्य भागद्वये किन्नरीवृत्तं तथा शेषैकभागस्य गलमानं भवति। शक्तिध्वजदण्डस्य विस्तारस्य गलमानं भवति। किन्नरीमुखस्य विस्तारस्तस्य द्विगुणितं भवति। शक्तिध्वजस्योपरि पत्रं शूलं वा भवति। शूलोच्चता किन्नरीमुखसमा भवेत्। पत्रमुक्तमानानुसारं यथा सुन्दरं भवेत् तथा करणीयम्। मुखपट्टेर्विस्तार एको दण्डो नासिका-विस्तारस्यार्धांशो वा भवति। मुखपट्टिं लतामण्डलछत्रादिद्वारालङ्करणीयम्। मुखपट्टिं विहाय शेषभागं गाढमुदाहृतम्। तस्याधोभागे पट्टिद्वयं तथा त्रिनाल्यप्रतेर्भूषितं भवति। स्थलस्य प्रमाणवदवगाढ-शूलस्य प्रमाणं, व्यालेन सह सनाटकं वा, मालिका-कोष्ठ-कूटादिद्वारा सुशोभितं भवेद् विमानप्रमाणानुसारं वा रचयेत्। पत्रतोरणं चित्रतोरणं मकरतोरणं वा भवेत्। तोरणस्य मध्ये (गजशुण्डया जलाभिषेकम्) जलेनाभिषेकं स्वीकुर्वतीं लक्ष्मीं कल्पयेत्। नानाप्रकारैः पृथक्पद्धत्या वा नासिकां (अवगाढं) सुशोभयेत्। सभद्रां महानासीं तथा सर्वाङ्गसंयुक्तां स्तम्भावलीं रचयेत्। उत्तर-वाजन-अब्ज-क्षेपणेन सह नासिकायाः कल्पनां कुर्यात्। विशेषरूपेण नासिकायाः कण्ठभागे तस्य

---

१४४ का.शि.२१.१ तः २०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features




शिखरस्य दीर्घता ।

महानासी ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्तम्भस्य विस्तार ऊर्ध्वभवन-स्तम्भस्य विस्तारवद् वा तस्याधो भवति। स्तम्भस्योच्चता कण्ठोच्चता समा भवति। स्तम्भोऽष्टकोणः, गोलाकारः, वर्गाकार ऊर्ध्वस्तम्भाकृतिसदृशो वा भवति। नासिकाया विस्तारो द्विदण्डो त्रिदण्डौ वा भवति। नासिका-स्तम्भस्य बहिःसीमां त्यक्त्वा, शेषं नासिकाया विस्तारो भवति।नासिका-स्तम्भस्य मध्ये मूर्तेः स्थापना करणीया।[१४५]

क्षुद्रनासी




क्षुद्रनासिका ।

क्षुद्रनास्या विस्ताराद् एकतृतीयांशमेकचतुर्थांशं वा न्यूनं कृत्वा शेषं तस्या उच्चता भवति। कपोतस्याधारेण क्षुद्रनासिकाया विस्तारस्य कल्पनां कारयेत्। शक्तिध्वजस्योच्चता

---

१४५ का.शि.२२.१ तः १७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...त्रेधा विभज्यैकांशं कण्ठमानकम्। शेषभागे किन्नरीद्वयं तथा वक्त्रं भवेत्। तस्य विस्तारं युक्तिपूर्वकं कुर्यात्। नासितारार्धं गाढं (अवगाढं) भवति। गाढस्यार्धभागसमा मुखपट्टिका भवति। क्षुद्रनासीं तालादिं नानालङ्कारैः सुशोभयेत्। कपोतस्य प्रत्येकचतुर्थभागोपरि स्वस्तिकाकृतिः कार्या। प्रत्येकतलस्य कपोतोपरि स्वस्तिकाकृतिं रचयेत्। कूटशाला वा पञ्जरस्य मध्यभागेऽल्पनासिका भवति। भद्रनासिकायाः कल्पना विशेषरूपेण शिखरोपरि कुर्यात्। शालाया अग्रभागस्यनासिका ललाटं कथितम्।[१४६]

प्रासादलक्षणम्

प्रासादः, सदनं, सद्म, हर्म्य, धाम, निकेतनम्, मन्दिरम्, भवनं, वासः, गेहं, दिव्यम्, विमानम्, आश्रयं, आस्पदं, आधारं, प्रतिधिष्ण्यम्- एते प्रासादस्य पर्यायवाचिशब्दाः सन्ति।

प्रथमं परिमाणमुच्यते- अष्ट यूका एको यवो भवति। अष्ट पिंपी एको यूको भवति। अष्ट पिशूनामेको बालाग्रो भवति। बालानां मस्तके केशा भवन्ति, तस्याग्रमानं बालाग्रं कथ्यते। तस्याष्टमांशो मूलमानं भवति। सप्त यवविस्तारो मध्यमाङ्गुलमुच्यते। षड्यवविस्तारमधमाङ्गुलं प्रोच्यते। चतुःशालीनां दैर्घ्यमुत्तमसंज्ञकोऽङ्गुलो भवति। त्रि-शालीनां दैर्घ्यमधमसंज्ञकोऽङ्गुलो भवति। शाली पञ्चविधा भवति। श्वेत-महा-रक्त-सौगन्धी-हेमशाली च। एतेषु रक्तशाल्या दैर्घ्यमङ्गुलार्धं भवति। एवंरीत्या षड्विधं मानाङ्गुलस्य प्रोक्तम्।[१४७]

संख्यावाचकशब्दाः

एकाङ्गुलं - चन्द्र-जीव-शिवांश-व्योमादिः।

---

१४६ का.शि.२२.१ तः २४
१४७ का.शि.२३.१ तः ९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तृतीयाङ्गुलम् - काल-अनल-रुद्राक्ष-शूल-आलेखन-गुणाः।

चतुर्थाङ्गुलम् ï वेद-अब्धि-युग-कोलकम्।

पञ्चाङ्गुलम् ï बाण-भूत-इन्द्रियाणि।

षडाङ्गुलम् ï सार-चारमक-ऋतु-कौशिकाः।

सप्ताङ्गुलम् ï पाताल-ऋषि-धाता (धातु?) ï माता ï लेक (लोक) ï स्मर (कामस्थान)-इत्यादयः।

अष्टाङ्गलुम् ï हस्ति ï पर्वत ï वसु ï मूर्तयः।

नवाङ्गुलम् - शक्तिद्वार-गृहद्वार-सूत्र-अनन्तघन-ताद्य?-द्विजाः।

दशाङ्गुलम् ï नाडिकाष्टायुतं-धर्मः।

एकादशाङ्गुलम् - कंशातं (त्रिष्टुप् ï ), रुद्रः।

द्वादशाङ्गुलम् ï अब्द-भास्कर-भानवः।

त्रयोदशाङ्गुलम् - चन्द्र - आदित्यशिवांशाः।

पञ्चदशाङ्गुलम् ï पक्षः-तिथिः।

षोडशाङ्गुलम् - कला-मूर्तिद्वयम्।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ी-सुगतिस्तथा सत्वरिः, षष्टिः ï सशक्वः, सप्ततिः ï तुष्टिः, अशीतिः ï पुष्टिः, नवतिः ï धृतिः, शतम् ï सुध्रितः- एवंप्रकारेण दशादिशतपर्यन्तं नामाभिधानमस्ति। अेकं दशं. शतं, सहस्रं, नियुतं-प्रयुतं-कोटिः-अर्बुदं-ब्रूतं-खर्वटं-निखर्वं-शंखः ï पद्मं-समुद्रः-मध्यमः-अन्तरः-आद्यः-परः-परार्धः- एवंप्रकारेण दशतो दशगुणितसंख्या भवति। उत्तमो एकः स्तम्भो द्वादशाङ्गुलानां (वितस्त्या?) भवेत्।[१४८]

हस्तः

चतुर्विंशतिरङ्गुलानामेकः कृष्ण (किष्कु)हस्तो भवति। श्रेष्ठमध्यमाङ्गुलैः श्रेष्ठं मध्यमं वा हस्तं कल्पयेत्। चतुर्हस्तानामेको दण्डः, तं वस्त्रेण मापयेत्। पञ्चविंशतिरङ्गुलानां प्राजापत्यं भवति। षड्विंशतिरङ्गुलानामेका धनुर्मुष्टिर्भवति। सप्तविंशतिरङ्गुलानां धनुर्ग्रहः, अष्टाविंशतिरङ्गुलानां प्राच्यः, नवविंशतिरङ्गुलानां वैदेहो भवति। त्रिंशदङ्गुलानां वैपुल्यम्, एकत्रिंशदङ्गुलानां प्रकीर्णकं हस्तो भवति। प्रत्येकस्याष्ट प्रकाराः भवन्ति। चतुर्विंशतिरङ्गुलानां भेदेनाधम-मध्यम-उत्तमा इति प्रकाराः सन्ति। धनुर्ग्रह-प्रकीर्णाभ्यां ब्राह्मणस्य गृहं कुर्यात्। वैपुल्य-धनुर्मुष्ट्या क्षत्रियाणां गृहम् तथा प्राजापत्येन शूद्रगृहं भवेत्। उपर्युक्तहस्तमानं हीनजातिकृते वर्जयेत्। हीनजातेरधिकारिणस्तथा ब्राह्मणस्य कृते विशालो हस्तः शुभावहः। उपर्युक्तहस्तमानं गृहाणां कृते योग्यमस्ति। सर्वप्रकाराणां हस्ताः सर्वदेवानां प्रासादानां कृते योग्याः। कृष्णहस्तः (किष्कु) सर्वजातिगृहाणां कृते श्रेष्ठोऽस्ति। यानादिशयनान्तं कृष्णहस्तेन मापयेत्। आराम-उद्यानादिकं प्राजापत्येन मापयेत्। ग्रामादिर्धनुर्मुष्ट्या, कूपः-नदी धनुर्ग्रहेण, कृष्णहस्तेन सर्ववास्तुनि कुर्यात्।[१४९]

---

१४८ का.शि. २३.१० तः २३
१४९ का.शि.२३.११ तः ३४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features




भिन्न-भिन्नसूत्राणि ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्रिर्वा चतुर्हस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा नव-दशहस्तपर्यन्तं सम-विषमे प्रत्येके चत्वारश्चत्वारो योजयित्वा मिलित्वाष्टप्रकारकं (एक-भवनस्य विस्तारस्य) मानं भवति। पञ्चषड्हस्तादारभ्य हस्तद्वयं वृद्धिं कृत्वा पञ्चदश-षोडशहस्तपर्यन्तं त्रितलस्याभास-प्रकारकस्य (भवनस्य) मानं भवति। सप्त-अष्टहस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा पञ्चदश-षोडशहस्तपर्यन्तं समस्य विषमस्य वा चतु:पञ्चतलभवनस्य मानस्य च दशप्रकारा भवन्ति। (आभासहर्म्यस्यविस्तार:) विस्तारस्य सप्त-षट्-पञ्च भागान् कृत्वा, विस्तारे क्रमेण षट्-पञ्च चतुर्वा भागान् योजयेत्। एवं विस्तारस्य द्विगुणितम्, द्विगुणितेऽष्टांशं योजयेत्, एतेन प्रकारेणाभास-सदनस्योच्चताया: पञ्च प्रकारा भवन्ति। शान्तिकं-पौष्टिकं-जयन्तं-अद्भुतं-सर्वकामिकम्- इति क्रमेण पञ्च नामानि सन्ति। आभासहर्म्यं वर्गाकारं भवति, तथा दैर्घ्यं विस्तारश्च समो भवति। विस्तारस्य मध्ये हस्तद्वयं हस्तद्वयं वर्धयित्वा कुर्यात्, एतदाभासहर्म्यमुक्तम्।[१५०]

विकल्पहर्म्यम्

नवदशहस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा पञ्चपञ्चाशत्-षट्पञ्चाशत्पर्यन्तमिति चतुर्विंशंतिप्रकारेषु मानं भवति। पञ्चतलादारभ्य द्वादशतलपर्यन्तमधम-मध्यमोत्कृष्टविकल्पस्य क्रमेण मानं भवति।[१५१] यथा-

१५० का.शि.२४,१ त: ८
१५१ का.शि.२४.९-१०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विषमहस्त:

| भवनम् | अधमम् | मध्यमम् | उत्तमम् | अधमम् | मध्यमम् | उत्तमम् |
|---|---|---|---|---|---|---|
| ५ | ९ | ११ | १३ | १० | १२ | १४ |
| ६ | १५ | १७ | १९ | १६ | १८ | २० |
| ७ | २१ | २३ | २५ | २२ | २४ | २६ |
| ८ | २७ | २९ | ३१ | २८ | ३० | ३२ |
| ९ | ३३ | ३५ | ३७ | ३४ | ३६ | ३८ |
| १० | ३९ | ४१ | ४३ | ४० | ४२ | ४४ |
| ११ | ४५ | ४७ | ४९ | ४६ | ४८ | ५० |
| १२ | ५१ | ५३ | ५५ | ५२ | ५४ | ५६ |

षड्त्रिंशद्-हस्तानां विस्तारस्तथा पञ्चसप्ततिहस्तोच्चतायुक्तं त्रयोदशतलं करणीयम्। षोडशतलभवनं शिवमन्दिरं वा पञ्चसप्ततिहस्तविस्तारं तथा नवहस्तस्य मञ्चक- युक्तं भवति। इदं शिवहर्म्यं शिवप्रियमस्ति।[१५२] एवं प्रकारेण विकल्पमानं प्रोक्तम्।

छन्दहर्म्यमानम्

त्रयोदश-चतुर्दशहस्तादारभ्य हस्तद्वयं हस्तद्वयं वृद्धिं कृत्वा पञ्चषष्टिर्वा षट्षष्टि-पर्यन्तं हस्त-विस्तारस्य सप्तविंशति: प्रकारा भवन्ति। चतुस्तलाद् द्वादशतलपर्यन्तं छन्दहर्म्यं भवति। अधम-मध्यमोत्कृष्टमानं चतुर्भवनस्य भवति।[१५३] यथा ï

१५२ का.शि.२४,११ त: १२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

हस्तविस्तारः

| तलम् | अधमम् | मध्यमम् | उत्तमम् |
|---|---|---|---|
| ४ | १३ | १५ | १७ |
| ५ | १९ | २१ | २३ |
| ६ | २५ | २७ | २९ |
| ७ | ३१ | ३३ | ३५ |
| ८ | ३७ | ३९ | ४१ |
| ९ | ४३ | ४५ | ४७ |
| १० | ४९ | ५१ | ५३ |
| ११ | ५५ | ५७ | ५९ |
| १२ | ६१ | ६३ | ६५ |

सप्तदश-अष्टादश-हस्तादारभ्य त्रिस्त्रिर्हस्तं वृद्धिं कृत्वा पञ्चनवति-षण्णनवतिहस्तपर्यन्तम्। उच्चता पूर्वसदृशी, एवं सप्तविंशतिः प्रकारा भवन्ति। उच्चताया अधम-मध्यमोत्कृष्टभेदाः सन्ति। एवं प्रकारेण छन्दमानमुक्तम्।

हस्तोच्चता

१५३ का.शि.२४.१४-१५, १/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | मध्यमम् | उत्तमम् |
|---|---|---|---|
| ४ | १७ | २० | २३ |
| ५ | २६ | २९ | ३२ |
| ६ | ३५ | ३८ | ४१ |
| ७ | ३५ | ३८ | ४१ |
| ८ | ५३ | ५६ | ५९ |
| ९ | ६२ | ६५ | ६८ |
| १० | ७१ | ७४ | ७७ |
| ११ | ८० | ८३ | ८६ |
| १२ | ८९ | ९२ | ९५ |

## जातिहर्म्यम्

जातिहर्म्यस्य विस्तार: सप्तदश-अष्टादश-हस्तादारभ्य द्विर्द्विर्हस्तयोर्वृद्धिं कृत्वा नवषष्टि-सप्ततिपर्यन्तं सप्तविंशति: प्रकारा भवन्ति। चतुस्तलाद् द्वादशतलपर्यन्तं भवति। जातिहर्म्यस्योच्चता त्रयोविंशति: सप्तविंशतिर्वा हस्तादारभ्य त्रिस्त्रिर्हस्तस्य वृद्धिं कृत्वा शतहस्तानामुच्चता भवति। पूवोक्तानुसारं समाना: प्रकारा: सप्तविंशतिर्भवन्ति। विस्तारस्तथोच्चताक्रमेण अधम-मध्यमोत्कृष्टानां मानं भविष्यति।

| | हस्तविस्तार: | | | हस्तोच्चता | | |
|---|---|---|---|---|---|---|
| भवनम् | अधमम् | मध्यमम् | उत्तमम् | अधमम् | मध्यमम् | उत्तमम् |
| ४ | १७ | १९ | २१ | २२ | २५ | २८ |
| ५ | २३ | २५ | २७ | ३१ | ३४ | ३७ |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | ३३ | ४० | ४३ | ४६ |
| ७ | ३५ | ३७ | ३९ | ४९ | ५२ | ५५ |
| ८ | ४१ | ४३ | ४५ | ५८ | ६१ | ६४ |
| ९ | ४७ | ४९ | ५१ | ६७ | ७० | ७३ |
| १० | ५३ | ५५ | ५७ | ७६ | ७९ | ८२ |
| ११ | ५९ | ६१ | ६३ | ८५ | ८८ | ९१ |
| १२ | ६५ | ६७ | ६९ | ९४ | ९७ | १०० |

एवंप्रकारेण सप्तविंशतिप्रकारा जातिविमानस्य दर्शिताः। जाति-छन्द-विकल्प-आभासादीनां कृते मानं प्रोक्तम्। (हर्म्य-भवनस्य प्रकारोऽस्ति। प्रासादस्य विस्तारो भित्त्याः स्तम्भाद् बहिर्वा स्तम्भाभ्यान्तरं वा स्तम्भस्य मध्यभागस्यान्तरेण स्वीकरणीयः। उन्नता उपान-स्तूपि - इत्यस्य कोणपर्यन्तं शिखरस्य कोणपर्यन्तं वा गणयेत्। सभा-मण्डप-शालादीनां विस्तारो भित्तेर्मध्यभागात् स्वीकुर्यात्। भित्तेर्मध्यभागे, स्तम्भस्य बहिर्वा मध्यभाग आभ्यान्तरं प्रति वा भित्तेर्बहिःस्थितस्य स्तम्भस्य बहिर्वाभ्यन्तरे वा स्तम्भस्य मध्यभागे मानसूत्रं योजयेत्। भित्तेर्मध्ये यदि स्तम्भो भवति तर्हि स्तम्भस्य स्थाने भित्तेर्विस्तारस्य मानं ग्रहीतुं शक्नोति। भित्तिर्बहिरागतं स्तम्भस्यानुसारमुपर्युक्तमानसूत्रस्य योजना करणीया। प्राकारस्य भित्तेः कृते मानसूत्रं भित्ते- र्मध्ये, भित्तेर्बहिर्वा भित्तेराभ्यान्तरे भवति। यानानां शयनानां च कृते मानसूत्रं मध्ये भवेत्। एवंप्रकारेण सर्वेषां सदनानां कृते मानसूत्रं दर्शितम्। कूटशालाया निर्गमनं, मानसूत्रस्य बहिः, कूटस्य विस्तारस्य समानं भवति। विस्तारस्तृतीयांशस्य चतुर्थांशस्यार्धो भवति। एकचतुर्थांशस्य, सपादस्य, सार्धैकभागस्य मानसूत्रस्य बहिर्निर्गमनं भवति। कूटस्यावयवानां निर्गमनं दण्डमानेन भवति। एकदण्ड- सार्धदण्ड-द्विदण्ड-त्रिदण्ड-प्रमाणैर्मानसूत्रस्य बहिःकूटस्य निर्गमनं भवति। मानसूत्राभ्यान्तरे कदापि कूटस्य प्रवेशो न करणीयः। सङ्कटस्य कारणं भवति। अतः सर्वविधप्रयत्नेन कुटस्य निर्गमनं मानसूत्रस्य

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दृशं भवति। होमस्याभ्यान्तरे सूत्रप्रमाणेन भवति। होमस्य बाह्मभागस्य च सूत्रप्रमाणेन विन्याससूत्रं भवति। मानसूत्रं-विन्याससूत्रं-अवसानसूत्रमिति त्रीणि सूत्राणि सन्ति।[१५४]

आयादिलक्षणम्

प्रासादमानं × ६ ३ शेष ï योनि:।

प्रसादमानं × ८ २७ शेष-नक्षत्रम्।

प्रासादस्योच्चता विस्तारश्च × ९ ७ शेष-वासरा:।

प्रासादस्य विस्तार: × ३ ३० शेष-तिथि:।

प्रासादोच्चता × ८ १० शेष-आय:।

प्राससदोच्चता × ९ १० शेष-व्यय:।

आय: सर्वदा व्ययादधिको भवेत्। केतु: (ध्वज:), सिंह:, वृष:, हस्ती - इति - आया: शुभावहम्। वासरेषु गुरुशुक्रबुधसोमा: शुभा:। यजमानस्य नक्षत्रं तथा प्रासादस्य नक्षत्रमेतयोर्विरोधो मा भवेत्। तथैव यजमानस्य जन्मतिथिस्तथा वास्तोर्तिथिरेतयोर्मध्ये विरोधो मा भवेत्। अर्थात् स्वकृते शुभं भवति। एवंप्रकारेण पृथक् ï पृथग्रीत्या शुभाशुभं दृष्ट्वा प्रासाद-विस्तारस्य शुभमानं स्वीकरणीयम्। यथा ï

प्रासादस्य विस्तार-दीर्घताया: (क्षेत्रफलस्य) ८ X १२ शेष-आय:।

---

१५४ का.शि.२४.१ त: ३५

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

ष-व्ययः।

प्रासादस्य क्षेत्रफलम् ८ X २७ शेष-दिनम्? नक्षत्रम्।

प्रासादस्य विस्तारः ३ X ८ शेष-ध्वजादियोनिः।

प्रासादस्य परिमितं ९ X ७ शेष-रविवासरादिः।

प्रासादस्य परिमितं ९ X ३० शेषतिथिः।

पूवोक्तानुसारं शुभाशुभं द्रष्टव्यम्। शुभं ( आय-तिथि-वार-नक्षत्रादि) यदस्ति तत् स्वीकरणीयम्। द्वि-त्रि-चतुः-पञ्च -षड् ï अष्ट-नवादिनक्षत्राणि सर्वदेष्टसिद्धिदातारो भवन्ति। अशुभनक्षत्राणि पूर्णरूपेण वर्जयेत्। राज्ञः कर्तुश्च जन्मनक्षत्रात् प्रासाद-नक्षत्रपर्यन्तं गणनां कुर्यात्। तेषु यदा शुभसंख्या (२,४,६,८,९ अन्यग्रन्थानुसारं ३-५ अपि) समागच्छति, तदा शुभं भवति। स्वामेर्जन्मलग्नतश्चन्द्रलग्नाद् अष्टमी राशिस्तथा प्रासादस्य राशिरेका भवति चेत्, दुष्टयोगो भवति, तेन विनाशो भवति। एतादृशं प्रासादं वर्जयेत्। शूलादियोगा दोषपूर्णा भवन्ति, अतस्तानपि वर्जयेत्।[१५५]

नागरादिविमानम्

हिमालय-कन्याकुमार्योर्मध्यभागो देशः कथ्यते। यथा देह-धारणे शरीरं वात-पित्त-कफद्वारा निर्मितं भवति। यथा जगत्त्रिगुणात्मकं भवति। सात्त्विक-राजस-तामसेति त्रयो गुणाः सन्ति। तथैव देशगुणधर्मानुसारं भागत्रये विभाजितमस्ति। हिमालयाद् विन्ध्य-पर्वतपर्यन्ता भूमिः सात्त्विकी, विन्ध्याचलसमीपे कृष्णानदीपर्यन्ता भूमी राजसी, कृष्णावेण्णातः कन्याकुमरीपर्यन्ता भूमिस्तामसी। सात्त्विकप्रदेशे नागरपद्धतिः, तामसप्रदेशे वेसर-पद्धतिः, राजसप्रदेशे

---

१५५ का.शि.२५.१ तः १५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवति, तस्मिन् प्रदेशे द्राविडपद्धतिर्भवति। सात्त्विके नागरपद्धत्या हर्म्याणि, तामसदेशे वेसर-पद्धत्या आलयास्तथा राजसदेशे द्राविड-पद्धत्या हर्म्याणि भवन्ति। क्रमेण पुलिङ्ग-नपुंसकलिङ्ग-स्त्रीलिङ्गा भवन्ति। नागरपद्धतेः प्रासादो ब्राह्मणः, वेसरपद्धतेः प्रासादो वैश्यः, तथा द्राविडपद्धतेः प्रासादः क्षत्रिय उच्यते।[156]

| वर्गीकरणम् | नागरः | द्राविडः | वेसरः |
|---|---|---|---|
| गुणः | सात्त्विकः | राजसः | तामसः |
| देशः | हिमालयतो विन्ध्याद्रिः | विन्ध्याद्रितः कृष्णावेण्णानदीपर्यन्तं | कृष्णावेण्णानदीतः कन्याकुमारीपर्यन्तम्। |
| लिङ्गम् | पुलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
| देवः | विष्णुः | ब्रह्मा | महेश्वरः |
| जातिः | ब्राह्मणः | क्षत्रियः | वैश्यः |

नागरः

कूटकोष्ठस्य निर्गमनं मानसूत्रे सुस्थितं भवति। कूटोच्चताया ऊर्ध्वं, कोष्ठक्रमेणाधोभागे पत्रतोरणसहितं, प्रत्येकतलोपर्येकाकारस्तम्भा भवन्ति। ऊर्ध्वभागे क्षुद्रकोष्ठसहिता महानासी भवति। वेदिका-जालकेन सह कूटस्य शीर्षं वर्गाकारं भवति। एकतलं वानेकतलानां भवनं

१५६ का.शि. २५.१६-२३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

। शिखरं तथा कण्ठो वर्गाकारो शालासदृशो वाकारेण भवति। एतन्नागर-भवनं प्रकल्पितम्।[१५७]

द्राविडः (प्रथमः प्रकारः)

पूर्वानुसारं मानसूत्रं कुर्यात्। कूटस्य निर्गमनं बहिर्भवति। कोष्ठः कूटेन सह बहि-र्निर्गच्छति। कूटं मानसूत्राद् बहिः, कूटस्य सीमान्ते कोष्ठो भवति। मध्यकोष्ठं सभद्रं वा विभद्रं भवति। पञ्जरं मानसूत्रे तथा कूटो मानसूत्राद् बहिर्भवति। वेला उन्नता, योग्यक्रमेण सौष्ठिकं भवति। सान्तरं मञ्चमुन्नतं भवति, किन्तु प्रस्तरहीनं भवति। वेला-मर्यादा, सौष्ठिक-कूट (कोष्ठ)तलस्य कूटं क्रमेण वर्गाकारम्, अष्टकोणं, वर्तुलाकारं भवति। भिन्न-भिन्नप्रकारस्याधिष्ठानम्, स्तम्भः, वेदिका तथा तोरणं भवति। गजमुखः, कुम्भः, लतादि-वृत्ताख्यस्फाटिते भवन्ति। हारान्तरसमीपे स्थितो मञ्च ऊर्ध्वे क्षुद्रकोष्ठो भवति। तत्रैव गजमुखः, भद्रनासी, अल्पनासी आधारेण सह विनाधारेण वा, प्रथमतलभवने वा प्रत्येकतले भवति। शीर्षं वा कण्ठं वर्तुलाकारम्, अष्टकोणं, वर्गाकारं वानेकशीर्षयुक्तं द्राविड-विमाने भवति।[१५८]

द्राविडविमानस्य द्वितीयः प्रकारः

उपर्युक्तानुसारं किन्तु स्तम्भस्तथाधिष्ठानमेकाकारं भवति। हारान्तरमध्ये विशेषेण कल्पवृत्तस्फुटो भवति। सान्तरप्रस्तरेण सह कूट-कोष्ठौ समानस्तरे भवतः। आन्तरमञ्चो न भवति। ऊर्ध्वमञ्चः समसूत्रे भवति। हारान्तरे भद्रं वा भद्रपञ्जरं कर्तव्यम्। सान्तरप्रस्तरेण सह

---

१५७ का.शि.२५.२४ तः २७
१५८ का.शि.२५.२८ तः ३४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शीर्षपर्यन्तं वर्गाकारा भवन्ति। वेदिकाष्टकोणा, शीर्षं तथा कण्ठो वर्तुलाकारो भवति। शिरःकण्ठोऽष्टकोणो वर्तुलाकारो वा भवति। वेदिकाष्टकोणा, शीर्षं तथा कण्ठो गोलाकारो भवति। अथवा शीर्षं तथा कण्ठमष्टकोणं वा वर्तुलाकारं कल्पयेत्। होमात् कुड्यलान्तरपर्यन्तम्। एतादृशं द्राविडविमानं ख्यातम्। [१५९]

द्राविडप्रासादस्य तृतीयः प्रकारः

अष्टकोणं वा षट्कोणं विमानं भवति, तर्हि तद्भवनं द्राविडमुच्यते। एवं त्रिप्रकारस्य द्राविडपद्धत्याः प्रासादं सर्वदा रचयेत्।[१६०]

वेसरविमानम्

वेसरपद्धत्यां कूटकोष्ठादीनां निर्गमनं समसूत्राणां भवेत्। कोष्ठ-कूटस्य शीर्षं वर्तुलाकारं भवेत्। गर्भगृहस्याकारो वृत्ताकारो वा बहिर्वृत्ताकारो भवति। शिखरस्य कण्ठ-शीर्षं गोलाकारं भवति। अथवेच्छानुसारमाकारस्य भवति। एकतलं वानेकातलं, अलिन्देन भद्रेण सह भवति। सर्वत एकसमानं दैर्घ्यं, विस्तारः, आयताकारः, वृत्ताकारः, वृत्तायताकारो वा भवति। अथवा कूटकोष्ठेन सह वृत्तायताकारस्य हर्म्यं, कूट-कोष्ठक्रमेणाधो ऊर्ध्वं भवति। अथवा कूटकोष्ठद्वयं समं भवति। वेसरभवनमेकतलस्य वानेकतलस्य वा भवति। अन्यप्रकारेण भवनस्य वर्णनम्। जन्मतः स्तूपिपर्यन्तं वर्गाकारं नागरविमानं भवेत्। शीर्षं तथा कण्ठोऽष्टकोणो भवति चेत्, द्राविडविमानं भवति। कण्ठस्तथा शीर्षं वृत्ताकारं भवति चेत् वेसरपद्धत्या भवनं भवति। कूटकोष्ठादिकं यद् दर्शितं तत् प्रासादस्य कृते। नानाधिष्ठानसहितं गलं तथा प्रत्येकस्तम्भः पृथक् पृथक्प्रकारेण वा सर्वत्र वृत्तस्तम्भा वेसरपद्धत्याः प्रासादस्य भवति। लिङ्ग-पिण्डका-प्रमाणेन प्रासादोऽधिष्ठानं च भवेत्। एवंरीत्या वास्तुनिर्माणे राजा

---

१५९ का.शि.२५, ३५ तः ३९
१६० का.शि.२५.४०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भिन्न-भिन्नप्रकारेणैकसाकं निर्माति चेत्, राजा तथा राष्ट्रकृते भयकारकं भवति। अतः सर्वप्रयत्नेनैकजातेर्हर्म्याणां निर्माणं करणीयम्। नागरे शान्तं (नक्काशी) न भवति। वेसरपद्धत्यां वाहनं, सैनिकः- इत्यादिकं चित्रितं भवति। द्राविडे भोगः, शौर्यं, तथा नृत्यादिकं चित्रितं भवेत्। यदि विपरीतं भवति चेत्, स्वामिनः संकटमागच्छति।[१६१]

गर्भविन्यासः

प्रासादं गेहं कथ्यते तथैव वास्तुगर्भो भवति। गृहे गुरुर्न भवति चेद् गेहं किञ्चित्कालमपि निवासयोग्यं न भवति। देवा गर्भन्यासं न कुर्वन्ति तर्हि तादृशे गेहे निवासो न करणीयः। सर्वप्रयत्नेन गर्भविन्यासं तु कारयेत्। गर्भविन्यासो मानवानां कृते श्रीप्रदोऽस्ति। मनुष्याणां कृते गर्भन्यासस्य नाम श्रीप्रदस्तथा देवालयस्य कृते श्रीकरो नामको गर्भविन्यासो भवति। ब्राह्मणानां कृतेऽधिष्ठानस्य प्रतेरुपरि हिताय भवति। नृपाणां कृते कुमुदादूर्ध्वं तथा वैश्याणां कृते जगत्यूर्ध्वं वरः। शूद्राणामभिवृद्ध्यर्थं होमोर्ध्वं गर्भन्यासं कुर्यात्। सर्व(निम्न) जातीनां कृते भूमेरुपर्याद्येष्टकोपरि गर्भन्यासः करणीयः। प्रासाद-मण्डपे तथैव प्रागद्वारे तथा गोपुरे परिवार-देवालये च गर्भन्यासः करणीयः। यत्र प्रथमेष्टकां स्थापयामः, तत्र गर्भन्यासः करणीयः। गर्भपात्रं सुवर्णस्य, रजतस्य ताम्रस्य च क्रमेणोत्तमं मध्यममधमं च भवति। अथवा कांस्यपात्रमपि भवितुं शक्नोति। प्रथमतलादारभ्य षोडशतलपर्यन्तं गृहाणां कृते पञ्चाङ्गुलमारभ्यैकैकाङ्गुलवृद्ध्या विंशदङ्गुलपर्यन्तम्, एवं षोडशप्रकाराणां गर्भपात्राणि भवन्ति। गर्भपात्रस्य दैर्घ्यं तथा विस्तारः स्तम्भमूलादधिको भवेत्, विस्तारसदृश्युच्चता वा भवेत्। पिधानस्योच्चता गर्भपात्रस्योच्चताया एको भागो भवति। पात्रे द्वित्रिभागपर्यन्तं पिधानालम्बनं भवति। कोष्ठस्य विस्तारो यवैकविस्तारादारभ्य यवार्धो भवति। फलोच्चतां त्रिचतुर्भागपश्चात् कोष्ठ-भित्तेरुच्चता भवति। प्रथमाष्टकोणेन निर्मितं, मध्य-कोष्ठे इन्द्रनाभसहितं कूटं स्थापयेत्। अनन्तं प्रारभ्य शिखण्ड्यन्तं मूलमन्त्रं स्थापयेत्। तद्बाह्येः

१६१ का.शि.२५.४१ तः ५२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

क्रमेण स्वरानुसारं रत्न-सुवर्ण-धान्य-फलं स्थापयेत्। मृत्तिका-कन्द-धान्य-पत्राणि गर्भस्य गर्ते विन्यसेत्। पश्चात् "गव्यदस्रेति" मन्त्रेण फलशुद्धिं कृत्वा कूटस्याक्षरं वदन् कूटे माणिक्यं संस्थापयेत्। अनन्तोपरि हीरकं तथा सूक्ष्मे मौक्तिक्यं न्यसेत्। शिलोत्तमोपरीन्द्रनीलम्, एकनेत्रे स्फटिकम्, एकरुद्रे शङ्खं, त्रिमूर्त्यां पुष्परागकम्, श्रीकण्ठे सूर्यकान्तं, शिखण्डौ वैदूर्यं, स्वर्णं पृथ्व्यां कृत्वाकारे विन्यसेद् बुधः। रजतकपालमिकारे, कुम्भमुकारे, तद्द्वार आरकूटेन गकारं, शंकरस्य कांस्यमूर्तिमकारे स्थापयेत्। सीसस्य परशुं कृत्वा एकारे स्थापयेत्। त्रपुणाया हरणं कृत्वा औकारे निधापयेत्। लोहस्य त्रिशूलमङ्कारे स्थापयेत्। सुवर्ण-वृषभं कृत्वा कूटाक्षरे विधापयेत्। आकारे शम्यां, इकारे मनःशिलाम्, उकारे जातिलिङ्गम्, ऋकारे गैरिकां न्यसेत्। लृकारे सौराष्ट्रां, एकारेऽञ्जनम्, अंकारे गोरोचनाम्। विसर्गे अःकारे नीलधारकं न्यसेत्। तद्बीजस्य स्मरणं कृत्वा क्रमेण यव-नीवार-साल-प्रियङ्गु-तिल-सर्षप-मुद्गानि सप्त बीजानि गर्भपात्रे रोपयेत्। उपर्युक्तानुसारं विधिना गर्भपात्रं स्थापयेत्। गर्भपात्रं स्थापयितुं भूमिं समतलां सुदृढां च कुर्यात्। नृपप्रासादस्योत्तरे चाग्रे पञ्च-षट्-सप्तहस्तस्य षोडशस्तम्भसहितामतिसुन्दरां प्रपां कुर्यात् । मण्डपस्य त्रिभागं कृत्वा मध्यभागे वेदीं कल्पयेत्। तस्योच्चतैकहस्तैकतालमात्रा वा भवेत्। अस्यां महाशालायां वेदी-परितोऽग्निकुण्डानि भवेयुः। प्रागादिषु क्रमात् (अग्निकुण्डं) वर्गाकारं, धनुषाकारं, वर्तुलाकारं, पद्माकारं वा भवेत्। कुण्डस्य त्रिमेखला नाभि-योनिसहिता भवेत्। कुण्डं तथा वेदिस्थानं दर्पणवद् भवेत्। तस्मिन् स्थाने गोमयेन लेपनं करणीयम्। पिष्टचूर्णैरलंकृत्य तथा पुण्याहवाचनं कृत्वा प्रोक्षणं कुर्यात्। चत्वारद्रोण-अक्षतेन वेदी-उपरि स्थण्डिलद्वयं रचयेत्। तस्योपरि तिल-तण्डुल-लाजा-दर्भ-पुष्पादिकं प्रसारयेत्। अष्टदिक्पालानां नामोच्चारणेन सह गन्धपुष्पादिभिः पूजयेत्। पञ्चगव्येनाभिषेकं कृत्वा गन्ध-जलेन स्नापयेत्। फलं (नारिकेलं) बद्ध्वा नववस्त्रेण वेष्टयेत्। कूटाक्षरमुक्त्वा स्थण्डिलोपरि नारिकेलं स्थापयेत्। तस्य परितः ससूत्रेण विधिना कलशं स्थापयेत्। कलशं तृण-गुच्छेन वस्त्रेण च वेष्टयित्वा गन्धेन सह क्रमेण स्थापयेत्। कुम्भे स्थितं विश्वेश्वरं तस्य मन्त्रेण सह,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...संस्कारं कृत्वा होमं कुर्यात्। अग्न्याधानादिकं विधिना कुर्यात्। हृदयादिमन्त्रोच्चारणं कृत्वा हृदय-मन्त्रादिमुक्त्वा समिध-घृत-तिल-तण्डुल-सर्षपैरीशान-दिक्-क्रमेण होमं कुर्यात्। होमं कृत्वा विशेषरूपेणाष्टोत्तरशताहुतीर्दद्यात्। द्रव्येणाहुतिं दत्त्वा व्याहृतीभिस्तथा मूलमन्त्रेण शताहुतीर्दद्यात्। जयादि-अभ्यातान-राष्ट्रभृत्-मन्त्रादिद्वारापि होमं कुर्यात्। रात्रौ जागरणं कृत्वा प्रातःकाले शुभमुहूर्ते नक्षत्रे लग्ने तिथौ वासरे शिवद्विजकुल उत्पन्नः, आचार्येण दीक्षितः, वारद्वयं स्नानं समापितः, सविग्रहः, श्वेतवस्त्रमुत्तरीयवस्त्रं धारयित्वा, भस्मलेपनादिं कृत्वा सज्ज आचार्यं सुवर्णमुद्रिकां दत्त्वा पूजां कुर्यात्। शिल्पिनः पूजापि वस्त्र-आभूषणादिं दत्त्वा कुर्यात्, तत् पश्चात् कर्ता, आचार्यस्तथा शिल्पी गर्भस्थाने प्रवेशं कुर्यात्। भित्तेरष्टभागान् कृत्वा बहिश्चतुर्भागान् त्यजेत् ।तथैवाभ्यान्तरे त्रिभागं त्यक्त्वा, शेषभागे गर्भपात्रं स्थापयेत्। आचार्यस्तडाग-नदी-क्षेत्र-वल्मीक-हलादिस्थितामष्टप्रकाराणां भूमिं स्वीकृत्य नमस्कारं कृत्वा गर्भस्य गर्ते स्थापयेत्। तस्योपरि कन्दान् स्थापयेत्। मध्यभागेऽम्बुजस्य कन्दं स्थापयेत्। पूर्वभागे कुमुदस्य कन्दं, दक्षिणभाग उत्पलस्य कन्दं, पश्चिमे सौगन्धि-कन्दं, उत्तरे उशीरकन्दं, तस्योपरि बीजं न्यसेत्। पूर्वे शालीं, दक्षिणे व्रीहिं, पश्चिमे कोद्रवं, उत्तरे माषं स्थापयेत्। आग्नेयकोणे माषं, नैरृत्येऽन्नं, वायव्ये प्रियङ्गुम्, ऐशान्ये कुलित्थम्- एवंप्रकारेण हृदयमन्त्रेण गर्भपात्रं गर्ते स्थापयेत्। सर्ववाद्यसहितं गीतं-नृत्यं कुर्वन् जयशब्देन ब्रह्मघोषेण च प्रासादबीजस्योच्चारणं कुर्वन् गर्भपात्रस्य स्थापनां कुर्यात्। पाषाणेन-इष्टकया सुधया सह सुदृढं कृत्वा गन्ध-पुष्पादिद्वारा प्रासादस्य पूजां कुर्यात्। इति गर्भन्यासविधानम्।[१६२]

एकतलभवनम्

---

१६२ का.शि.२६.१ तः ५४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…ुलाकारः, आयताकारः, षडस्रकः, अष्टकोणः – इति आकारा- स्तथा शिखरमपि तथैव भवति। प्रासादस्य विस्तारस्य चार्धमानं मुखमण्डपस्य भवति, तर्हि सः कनिष्ठः, गृहस्य विस्तारस्य सदृशो मुखमण्डपस्य विस्तारोऽस्ति चेत् , सः श्रेष्ठः, द्वयोर्विस्तारस्याष्ट भागान् कुर्मश्चेत्, मुखमण्डपस्य विस्तारस्य नव प्रकारा भवन्ति। प्रसादस्य विस्तारस्य च सदृशो मण्डप उत्तमः, अर्धविस्तारस्य सदृशो मण्डपो मध्यमः, तृतीयोऽधमो भवति। प्रासाद एकदण्ड-प्रवेशयुक्तो मण्डपः श्रेष्ठः। मानसूत्रे सार्धैको द्विदण्डप्रवेशो मध्यमः कनिष्ठश्च क्रमेण भवति। सर्व-अवयवैः सहान्तरालं भवति। तस्य रिक्तस्थानस्य दैर्घ्यं त्रिदण्डं चतुर्दण्डं वा भवति। (भित्तेराभ्यान्तरात् मानं स्वीकृतम्। एतस्य मण्डपस्य पार्श्वे गजहस्तविभूषितं सोपानं कुर्यात्। तस्य विस्तारः प्रासाद-भित्तेर्यावद् विस्तारसदृशो वार्धत्रिपादको भवेत्। अन्तराल-भित्तेर्विस्तारो मण्डप-भित्तेर्विस्तार- सदृशो भवेत्। मुखमण्डपं कूटकोष्ठेन सहितं रहितं वा भवति। तोरणादिद्वारा चित्रितं, एकानेकतलयुक्तं, त्रिवर्गेण सहितं मुखमण्डपं कर्तव्यम्। (त्रिवर्गं नाम ï अधिष्ठान-स्तम्भ-प्रस्तराः) प्रासादस्य विस्तारं त्रिभागे विभाजनेन गर्भगृहस्य विस्तारस्यैको भागो भवति। पञ्चभागे विभाजनेन भागत्रयं, सप्तभागे विभाजनेन चत्वारः, नवभागे विभजने पञ्चभागाः, द्वादशभागेनैकादशभागाः, त्रयोदशभागेनाष्टभागाः, दशभागेनाष्टभागाः, मण्डप-विस्तारस्य सपादो नवांशो (१/९) वा भागो गर्भगृहस्य विस्तारस्य भवति। एवंप्रकारेण गर्भगृह-विस्तारस्य नवप्रकाराः प्रोक्ताः। शेषविस्तारस्य परितो भित्तेः कल्पनां कुर्यात्। एकद्वित्रिचतुःपञ्चदश वा भागान् कृत्वा, एकभागस्य भवति।[१६३]

| अङ्गम् | शान्तिकम् | पौष्टिकम् | जयन्तम् | अद्भुतम् | सार्वकामिकम् |
|---|---|---|---|---|---|
| अधिष्ठानम् | १ | १ | १ | १,१/२ | १ |
| स्तम्भः | २ | २,१/२ | २,१/२ | २ग | २ |

१६३ का.शि. २७.१ तः १३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | |
|---|---|---|---|---|---|
| [illegible] | [illegible] | [illegible] | १ | १ | - |
| कण्ठ: | १ | १ | १,१/२ | २,१/२ | - |
| शिखरम् | २ | २१/२ | ३ | १,१/२ | ३ |
| स्तूप: | १ | १ | १ | २ | १ |
| आहत्य | ८ | ९ | १० | ११ | ७ |

(का.शि. २७, १४ त: २८)

ऊर्ध्वमञ्चे परितश्चतुष्कोणसमीपे द्विसप्ततिभागेषु कर्णकूटो भिन्न-भिन्नप्रकाराणां सप्तभागेषु भवति। सर्वावयवानां यत्र प्रवेशो भवति, एतादृशी प्रगीवस्य कल्पनां कुर्यात्। तथैव वृत्ताकारकण्ठेन सह शिखरस्य घनो भवति। शिखरे चतुरस्रा महानसी मुख्यदिग्भागे भवति। अष्टदिक्ष्वायताकारो भद्रो वा मञ्चस्योर्ध्वं षोडश लघ्व्यो नासिका भवन्ति। प्रस्तरस्योपर्यष्ट लघ्व्यो नासिका भवन्ति। तत् जयद्वन्द्वमुदाहृतम्। उपर्युक्तानुसारं किन्तु कर्णकूटाभ्यां पञ्चभागेन भवति। नागरपद्धत्यामुचितं कण्ठं कूटाकारं प्रकल्पयेत्। कण्ठकूटप्रमाणेन मध्यभागे यद् भद्रं भवति, तद् भद्रनासिका उच्यते। तदन्तरालतुल्यं क्षुद्रं पञ्चांशसंयुतं भवति। कूटं भद्रनासिका वा भद्रेण सहिता रहिता वा भवति। मध्यभागे विशाला भद्रनासिका विशालं भद्रं वा भवति। गृहविस्तारं त्रिचतु:पञ्चषट्सप्तभागेषु विभज्य, एकस्य भागद्वयस्य वा मध्ये विशाल-भद्रं भवति। अथवा शालामध्ये त्रिभद्रं कुर्यात्। भद्रनासेर्निर्गमनममेकदण्डं, सार्धैकदण्डं द्विदण्डं वा भवति। शिखरमिच्छानुसारं रचयेत्। तत् कण्ठश्रीभोगान्तमुदाहृतम्। स्वतो विस्तारस्य भित्तेस्तथा स्तम्भोपरि अष्टप्रकारकाणां पट्टा भवन्ति। स्वतो विस्तारस्य भित्ते: स्तम्भस्य निर्गमनरहितं भवति। सर्वदेवतानां कृते भवति। तत् श्रीभद्रं कथ्यते। उपर्युक्तानुसारं सदनस्य बहिर्मध्यभागे भद्रयुक्तस्तोरणैर्जालकाभिश्च परितो सुशोभनं कृतमस्ति, तादृशो वक्षो भवति। स श्रीविशाल उच्यते। स्वस्तिबन्धसदनमुपर्युक्तानुसारं किन्तु वेदी- कण्ठ-घटादि - अष्टाङ्गयुक्त: स्तम्भस्तथा चतुर्दिक्षु नासिका. तथैवोपदिक्षु लघ्वी नासिका शिखरादूर्ध्वं, स्तम्भोपर्यल्पनासी

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कर्णकूटं विना सर्वदेवतानां प्रियं शुशोभनमुच्यते। श्रीकरे शिखरस्योपरि नासिका, अष्टकोणस्य षोडशकोणस्य वा प्रस्तरो भवति। शिखर-कण्ठ-वेदिका वर्गाकारा भवन्ति। तथैव किन्तु शिखरस्योर्ध्वमष्टाल्पनासिकया सह शीर्ष-समीपे द्वितीयकोष्ठेन सह महानासी भवति। नासिकाया विस्तारो दण्डद्वयं त्रिदण्डं वा भवति। तत् कोष्ठदीपमुच्यते। नासिकासममुच्चता, उपदिग्युक्तया भद्रनासिकया सुशोभितं शिखरं परिकल्पयेत्। शीर्षं तथा कण्ठो वृत्ताकारो भवति, तत् केसरं कथ्यते। गलं शीर्षं वाष्टकोणं भवति, तद् राजकेसरमुच्यते। प्रासादस्य विस्तारस्य च पञ्च-सप्ताष्ट वा भागान् कृत्वा, मध्ये भद्रकं त्रिभागं द्विभागं वा पूर्वोक्तानुसारं भवति। हर्म्यस्य बहिरन्यभद्रमानेन मध्यभद्रस्य निर्गमनमेकदण्डं सार्धैकदण्डं द्विदण्डं त्रिदण्डं वा भवति। यस्य शिखरं वृत्ताकारं, महानास्या सह भवति। प्रत्येकस्तम्भेऽल्पनासीयुक्तं, कण्ठशीर्षयोराकारयुक्तं, सर्वदेवतानां कृत उचितं कल्याणसुन्दरं नाम्ना प्रख्यातम्। पूर्वोक्तानुसारं किन्तु पूर्व-पश्चिमदिग्भागे भद्रनासिका, पार्श्वयोर्ललाटनासिकया सह भवति। वृत्ताकारमायताकारं च भवेत्। तत् कोशलमुच्यते। पूर्वदिग्भागे स्कन्दस्य मूर्तिः। दक्षिणे दक्षिणामूर्तिः। पश्चिमे विष्णो- र्लिङ्गोद्भस्य वा मूर्तिर्भवति। उत्तर-दिग्भागे ब्रह्मदेवस्य मूर्तिर्भवति। मूर्तिरियं भारस्थाने वर्जयेत्। मण्डपस्य दक्षिण-भद्रे सिद्धिविनायकस्य स्थापना, पूर्व-पश्चिमभागे नृतमूर्तेः (नृत्यं कुर्वन् गणेशस्य मूर्तेः) कल्पनां कुर्यात्। उत्तरदिग्भागे दुर्गां वा क्षेत्रपालं स्थापयेत्। एवंप्रकारेण सदनस्य स्थानस्य च प्रत्येकदिग्भागे मूर्तिं कल्पयेत्। अधिष्ठानादूर्ध्वं पूर्वदिग्भागे स्कन्दस्य, ऐरावतस्य कमलासनोपर्यारूढब्रह्मदेवस्य वा - एतयोरेकं स्वीकरणीयम्। दक्षिणे दक्षिणामूर्तिर्वा वीरभद्रः, पश्चिमे नृसिंहस्तथा सौम्या (कुबेर) मूर्तिः, उत्तरे कमलारूढब्रह्मदेवस्य मूर्तिर्भवति। प्रथम-द्वितीयं तृतीय-तलानां गृहस्य प्रस्तरस्योपर्येता मूर्तयो भवन्ति। चतुर्वाधिकतलानां भवनानामुपरि महेशस्य मूर्तिर्भवेत्। उमास्कन्देन सह महेशस्य मूर्तिर्भवेत्। अन्यदेवानां गन्धर्व-सिद्ध-दैत्य-मरुद्गणानां मूतर्यो भवेयुः। चतुस्तलादारभ्य पञ्चदशतलपर्यन्तं कण्ठे प्रस्तरस्योपर्युरिष्टनाशायेष्टमूर्तेः स्थापना करणीया। गलस्य स्थाने स्थितस्य मञ्चस्योर्ध्वस्य

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...गे द्विरेकः शयनासनस्थो वृषभो भवेत्। चतुष्कोणे पद्मपीठस्यापयुपविष्टौ, स्थूलशरीरयुक्तौ, हृदयाञ्जलिसंयुक्तावेतादृशौ द्वौ भूतौ भवतः। अग्निकोण आमोदं, नैऋते प्रमोदं, वायुकोणे प्रमुखम्, ईशानकोणे दुर्मुखं स्थापयेत्। आग्नेयकोणे क्रमेण श्वेत-रक्त-ताम्र-कृष्ण-पीतवर्णा भवन्ति। यमदेवस्यावाहनं करणीयम्। स्थूलया सूक्ष्मया वा मृत्तिकया मूर्तेः कणलेपनं कुर्यात्। नानालङ्कारैर्विभूषितं कुर्यात्। नानाक्रीडासमायुक्तं सुधया धातुभिर्वा यथोचितं रचयेत्। मूर्ति-शूलस्योपरि लेपनं कुर्यात्।[१६४]

द्वितलम्

द्वितीयतलस्योच्चता विस्तारो निर्गमनश्च प्रासादमानानुसारं कर्तव्यः। विन्याससूत्रस्याभ्यान्तरस्य विस्तारस्य च षड् सप्त वा भागान् करोति, तर्हि कूट-विस्तारस्यैकभागस्तथा कोष्ठस्य दीर्घता द्विगुणिता भवति। कोष्ठस्य विस्तारः, कूटस्य विस्तारेण समो भवति। शेषं हारान्तरं भवति। कोष्ठस्य पार्श्वे पञ्जरं भवति। हारान्तरं विहाय शेषस्थाने पञ्जरस्य विस्तारस्त्रिपादं वार्धभागो भवति। कूटाद् बहिर्मानसूत्राभ्यन्तरे

पञ्जरस्यान्तःप्रवेशो भवति। पञ्जरं तथा कणकूटं नासिकाया आकारवद् भवति।[१६५]

द्वतीयतलम्

| अङ्गम् | शान्तिकम् | पौष्टिकम् | जयन्तम् | अद्भुतम् | सार्वकामिकम् |
|---|---|---|---|---|---|
| अधिष्ठानम् | ३ | ३,१/२ | ३,१/२ | ४ | ४ |

---

१६४ का.शि.२७.१४ तः ६९
१६५ का.शि.२८.१ तः ५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | |
|---|---|---|---|---|---|
| | | | ७ | ८ | ८ |
| मञ्चः | ३ | ३ | ३ | ३ | ३ |
| स्तम्भः | ५ | ६,१/२ | ६,१/२ | ७ | ७,१/२ |
| मञ्चः | २ | ३ | ३ | ३ | ३ |
| वेदिका | १ | १ | १ | १ | २ |
| गलम् | २ | ३,१/२ | २,१/२ | ३ | ३ |
| शीर्षं | ४,१/२ | ५ | ५ | ५ | ७ |
| स्तूपिः | १,१/२ | १,१/२ | १/२ | १,१/२ | २,१/२ |
| आहत्य | २८ | ३४ | ३३ | ३६ | ४० |

विमानं होमादारभ्य स्तूपिपर्यन्तं वर्गाकारं भवेत्। अष्टपञ्जरेण सह चतुष्कूटं तथा चतुःशालं भवति। तस्योपरि स्तम्भः, स्तम्भस्योपरि प्रतिः, प्रतेरूर्ध्वमष्टचत्वारिंशदल्पनासयो भवन्ति। वेदिकाया उपरि नानाचित्रैश्चित्रितं भवति। तथैव किन्तु शीर्षाग्रे पार्श्वे चाल्पनासिका युक्तः स्वस्तिभद्रो दर्शितः। अयं शंकरप्रीतिकरो भवेत्।[१६६]

श्रीकर उपर्युक्तानुसारं किन्त्वधो भागे कूट-कोष्ठौ, मञ्चसमीपे नासिका, अधो पञ्जरं, शीर्षोपरि नासिका, क्रमेण स्तूपिः-घटः-गलपर्यन्तं भवति। उपर्युक्तानुसारं किन्तु कूटकोष्ठौ कूटशालाया उच्चता समा भवति। पञ्जरमधोभागे भवति। स कैलास उच्यते।[१६७]

रुद्रकान्तम्

१६६ का.शि.२८.६ तः २१
१६७ का.शि.२८.२३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ानान्तरप्रस्तरेण सह समसूत्रे, विशेषरूपेण हारान्तरमध्ये द्वौ चत्वारि वा पञ्जराणि भवन्ति। चतुष्कूटं चतुःशाला वा तथा अष्टाल्पनासिका भवन्ति। वेदिकाष्टकोणा, शीर्षं तथा गलं वृत्ताकारं भवति। शिखरादूर्ध्वं चतुर्दिक्षु भद्रनासी विना भद्रां वा नासिका भवेत्। एतादृश्योऽष्टनास्यो भवन्ति। वेदिकया तोरणेन सहितमाभूषितं भवति, तं रुद्रकान्तं कथ्यते।[१६८]

कूटात् कोष्ठस्य निर्गमनमेकदण्डं सार्धैकदण्डं वा भवति, अथवा दण्डद्वयं त्रिदण्डं वा भवति। नानाधिष्ठानसंयुक्तम्, नानास्तम्भसहितम्, ऊर्ध्वं विमान-आकृतिसंयुतम्, प्रागुक्तानां सर्वप्रकाराणां गेहेषु भवेद् तद् विनापि भवेत्।[१६९]

स्वस्तिबन्धम्

तथैव किन्तु शिखरादूर्ध्वं चत्वारोऽर्धकोष्ठाः, चतुःकूटेन सह षड्भिरष्टभिर्नासीभिः समन्वितं वर्गाकारं शीर्षं भवति, तत् स्वस्तिबन्धमिति स्मृतम्।[१७०]

कल्याणसुन्दरम्

तदेव किन्त्वान्तरप्रस्तरेण सहितं कोष्टद्वयं युक्तं, हार-पञ्जरेण सह षड् वा अष्टाल्पनासीसंयुक्तम्, तथा सर्वालङ्कारैर्भूषितं कल्याणसुन्दरं प्रोक्तम्।[१७१]

पाञ्चालम्

तदेव किन्तु शिखरस्योपर्यर्धकोष्टं वर्जयेत्। चतुर्नासिकोपेतां शिखरस्य कल्पनां कुर्यात्।[१७२]

---

१६८ का.शि. २८,२४ तः २७
१६९ का.शि. २८.२८-२९
१७० का.शि.२८.३०-३१
१७१ का.शि.२८.३२-३३-१/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विष्णुकान्तम्

तदेव किन्तु कण्ठस्तथा शिखरमष्टकोणेन भरितं (पूरितं) भवति। शीर्षमष्टमहानासीसंयुक्तं भवति। तद् विष्णुकान्तं कथ्यते।[१७३]

विश्वकरम्

सान्तरप्रस्तरेण सह चत्वारश्चत्वार: कूटकोष्ठौ, दीर्घाकार: पञ्जरेण सह भवति। कण्ठो शीर्षं वा वृत्ताकारं भवति। एकदण्डं सार्धैकदण्डं त्रिदण्डं वा कर्णकूटस्य कोष्ठस्य बहि-र्निष्क्रान्तं कल्पयेत्। शिखरपरितोऽष्टचत्वारिंशन्नासिका: भवन्ति। अयं विश्वकरो भवति, ईश्वरमधिकं प्रियोऽस्ति।[१७४]

मंगलम्

तदेव किन्तु शिखरस्योच्चताया द्वादशभागान् कृत्वा वेदिकाया: कण्ठस्य तथा शीर्षस्योच्चतैकांशेनाधिका भवति। त्रिस्तूपिसंयुक्तं मङ्गलं कथितम्।[१७५]

गान्धारम्

तदेव परन्तु वृत्तायताकृतियुक्तं भवति चेत्, गान्धारं भवति।[१७६]

मनोहरम्

---

१७२ का.शि.२८.३३, २/२, ३४
१७३ का.शि.२८.३५
१७४ का.शि.२८.३६-३७-३८
१७५ का.शि. २८.३९-४०, १/२
१७६ का.शि. २८.४०, २/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कृतिर्वा उपानादिद्वयस्रवृत्तं, वोपर्युक्तानुसारं भवति।

तथैव बहिरायात-वर्गाकाराकृतेः कल्पनां कुर्यात्। गर्भगृहं गोलाकारं भूत्वा कूट-कोष्ठाभ्यां भवेत्। कर्णकूटस्य शीर्षं गोलाकारं भवेत्। कूटं, कोष्ठं तथाल्पनीडं समसूत्रे भवेत्। सर्वदेवानां कृत उचितं मनोहरनाम्ना ज्ञायते।[१७७]

शिवकान्तम्

उपानादारभ्य स्तूपिपर्यन्तं बहिः प्रति गोलाकारं तथोपर्युक्तानुसारं गृहं शिवकान्तं कथ्यते।[१७८]

कुबेरकान्तम्

अधिष्ठानं तथा गर्भगृहं वर्गाकारं भवेत्। अधिष्ठानस्य बहिर्भाग उपरिष्टात् स्तूपि-पर्यन्तं वृत्ताकारं भूत्वा कूटकोष्ठादिसर्वाङ्गयुक्तं गर्भगृहं भवेत्। अधिष्ठानं वर्गाकारं वायताकारं भवेत्। उचितकूटकोष्ठेन सह शिखरं कण्ठं च षट्कोणेन भवेत्। तत् कुबेरकान्तमुच्यते।[१७९] एवं द्वितलानां गृहाणां अष्टादश प्रकारा भवन्ति। होमात् स्तूपिपर्यन्तमिष्टकाभिः शिलाभिर्वा निर्माणं कुर्वन्, पुरुष-प्रमाणानुसारं भवति। (वास्तविकं १८ प्रकाराणि न कथितानि किन्तु केवलं १५ प्रकाराणि निर्दिष्टानि।)[१८०] इष्टका-पाषाणयोर्मिश्रणं कृत्वा गृहं रचयति, तर्हि तद् गेहं संमिश्रहर्म्यं कथ्यते। पाषाणेन, पाषाणस्योपरि इष्टकाद्वारा निर्मितं तथा इष्टका-काष्ठानां संमिश्रेण निर्मितं गेहं षण्ढमुच्यते।[१८१]

तथैव निर्मितं गेहं अर्थात् अधोभागे पाषाणैः पूरितं तथा ऊर्ध्वभागे प्रकोष्ठादिकं दारुणा निर्मितं, तद् गृहं घनीकृतमुच्यते। शेषगृहाणि काष्ठेन रचितानि स्त्रीलिङ्गसंचितं वा विद्यते।

१७७ का.शि.२८.४१ तः ४४,१/२
१७८ का.शि.२८.४४-२/२, ४५-१/२
१७९ का.शि.२८.४५-२/२, ४६
१८० का.शि.२८.४७
१८१ का.शि.२८.४८-४९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ङ्गगृहाणि भवन्ति। मुखमण्डपस्य विस्तारस्य च मानं गर्भगृहस्य विस्तारसमं भवति। परितो भित्तेर्मानं यदुक्तमस्ति प्रथम-तलस्य, तथैव भवेत्। द्वारपार्श्वे स्तम्भमध्येऽधिष्ठानादारभ्योत्तर-सिंहपर्यन्तं द्वारपालाय गुहां कुर्यात्। द्वरापालस्य मूर्तेरुच्चता द्विशाला भवेत्, अथवा भित्तेः प्रवेशः केवलमेकदण्डो भवेत्। सर्वगृहेषु द्वारपालस्य मूर्तेः कृते गुहां कुर्यात्, अन्तःप्रवेशं विना। एवं द्वितलमाख्यातम्।[१८२]

त्रितलम्

त्रितलस्य विस्तारमानं पूर्वोक्तानुसारं भवेत्। विन्याससूत्राभ्यन्तरस्याष्टाविंशतिभागान् कृत्वा, एको भागः कूटस्य भवति, शालाया दीर्घता वा भागद्वयं भवति। एकभागः, पादोनभागः, अर्धभागो वा पञ्जरस्य विस्तारो भवेत्। शेषं हारान्तरं भवति, निर्गमनं वा पूर्वोक्तानुसारं भवेत्। ऊर्ध्वतलस्य षडभागान् कृत्वा, शेषभागः कूटस्य विस्तारस्य प्रोक्तः। शालाया दैर्घ्यं भागद्वयं, शेषं हारान्तरं भवेत्। पञ्जर-हारान्तरौ सपादस्य पादोनभागस्य वा भवतः। ऊर्ध्वतलस्य त्रिभागेष्वेकस्मिन् भागे मध्यभद्रो भवति। एकदण्डं, सार्धैकदण्डं द्विदण्डं वा मध्यभद्रस्य निर्गमनस्य मानं भवति।[१८३] प्रासादस्योच्चतायाश्चतुर्विंशति-भागैर्विभज्यते, तदाधः कोष्टके-[१८४]

| अङ्गम् | शान्तिकम् | पौष्टिकम् | जयन्तम् | अद्भूतम् | सार्वकामिकम् |
|---|---|---|---|---|---|
| अधिष्ठानम् | २ | २ | २ | ३,१/२ | ४ |
| स्तम्भः | ४ | ४ | ४ | ७ | ८ |
| मञ्चः | २ | २ | २ | ३,१/२ | ४ |
| स्तम्भः | ३,१/४ | ३,१/४ | ४ | ६,१/२ | ७,१/२ |
| मञ्चः | २,१/२ | १,१/२ | १,३/४ | ३ | ३,१/२ |
| स्तम्भः | ३,१/२ | २,१/२ | ३,१/२ | ६ | ७ |
| मञ्चः | १,१/४ | १,१/२ | १,१/२ | २,१/२ | ३ |
| वेदिका | ग | १,१/२ | १ | १ | १ |

१८२ का.शि.२८.५० तः ५५
१८३ का.शि.२९.१ तः ५
१८४ का.शि.२९.६ त २४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | |
|---|---|---|---|---|---|
| [illegible] | [illegible] | [illegible] | २ | २ | २ |
| शिखरम् | २,१/२ | २ | ४ | ५ | ६ |
| स्तूपिः | १ | १,१/४ | १,१/४ | २ | २ |
| आहत्य | २४ | २४ | २७ | ४२ | ४८ |

स्वस्तिकम्

अष्टकूटम्, अष्टशाला, षोडशपञ्जराः, अष्टादशाल्पनासिकाः, जन्मादूर्ध्वकोण-पर्यन्तं वर्गाकारं भवति। नानाधिष्ठानानि तथा स्तम्भैरलङ्कृतं शिखरस्योपरि द्वादश नासिका भवन्ति। चतस्रो महानास्यो भवन्ति। महाकूटकोष्ठादिसंयुक्तं नागरपद्धत्यानुकूलभवनं स्वस्तिकं प्रोच्यते।[१८५]

रुद्रकान्तम्

तदनुसारं किन्तु शिखरं, गलं वा वेदिका वर्तुलाकारा भवति चेत्, शङ्करस्य प्रियकरं भविष्यति। एतादृशं रुद्रकान्तं कथ्यते।[१८६]

शिवकान्तम्

तदेव किन्तु शिखरस्य कोणेऽल्पनासीद्वयसमन्वितं शङ्करमतिप्रियं शिवकान्तमुच्यते।[१८७]

विष्णुकान्तम्

---

१८५ का.शि.२९.२४ तः २८
१८६ का.शि.२९.२९
१८७ का.शि.२९-३०

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

...ठः-शीर्षं घटो वाष्टकोणो भवति तद् विष्णुकान्तं निदिष्टम्।

शुद्धाभिधानम्

विन्याससूत्राभ्यान्तरभागं नवभागैर्विभजति, तदा कूटस्य विस्तार एको भागः, कोष्ठस्य दैर्घ्यं भागद्वयं, प्रत्येककोष्ठस्य एकं द्विकोष्ठं भवति, पश्चादर्धभागस्य पञ्जरम्, शेषभागं हारान्तरं भवति। एवं प्रमाणेन कल्पनां कुर्यात्। चत्वारः कूटानि, अष्ट शाला, द्वादशपञ्जरेण सहाल्पनासी, शीर्ष-गलावष्टकोणौ, शिखरोपरि अष्टनास्यः, एवं शुद्धाभिधानं कथितम्। इदं धर्मविषयं स्नेहं च वर्धयति।[१८९]

विमानाकृतिः

तदेव परन्तु वेदिका अष्टकोणा, शिखरं तथा गलं वृत्ताकारं भवति। सर्वदेवानां कृते प्रोक्तम्। तद् विमानाकृतिः कथितम्।[१९०]

ब्रह्मकान्तम्

तथैव परन्तु शिखरं तथा कठो वर्गाकारो भवेत्, तर्हि तद् ब्रह्मकान्तमुच्यते। तदनुसारं किन्त्वग्रभागः सपादभागः, एकांशः, तृतीयांशो वायताकारो भवेत्। विस्तारमष्टभागे तथा दीर्घतां दशभागेषु विभज्य, तेष्वेको भागः कूटविस्तारस्य, शालाया दैर्घ्यं भागद्वयं, शेषभागे हारान्तरं भवेत् ।ऊर्ध्वं तलस्य विस्तारस्य तथा दीर्घतायाः षड् - अष्ट भागान् करोति, तदा कूटस्य विस्तारस्यैको भागः, कोष्ठस्य दीर्घता भागत्रयं, पञ्जरस्य विस्तारोऽर्धभागः, शेषं हारान्तरं भवति। ऊर्ध्वतलस्य विस्तारस्य त्रिभागं कृत्वा, एकभागस्य कण्ठभद्रं भवति। वेदिका कण्ठोऽथवा शीर्षं द्व्यश्रवृत्तं भूत्वा, चत्वारि कूटानि, अष्ट शालाः, तथा द्वादश पञ्जराणि

---

१८८ का.शि.२९.३१
१८९ का.शि.२९.३२ तः ३४
१९० का.शि.२९-३५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to
Unlimited Pages and Expanded Features

चत्वारः कूटाः, चतस्रः शालाः, अष्टपञ्जराणि भवन्ति। हारान्तरः षोडशा भूत्वा, अल्पनासिशतं भवन्ति। ललाटनासिका भूत्वा, पार्श्वे भद्रनासिका भवति। प्रत्येकनासिकायाः पृष्ठभागं प्रति, शिखरं भवति।[१९१]

हस्तिपृष्ठम्

नानाप्रकारेणाधिष्ठानसंयुक्तम्, नानास्तम्भैः सह सर्वालङ्कारैर्युक्तमिदं हस्तिपृष्ठमुच्यते।[१९२]

भद्रकोष्ठम्

मानसूत्रस्य मानविस्तारं नवभागेषु विभज्य, त्रिभागो गर्भगृहस्य, भित्तेर्विस्तार एकांशः, परितोऽलिन्दस्यैको भागः, हारस्य विस्तार एको भागो भवति। एतादृशीं कल्पनां कृत्वा, तत्र कण्ठकूटस्यैको भागः, मध्यभागे त्रिकोष्ठं, तदनन्तरं पञ्जरस्यैको भागो भवति। हारान्तरस्यार्धो भागः, एवं प्रथमतलस्य कल्पनां कुर्यात्, पञ्जरस्यार्धो भागो भवति। शेषभागो हारान्तरं भवति। यः परितो भवति, कोष्ठस्य मध्यभागे महानासिकाया निर्गमनं त्रिदण्डं भवति। ऊर्ध्वतलस्य विस्तारस्य षड्भागान् कृत्वा, कूष्टकोष्ठस्य दीर्घता भागद्वयं भवति। अर्धो भागः पञ्जरस्य विस्तारो भवति। शेषं हारान्तरं भवति। ऊर्ध्वतल-विस्तारस्य बहिरर्धदण्डं निर्गमनयुक्तमधिष्ठानं वर्गाकारं भवति, शीर्षकण्ठवष्टकोणौ भवतः। प्रथमतलस्य परितः कोणस्योपरि कूटस्य शीर्षं वर्गाकारं भवेत्, ऊर्ध्वतलस्य ऊर्ध्वं कूटस्य शीर्षमष्टकोणं भवेत्।

---

१९१ का.शि.२९.३६ तः ४३
१९२ का.शि.२९.४४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

डशपञ्जरेण सह, शताल्पनासिका- युक्तं, श्रेष्ठशिखरसंयुतभद्रकोष्ठं भवति। इदं सर्वदेवानां कृत उचितमस्ति।[१९३]

वृत्तकूटम्

तदेव किन्तु कर्णकूटस्य शीर्षं वृत्ताकारं प्रासादस्य शीर्षं कण्ठं वा गोलाकारेण रचयेत्। शिखरस्योपरि चतुर्दिक्षु भद्रनासिका भवेत्, उपदिक्ष्वल्पनास्यो भवन्ति, तद् वृत्तकूटं भवति।[१९४]

श्रीकण्ठः

तदनुसारं परन्तु शिखरोपरि कोणसमीपे अष्ट क्षुद्रनासिकाः , कर्णकूटस्य शीर्षं, वर्गाकारं कुर्यात्, अन्यदपर्युक्तानुसारं कुर्यात्, तत् श्रीकण्ठमुच्यते। तदनुसारं किन्तु विस्तारस्याष्टांशाधिकं दीर्घता भवति, वर्गाकारं भूत्वा मध्यभागे भद्ररहित- महानासेः कल्पनां कुर्यात्। शीर्षं तथा कण्ठं शालानुसारं वृत्तं भूत्वा, त्रिस्तूपिना सह, सुमंगलनामकं सदनं भवति।[१९५]

गान्धारम्

मानसूत्रस्य मध्यभागस्य विस्तारस्य च दशभागान् कृत्वा, गर्भगृहस्य चतुर्भागः परितो वा भित्तेरेको भागः, परितोऽलिन्दस्यैको भागः, अथवैकभागस्य हारस्य कल्पनां कुर्यात्। तत्र कूटविस्तारस्यैको भागः, मध्यभागे कोष्ठस्य दीर्घताया भागद्वयं, कूट-कोष्ठयोर्मध्ये पञ्जर-विस्तारस्यैको भागो भवति। पञ्जरस्य पार्श्वे एकभागस्य हारान्तरं भवति। ऊर्ध्वतलस्याष्टभागान् कृत्वा, कूटविस्तारस्यैकभागः, शालाया दीर्घताया भागद्वयं, मध्ये

---

१९३ का.शि.२९.४५ तः ५४,१/२
१९४ का.शि.२९.५४,२/२,५५
१९५ का.शि.२९.५६ तः ५९

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

भवति। ऊर्ध्वतृतीयतलस्य चतुर्भागान् कृत्वा, मध्ये द्विभागस्य भद्रं भवति। तस्य निर्गमनमेक-द्वि-त्रिदण्डं वा भवति। तस्याधिष्ठानं वर्गाकारं भूत्वा, तदनुसारं कण्ठशीर्षौ वर्गाकारौ भवतः। अष्टशालाः, अष्टकूटं, षोडशपञ्जरम्, नानाप्रकारस्याधिष्ठानेन सह, नानास्तम्भालङ्कृतं, उन्नतकूट-कोष्ठं तथान्तर-प्रस्तरयुक्तं भवनं गान्धारं प्रोक्तम्।[१९६]

श्रीविशालम्

कण्ठ-शीषावष्टकोणौ भवतः, तत् श्रीविशालनाम्ना प्रसिद्धमस्ति।

श्रीभोगाढ्यम्

वेदिका तथा गलं वृत्तम्, तथैव शीर्षं वृत्ताकारः दर्शितः, शेषं उपरोक्तानुसारं भवति। सर्वदेवानां कृते योग्यं अस्ति। एतादृशः श्रीभोगाढ्यः भवति। वृत्ताकारं, वृत्तायतं, द्व्यश्रवृत्ताकृतिः षट्कोणं, कूटकोष्ठादिकाः सर्वेऽवयवाः पूर्वानुसारं भवन्ति। वर्षस्थलं तथा मण्डलं भवति। शीर्षकर्णरहितं भवति। वर्षस्थलं विना, परन्तु कण्ठ-शीर्षेण सहितं, नागरपद्धतेः कृते योग्यम् (वर्गाकारम्)। एतादृशं कोष्ठादिसर्वावयवयुक्तं भवति।[१९७] नानालङ्कारैः सह, नानाचित्रैर्विभूषितं, महागर्भगृहं, भित्तिस्तथा मुखमण्डपः प्रथमतलानुसारं भवति। (पृथगुल्लेखो नास्ति।)

चतुर्भूमिः

विस्तारोच्चतायाः मानं प्रासाद मानानुसारं भवेत्। मानसूत्रस्य द्वादशभागकृते, गर्भगृहस्यैको भागो भवति। भित्तिः, अलिन्दः तथा हारः प्रत्येकस्यैकैको भागो भवति।[१९८]

---

१९६ का.शि.२९.६०-६७
१९७ का.शि.२९.६८ तः ७१
१९८ का.शि.३०.१-२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ष्टभागान् कृत्वा, कर्णकूटस्यैको भागः, कोष्ठ-दीर्घताया भागद्वयं, पञ्जर-विस्तारस्यैको भागस्तथा शेषं हारान्तरं भवति। ऊर्ध्वतलस्य षड् भागान् कृत्वा, कर्णकूटं, कोष्ठं तथा पञ्जरं पूर्वानुसारं भवति। ऊर्ध्वतलस्य षड्भागान् कृत्वा, कूटस्य विस्तारस्यैको भागो भवति। कोष्ठस्य दीर्घताया एको भागः, पञ्जरस्य विस्तारस्यार्धो भागः, शेषं हारान्तरं भवति। निर्दिष्टमानानुसारं कार्यं करणीयम्, कनिष्ठं वा महत् न भवेत्। ऊर्ध्वतलस्य त्रिभागं कृत्वा, एकेन भागेन मध्यभागे भद्रं कुर्यात्। तस्य निर्गमनमेक-सार्धैको वा द्विदण्डो भवेत्।[१९९]

चतुर्थतलम्

| अङ्गम् | शान्तिकम् | पौष्टिकम् | जयन्तम् | अद्भुतम् | सार्वकामिकम् |
|---|---|---|---|---|---|
| अधिष्ठानम् | ३ | ३ | ३,१/२ | ३,१/२ | १,१/२ |
| स्तम्भः | ६ | ६ | ७ | ७ | ७ |
| मञ्चः | २,१/२ | ३ | ३,१/२ | ३,१/२ | ३ |
| स्तम्भः | ४,३/४ | ५ | ६ | ६,१/२ | ६,१/२ |
| मञ्चः | २ | ३ | ३ | ३,१/२ | ३,१/२ |
| स्तम्भः | ४,१/२ | ५,१/३ | ६ | ६ | ६,१/२ |
| मञ्चः | २ | २, २/३ | ३ | ३ | ३ |
| स्तम्भः | ४,१/४ | ४,१/२ | ५,१/२ | ५,१/२ | ५,१/२ |
| मञ्चः | १,३/४ | २ | ३ | २,१/२ | २,३/४ |

१९९ का.शि.३०.३ तः ७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | |
|---|---|---|---|---|---|
| [illegible] | [illegible] | [illegible] | १ | १ | १ |
| गलं | २ | १,१/२ | २ | २ | २ |
| शिखरम् | ४,१/२ | ३ | ५ | ५ | ५ |
| स्तूपिः | २ | २ | १,१/२ | २,१/४ | १ |
| आहत्य | ४०,१/४ | ४२ | ५० | ५१ | ४८ |

[२००]

सुभद्रः

होमात् स्तूपिपर्यन्तं वर्गाकारस्य कल्पनां कुर्यात्। द्वादश कूटानि, द्वादश कोष्ठानि तथा चतुर्विंशतिः पञ्जराणि भवन्ति। शिखरोपरि चतुर्दिक्षु चतस्रो भद्रनास्यः, प्रत्येकस्तम्भोपरि अल्पनासी तथैव शिखरोपरि अष्टाल्पनास्यो भवन्ति। कूटकोष्ठादिकाः सर्वे अवयवा नागरपद्धत्या योग्यरीत्या कुर्यात्। भवनस्य स्तम्भानामाकारः समानो भवेत्। इदं सुभद्रं कथ्यते।[२०१]

ब्रह्म

उपर्युक्तानुसारं किन्त्वष्टाल्पनासिका विना भवति तर्हि सर्वदेवानां कृते योग्यं ब्रह्म भवनं भवति।[२०२]

श्रीकण्ठम्

तदनुसारं परन्तु शिखरस्य कण्ठो वृत्ताकारो भवेत्। सः श्रीकण्ठः कथ्यते।[२०३]

---

२०० का.शि.३०,८ तः २८
२०१ का.शि.३०.२९ तः ३१
२०२ का.शि.३०.३२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शीर्षं तथा कण्ठोऽष्टकोणो भवति चेत् श्रीमण्डनं भवति।[२०४]

श्रीभवन्तम्

तथैव किन्तु शिखरोपर्यष्टमहानासी भवति तदा तत् श्रीभवन्तं भवति। शाला-भद्रेण सह भवति।[२०५]

श्रीकान्तं तथा श्रीविशालम्

भद्ररहितं स्यात् तर्हि श्रीकान्तं भवति। उपर्युक्तसर्वाणि सदनाननि भद्ररहितानि, पुनरष्टाल्पनासीसहितानि भवेयुस्तर्हि श्रीविशालं भवति।[२०६]

नानास्तम्भास्तथाधिष्ठानसंयुक्तं तस्य नामानुसारं भवति। भास्करमात्रं, शीर्षरहितं भवति। मानसूत्राभ्यन्तरस्य विस्तारस्य नवभागान् कृत्वा, गर्भगृहस्य त्रिभागाः, भित्ति-अलिन्दयोरेको भागः, हारस्याप्येकांशो भवति। पश्चात् (ऊर्ध्वतलोपरि) विन्यासस्य सूत्रस्य विस्तारस्य नवभागान् कृत्वा, कूटस्य विस्तारस्यैको भागः, कोष्ठस्य दीर्घता त्रिभागा भवति। पञ्जर-विस्तारस्यैको भागः, तथा हारान्तरस्यार्धो भागो भवति। शालाया मध्यभागात् महानासिकाया निर्गमनमर्धे भागे भवति। ऊर्ध्वतलस्य विस्तारं नवभागे विभज्य, कूटस्यैको भागः, शालाया दैर्घ्यं भागद्वयं, पञ्जरस्यैको भागो भवति। शेषं हारान्तरं भवति। ऊर्ध्वतलस्य विस्तारं षड्भागैर्विभज्यते तदा कूटस्यैको भागः, कोष्ठस्य दीर्घता भागद्वयं भवेत्। पञ्जरस्य विस्तारः सार्धैकांशस्तथा शेषं हारान्तरं भवति। ऊर्ध्वतलादर्धो , मध्यभागे निर्गमनमेको दण्डो भवति। वर्गाकारोऽष्टकोणो वृत्ताकारश्च -एवंक्रमेण नानातलोपरि (अधस्तादूर्ध्वं) कूटस्य शीर्षं

२०३ का.शि.३०.३३-१/२
२०४ का.शि.३०.३३-२/२
२०५ का.शि.३०.३४
२०६ का.शि.३०.३५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवति तथा गृहस्य शिखरमष्टकोणं भवेत्। अष्टमहानासायुक्तस्य शीर्षस्य कल्पनां कुर्यात्। द्वादश कोष्ठानि, द्वादश कूटानि तथा चत्वारिंशत् पञ्जराणि भवन्ति।[२०७]

पूर्वोक्तानुसारमौन्नतस्य मानं नीत्वा पश्चात् कोष्ठं (गृहं) कुर्यात्। गृह-विस्तारं दशभागैर्विभज्य गर्भगृहं चतुर्भागस्य भवेत्। भित्तेर्मानमेको भागः, अलिन्दस्यैको भागस्तथा परितो हारस्य विस्तार एको भागो भवति। विन्याससूत्रस्य मध्येऽन्तरस्य दशभागाः क्रियन्ते तर्हि तेषु कर्णकूटस्यैको भागः, कोष्ठस्य दीर्घता भागद्वयं भवति। पञ्जरस्य विस्तारोऽर्धो भागस्तथा शेषं हारान्तरः भवति। चत्वारि कूटानिं, अष्ट कोष्ठानि तथा अष्ट पञ्जराणि भवन्ति। प्रथमतलोपरि चतुर्विंशतिहारान्तरं, पूर्णप्रस्तरं, अलिन्दस्यैको भागो भवति। ऊर्ध्वतलस्य नवभागान् कृत्वा कूटस्य विस्तार एको भागो भवति। कोष्ठस्य दैर्घ्यं द्विगुणितं भवति। पञ्जरमपि द्विगुणितं भवति। शेषं क्षुद्रपञ्जरेण सह हारान्तरं भवति। ऊर्ध्वमन्तिमतलं त्रिभागेन विभज्य, मध्यभागस्य भद्रस्य निंर्गमनमेकदण्डं भवति। अधिष्ठानं वर्गाकारं, शीर्षं तथा गलमष्टकोणं, शिखरोपरि अष्टमहानास्यो भवन्ति। प्रत्येकस्तम्भोपरि अल्पनास्यो भवन्ति। कर्णकूटस्यैको भागो भवति। कोष्ठस्य षोडश भागाः, तथान्तरप्रस्तरेण सहाधः कूटं तथा उच्चस्थाने कोष्ठं भवति। अष्टाविंशतिः क्षुद्रनीडाः, नासेर्मुखं सूकराकृतिवद् भवेत्। नानाचित्रैरलङ्कृतस्तथा पूर्वोक्तानुसारं तुङ्गः, सर्वदेवानां कृते उचितः, एतादृशो जयावहः कथ्यते।[२०८]

तथैव किन्तु कण्ठात् शिखरपर्यन्तं वृत्ताकारो भवति। (नूतनप्रकारस्य प्रासादस्योल्लेखोऽस्ति)[२०९]

---

२०७ का.शि.३०.३६ तः ४५
२०८ का.शि.३०.४६ तः ५५
२०९ का.शि.३०.५६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

… तथा पञ्जरं भवेत्। तलोपरि कूटस्य शीर्षं, स्तूपि:, कुम्भस्तथा कण्ठो वृत्ताकारो भवेत्। मध्यतलोपर्यष्टकोणो (कूटस्य भागो) भवति। मध्यतलोपरि कर्णकूटं वर्गाकारं भवति। सर्वदेवानां प्रियं सुखावहं सदनं भवति।[२१०]

तदनुसारं किन्तु कूटं, कोष्ठं, आन्तरप्रस्तरं विना विस्तार उच्चता च समसूत्रे भवति। एतत् जयागृहं भवेत्।[२११]

तदनुसारं किन्तु शिखरोपरि कण्ठो वर्गाकारो भवेत् तर्हि धाराकान्तं कथ्यते।[२१२]

पञ्चतलविधानम्

पञ्चभूमेर्मानं प्रासादमानानुसारं भवेत्। विस्तारस्यैकादश भागैर्विभज्य, त्रिभागा गर्भगृहस्य भवति। भित्तेर्भागद्वयं, अलिन्दस्यैको भागो भवति। (हारस्यैको भागो भवति) हार-मानानुसारमलिन्दस्य तथा स्तम्भस्य भित्तिर्भवति। प्रस्तरोपरि समानस्तरस्य वर्षस्थलस्य कल्पनां कुर्यात्। (वर्षस्थलं जलनिकासमार्ग:) तलस्य मञ्चोपरि द्वितीये वा तृतीये तले देवानां स्थापना कर्त्तव्य:। तावत् पर्यन्तं सर्वाणि तलानि घनीकृतानि भवेयु:। विन्याससूत्रस्य मध्यभागमेकादशभागैविरभज्य, कर्णकूटस्यैको भाग:, मध्यभागे कोष्ठस्य त्रिभागा भवन्ति। कर्णकूटस्य तथा कोष्ठस्य मध्यभाग एकं पञ्जरं भवति। हारान्तरस्यैको भागो भवति। तस्योपरि सदनविस्तारस्य नवभागान् कृत्वा, सौष्टिकस्य (कर्णकूटस्य) एको भागो भवति। मध्य-कोष्ठं त्रिभागं कृते पञ्जरस्यैको भाग भवति। द्वितीयतले हारान्तरस्यार्धो भाग:, तस्योपर्यष्टभागपर्यन्तं (अष्टभागैर्विभज्य) कर्णकूटस्यैको भागो भवति। कोष्ठस्य भागद्वयं, पञ्जरस्यैको भाग: भवति। सर्वलक्षणसम्पन्नस्यार्धभागस्य हारान्तरं भवति। तस्योर्ध्वं (चतुर्थतले) षड्भागान् कृत्वा कूटस्य विस्तार एको भाग:, शालाया दीर्घता एको भाग:,

---

२१० का.शि.३०.५७ त: ५८
२११ का.शि.३०.५९
२१२ का.शि.३०.६०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

न्तरं भवति। तत्र बलकुञ्जरो भवति। तस्योर्ध्वतलस्य (पञ्चमतल) मध्यभागे एकदण्डस्य निर्गमनं भवति।[213]

पञ्चमं तलम्[214]

| अङ्गम् | शान्तिकम् | पौष्टिकम् | जयन्तम् | अद्भुतम् | सार्वकामिकम् |
|---|---|---|---|---|---|
| अधिष्ठानम् | २,१/४ | ३ | २ | २ | १,१/२ |
| स्तम्भः | ५,१/२ | ५ | ४ | ४ | ३ |
| मञ्चः | २,१/२ | ३ | १, ३/४ | २ | ३ |
| स्तम्भः | ५,१/४ | ४, १/३ | ३,१/२ | ३,१/२ | २,१/४ |
| मञ्चः | २, १/३ | २,१/४ | १, ३/४ | १,३/४ | १, ३/८ |
| स्तम्भः | ५ | ४,१/२ | ३,१/२ | ३ | २,१/२ |
| मञ्चः | २,१/४ | २ | १,१/२ | १,१/२ | १,१/४ |
| स्तम्भः | ५,१/२ | ४ | ३,१/४ | २,१/२ | २,१/४ |
| मञ्चः | २ | २ | ३ | २,१/४ | २, १/८ |
| स्तम्भः | ४,१/२ | ३,१/२ | ३ | २,१/४ | २, १/८ |
| मञ्चः | १, ३/४ | १,१/२ | १,१/४ | १,१/४ | १ |
| वेदिका | १ | १ | १ | १ | १/२ |
| कण्ठः | २ | २ | १,१/४ | १,१/२ | ३/४ |
| शीर्षं | ४, १/३ | ४,१/२ | ३,१/४ | ३,१/२ | १, ३/४ |
| स्तूपिः | २ | १,१/२ | ३,१/२ | २ | ७/८ |

---

२१३ का.शि.३२.१ तः ११
२१४ का.शि.३२.१२ तः ४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

३६ ३३ २४,१/४

ब्रह्मकान्तम्

होमात् स्तूपिपर्यन्तं वर्गाकारं भवेत्। षोडश शाला:, षोडश सौष्टिकं तथाष्टचत्वारिंशत् पञ्जराणि भवन्ति। प्रत्येकस्तम्भोपर्यल्पनासी भवति। हारान्ते नासिकाद्वयं भवेत्। शिखरोपरि चतस्र: भद्रनास्यो भवन्ति। कोणे क्षुद्रनासीद्वयं भवति। तं ब्रह्मकान्तं कथ्यते।[२१५]

अधिकानि कूटानि भवन्ति तं प्राजापत्यं कथ्यते। तत्रैव कूटमुन्नतं , मञ्चकेन सहानन्तकोष्ठं भवति तर्हि सर्वदेवानां कृते उचितं, तादृशं स्वयंभुवगृहम्।[२१६]

भद्रकान्तम्

तदनुसारं किन्तु वेदिका, कोष्ठं, तथा शीर्षमष्टकोणसंयुतं भवेत्। शालाया मध्यभाग एकभागस्य कोष्ठस्यान्तर्गमनं भवति, तर्हि तं भद्रकान्तमुच्यते ।[२१७]

जनार्दनम्

सभाया: परितो मञ्चेण सह, मञ्चेन विना कूट-कोष्ठं भवति, तं जनार्दनमुच्यते।

अतिभद्रम्

तथैव किन्तु कोष्ठे भद्रं विना वा मध्यभागे भद्रं भवति, तर्हि गलं वा शीर्षं वृत्ताकारं भवेत् चेत् सर्वदेवानामुपयुक्तमतिभद्रं प्रोच्यते।[२१८]

सर्वतोभद्रम्

---

२१५ का.शि.३२.३५ त: ३७
२१६ का.शि.३२.३८
२१७ का.शि.३२.३९
२१८ का.शि.३२.४०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

, पञ्जरं, कण्ठं, मञ्चेन सह भवेत्, तदा धर्मप्रियं सर्वतोभद्रं भवति।[219]

वीरभद्रम्

सुन्दरौ कूट-कोष्ठौ तथाधिष्ठानेन सह पञ्जरम्, नानाप्रकाराणामधिष्ठानसंयुक्तम्, नानाप्रकाराणां स्तम्भैरलङ्कृतम्, नानालङ्कारैः सह पञ्जरद्वयं, शिखरोपरि अष्ट अल्पनास्यो वा चतस्रो महानास्यो , सर्वदेवतानामनुकूलमिदं वीरभद्रम्। तत्रैव भागद्वयेऽष्ट सौष्ठिकं, द्वादश पञ्जरेण सहान्यं सर्वं पूर्वानुसारं भवति तर्ह्युपयुक्तनामानुसारं वीरभद्रं भवनं भवति। तले यदुचितं भवेत् तस्य कल्पनां कुर्यात्।[220]

षड्भूमिः

षष्ठतलस्योच्चता विस्तारश्च प्रासादमानानुसारं भवेत्। विस्तारस्यैकादशभागाः, गर्भगृहस्य त्रिभागा भवन्ति। भित्तेर्भागद्वयं, अलिन्दस्यैकभागो भवति। हार एकभागस्याथवालिन्दस्य स्थलं भवति। द्वितीयतले वा तृतीयतले देवतानां स्थापनं कुर्यात्, तावत् पर्यन्तं तलं घनीकृतं भवेत्। भवनस्याभ्यान्तरं घनीकृतं तथा बाह्यमलङ्कृतं भवेत्। विन्याससूत्रस्य मध्यान्तरस्य द्वादशभागैर्विभज्य, सौष्ठिकस्य विस्तारस्यैको भागः, कोष्ठस्य दैर्घ्यं द्विगुणितं भवति। पञ्जरस्य विस्तार एकभागस्तथा शेषं हारान्तरं भवति। चत्वारि कूटानि, अष्ट कोष्ठानि तथा द्वादश पञ्जराणि, एतैः सह तलोपरि चतुर्विंशतिहारान्तरं भवति। प्रासादस्य मध्यभागे पञ्जरं तथा कण्ठस्य समीपे सौष्टिकं भवेत्। कर्णकूटस्य पार्श्वे पञ्जरस्य कल्पनां कुर्यात्, विशेषरूपेण कोष्ठ-पञ्जरौ मध्यभागे कल्पयेत्। तस्योपरि तलस्य दशभागान् करोति तर्हि कर्णकूटस्यैको भागः, मध्यभागे पञ्जरस्यैको भागः, तस्याकृतिः कण्ठ-कूटवत्

---

२१९ का.शि.३२.४०
२२० का.शि.३२.४१ तः ४७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

, पञ्जरस्यार्धो भागः, शेषं हारान्तरं भवति। संख्या तलभवनसदृशाक्तास्ति। तस्योपरि (तृतीयस्य) तलस्य नवभागान् कृत्वा, कण्ठ-कूटस्यैको भागः, मध्यशालायास्त्रिभागा भवन्ति। पञ्जरस्य विस्तारस्यैको भागः, हारान्तरस्यार्धो भागो भवति। तस्य (चतुर्थतले) ऊर्ध्वतलस्याष्टभागान् कृत्वा कूटस्य विस्तारस्यैको भागो भवति। द्विभागस्य कोष्ठं मध्यभागे, एकभागस्य पञ्जरम्, अर्धो भागो हारान्तरस्य भवति। एवंप्रकारेण कल्पनां कुर्यात्। तस्योपरि (पञ्चमतलस्य) तलस्य विस्तारस्य समानरूपेण षड्भागान् कृत्वा, एकभागस्य कूटं, कोष्ठस्य दीर्घता द्विगुणिता भवति। पञ्जरस्य विस्तारस्यार्धो भागः, शेषं हारान्तरं भवति। तस्योर्ध्व तलस्य विस्तारस्य (षष्ठतलस्य) अर्ध भागे मध्यभागस्य भद्रं भवति। भद्रस्य निर्गमनस्यैकांशः, सार्धैकांशः, द्विदण्डो वा भवति।[२२१] कोष्टकं यथा –[२२२]

| नाम | मानम् |
|---|---|
| अधिष्ठानम् | २,१/२ |
| स्तम्भः | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,१/२ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |

२२१ का.शि.३३.१ तः १५
२२२ का.शि.३३.१६ तः २२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| | २,१/२ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ३,१/२ |
| मञ्चः | १ |
| वेदिका | १ |
| कण्ठः | १, ३/४ |
| शीर्षं | ४,१/२ |
| स्तूपिः | २ |
| आहत्य | ५७ |

अम्बुजासनम्

अष्टाविंशतिप्रकाराणामधिष्ठानम्, विंशतिः कूटानि, अष्टचत्वारिंशत् पञ्जरेण सह, प्रत्येकस्तम्भोपरि अल्पनासिका भवेयुः। होमतः स्तूपिपर्यन्तं वर्गाकारं भवति। शिखरोपरि परितो महानासी भवति। इदं सर्वदेवतानां कृतेऽनुकूलमम्बुजासनं दर्शितम्।[२२३]

सुशांकरसदनम्

तदनुसारं किन्तु शिखरं तथा कण्ठोऽष्टकोणो भवेत्, सौष्ठिकपर्यन्तमवशिष्टशीर्षस्य भागो वर्गाकारो भवेत्, अधो ऊर्ध्वं भद्रकोष्ठमथवा भद्रेण विना कोष्ठं, उन्नतं द्विप्रस्तरेण सह तद्रहितं वा सदनं सुशांकरनाम्ना प्रसिद्धम्।[२२४]

---

२२३ का.शि.३३.२३ तः २५

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

तथैव किन्तु सौष्ठिकं तथा शीर्षं गोलाकारं करोति चेत्, तर्हि भद्रलीनकं नामकं सदनं भवति।[225]

शिवभद्रम्

तदनुसारं परन्तु शिखरोपरि अष्टाल्पनास्यो भवन्ति, तर्हि शङ्करस्यानुकूलं शिवभद्रं भवति।[226]

नागेन्द्रम्

तदनुसारं परन्तु ध्वश्रवृत्तं (पृष्ठेऽर्धवृत्ताकारं तथा अग्रे कोणद्वयं) गलेन सहितं, शीर्षयुक्तम् तथा पुरतो ललाटनासी भवति तर्हि तत् नागेन्दमुच्यते।[227]

सप्तभूमि:

उच्चतायास्तथा विस्तारस्य च मानं प्रासादमानानुसारं भवति।प्रासादस्य विस्तारं द्वादशभागैर्विभजति तदा गर्भगृहस्य चत्वारो भागा:, भित्तेर्विस्तारस्य भागद्वयं, अलिन्दस्यैको भागो भवति। परित एकभागस्य हारान्तरस्य कल्पनां कुर्यात्। विन्याससूत्रस्याभ्यन्तरस्य समानरूपेण द्वादशभागान् कुर्यात्। कूट-विस्तारस्यैको भाग:, कोष्ठं द्विगुणितं, पञ्जरस्य विस्तारस्यैको भाग:, शेषं हारान्तरं भवति। चत्वारि कूटानि, अष्ट शालास्तथा द्वादश पञ्जराणि भवन्ति। तस्योर्ध्वतलस्य (द्वितीयस्य) विस्तारस्य दशभागान् कुर्यात्। कर्णकूटं तथा कोष्ठं पूर्वानुसारं कर्तव्यम्। पञ्जरस्य विस्तारोऽर्धो भाग:, शेषं हारान्तरं भवति। तस्योर्ध्वतलस्य (तृतीयस्य) दशभागान् कुर्यात्, पञ्जरं, कूटं तथा कोष्ठं पूर्वानुसारं भवति। ऊर्ध्वतलस्य (चतुर्थस्य) नवभागान् करोति, तदा शालायास्त्रिभागा:, कर्णकूटस्यैको भाग:, तत्पश्चात् पञ्जरस्यैको भागो भवति। हारान्तरस्यार्धो भाग:, तस्योर्ध्वतलं (पञ्चमं)

---

२२४ का.शि.३३.२६-२७
२२५ का.शि.३३.२७-२/२
२२६ का.शि.३३.२८
२२७ का.शि.३३.२९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible] शालाया भागद्वयं, शेषावयवान् पूर्वानुसारं कुर्यात्। [illegible] कुर्यात्, तदैकभागस्य कूटं भवति। शालाया दीर्घता द्विगुणिता भवति। पञ्जर-विस्तारस्यार्धो भागः, शेषं हारान्तरं भवति। तस्योर्ध्वसप्तमतलस्य विस्तारस्य त्रिभागेषु मध्ये एकभागस्य भद्रं भवति। तस्य निर्गमनं एकदण्डं भवति।[२२८]

सप्तमं तलम्[२२९]

| नाम | मानम् |
|---|---|
| अधिष्ठानम् | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६ |
| मञ्चः | २, १/४ |
| स्तम्भः | ५,१/२ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |

२२८ का.शि.३४.१ तः ११
२२९ का.शि.३३.१६ तः २२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| वेदिका | १ |
| कण्ठ: | १, ३/४ |
| शीर्षं | ५,१/२ |
| स्तूपि: | २ |
| आहत्य | ६७ |

समुज्ज्वलम्

पञ्जरं तथा कूटकोष्ठं समसूत्रे भवति। होमस्योर्ध्वभागादारभ्याग्रपर्यन्तं वर्गाकारं भवति। शिखरोपरि चतस्रो नासिका:, चतुर्विंशति लघुकूटानि, षड्त्रिंशत् शाला भवन्ति। षष्टि: पञ्जरेण सह प्रत्येकस्तम्भेऽल्पनासिकासमन्वितं, नानाप्रकाराणामधिष्ठानं समानरूपेण वाधिष्ठानं, समानाकारयुक्तस्तम्भसमन्वितं-एतादृशं प्रासादं समुज्ज्वलं कथ्यते।[२३०]

तथैव परन्तु सान्तरप्रस्तरेण सहान्तरकूटयुक्तं सदनं सर्वदेवानामनुकूलं श्रीछन्दं कथ्यते।[२३१]

श्रीविशालम्

तत्रैव मञ्चेन सहाध: कूटं, ऊर्ध्वकोष्ठं भवेत्, सर्वदेवानां प्रियं श्रीविशालनामकेन प्रसिद्धमस्ति।[२३२]

श्रीकान्तम्

---

२३० का.शि.३४.१८ त: २०
२३१ का.शि.३४.२१
२३२ का.शि.३४.२२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शीर्षं, कण्ठं तथा वेदिका अष्टकोणास्ति चेत् तं श्रीकान्तमुच्यते।[233]

श्रीप्रियम्

कूटकोष्ठं समतलं भवति वा कूटमधो भवति, तदा तत् श्रीप्रियं कथ्यते।[234]

रुद्रकान्तम्

तथैव किन्तु शिखरं, स्तूपिः, तथा गलं गोलाकारं भवति, तर्हि रुद्रस्याधिकं प्रियं रुद्रकान्तं भवति।[235]

वृत्तभद्रम्

तथैव किन्तु कर्णकूटं तलभवनादरभ्योर्ध्वभवनोपरि क्रमानुसारं वर्गाकारं, अष्टकोणं, तथा वृत्ताकारं वा करोति तदा तद् वृत्तभद्रं भवति।[236]

सुवृत्तम्

तथैव किन्तु कूटोपरि शाला, यद्यधो भवति तर्हि कूटस्य शीर्षं गोलाकारं भवति। तत् सुवृत्तं कथ्यते।[237]

शिवभद्रम्

---

२३३ का.शि.३४.२३
२३४ का.शि.३४.२४
२३५ का.शि.३४.२५
२३६ का.शि.३४.२६
२३७ का.शि.३४.२७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मञ्चः शिखराकार इष्टसमानो भवति। तथैव कण्ठस्य स्तूपघटस्याकारो भवति। वर्गाकारशीर्षयुक्तम्, कण्ठकूटस्य कल्पनां कुर्यात्, शंकरमत्यन्तमनुकूलं, इदं शिवभद्रं भवति।[२३८]

भद्रपञ्जरम्

उपर्युक्तानुसारं कूटकोष्ठयुक्तम्, किन्तु एकस्य, सार्धैकस्य, द्विदण्डस्य वा निर्गमनयुक्तं भद्रं भद्रपञ्जरं वा भवति।[२३९]

नानाप्रकारस्याधिष्ठनयुक्तम्, नानाप्रकारस्तम्भैरलङ्कृतम्, नानाचित्रैः समन्वितं, सदनं शिवसौख्यं कथ्यते।[२४०]

तथैव परन्तु गर्भगृहाभ्यन्तरे गोलं वर्गाकारं वा भवति। बाह्यं केवलं वृत्ताकारं भवति। सौष्ठिकमपि वृत्ताकारं भवति। अन्यावयवाः पूर्वानुसारं, नानावयवैर्भूषितं, पञ्जरं तथा कूटकोष्ठमन्तरप्रस्तरेण विना भवति। शिखराकारं तथैवेष्टं भवेत् शिवप्रीतिकरं भवति।[२४१]

वसुभूमिः

उच्चता तथा विस्तारः प्रासादमानानुसारं भवति। प्रासादस्य विस्तारस्य त्रयोदश भागान् करोति तदा पञ्चभागस्य गर्भगृहम्, द्वौ भागौ भित्तेः, अलिन्दस्यैको भागः, तथा हारस्यैकः भागः भवति। गर्भगृहस्य त्रिभागाः ,एकांशो भित्तेः, अलिन्दस्यैको भागः, भित्तेरेको भागः, अलिन्दस्यैको भागः, तस्यार्ध पञ्जरस्यविस्तारो भवति। भद्रेण सह तद् विना वा, द्वादश कोष्ठानि, चत्वारि कूटानि, पञ्चदश (षोडश) पञ्जरसमन्वितम्। द्वात्रिंशद् हारान्तरं, एवं प्रकारेण तलभवनस्य कल्पनां कुर्यात्, वर्षस्थलं तथालिन्दो भवति। प्रस्तरपर्यन्तं घनीकृतं

---

२३८ का.शि.३४-२८.२९
२३९ का.शि.३४.३०
२४० का.शि.३४.३१
२४१ का.शि.३४.३२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विस्तारस्य त्रयोदशभागान् कुर्यात्, कूटं कोष्ठं तथान्ये सर्वऽवयवास्तलभवनस्य समाना भवन्ति। तृतीयतलस्य विस्तारस्य द्वादश भागान् करोति, तदा कर्णकूटस्यैको भागः, शालाया भागद्वयं, अर्धो भागः पञ्जरस्य विस्तारस्य, शेषं हारान्तरं भवति। पञ्जरस्य कूटकोष्ठस्य संख्या तलभवनसमाना भवति। लम्बपञ्जरेण सह हारान्तरस्यार्धो भागः, चतुर्थतलस्य विस्तारस्याष्टभागान् करोति तदैकभागस्य कर्णकूटं, मध्यभागे द्विभागस्य शाला, पञ्जरस्य विस्तार एकांशः, अर्धभागस्य हारो भवति। चत्वारि कूटानि, चतस्रः शालाः, अष्ट पञ्जराणि, हारान्तरं -एवं प्रकारेण कनिष्ठभवनं भवति। सप्तमतलस्य समानाः षड्भागान् कुर्यात्, एको भागः कूटविस्तारस्य, मध्यभागस्य कोष्ठस्य भागद्वयं भवति। अर्धो भागः पञ्जरविस्तारस्य, शेषं हारान्तरं भवति, पञ्जर-विस्तारस्यार्धो भागः, भद्रेण सह  विना भद्रेण वा भवति। द्वादश कोष्टानि, चत्वारि कूटानि, षोडशपञ्जरेण सह, तलभवनोपरि द्वात्रिंशद् हारान्तरस्य कल्पनां कुर्यात्, वर्षस्थलम्, अलिन्दः प्रस्तरपर्यन्तं घनीकृतं भवति।[२४२]

अर्धो भागः पञ्जरविस्तारस्य, शेषं हारान्तरं भवति। अष्टमतलस्य मध्यभागस्य निर्गमनमेकदण्डस्य भवति। कोष्ठात् कूटस्य बहिर्निर्गमनं भवति। मध्यशाला निर्गमन-रहिता भवति। कूट-कोष्ठौ समसूत्रे भवतः। (होमात् स्तूपिपर्यन्तं सप्तसप्तति भागान् कृत्वा, सार्धत्रिभागस्याधिष्ठानं, सप्तभागाः स्तम्भोच्चतायाः, सपादत्रिभागस्य प्रस्तरं, सार्धषड्भागाः स्तम्भोच्चतायाः, सार्धद्विभागस्य मञ्चस्य उच्चता।)[२४३] वर्णनेऽपूर्णता प्रतीयते। षष्ठिभागानां वर्णनं वर्तते। सप्तसप्तति भागानां नास्ति।

अष्टतलम्[२४४]

२४२ का.शि.३५.१ तः १५
२४३ का.शि.३५.१६ तः २६
२४४ का.शि.३५.२६.३०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | मानम् |
|---|---|
| अङ्गम् | ८ |
| अधिष्ठानम् | ३,१/२ |
| स्तम्भः | ७ |
| मञ्चः | ३,१/२ |
| स्तम्भः | ६,१/२ |
| मञ्चः | २,१/२ |
| स्तम्भः | ६ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | ३/४ |
| वेदिका | १ |
| गलं | २,१/४ |
| शीर्षं | ४,१/२ |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



शिवछन्दम्

उपानतः स्तूपिपर्यन्तं वर्गाकारस्य कल्पनां कुर्यात्, स्तम्भोऽष्टकोणो वर्गाकारो भवति, प्रत्येकेष्वल्पनासी भवति। शिखरोपरि चतस्रो नास्यो भवन्ति। प्रत्येकतलोपरि सर्वस्तम्भानामाकारः समानो भवति। तत् शिवछन्दं कथ्यते।[२४५]

वागीशम्

तत्रैवाधो कोष्ठं तथा मञ्चकं भवति। उन्नतं सौष्ठिकं भवेत्। सर्वदेवानां प्रियं, प्रसिद्धं वागीशं भवति।[२४६]

अष्टभागम्

सौष्ठिकं पुनर्वर्गाकारम्, अष्टकोणं गोलाकारं वा कुर्यात्। एवंक्रमेण नानातले पुनर्भवेत्, विमानशिखरस्य तथा कण्ठस्याष्टकोणं कल्पयेत्। इदमत्यंत धर्मप्रियमष्टभागं नाम्ना विख्यातम्।[२४७]

पर्वतम्

तदनुसारं परन्तु कूटकोष्ठं मञ्चेण सह वा रहितं समतलं भवति। नानाप्रकारैरलङ्कृताः स्तम्भाः भवन्ति। नानाचित्राणि भवन्ति, तत् पर्वतमुच्यते। [२४८]

कैलाससदनम्

---

२४५ का.शि.३५.३१-३२, १/२
२४६ का.शि.३५.३२, २/२
२४७ का.शि.३५.३३-३४
२४८ का.शि.३५.३५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ठस्य च वृत्ताकाररूपेण कल्पनां कुर्यात्। इदं शङ्करस्य प्रियं कैलासनामकं सदनं भवति।

नवभूमिः

गृहस्योच्चता तथा विस्तारः प्रसादमानानुसारं भविष्यति। विस्तारस्य पञ्चदशभागान् कुर्यात्। त्रिभागस्य गर्भगृहं, द्विभागस्य गृहपिण्डी, एकभागस्यालिन्दः, एकभागस्य भित्तेर्विस्तारः, तथैवालिन्दः, एकांशस्य हार-विस्तारस्य कल्पनां कुर्यात्। प्रासाद-विस्तारः समानेषु षोडशभागेषु विभज्यते, चतुर्भागस्य गर्भगृहं, द्विभागस्य गृहपिण्डी, एकांशस्यालिन्दः, एकभागस्य भित्तेर्विस्तारः, अलिन्द एकभागस्य, हारस्य विस्तारस्यैको भागो भवति। विन्याससूत्राभ्यन्तरस्यान्तरस्य समानरूपेण पञ्चदशभागान् कुर्यात्, एकभागस्य सौष्ठिकविस्तारः, कोष्ठस्य दीर्घता द्विगुणितं, एकभागस्य पञ्जरविस्तारः, एकभागस्य कूटं, तलभवनोपरि द्वात्रिंशद् हारान्तराणि भवन्ति। एवं रीत्या द्वितीयभवनं कल्पयेत्, तृतीयभवनस्य विस्तारस्य चतुर्दशभागान् कुर्यात्, पञ्जर-विस्तारस्यार्धो भागः, अन्यावयवाः पूर्वानुसारं भवन्ति। तथैव चतुर्थतलस्य मानं भवति। पञ्चमभवनस्य द्वादशभागान् कुर्यात्, एकभागस्य कूटविस्तारः, द्विगुणितं शालाया दीर्घता, अर्धभागस्य पञ्जरविस्तारः, तस्यार्धं हारस्य विस्तारः, द्वादश शालाः, कूट-प्रमाणेन षोडशपञ्जराणि भवन्ति। तस्योर्ध्वतलस्य विस्तारस्याष्टभागाः कर्तव्याः, एकभागस्य सौष्ठिकविस्तारः, मध्यभागस्य शालाया भागद्वयं, एकभागस्य पञ्जरविस्तारः, हारान्तरस्यार्धो भागः, तस्योर्ध्वसप्तमतलस्य षड्भागान् कुर्यात्, एकभागस्य कूटविस्तारः, कोष्ठस्य दीर्घता द्विगुणिता, पञ्जरविस्तारस्यार्धो भागः, तथा शेषं हारान्तरं भवति। तस्योर्ध्वतलस्य (८-९ मानं न दत्तम्) त्रिभागं कुर्यात्, मध्यभागे निर्गमनमेकदण्डं कक्षलपयेत्।[२४९] कोष्टकम्[२५०]

२४९ का.शि.३६.१ तः १५
२५० का.शि.३५. १६ तः २२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | मानम् |
|---|---|
| अङ्गम् | ९ |
| अधिष्ठानम् | ३.३/४ |
| स्तम्भः | ७.१/२ |
| मञ्चः | ३.१/२ |
| स्तम्भः | ७ |
| मञ्चः | ३.१/४ |
| स्तम्भः | ६.१/२ |
| मञ्चः | ३ |
| स्तम्भः | ६ |
| मञ्चः | २.३/४ |
| श्तम्भः | ५.१/२ |
| मञ्चः | २.१/२ |
| स्तम्भः | ५.१/४ |
| मञ्चः | २.१/२ |
| स्तम्भः | ५ |
| मञ्चः | २.१/४ |
| स्तम्भः | ४.३/४ |

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| | २ |
| स्तम्भः | ४.१/२ |
| मञ्चः | १.३/४ |
| वेदिका | १ |
| गलं | १/२ |
| शीर्षं | ४.१/४ |
| स्तूपिः | १.३/४ |
| आहत्य | ८७.१/२ |

ललितभद्रकम्

प्रत्येकस्तम्भस्योर्ध्वमल्पनासी, शिखरोपरि चतस्रो नास्यः, अधः समतलं वर्गाकारं कूटं भवति। होमतः स्तूपिपर्यन्तं वर्गाकारं, मध्यशालातः कोष्ठस्य निर्गमनमेकांशस्य सार्धैकांशदण्डस्य वा भवति। एतादृशं ललितभद्रकं नामकं भवनं प्रोक्तम्।[२५१]

२५१ का.शि.३६.२३-२४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

उपर्युक्तानुसारं किन्तु कोष्ठमुन्नतं  समतलं वा , अधो लघु भद्रं भवति। सर्वदेवानामनुकूलं ब्रह्मकान्तनामकं हर्म्यं प्रोक्तम्।[२५२]

प्रादेशम्

तदेव किन्तु मञ्चेण सहितं  रहितं वा, कूटकोष्ठौ भवत:, सर्वदेवानामनुकूलं प्रसिद्धं प्रादेशं भवति।[२५३]

सौष्ठिकं तथा श्रीवर्धनम्

तथैव परन्तु शिखरं तथा कण्ठमष्टकोणं भवति, अष्टनासिका:, पुनर्वर्गाकारम्, अष्टकोणं, वृत्ताकारं सौष्ठिकं भवति। अन्यभागो वर्गाकारो भवति, तत् श्रीवर्धनं कथ्यते।[२५४]

सुपद्मम्

मञ्चसहितं  रहितं वा समतलं, कूटकोष्ठौ भवत:, शिखरं वृत्ताकारं, चतुर्दिशासु भद्रनासिका भवन्ति। उपदिक्षु नासीद्वयं नासीद्वयं भवति, अथवा द्विपञ्जरमेकं  द्विर्वा भवति, एतादृशं सुपद्मं भवति।[२५५]

कृतवर्धनम्, वृत्तगेहम्

तथैव किन्तु सौष्ठिकस्य शिखरं वृत्ताकारं भवति, तत् कृतवर्धनं कथ्यते। तदनुसारं किन्तु गर्भगृहं वृत्ताकारं भवति, तत् वृत्तगेहं कथ्यते।[२५६]

---

२५२ का.शि.३६.२५
२५३ का.शि.३६.२६
२५४ का.शि.३६.२७-२८
२५५ का.शि.३६.२९-३०
२५६ का.शि.३६.३१

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दशमतलस्योच्चताया विस्तारस्य च मानं प्रासादमानानुसारं कल्पयेत्। तस्य विस्तारस्य चतुर्दशभागान् करोति तदा, गर्भगृहस्य चत्वारो भागाः, भित्तेर्भागद्वयं, अलिन्दस्यैको भागः, हारान्तरस्यैको भागो भवति। विन्याससूत्रस्य मध्यान्तरस्य चतुर्दशभागाः क्रियन्ते तर्हि कूटविस्तारस्यैको भागः, द्विगुणितं शालाया दीर्घता, पञ्जरविस्तारस्यैको भागः, हारान्तरमेकचर्तुथांशं भवति। चत्वारि कूटानि, चतुःशालाः, षोडशपञ्जरेण सह द्वात्रिंशद् हारान्तराणि तलभवने भवन्ति। ऊर्ध्वतलस्य (द्वितीयस्य) विस्तारस्य त्रयोदशभागान् करोति, तर्हि कण्ठकूटस्यैको भागः, शाला द्विगुणिता भवति। पञ्जरविस्तारस्यैको भागः, शेषं हारान्तरं भवति। ऊर्ध्वतलस्य (तृतीयस्य) द्वादशभागान् करोति तर्ह्येकभागस्य सौष्ठिकं भवति। द्विगुणिता कोष्ठस्य दीर्घता, पश्चादर्धभागस्य पञ्जरं भवति। हारान्तरमेकचर्तुथांशं भवति। तथा संख्या तलभवनानुसारं भवेत्। तस्योर्ध्वतलस्य (चतुर्थस्य) विस्तारस्येकादशभागान् कुर्यात्, एकचर्तुथांशं पञ्जरम्, अन्यावयवाः पूर्वानुसारं कर्तव्याः। पञ्चमतलस्य दशभागान् कुर्यात्, एको भागः कूटविस्तारस्य, कोष्ठस्य दीर्घता द्विगुणिता शेषं हारान्तरं भवति। हारान्तरस्य त्रिभागं कृत्वा, तेष्वेको भागः पञ्जरविस्तारस्य भविष्यति। षष्ठतलस्य नवभागाः क्रियन्ते, तर्हि सौष्ठिकस्यैको भागः, हारान्तरस्य भागद्वयं, तेषु पञ्जरविस्तारस्यैको भागो भवति। सप्ततलस्य नवभागान् करोति, तदा सौष्ठिकस्यैको भागो भवति। कोष्ठस्य सार्धैकभागः, शेषं हारान्तरं भवति। हारान्तरस्य भागद्वयं , पञ्जरविस्तारस्यैको भागो भवति। एकादशसंख्यया सह पूर्वानुसारं संख्या तलस्य भवति। सप्तमतलस्य विस्तारस्याष्टभागान् कुर्यात्। कूटस्यैको भागः, मध्यभागस्य शालाया भागद्वयं, पञ्जरविस्तारस्यैको भागः, अर्धभागस्य हारान्तरं, अष्टपञ्जरेण सह चत्वारि कूटानि, चतुःशालाः, पञ्चदश (षोडश) हारान्तराणि भवन्ति, एवं सप्तमतलस्य कल्पनां कुर्यात्। अष्टमतलविस्तारस्याष्टभागान् कृत्वा, उपर्युक्तानुसारं कूटं, कोष्ठं तथा शेषं हारान्तरं भवति। (हारस्य मध्ये) त्रिभागेष्वेकभागस्य

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...य समानरूपेण षड्भागान् कुर्यात्। उपर्युक्तानुसारं कूटं, कोष्ठं, पञ्जरं च रचयेत्। तस्योपरि दशमतलस्य विस्तारं त्रिभागे विभज्य, मध्यभागे स्थितभद्रस्यैको भागः, तस्य निर्गमनमेकदण्डं भवति।[२५७] प्रासादस्य विस्तारं शतभागेषु विभजति, तदा :-

दशमतलम् –

| नाम | मानम् |
|---|---|
| अङ्गम् | १० |
| अधिष्ठानम् | ४ |
| स्तम्भः | ८ |
| मञ्चः | ३,३/४ |
| स्तम्भः | ७,१/२ |
| मञ्चः | ३,१/२ |
| स्तम्भः | ७ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३ |
| स्तम्भः | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,१/२ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |

२५७ का.शि.३७.१ तः १९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| [illegible] | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | १,३/४ |
| गलं | १,१/२ |
| शीर्षं | ४,१/२ |
| स्तूपिः | १,३/४ |
| आहत्य | ९९ |

एकादशतलम्

एकादशतलस्योच्चताया दीर्घताया मानं प्रासादमानानुसारं भवेत्। विस्तारस्य पञ्चदशभागान् कृत्वा, गर्भगृहस्य त्रिभागाः, भित्तेर्भागद्वयं, अलिन्द एकभागस्य भवति। भित्तेर्विस्तारस्यैको भागः, अलिन्दस्यैको भागः, हारान्तरस्याप्येको भागः, एवं क्रमेण भवति। अलिन्दस्तथा भित्तिर्घनीकृता भवति, अथवा प्रस्तरपर्यन्तं, तस्योपर्यलिन्दपर्यन्तं घनीकृतं भविष्यति। विन्याससूत्रस्याभ्यन्तरस्य विस्तारस्य पञ्चदशभागाः क्रियन्ते तर्हि, कर्णकूटस्यैको भागः, पक्षशाला भागद्वया भवति ।मध्यशालायास्त्रिभागाः, पञ्जरस्यार्धभागः, तथैव हारान्तरम्, एवं प्रकारेण तलभवनं भविष्यति। द्वितीयतलस्य विस्तारस्य चतुर्दशभागान् कृत्वा, कूटविस्तारस्यैको भागः, कोष्ठस्य दीर्घता द्विगुणिता भवति। शेषं हारान्तरं भवति। हारान्तरस्य त्रिभागस्यैकभागस्य पञ्जरं भवति। पञ्जर-कोष्ठयोः संख्या पूर्वानुसारं भवति। तृतीयभवनस्य विस्तारमेकादशभागैर्विभजति तदा, पञ्जर-कोष्ठौ भविष्यतः। चतुर्थतलस्य विस्तारं दशभागैर्विभजति, कूट-कोष्ठयोः संख्या पूर्वानुसारं भवति। पञ्चमतलस्य विस्तारं नवभागेषु विभजति। कूटविस्तारस्यैको भागः, कोष्ठस्यार्धैकभागः, शेषं हारान्तरं भवति। हारान्तरस्य त्रिभागेषु पञ्जरस्यैकोभागो भवति। कूटादीनां संख्या पूर्वानुसारं भवति। अष्टमतलविस्तारस्याष्टभागान् कृत्वा कूटविस्तारस्यैको भागः, मध्ये शालाया भागद्वयं भवति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible] न्तरस्यार्धो भागः, अष्टपञ्जरेण सह चत्वारि कूटानि, [illegible] न्तरस्य संख्या पञ्चदश प्रदत्ता। नवमतलस्य विस्तारं सप्तभागैर्विभज्य, कूटविस्तारस्यैको भागः, कोष्ठ-दीर्घताया भागद्वयं, शेषं हारान्तरं वा तस्य तृतीयभागस्य पञ्जरं भवति। दशमतलस्य विस्तारस्य षड्भागान् करोति तदा कोष्ठ-पञ्जरावुपर्युक्तानुसारं भवतः। प्रथमतः पञ्चतलपर्यन्तं भद्र-पञ्जरं भवेत्। भवनस्य परितो भद्रं वा भद्रपञ्जरं भवेत्। एकादशतलविस्तारस्य भागत्रयं कृत्वा, मध्यभागे भद्रस्यैकं भागं कुर्यात्, तस्य निर्गमनमेकदण्डं भविष्यति।[258] प्रासाद-विस्तारस्य त्रयोदशाधिकमेकशतं भागान् करोति, तर्हि-

| नाम | मानम् |
|---|---|
| अङ्गम् | ११ |
| अधिष्ठानम् | ४,१/२ |
| स्तम्भः | ८,१/२ |
| मञ्चः | ४ |
| स्तम्भः | ८ |
| मञ्चः | ३,३/४ |
| स्तम्भः | ७,१/२ |
| मञ्चः | ३,१/२ |
| स्तम्भः | ७ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३ |

२५८ का.शि.३८.१ तः १९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,३/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | १,३/४ |
| वेदिका | ३/४ |
| गलं | १,१/२ |
| शीर्षं | ४,१/२ |
| स्तूपिः | १,३/४ |
| आहत्य | १२७ |

२५९

ब्रह्मकान्तम्

२५९ का.शि.३८,२० तः २८

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

ृते: कल्पनां कुर्यात्। शिखरोपरि चतुर्दिशासु महानासी
। तद् ब्रह्मकान्तं कथ्यते।[260]

विजयम्

सौष्ठिक-आन्तरमञ्चमपि भवति तर्हि तद् विजयं कथ्यते।[261]

सर्वार्हकम्

तथैव किन्तु कूटस्याध:, मञ्चेण सह, कोष्ठस्योपरि भवति, तर्हि सर्वदेवानामनुकूलं, एतादृशं सर्वार्हकं भवति।[262]

इन्द्रकान्तम्

तथैव किन्तु शिखरं तथा कण्ठो वृत्ताकार:, वेदिकाष्टकोणा, सर्वदेवानामनुकूलं भवति। एतादृशमिन्द्रकान्तं भवति।[263]

गणिकाशालकम्

तथैव किन्तु मध्यभद्रं भवति, समतलं कूटकोष्ठं, मञ्चेन सह वा मञ्चरहितं कूटशाला वा पञ्जरसमन्वितं भवति, तर्हि ब्रह्मण:, विष्णोस्तथा शङ्करस्य कृतेऽनुकूलं गणिकाशालकं भवति।[264]

इन्द्रकान्तम्

उपर्युक्तानुसारं किन्तु शिखरं तथा कण्ठं वृत्ताकारं, वेदिकाष्टकोणा भवति सर्वदेविकं विमानमिन्द्रकान्तमुच्यते।[265] उपर्युक्तस्य पुनरावृत्ति:? (३८.३३)

कर्णविशालम्

---

२६० का.शि.३८.२९-३०
२६१ का.शि.३८.३१
२६२ का.शि.३८.३२
२६३ का.शि.३८.३३
२६४ का.शि.३८.३४
२६५ का.शि.३८.३५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्रेण सह कर्णकूटं भवति, तत्रस्थसौष्ठिकस्य शिखरं
ं कर्णविशालं भवति।[२६६]

द्वादशतलम्

गृहस्योच्चतायास्तथा दीर्घताया मानं प्रासादमानानुसारं स्वीकरणीयम्। प्रासादविस्तारस्य सप्तदशभागान् कुर्यात्। सौष्ठिकस्य शिखरस्य कुण्डलाकृतिर्भवति। गर्भगृहस्य पञ्चभागाः, गृहपिण्डेर्भागद्वयं, अलिन्दस्यैको भागः, भित्तिरर्धभागस्य भवति। अलिन्दस्यैको भागः। प्रासादविस्तारस्य नवभागान् कुर्यात्। गर्भगृहस्य त्रिभागं कुर्यात्। गर्भगृहस्य विस्तारवद् गृहपिण्डस्य विस्तारो भविष्यति। शेषमलिन्दः, भित्तिः, हारादिकं पूर्वानुसारं कुर्यात्। विन्याससूत्राभ्यन्तरस्यान्तरस्य सप्तदशभागान् कुर्यात्। मध्यशालायास्त्रिभागाः, कर्णकूटस्यैको भागो भवति। कर्णकूटस्य मध्ये सुन्दरशाला भागद्वयस्य भवति। कूट-कोष्ठयोर्मध्यान्तरं तथा कोष्ठस्य मध्यान्तरं कर्णकूटस्य प्रमाणेनाकारयुक्तं भवति। पञ्जरस्य विस्तार एकभागस्य भवति। तेष्वधिकमवशिष्टो भागः क्षुद्रपञ्जरेण युक्तो हारान्तरं भवति।[२६७] उपर्युक्तानुसारं तलभवनं कुर्यात्, एकादशतलानुसारं वा कुर्यात्। सप्तविंशतिरधिकमेकशतं भागैर्गृहं विभजति, तर्हि –

| नाम | मानम् |
|---|---|
| अङ्गम् | १२ |
| अधिष्ठानम् | ५ |
| स्तम्भः | ९ |
| मञ्चः | ४,१/२ |
| स्तम्भः | ८,१/२ |
| मञ्चः | ४ |
| स्तम्भः | ८ |

२६६ का.शि.३८.३६
२६७ का.शि.३९.१ तः ८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to
Unlimited Pages and Expanded Features

| | |
|---|---|
| | ३,१/४ |
| स्तम्भः | ७,१/२ |
| मञ्चः | ३,१/२ |
| स्तम्भः | ७ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३ |
| स्तम्भः | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,३/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | १,३/४ |
| वेदिका | ३/४ |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| | १,१/२ |
| शीर्षं | ४,१/२ |
| स्तूपि: | १,३/४ |
| आहत्य | १४२ |

त्रयोदशतलम्

विस्तारादिमानं प्रासादमानानुसारं भवेत्। गृहविस्तारस्य नवदशभागान् कुर्यात्। गर्भगृहस्य त्रिभागा:, गृहपिण्डस्य भागद्वयं, अलिन्दस्यैको भाग:, तथैव भित्तेर्विस्तारो भवेत्। अलिन्दस्यैको भाग:, तथा भित्तेर्विस्तारस्यैको भागो भवति। विन्यासस‍ूत्राभ्यन्तर-अन्तरस्य नवदशभागा: क्रियन्ते तर्हि कर्णकूटस्यैको भाग:, मध्यभागे शालायास्त्रिभागा:, पार्श्वे शालाया विस्तारस्य भागद्वयं, पञ्जरस्यैको भाग: भवति। क्षुद्रपञ्जरसमन्वितं हारान्तरस्यार्धो भाग:, पञ्जरस्याकार: कर्णकूट-प्रमाणेन तथा तथैव क्षुद्रपञ्जरं भवति।[268] एवं तलभवनं प्रोक्तम्। ऊर्ध्वतलं द्वादशतलानुसारं भवति। सदनस्योच्चताया द्विचत्वारिंशद् एकशतभागान् करोति, तर्हि –

| नाम | मानम् |
|---|---|
| अङ्गम् | १३ |
| अधिष्ठानम् | ५ |
| स्तम्भ: | १० |
| मञ्च: | ५ |
| स्तम्भ: | ९ |
| मञ्च: | ४,१/२ |
| स्तम्भ: | ८,१/२ |
| मञ्च: | ४ |
| स्तम्भ: | ८ |
| मञ्च: | ३,१/४ |
| स्तम्भ: | ७,१/२ |

२६८ का.शि.४०.१ त: ६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| | ३,१/२ |
| | ७ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३ |
| स्तम्भः | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,३/४ |
| मञ्चः | २,१.२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | १,३/४ |
| स्तम्भः | १,३/४ |
| वेदिका | ३/४ |
| गलं | १,१/२ |
| शीर्षं | ४,१/२ |
| स्तूपिः | १,३/४ |
| आहत्य | १४२ |

शेषं द्वादशभवनानुसारं भवेत्।[२६९]

षोडशतलम्

पञ्चालिन्दैः सह समानमानयुक्तं, पञ्चहारेण सह गृहपिण्डं भवति। गर्भगृहस्य पञ्चभागाः, गृहपिण्डस्य चत्वारो भागाः, शेषं पूर्वानुसारमलिन्दादिकं भवति। षोडशतलगृहस्य प्रथमतले, द्वितीयतले, तृतीयतले, चतुर्थतले, पञ्चमतले वा देवानां स्थापनां कुर्यात्। यद् भवने देवानां स्थापनां करोति, तस्योर्ध्वभागस्य भवनानि घनीकृतानि भवेयुः

२६९ का.शि.४०.८-९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...कृतं भवेत्, अलिन्दस्य स्तम्भपर्यन्तं, स्तम्भोपरि ...कृतं भवेत्। विस्तारस्य चतुस्त्रिंशद् भागान् कुर्यात्। कर्णकूटस्यैको भागः, गृहस्य मध्यभागसमन्वितायाः शालाया दीर्घतायाश्चत्वारो भागाः, तस्य मध्ये स्थितायाः शालाया भागद्वयं भवति। तस्य मध्ये कर्णकूटवदेकभागस्य पञ्जरम्, तस्य मध्येऽर्धो भागो हारान्तरस्य भवति। तथैव तलभवनोपर्यष्टाविंशतिः शालाः, चत्वारि कर्णकूटानि तथा द्वात्रिंशत् पञ्जराणि भवन्ति। हारान्तरस्य संख्या चतुषष्टिर्भवति। एवंप्रमाणेन तलभवनं दर्शितम्। द्वितीयतलस्य विस्तारस्य द्वात्रिंशद् भागान् कुर्यात्। द्विभागस्य मध्यशाला तथा शेषावयवाः पूर्वानुसारं भवन्ति। तृतीयतलस्य विस्तारस्य द्वात्रिंशद् भागान् कुर्यात्। कर्णकूटस्य समीप एव पञ्जरस्य सार्धत्रिभागा भवन्ति। पादोनद्विभागस्य हारान्तरं भवति, शेषावयवाश्तृतीयभवनानुसारं भवन्ति। चतुर्थतलस्याष्टाविंशतिः भागान् कुर्यात्। कर्णकूटस्य पार्श्वे शालाद्वयं, पञ्जरस्यैको भागः, शेषावयवाः पूर्वानुसारं भवन्ति। पञ्चमतलविस्तारस्य षड्विंशतिभागान् कुर्यात्, मध्यशालायाश्चत्वारो भागाः, कर्णकूटस्यैकोभागो भवति। कर्णकूटयोर्मध्यभागस्य शाला, तस्या मध्ये लघुकोष्ठं, प्रत्येकस्य भागद्वयमिति कल्पयेत्। कोष्ठस्य मध्येऽर्धभागस्य पञ्जरं वा कर्णकूटं भवति। तस्यार्धं हारान्तरं भवति। तस्य संख्या तलभवनस्य हारान्तरवद् (६४) भवति। षष्ठतलविस्तारस्य चतुर्विंशतिभागान् कुर्यात्। मध्यभागस्य कोष्ठस्य भागद्वयं, शेषावयवाः पूर्वानुसारं भवन्ति। सप्तमतलस्य विस्तारस्य द्वाविंशतिभागान् कुर्यात्। कर्णकूटस्यैको भागः, मध्यशालाया भागद्वयं, तस्या मध्ये क्षुद्रकोष्ठस्यैको भागो भवति। तस्य मध्ये कोष्ठस्य दीर्घताया भागद्वयं भवति। पञ्जरविस्तारस्यार्धभागः, हारान्तरस्य विस्तारस्यापेक्षयार्धो भागः, पञ्जरं तथा कूटकोष्ठयोः संख्या पूर्वानुसारं भवति। अष्टमतलविस्तारं विंशतिभागेषु विभजति तर्हि, कर्णकूटस्यैको भागः, मध्यभागे स्थितस्य कोष्ठस्य भागद्वयं, तस्या मध्ये कोष्ठ-दीर्घताया भागद्वयं प्रोक्तम्। पञ्जरविस्तारस्यार्धो भागः, हारान्तरो विस्तारस्य तस्यापेक्षयार्ध, पञ्जर-कूटकोष्ठयोः संख्या पूर्वानुसारं भवति। नवमतलविस्तारस्याष्टदश भागान् कुर्यात्, कर्णकूटस्यैको भागः, मध्यशालाया भागद्वयं भवति। तस्या मध्येऽर्धो भागः पञ्जरस्य, द्वयोः पार्श्वे, तस्यापेक्षया हारान्तरस्यार्धो भागो भवति। द्वयोः पार्श्वे द्विभागस्य विशेषतः कोष्ठं कुर्यात्। कूटकोष्ठयोर्मध्ये, कोष्ठस्य वा मध्येऽर्धभागस्य पञ्जरस्य कल्पनां कुर्यात्, तस्यापेक्षया हारान्तरस्यार्धो भागो भवति। विंशतिः कोष्ठानि, चत्वारि कूटानि, चतुर्विंशतिः पञ्जराणि भवन्ति। दशमतलविस्तारं षोडशभागेषु विभजतु। कर्णकूटस्यैकोभागस्तथैव पञ्जरविस्तारस्य भवति। शालाविस्तारस्य भागद्वयं, हारविस्तारस्याअर्धो भागः, द्वादशशालाः, चत्वारि कूटानि, षोडशपञ्जरेण सह

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवन्ति। एकादशतलविस्तारं चतुर्दशभागैर्विभजति तर्हि, याः शालाया भागद्वयं, कर्णकूटं तथा मध्यशालाया मध्ये स्थितायाः शालायास्त्रिभागा भवन्ति। पञ्जरविस्तारस्यार्धो भागः, तस्यार्धं हारस्य विस्तारः, चत्वारि कूटानि, द्वादश शालाः, षोडशपञ्जरेण सह द्वात्रिंशद् हारान्तराणि भवन्ति। द्वादशतलविस्तारस्य द्वादशभागान् कुर्यात्, पञ्जर-कूट-कोष्ठानां संख्या एकादशतलवद् भवति। कोष्ठविस्तारस्य भागद्वयं कुर्यात्। त्रयोदशतलविस्तारस्य दशभागान् कुर्यात्, एकभागस्य कर्णकूटं, मध्यशालाया भागद्वयं, मध्येऽर्धभागस्य कर्णकूटं, तथैव पञ्जरम्, तस्यापेक्षयार्धभागस्य हारान्तरं, संख्या द्वादशतलवद् भवति। चतुर्दशतलविस्तारस्याष्टभागान् कुर्यात्, कर्णकूटस्यार्धभागः, मध्यशाला द्विभागस्य भवति। पञ्जरविस्तारस्यार्धो भागः. तस्यार्धं हारान्तरं भवति। चत्वारि कूटानि, चतस्रः शालाः, षोडशपञ्जरेण सहात्यन्तसुन्दराणि चतुर्विंशतिहारान्तराणि भवन्ति। पञ्चदशतलविस्तारस्य समानरूपेण षड्भागान् कुर्यात्। कर्णकूटस्यैको भागः, मध्यशाला द्विभागस्य, द्विपञ्जरयुक्तहारान्तरस्यैको भागो भवति। षोडशतलविस्तारं चतुर्भागेषु विभजेत् मध्यभागे द्विभागस्य विस्तारः, निर्गमनमेकदण्डस्य,[२७०] प्रासादविस्तारस्योच्चताया द्विशतं भागाः –

| नाम | मानम् |
|---|---|
| अङ्गम् | १६ |
| अधिष्ठानम् | ७ |
| स्तम्भः | १३ |
| मञ्चः | ६,१/२ |
| स्तम्भः | १२ |
| मञ्चः | ६ |
| स्तम्भः | ११ |
| मञ्चः | ५.१/२ |
| स्तम्भः | १० |
| मञ्चः | ५ |
| स्तम्भः | ९ |
| मञ्चः | ४,१/२ |
| स्तम्भः | ८,१/२ |
| मञ्चः | ४ |
| स्तम्भः | ८ |
| मञ्चः | ४ |

२७० का.शि.४१.१ तः ४४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | |
|---|---|
| स्तम्भः | ७,१/४ |
| मञ्चः | ३,१/४ |
| स्तम्भः | ६,१/२ |
| मञ्चः | ३ |
| स्तम्भः | ६ |
| मञ्चः | २,३/४ |
| स्तम्भः | ५,१/२ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५,१/४ |
| मञ्चः | २,१/२ |
| स्तम्भः | ५ |
| मञ्चः | २,१/४ |
| स्तम्भः | ४,३/४ |
| मञ्चः | २ |
| स्तम्भः | ४,१/२ |
| मञ्चः | १,३/४ |
| वेदिका | १ |
| गलं | २ |
| शीर्षं | ४,१/२ |
| स्तूपिः | १,१/४ |
| आहत्य | १९९ |

[२७१]

ब्रह्मकान्तम्

होमात् स्तूपिपर्यन्तं वर्गाकारं भवति। शिखरोपरि चतुर्दिक्षु महानास्यो भवन्ति। प्रत्येकस्तम्भेऽल्पनासी भवति। तद् ब्रह्मकान्तं कथ्यते।[२७२]

सारस्वतगृहम्

तथैव किन्तून्नतो मञ्चः, सौष्ठिकं तथा कोष्ठं भवेत्। एतादृशं शङ्करस्य कृते सारस्वत-गृहं भवति।[२७३]

२७१ का.शि.४१,४६ तः ५७
२७२ का.शि.४१.५८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तथैव किन्त्वधः कूटं, मञ्चसहितमूर्ध्वकोष्ठं, सर्वप्रकाराणामुन्नत्यर्थं कारणीभूतं प्रादेशं कथ्यते।[२७४]

श्रीकरम्

तथैव किन्तु शिखरं तथा कण्ठोऽष्टकोणो भवति, शिखरोपर्यष्टमहानासीयुक्तं श्रीकरं कथ्यते।[२७५]

पर्वतीकम्

अत्र मध्यभागो भद्रयुक्तः, द्वौ समतलौ कूट-कोष्ठौ भवतः। तथैव मञ्चेण सह तद् रहिता वा कूटशाला भवति। इदं शङ्करस्यात्यन्तमनुकूलं प्रसिद्धं पर्वतीकं भवति।[२७६]

सुशांभवम्

तथैव किन्तु शिखरं तथा कण्ठो वृत्ताकारः, वेदिकाष्टकोणा, वेदिका वृत्ताकारा वा, घटानुसारं वृत्ताकारं भवति। इदं शंकरस्यानुकूलं सुशांभवं भवति।[२७७]

पञ्जरम्, कूटकोष्ठं, शिखरं तथा सर्वेऽवयवा नागरपद्धत्यनुकूलाः कुर्यात्। एवंप्रमाणेनैकमनेकानि वा सदनानि कुर्यात्। प्रत्येकतलोपरि प्रयत्नेन यथायोग्यं मञ्चं रचयेत्। तल-योग्यं विस्तार-उच्चताया भित्तिस्तथा गर्भगृहं भवेत्। एवंप्रकारेण विधिपूर्वकं घण्टाद्यलंकारैः सह तथालिन्देन सह गृहं भवति। तथैवोर्ध्वमारोहणाय सोपानानि रचयेत्। यथायोग्यं भवेत् तथैव शालां कुर्यात्। तथैव प्रासादस्य पुरत एकतलस्यानेकतलानां वा मण्डपं रचयेत्। पूर्वोक्तेन विधिना सर्वालंकारैः शास्त्रानुसारं नानाप्रकाराणां मनोहर चित्राणि रचयेत्। उपर्युक्तानुसारं यथाशक्ति मन्दिरं रचयति, स लोके धनिकः, श्रीमान्, पुत्रपौत्रादियुतः, स्त्री-दास-दासी -इच्छितसन्ततिसहितः प्रसन्नो भविष्यति। पापाद् विमुक्तिश्च भविष्यति।[२७८]

मूर्धेष्टका

---

२७३ का.शि.४१.५९
२७४ का.शि.४१.६०
२७५ का.शि.४१.६१
२७६ का.शि.४१.६२
२७७ का.शि.४१.६४
२७८ का.शि.४१.६५ तः ७१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नासी समाप्ता भवति, तत्र मूर्धेष्टकायाः स्थापनायाः अनन्तरं मूर्धेष्टकां स्थापयेत्। शिखरस्य समाप्तिपर्यन्तं मूर्धेष्टका भवति। प्रथमतलस्य कृतेऽनेकतलानां गृहाणां कृते वा इष्टकाया विस्तारः, दीर्घता तथोच्चता प्रथमेष्टकावत् भविष्यति।[२७९]

पूजाविधिः

प्रासादस्य पुरत उत्तर-वायव्यदिक्षु गोपुरस्य पार्श्वे नव-अष्ट-सप्त-षट्-पञ्च वा हस्तस्य मण्डपं रचयेत्। तस्य दीर्घता तथा विस्तारः समानरूपेण भवेत्, षोडश स्तम्भानां मण्डपं वा प्रपां कुर्यात्। चतुर्द्वारं चतुर्वन्दनवारो वा भवति, षड्, अष्ट, नव वा वितानध्वजेन सह प्रपामण्डपं कुर्यात्। मुक्ताहारेण, दर्भमालाभिर्मण्डपमलङ्कुर्यात्। मण्डपस्य त्रिभागेषु मध्यभागे एकभागस्य वेदिकां रचयेत्। वेदिकायाः पृष्ठभागोपरि चतुरङ्गुल-उच्चतायास्तिस्र उपवेदयो भवन्ति। शेषविस्तारे वेदी भवति, तस्या उच्चता द्वादशाङ्गुलं भविष्यति। द्वादशाङ्गुलानामुच्चता तथा दर्पणवत् समतलयुक्तं वेदी-उपरि वर्गाकारमग्निस्थण्डिलं रचयेत्। स्थूलवालुकाम्, अष्ट-द्रोणधानाः, तस्यार्ध-अक्षताः, तस्यार्धं तिलान्, तथैव लाजास्तस्योपरि प्रसार्य श्वेत-पद्मं रचयेत्। नानापुष्पैः, कुशं,दर्भं प्रसार्य कमलस्य मणिकर्णिकां पुष्पदलं वा यथा सुन्दरं भवेत् तदनुसारं रचयेत्। गन्ध-पुष्पादिना सम्पूज्य, विशेषरूपेण धान्येनाहुतिं दद्यात्। लोहस्य काष्ठस्य वा स्तूपिं तथा दण्डं रचयेत्। स्तूपिं, दण्डं, आसनं च एतेषां रचनां खदिर-तिन्तिणी-सारवृक्षेण वा दृढवृक्षेण कुर्यात्, अथवा मयूर-पद्मकण्डूरयोरुत्तमकाष्ठयोः कुर्यात्। सुवर्ण-लोह-ताम्रस्य मिश्रणेन वोर्ध्वतलस्य त्रिगुणितमुच्चतायाः स्तूपिदण्डं कुर्यात्। शीर्षोपरि पाषाणस्योपरिष्टात् स्तूपिपर्यन्तं दीर्घता भविष्यति। ऊर्ध्वतलविस्तारवत् मूलस्य विस्तारो भविष्यति। तस्याग्रभागस्य विस्तार एकाङ्गुलो भवति। मूलतोऽग्रपर्यन्तं स्तूपिदण्डस्योच्चता विस्तारश्च काष्ठप्रमाणेन क्रमेण न्यूनं कुर्यात्। मूले स्तूपिदण्डो वर्गाकारो भवेत्। उच्चताया मध्यभागेऽष्टकोणः, पुरतोऽग्रभागो वृत्ताकारो वा वर्गाकारः, तस्योर्ध्वं सर्वे भागा गोलाकारा भवन्ति। तस्य (स्तूपिदण्डस्य) मूलस्य समीपे शिखायाः (तिर्यक् दण्डस्य) योजनां कुर्यात्। तस्य मूलस्य विस्तार एकदण्डो वाग्रभागस्यैकदण्डो भवति। लोहेन तिर्यक् दण्डं कुर्यात्। (स्तूपि)दण्डस्य तथैव मूर्धेष्टकायाः पञ्चगव्येन प्रक्षालनं कुर्यात्। कर्णिकासमीपे (वेद्युपरि कमलस्य मध्यभागः) दण्डं स्थापयेत्। क्रमेण चतुर्मुख्यदिक्षु चतस्र इष्टकाः स्थापयेत् दण्डोपरि पृथ्व्यादिं कुर्यात्। पूर्वदिशातोऽष्टदिक्षु क्रमेण गन्ध-पुष्पैः पूजां कुर्यात्। सुवर्ण-रजत-ताम्र-

---

२७९ का.शि.४२.१ तः ३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...णं कृत्वा कौतुक-बन्धनं कुर्यात्। ब्रह्मा--विष्णु-शंकर- ...ोष्टकाया ऊर्ध्वं वा दण्डस्यान्ते स्थापयेत्। तान् नैवेद्यं तथा पानं दद्यात्। प्रत्येकं कुशैः सह नूतनवस्त्रैराच्छादनं कुर्यात्। कुश-गुच्छैराच्छादितेषु सुगन्ध-जलेन पूरितेषु, वस्त्र-सुवर्ण-पुष्प-फल-पानेन समन्वितेषु (अष्टकलशेषु) अष्टविद्येश्वराणामधिपस्य (प्रमुखस्य) प्रतिष्ठां कुर्यात्। तेषां मन्त्राणामुच्चारणं कृत्वा नैवेद्यविधिपर्यन्तं पूजां कुर्यात्। पश्चात् होमं कुर्यात्, अग्न्याधानादिक्रियां कुर्यात्, समिध्-घृत-चरु-धान्य-यवादिना प्रत्येकं शतं वार्धं पञ्चाशद् आहुतीः क्रमेण दद्यात्। परब्रह्म-षडंग-क्षुरिकादीन् च मुख्यबीजेन (तिल-अक्षत-सर्षपादिसहितेन) घृतेन प्रत्येकस्य पञ्चविंशतिराहुतीर्दद्यात्। जयादि-अभ्यातान- राष्ट्रभृन्-मन्त्रेण होमं कुर्यात्। ब्रह्मादिबीजमन्त्रैर्घृतादीनामाहुतीर्दद्यात् ।रात्रौ जागरणं कृत्वा सुप्रभाते मूर्तिना सह विधिपूर्वकं स्नानं कृत्वा नूतनवस्त्राणि, शिरस्त्रं, भस्म, रुद्राक्षं च धारयत्। तथैव यज्ञोपवीतं, भस्म,सुवर्णाङ्गुलीयकम्, वलयं,कुण्डलं धृतमस्ति, एवं शिल्पिनं यज्ञसूत्रेण सहाभूषणैः सुशोभितं कुर्यात्। स्थिरराशेरुदयस्य समये, अथवा मीनराशेः शुक्रे दृष्टे वा। आचार्यस्य तथा शिल्पेरनुग्रहेण पुण्याहवाचनान्ते मूर्ध्नेष्टकायाः स्थापनां कुर्यात्। इष्टका-स्तूपिदण्डेन सर्वप्रासादानां प्रदक्षिणां कृत्वा, नानाभूषणानि धारयित्वा (आचार्यस्तथा शिल्पी) प्रासादस्य (अनुलेपनं) आराधनं कुर्यात्। आचार्य उत्तराभिमुखो भूत्वानन्यभावेन ब्रह्मा- विष्णु-रुद्र-ईश्वर-सदाशिव-एतेषां मन्त्रैः स्मरणं कृत्वा चतस्र इष्टकाः स्थापयेत्। पृथ्वीरूपे इष्टकाक्रमेण ईशानदिशात उत्तरं प्रत्यग्रभाग आगच्छेत्। एवं प्रकारेण स्थापयेत्। समतलं स्थानं, आग्नेयदिशातः पूर्वं प्रत्यग्रे भवेत्, एतादृशीं जलात्मिकां (इष्टकां) स्थापयेत्। समतल-स्थानं नैर्ऋत्यादुत्तरं प्रत्यग्रयुक्तां जलात्मिकां (इष्टकां) स्थापयेत्। समतलस्थाने वायव्यदिशातः पूर्वं प्रत्यग्रयुक्तां वायुरूपां मरुदात्मकां (इष्टकां स्थापयेत्)। एवं क्रमेण कुर्यात्। छिद्रं मा भवेत्, तथैव स्थापयेत्। माणिक-मरकत-वैडूर्य-इन्द्रनील-मौक्तिक-स्फटिक-पद्मराग-प्रवाल-वज्राणि मध्यभागे स्थापयेत्। अन्यरत्नानि नानादिक्षु शक्तिबीजस्य स्मरणं कृत्वा स्थापयेत्। तस्योपरि ईशानमन्त्रेण स्तूपिदण्डस्य स्थापनां कुर्यात्। कलशस्य जलेन दण्डं तथा पञ्च पाषाणानां प्रोक्षणं कृत्वा, मूर्तीनां (ब्रह्मा-विष्णु-इत्यादीनां) गन्ध-पूष्प-धूपादिना पूजां कुर्यात्।[२८०]

## मूर्धेष्टका स्तूपिश्च

---

२८० का.शि.४२.४ तः ४५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

षाणं) सर्वथा न चलेत्, तथैव दृढं कुर्यात्। तत्पश्चात् शिखरोपरि प्रोक्तरीत्या करालादीन् सुधया दृढं सर्वथा न चलेत्, एतादृशीं स्तूपिं रचयेत्। सुवर्ण-रजत-ताम्रेण गृहमाच्छादितं कुर्यात्। गृहनिर्माणे आचार्याय धेनोर्दानं कुर्यात्। सुवर्णस्य दश निष्कं दक्षिणारूपेण दद्यात्, यज्ञस्य सर्व-साहित्यं आचार्याय दद्यात्। तत्पश्चात् शिल्पिने धेनु-भूमि-सुवर्ण- इत्यादिकं दत्वा पूजयेत्। एतादृशं यो मनुष्यः करोति, तं शुभफलस्य प्राप्तिर्भवति।[२८१]

प्राकारः

प्राकारः शालायाः प्रासादस्य च रक्षायै शोभायाश्च कृते भवति।[२८२]

अन्तर्मण्डलस्य विस्तारः प्रासादविस्तारादर्धो भवति। एकतृतीयांशश्चतुर्थांशो वा भवति। अन्तर्मण्डलमित्युक्ते अन्तर्मार्गः, प्रासादस्य भित्तेर्वा मध्ये रिक्तं स्थानम्। तस्य बाह्येऽन्तर्हारस्य विस्तारोऽन्तर्मण्डलाद् द्विगुणितो भवति। अथवा मध्यहारस्य विस्तारोऽर्न्तमण्डलात् त्रिगुणितो भवति। एवं त्रिप्राकारा भवन्ति। मध्यहारस्य सीमा भवति, तस्य विस्तारोऽन्तर्मण्डलस्य चतुर्गुणितो भवति। पञ्च प्राकारस्य महामर्यादाया अन्तर्मण्डलस्य पञ्चगुणितो भवति। प्रासादस्य पादुकाद् होमात् पूर्वं प्राकारस्यान्तरं भवति। प्रथम प्राकारतो द्वितीयप्राकारपर्यन्तमन्तरं, द्वितीयात् तृतीयप्राकारपर्यन्तं, तृतीयात् चतुर्थप्राकारपर्यन्तं तथा ततः पञ्चमप्राकारपर्यन्तमन्तरं गणयेत् । ऊर्ध्वस्यान्तरं भित्तेरन्तरन्तः, मध्यतो बाह्यो बाह्य एवंप्रकारेण स्वीकरणीयः। अथवा प्रत्येक पादुकाया मध्यान्तरं गणयेत्। अन्यपद्धत्या प्रथममण्डलस्य विस्तारः (प्रासादस्य) प्रकृतेर्विस्तार समो भूत्वा, द्वितीयात् पञ्चमस्य (मण्डलस्य विस्तारः) त्रिस्त्रिरङ्गुलेन क्रमेण न्यूनो भवति। ईदृशं सदनस्य मानेन प्राकारस्य मानं प्रोक्तम्। त्रि-पञ्च-सप्तहस्तप्राकारस्य प्रथमस्य (मण्डलस्य, अन्तर्मण्डलस्य) विस्तारस्य त्रि प्रकाराः प्रोक्ताः। नव-एकादश-त्रयोदशहस्ता द्वितीयान्तर्हारस्य विस्तारो भवति। पञ्चदश-सप्तदश-नवदशहस्ता विस्तारः, मध्यहारस्य। त्रिप्रकाराः प्रोक्तः। तत्पश्चात् मर्यादां यथा-एकविंशतिः, त्रयोविंशतिः, पञ्चविंशतिः हस्ता चतुर्थप्राकारस्य विस्तारः । महामर्यादा सप्तविंशतिः, नवविंशतिः, एकत्रिंशद् विस्तारः । एवंप्रकारेण आभासः, विकल्पः, हर्म्य-एतेषां कृते कल्पनां कुर्यात्। सप्तहस्तात् प्रारभ्य पञ्चत्रिंशत्पर्यन्तं, प्रत्येकप्रथमभित्तितः, भित्तेर्मध्यस्य

---

२८१ का.शि.४२.४६ तः ५०
२८२ का.शि.४३.१

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्रप्रकारा:, (हस्तद्वयं हस्तद्वयं वर्धयित्वा) त्रयो पञ्च वा
ति।[283]

| | | | | |
|---|---|---|---|---|
| अन्तर्मण्डस्योच्चता | ७ | ९ | ११ | हस्ता: |
| अन्तर्हारस्योच्चता | १३ | १५ | १७ | हस्ता: |
| बाह्यहारस्योच्चता | १९ | २१ | २३ | हस्ता: |
| मर्यादेरुच्चता | २५ | २७ | २९ | हस्ता: |
| महामर्यादेरुच्चता | ३१ | ३३ | ३५ | हस्ता:,एवं १५ प्रकारा: |

जातिप्रकाराणां गृहे नवहस्तात् त्रिंशद् हस्तपर्यन्तम्, ऊर्ध्वप्रोक्तानुसारं भित्तिर्भवति। गृहमानात्, भित्तेर्मध्यस्यान्तरं, यथा पूर्वं प्रोक्तं तथैव प्रकारा भवन्ति। तथैव प्रकारेण हस्तमानं भवति। पञ्चप्राकारा भवन्ति।[284]

तृतीयप्राकार:

द्वितीयायाश्तृतीयाया वा भित्तेरूर्ध्वं चतुर्था भित्ति:, या भित्ति: योग्या भवति, तस्योपरि हर्म्य-वृत्तस्य योजनां कुर्यात्। तस्य मुखसमीपे वृत्ताकारां मुखविस्तारस्य कल्पनां कुर्यात्। बीजेन पादं बीजं तस्यार्धं, पादोनं वा समं भवति। (प्राकारस्य संख्या त्रिर्भवेत् तर्ह्यन्तर्मण्डलाद् हारस्य विस्तार:, मूलप्रासादस्य विस्तारेण न्यूनातिन्यूनमनुक्रमेण अर्ध:, पादोनो वा समं भवति। अधिकाधिकं द्विगुणित:, त्रिगुणित:, चतुर्गुणितो वा भवति। बीजस्योपरि मुखं (वृत्ताकारं) विस्तारेण द्विगुणितं, त्रिगुणितं, चतुर्गुणितं पञ्चगुणितं वा भवति। अन्तर्मण्डलस्य भित्तेर्विस्तार एकहस्तो भवति। तस्य त्रिगुणितं, षड्गुणितं वा विस्तारं वर्धयितुं शक्यते। महामध्यपर्यन्तं तृतीयप्राकारस्य महामर्यादापर्यन्तं, पञ्चप्राकारपर्यन्तं तस्य भित्तेर्दीर्घता सार्धैका हस्तद्वयं वा भवति। (त्रिगुणितं षड्गुणितमपि भवितुं शक्नोति।) भित्तेर्विस्तारो दर्शित:, उच्चता वर्ण्यते।

२८३ का.शि.४३.२ त: १४
२८४ का.शि.४३.१५-१६

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

… पञ्चगुणितं वोच्चता भवति। उच्चता (मूलप्रासादस्य) …य निर्गमपर्यन्तं वाजनस्य वाोर्ध्वपर्यन्तं भवति। प्रस्तराद् गलपर्यन्तं भित्तेरुच्चता भवति। भित्तेर्बाह्यं प्रति तथा सरलरेखानुसारस्थित्यामन्तः प्रति तिर्यग् भवति। भित्तेर्मूलविस्तारादग्रभागस्य विस्तारोऽष्टांशक्रमेण न्यूनो भवति। मूलतः सीमान्तपर्यन्तं भित्तेर्विस्तारं क्रमेणाष्टांशं न्यूनं कुर्यात्। हस्तमानेन भित्तेरुच्चतां कथयति। प्रथमा भित्तेरुच्चता कलशपर्यन्तम्, द्वितीया भित्तिः फलकस्योर्ध्वपर्यन्तम्। तृतीया बोधिकापर्यन्तं भवति। चतुर्थी मञ्चकस्योर्ध्वपर्यन्तं, पञ्चमी कपोतस्योर्ध्वपर्यन्तं भवति। एवं प्रकारेण भित्तेरुच्चता क्रमेण प्रोक्ता।[२८५]

प्राकारस्य भित्तिः, उत्तर-प्रस्तरादिः

भित्तेरूर्ध्वभागस्याकारो मालिकानुसारं वा सभानुसारं भवति। मण्डपाकृतिर्वा मध्यभागे सरलरेखानुसारं भवति। भित्तेरुपरि भित्तिं रचयेत्, स्तम्भोपरि स्तम्भं स्थापयेत्। प्रत्येकभवनस्य स्तम्भोपर्यल्पनासी भवेत्। स्तम्भस्य पङ्कतेः प्रमाणं दर्शयति। मूलहर्म्यस्य होमादुत्तरपर्यन्तं या उच्चता भवति, तामुच्चतां सप्तभागेषु विभजेत्। तस्माद् द्विरंशस्याधिष्ठानम्, स्तम्भस्योच्चता पञ्चांशानां भवति। स्तम्भः सर्वावयवैः साकं भवति। मूलहर्म्यस्य होमादुत्तरं प्रति उच्चतां नवभागेषु विभजेत्। अधिष्ठानस्य भागद्वयं कुर्यात्। स्तम्भस्योच्चता सप्तभागेषु भवति। होमादुत्तरपर्यन्तं एकादश भागान् कुर्यात्। अधिष्ठानस्य त्रिभागाः, शेषभागाः (८) स्तम्भस्योच्चताया मूलप्रासादस्य वा समं स्तम्भोऽधिष्ठानं च भवति। यदि स्तम्भाः काष्ठस्य वा पाषाणस्य भवन्ति, तर्हि स्तम्भानामुच्चतायाः षड्, सप्त, अष्ट वा भागान् कुर्यात्, तदा स्तम्भस्य विस्तार एकभागस्य भवति। कुड्यस्तम्भस्य (भित्ति-स्तम्भस्य) विस्तारः सर्वतः पादोनमर्धो वा भवेत्। त्रिः-चतुः ï पञ्च हस्तस्य परितो मालिकाकृतिर्भवति । द्विहस्तादारभ्य पञ्च हस्तपर्यन्तं त्रिस्त्रिरङ्गुलानां वर्धनं कृत्वा, एवं प्रकारेण स्तम्भानां पङ्कतेः पञ्चविंशतिः प्रकारा भवन्ति। सर्वतः पङ्क्तीनां समसंख्या भवेत्। समाया वा विषमसंख्यायाः स्तम्भानां पङ्क्तयः सर्वतो भवेयुः। मूलभागस्य विस्तारस्य दश-नव-अष्ट भागान् कृत्वा, मूलादग्रक्रमात् चैकांशं न्यूनं कुर्यात्। स्तम्भाग्रस्य विस्तारो दण्डं कथ्यते। उत्तरस्योच्चतैको दण्डः, पादोनदण्डः, अर्धो दण्डो वा भवति । उत्तम-मध्यम-अधम-उच्चताया उत्तरो भवति। विस्तारः स्तम्भस्य मूलसमानो भवति। स्तम्भस्य मध्यस्य विस्तारः समं स्तम्भस्याग्रमानस्य भवेत्, तर्हि क्रमेण उत्तमः, मध्यमः, अधमो वा विस्तारो भवति। उत्तरस्य विस्तारं त्रिभागेष्वेकभागस्य

---

२८५ का.शि.४३.१७ तः २६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...त्तरस्योच्चता समानं तुलीनीव्रस्य निर्गमनं भवति। तस्य ...गुणितं वा तस्य विस्तारस्य समं तुलानीव्रस्य निर्गमनं भवति। तुला, वाजनं, गुल्मकं चोर्ध्वं स्थापयेत्। तुलाया निर्गमनस्यार्धो विस्तार:, तुलाया ऊर्ध्वं जयन्तो भवति। जयन्तस्य विस्तारस्यार्धमनुमार्गस्योच्चता विस्तारश्च प्रोक्त:। तुलाया मध्यस्यान्तरं, तुलाया उच्चताया: समं, पश्चात् जयन्तस्य मध्यस्यान्तरस्य चोच्चता जयन्तस्योच्चताया: समं भवति। अनुमार्गस्यान्तरमेवंरीत्या भवेत् यथा इष्टकाया मध्यान्तरमेकदण्डस्य। कपोतादीनां निर्गमनं प्रस्तरानुसारं भवति। तुलाया उपरि इष्टकास्तरणं कुर्यात्। सुधया गुडजलेन चेष्टकानां स्तरस्य रचनां कुर्यात्। पश्चात् कराल-मुद्ग-गुल्मै: कल्केन सह चिक्कण-वालुकाया मिश्रणेन, चिक्कणनं कुर्यात्। एवंप्रकारेण इष्टकास्तरणं कुर्यात्। पाषाणा भवन्ति चेत् पाषाणानामास्तरणमप्येवंप्रकारेण रचयेत्। विशेषरूपेण प्रथमतले फलकानुसारं पाषाणं स्थापयेत्। वाजनस्योपरि सुधाकर्म कुर्यात्। एतत् तलभवनस्य कृते। द्वितीयतलस्य कृते यथाï मूलस्याग्रपर्यन्तं स्तम्भस्योच्चताया अष्टभागान् कुर्यात्। ऊर्ध्वतलस्य स्तम्भानामुच्चताया एकैकभागो न्यूनो भवति। एकस्यानेकतलस्य वा भवने प्रस्तरोऽर्धो भवति। प्रस्तरस्योपरि भित्तेरुच्चता भवति। भित्ते: शीर्षं छत्राकारं, सदाकारं सभाकारं वा भवति, गोपानं वाजनं वा प्रमाणेन भित्तेरूर्ध्वभागस्याकारो भवति। वालुकाया वृत्तं, दृढ-काष्ठस्य गोपानं, आच्छादनं वा कुर्यात्, तस्योपरि लुपा भवति। एतत् सभाकारं कथ्यते। यथा सुन्दरं दृश्येत् तथैव करणीयम्।[२८६]

पदानुसारव्यवस्था

जाते: पञ्च भवनानि, छन्दस्य चत्वारि भवनानि भवन्ति। यावत् तलानामाभासहर्म्यं भवति, तावत् तलानां विकल्पहर्म्यं भवति। जात्यादिगृहाणां भित्तेस्तलं योग्यं (दृढं) कुर्यात्। मर्यादाप्राकारेऽग्निपदे महानसं भवेत्। नैर्ऋत्यकोणे शस्त्रागारं, वायुकोणे शयनस्थानं भवति। ईशानकोणे योगशाला भवेत्। अथवा भृशभागे पुनर्योगशाला भवेत्। आग्नेयदक्षिणदिशामध्ये सूतिकागृहं भवेत्। इन्द्र-ईशानयोर्मध्ये स्नानगृहं भवेत्। धान्यं स्थापयितुं स्थानं तस्य पार्श्वे वा भृङ्गराजस्य पदे भवेत्। नैर्ऋत्य-पश्चिमयोर्मध्ये ग्रन्थालयो भवेत्। तस्य पार्श्वे उत्तमस्य व्यञ्जनालयस्य स्थानं भवेत्। सोम-वायव्योर्मध्ये वस्त्रागारो भवेत्। सोम-ईशानयोर्मध्ये देव्या मन्दिरं कल्पयेत्। तस्य समीपे पर्यङ्कसहितं शयनस्य स्थानं भवेत्। पुष्पदन्तस्य तथा

२८६ का.शि.४३.२७ त: ५५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

। गृहक्षतोपरि धान्यभाण्डारो भवेत्। मण्डलस्य परित
काया: पश्चात् सोमसमीपे कूपो भवेत्।

द्वितीयप्रकारो कथ्यते। इन्द्र-शंकरयो: स्थानमध्ये विद्यास्थानं (पाठशाला) भवेत्। दक्षिण-आग्नेयमध्ये पुष्पमण्डपो भवेत्। दक्षिणनैर्ऋत्यमध्ये स्नानार्थं जलसञ्चयप्रकोष्ठो भवेत्। नैर्ऋत्य वारुणयोर्मध्ये पुराणं श्रोतुं मण्डपो भवेत्। वारुण-वायव्यमध्ये शस्त्रागारं भवेत्। वायव्य-उत्तरयोर्मध्ये शयन-स्थानं भवेत्। उत्तर-ईशानयोर्मध्ये यज्ञमण्डपो भवेत्। जयन्तपदे स्नानगृहं भवेत्। आग्नेयपदोपरि भोजनगृहं भवेत्।[२८८]

मालिकाया: परित: शङ्करस्य नाना मूर्तीनां स्थानस्य च वर्णनम् । ईशानपदे नृत्यमूर्ते: (शङ्करस्य), आग्नेयकोणे वृषवाहनस्य, नैर्ऋत्ये पार्वत्या स्कन्देन सह वा शङ्करस्य, वायव्यदिग्भागे कङ्कालस्य, जयन्तोपरि भिक्षाटनस्य, सत्यपदे सुखासनस्य, वितथोपरि त्रिपुरान्तकस्य मूर्तिर्भवेत्। सुग्रीवस्य पदे हर्यर्धहरस्य, गन्धर्वस्य पदे चन्द्रशेखरस्य, शोषपदे कामदहनस्य, मुख्यस्य पदोपरि कालारिमूर्तिर्भवेत्। अदितिपदे अर्धनारीश्वरस्य, महेन्द्रपदे कल्याणसुन्दरस्य, पर्जन्यपदे क्षेत्रपालस्य, दक्षिणे दक्षिणेश्वरस्य मूर्तिर्भवेत्। वरुणस्थाने लिङ्गस्य (अद्भुतलिङ्गस्य), उत्तरदिशायां गजहारिणो मूर्तिर्भवेत्। एवंप्रकारेण ईश्वरमूर्तीनां प्रासादस्यान्त: कल्पयेत्।[२८९] मूलप्रासादे एवं रीत्या सकलस्थापनां कुर्यात्।

प्राकारस्य चतुर्दिक्षु द्वारशोभादिकं गोपुरं कुर्यात्। प्राकरस्य पङ्क्त्यां दीर्घताया मध्यभागे मूलप्रासादस्य मध्यसूत्रोपरि वा द्वाराणि भवेयु:। मुख्यद्वारमेकं वा द्वौ भवेताम्। अन्यद्वाराणां स्थानानि रिक्तानि भवेयु:। प्राकारस्य बाह्यव्यवस्था कथ्यते एक-द्वि-त्रि-चतु:-पञ्च दण्डस्य विस्तारस्य मार्गा भवेयु:। तेषां बाह्यभागे त्रिपङ्क्तयस्तथैव भवेयु:।[२९०]

पूर्वस्थाने शैवस्तस्य परिवारो वा भवति। पूर्वे उत्तरे वा दिग्भागे (ब्राह्मणस्य) अर्चकस्य निवासस्थानं भवेत्। दक्षिणे दैवज्ञस्य (ज्योतिषी) अम्बष्ठस्य, वैद्यादीनामाावासस्य स्थानं भवति। देवपूजायामुपयुक्तसाहित्यस्य विक्रेतु: पश्चिमदिशायां निवास:। सर्व प्रकाराणां भक्तानां निवास उत्तरदिशायाम्। आग्नेयदिग्भागे महाव्रतस्य स्थानं, तथा दक्षिणे पशुपतेर्देवालयो भवति। नैऋत्यदिक्षु कलामुखस्य (नृत्यशाला), पश्चिमदिक्षु ऊर्ध्वालयो भवति। वायव्यदिक्षु जैनानां

२८७ का.शि.४३.५६ त: ६४
२८८ का.शि.४३,६५ त: ७०
२८९ का.शि.४३,७० त: ७५
२९० का.शि.४३.७६ त: ७९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...वति। पाठशालायाः पृष्ठभागे वैश्यानां गृहाणि भवन्ति। ...र्यात्। दक्षिण-आग्नेय दिग्भागस्य मध्ये गौशाला भवति। पश्चिमनैर्ऋत्यस्य दिग्भागस्य मध्यभागे सूतिकागृहं भवति। पश्चिम-वायव्यदिग्भागस्य मध्ये रोगपीडितानां निवासस्थानं भवेत्। वायव्य-उत्तरस्य मध्ये बालशिक्षणार्थं मण्डपो भवति। सोमशङ्करयोः (ईशान्यां) मध्ये धान्यस्य भाण्डारो भवति। तस्य बाह्यवृत्ते दासीगणिकादीनां निवासस्थानं भवति। नृत्य-गीताभ्यासकर्तॄणां, क्रयविक्रयण कर्तॄणाम्, चक्रिणां, कुम्भकारस्य, मालाकारस्य, मत्स्यमांसोपजीविनां, नृत्यकाराणां, शूद्रकानां, गोपालानां तथा शिल्पीसहायकानां संकर-पद्धत्या जन्मप्राप्तानां गृहाणां पङ्क्तयः पूर्वदिग्भागात् प्रारभ्य ईशानदिशापर्यन्तं क्रमेण योजनं कुर्यात्। तस्य बहिरीशानभागे श्मशानं दक्षिणे उत्तरे वा भवेत्। तस्य बही रजकस्य गृहं भवेत्। तस्य बहिरेककोशमात्रे चण्डालानां वासो भवेत्।[२९१]

मण्डपलक्षणम्

प्रासादे एकतलमण्डपं भवति, तन्मुखमण्डपं कथ्यते। जाति-छन्द-विकल्पादिप्रासादस्य कृतेऽपि तथैव, (अर्थाद् एकतलमण्डपं मुखमण्डपमुक्तम्) प्रासादस्य पुरतो मुख्यदिशायामुपदिक्षु वा ग्रामस्य मध्यभागे, ग्रामे मुख्यदिक्षु उपदिक्षु वा उद्याने, नदीतटे, तडागस्य तटे मण्डपं रचयेत्। देवतानां (देवप्रासादस्य कृते) कृते अष्टदिक्षु मुखमण्डपो भवति। प्रासादस्य पुरतश्चत्वारो मण्डपाः स्युः। प्रथमो मुखमण्डपः, द्वितीयः प्रतिमामण्डपः, तृतीयः स्नानमण्डपः, चतुर्थो नृत्यमण्डपो भवति। एतेषु प्रथमो मण्डपः (मुखमण्डपः) पूर्वानुसारं, तथैव द्वितीयादिमण्डपा भवन्ति। एते मण्डपा अन्तर्हारमध्यहारादिस्थानेऽपि रचयेत्।[२९२]

अन्तराललक्षणम्

मण्डपेन संयुक्तो मण्डपो भवेत्। अथवा प्रत्येकमण्डपस्य मध्ये शाला भवेत्, तद् अन्तरालं कथ्यते। अन्तरालस्य लक्षणानि यथा-। एक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्त-अष्ट-नव-दश-एकादश वा हस्तानां अन्तरालस्य विस्तारो भवति। एवंप्रकारेणैकादश प्रकारा भवन्ति। यत्र मण्डपानां रचना करणीया तत्र विशेषरूपेण (स्तम्भ)पङ्क्तिर्भवेत्। अन्तरालं एक-द्वि-त्रि-चतुः-पञ्च भागेषु विभज्यते तदायं रिक्तः (सावकाशोऽन्तरालो) भवति, मध्ये वा भित्तिर्भवति। भित्तेर्मध्येऽन्तरालो भवति तर्हि स्थानद्वयात् प्रवेशो भवति। एक-द्वि-त्रि दण्डाः (स्तम्भाग्रस्य विस्तारो) एकभागस्य वा प्रवेशो भवति। द्वयोः प्रवेशयोर्मध्ये द्वारं जालकं वा भवति।

---

२९१ का.शि.४३.८० तः ९२
२९२ का.शि.४४,१ तः ६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...भवति। अभ्यन्तराल: समं विषमो वा भवति। ...ानि मण्डपस्य प्रमाणेन भवन्ति।[२९३]

आभासमण्डप:

त्रिहस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा नवदशहस्तपर्यन्तमाभासमण्डपस्य नवप्रकारा भवन्ति। आभासप्रासादे आभासमण्डपो भवति।[२९४]

छन्दमण्डप:

एकविंशतिहस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा सप्तत्रिंशद्धस्तपर्यन्तम्, विकल्पमण्डपानां नवप्रकारा भवन्ति। विकल्पसदनस्य तथाभाससदनस्य कृतेऽपि योग्यो भवति। नवत्रिंशद्धस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा पञ्चपञ्चाशद्धस्तपर्यन्तं छन्दमण्डपो भवति। (अयं छन्दप्रकारस्य प्रासादस्य मण्डपो भवति।)[२९५]

जातिमण्डप:

पञ्चसप्ततिहस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा त्रिसप्ततिहस्तपर्यन्तं जातिमण्डपो भवति। विस्तारस्य समं दीर्घतायुक्त: समकोणयुक्तो मण्डप: भवति।[२९६] (ऊर्ध्वमण्डपो वर्गाकारो भवति।)

मण्डपस्य स्तम्भा:

सार्धैकहस्तात् प्रारभ्य षट्-षडङ्गुलं वर्धयित्वा, पञ्चहस्तपर्यन्तं स्तम्भानां पङ्क्ते: कल्पनां कुर्यात्। सार्धद्विहस्तादारभ्य षट्-षडङ्गुलान् वर्धयेत्, स्तम्भस्योच्चता भवति। अष्ट-अङ्गुलादारभ्यार्ध-अर्ध-अङ्गुलं वर्धयित्वा नवदश-अङ्गुलपर्यन्तं त्रिविंशतिप्रकाराणां (मण्डपस्य) स्तम्भानां विस्तारो भवति। स्तम्भस्य विस्तारस्योच्चताया द्वादश-एकादश-दश-अष्ट वा भागान् कुर्यात्। मूलविस्तारस्यैको भागो द्वात्रिंशद्भागेष्वैको भागो न्यूनमग्रस्य विस्तारो

---

२९३ का.शि.४४.७ त: १३
२९४ का.शि.४४.१४-१५
२९५ का.शि.४४.१७
२९६ का.शि.४४.१८-२०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तेऽधिष्ठानस्योच्चता, स्तम्भस्योच्चताया अर्धा भवति। भागद्वयमधिष्ठानस्योच्चता भवति।[२९७]

मण्डपस्यावयवा:

स्तम्भस्योच्चतायास्त्रिभागेष्वेको भाग एकचतुर्थांशो वाधिष्ठानस्योच्चता भवति। इयमुच्चता केवलमधिष्ठानस्य, अथवोपपीठं तथाधिष्ठानं मिलित्वा भवति। उपपीठस्य तथा अधिष्ठानस्योच्चता समा भवति, तस्य द्विगुणिता त्रिगुणिता वा भवति। उपपीठस्योच्चताधिष्ठानस्योच्चताया अपेक्षयार्धा भवति। उपपीठ-अधिष्ठान-स्तम्भ-प्रस्तरादीनां प्रवेशो निर्गमनमलंकारश्च पूर्वानुसारं भवति।[२९८]

प्रथमो मण्डप:

स्तम्भास्त्रिपंक्तियुक्ता:, षोडश स्तम्भा:, षोडश अल्पनास्य:, मध्यभागे कूटयुक्तं रहितं वा सर्वतोऽलङ्कारसमन्वितम्, चत्वारि द्वाराणि, अष्टदिक्ष्वष्टद्वाराणि भवन्ति। प्रत्येकदिग्भागे एकं द्वौ वा जालकस्य वातायनं, बाह्ये सोपानं, तोरणादिचित्रितं तोरणरहितं वा-अयं प्रथमो मण्डपो भवति।[२९९]

द्वितीयो मण्डप:

उच्चतायाश्चतुर्भागान् कुयात्, अष्टदिक्षु द्वारसमन्वितम्, पूर्व पश्चिमं वा प्रति भागद्वयं कुयात्। एकभागविस्तारस्य निर्गमनं भवति। मध्यभागे स्तम्भो न भवेत्। ऊर्ध्वं भागद्वयस्य कूटं भवति।

अष्टपञ्जरयुक्तम्- एवंप्रकारेण द्वितीयो मण्डपो भवति।[३००]

तृतीयो मण्डप:

वर्गाकारो भवति, विस्तारस्य पञ्चभागान् कुर्यात्। मध्ये भागद्वयस्य कूटं भवति। मण्डपस्य परितो द्वात्रिंशत् स्तम्भा भवन्ति। चतुर्विंशति: नास्य:, अष्टपञ्जरेण युक्तो भवति।

---

२९७ का.शि.४४.२१ त: २५
२९८ का.शि.४४.२४ त: २८
२९९ का.शि.४४.२९-३१
३०० का.शि.४४.३२-३३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...वति। द्वारे सर्वालङ्कारयुक्तानि सोपानानि भवन्ति। ...वं प्रकारेण तृतीयो मण्डपः भवति।[301]

चतुर्थो मण्डपः

वर्गाकारो भवति, षड्भागाः क्रियन्ते तर्हि मध्ये एकभागस्य कूटं भवति। तत् कूटमष्ट स्तम्भैः सह मध्ये रङ्गसमायुतं भवति। चत्वारि द्वाराणि, इष्टदिक्षु वा, एकं द्वारं भवति। तद् द्वारं द्विभागस्य विस्तारस्य भवति, एकभागस्य निर्गमनं भवति। इष्टदिक्षु चतुर्दिक्षु वा भद्रम्, अष्टचत्वारिंशत् स्तम्भाः, चतुर्विंशतिरल्पनास्यः, कुम्भ-लतादिभिश्चित्रिता भित्तिः, अष्टतोरणयुक्तम्- अयं तृतीयो (चतुर्थः) मण्डपः भवति।[302]

पञ्चमो मण्डपः

वर्गाकारो भवति, सप्तभागानां षष्टिस्तम्भयुक्तः, तस्य मध्ये नवभागस्य कूटम्, अलंकारयुक्तमङ्गणं वा भवति। द्वात्रिंशदल्पनास्यः, चतुर्दिक्षु भद्रं, मुखभद्रस्य निर्गमनं, विस्तारस्यैकतृतीयांशं भवति। मध्यभागे रङ्गेण सहेष्टदिक्षु भित्तिसंयुतः, सर्वालङ्कारैः संयुतः। एतादृशः पञ्चमो मण्डपः प्रोक्तः।[303]

(चतुर्द्वारसमन्वितः, मध्यभागे एकं कूटं, सर्वालङ्कारयुक्तः, षष्ठो मण्डपो भवति। वर्गाकारो नवभागेषु विभज्यते, शतस्तम्भयुक्तः, (चतुर्दिक्षु) चत्वारि भद्राणि, यस्य निर्गमनं विंशतिष्वेक-भागो भवेत्।)

सप्तमो मण्डपः

वर्गाकारः, अष्ट भागेषु विभाजितः, अशीतिः स्तम्भयुक्तः, तस्य मध्ये चतुर्भागस्योर्ध्व-कूटस्य कल्पनां कुर्यात्। चतस्रो दिक्षु, इष्टदिशायां वा द्वारयुक्तः, त्रिभागस्य विस्तारः, तावत् (मण्डपस्य बहिः) निर्गमनयुक्तः, मुखसोपानयुक्तः (बाह्यं प्रति सोपानानि), मध्ये रङ्गेण युक्तः, अष्टचत्वारिंशत् नासीसंयुतः, सर्वालङ्कारयुक्तो भवति। अयं सप्तमो मण्डपो भवति।[304]

---

३०१ का.शि.४४.३४-३६
३०२ का.शि.४४, ३७-४०
३०३ का.शि.४४.४१ तः ४३
३०४ का.शि.४४.४५-४६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वर्गाकार:, दशभागेषु विभाजित: ११२ स्तम्भसमन्वित:, मध्ये एकभागस्य कूटं, दिक्षु अष्ट, एवं प्रकारेण नव कूटानि वा भवन्ति। कूटस्योर्ध्वमेकभागो निर्गमनस्यान्तरालो भवति। मुखं प्रति सोपानानि भवन्ति। प्रत्येकदिक्षु भद्रेण सह सर्वालङ्कारैर्विभूषित: ï अयमष्टमो मण्डपो भवति।[३०५]

नवमो मण्डप:

वर्गाकार:, एकादशभागा: क्रियन्ते तर्हि मध्यभागे कूटस्य भागद्वयं, मुख-समीपे सोपानानि, इष्टदिक्षु भद्रेण सह तत्रैव वा भित्त्यामिच्छानुसारं द्वारं भवेत्, सर्वालङ्कारै: सहित:- नवमो मण्डप: प्रोक्त:।[३०६]

दशमो मण्डप:

वर्गाकार:. द्वादशभागा: क्रियन्ते तर्हि, मध्ये भागद्वयस्य कूटं, मण्डपस्य बहिर्भागे एकभागस्यालिन्दो भवति। अलिन्दस्य विस्तारस्य विंशतिभागा:, चतुर्दिक्षु निर्गमनं भवति। अष्टषष्टि: (१६८?) स्तम्भा अधिष्ठानोपरि भवन्ति, सर्वालङ्कारयुक्त:- दशमप्रकारस्य मण्डपो भवति।[३०७]

एतदनन्तरमायताकारमण्डपचतुष्टयस्य वर्णनं भवति। तदनन्तरं द्वादश-त्रयोदश-चतुर्दशमण्डपवर्णनं प्राप्यते। किन्तु एकादशमण्डपस्य वर्णनं लुप्तं भवति।

प्रथमो मण्डप:

मण्डपस्य दीर्घतानुकूलम्, समभागं कुर्यात्, वृत्ताकारं वा मण्डपं कुर्यात्। विस्तारस्य त्रिभागा:, दीर्घताया: पञ्चभागा भवन्ति। एकपार्श्वे पुरतो वैकभागस्य द्वारं भवति। पार्श्वे त्रिंशत् स्तम्भै: सह पङ्क्तिद्वयं भवति। उपर्युक्तानुसारं स्तम्भस्यैकभागं त्यक्त्वा (सर्वमण्डपेषु) परितस्तथाभ्यन्तरं प्रति भवति। लुपा अष्टविंशतिस्तम्भोपरि भवति। पुरत: स्तम्भा: समानपङ्क्तौ भवन्ति, चतुर्विंशति: स्तम्भा:, ते च समानपङ्क्तौ न भवन्ति।

---

३०५ का.शि.४४.४७-४८
३०६ का.शि.४४.४९-५०
३०७ का.शि.४४.५१-५३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible] जालकं-तोरणादिकं भवति। नानाकुम्भ-लतादिसंयुक्तः-
[illegible]

द्वितीयो मण्डपः

चत्वारो भागा विस्तारस्य तथा षड्भागा दीर्घतायुक्तमण्डपे एकभागस्य परितः कूटं भवति। मध्यभागे कूटं न भवति। (विस्तारस्य) द्विभागेष्वेकभागस्य मुखभद्रं भवति।[३०९] द्वात्रिंशत् स्तम्भानां द्वितीयो मण्डपो भवति।

तृतीयो मण्डपः

पञ्चभागविस्तारोऽथवा सप्तभागदीर्घता भवति, मध्यभागे त्रिभागस्य पञ्चभागस्य वा सभा भवति। स्तम्भानां परित एकभाग उद्घाटितो भवति। इष्टदिक्षु भद्रं भवति। सर्वालंकारसंयुतं चत्वारिंशत्स्तम्भानां वेदिकासहितस्तृतीयो मण्डपो भवति।[३१०]

चतुर्थो मण्डपः

विशालता षड्भागस्य तथा दीर्घताष्टभागयुक्तो मण्डपो भवति, विशालता भागद्वयं तथा दीर्घता चतुर्भागस्य-एतादृशी मध्यभागे सभा भवति। मण्डपस्य परितोऽष्टांशं दीर्घभद्रकं भवति। षष्टिस्तम्भयुक्तश्चतुर्थो मण्डपो भवति।[३११]

द्वादशमण्डपः

सप्तभागानां विस्तारः, नवभागस्य दीर्घता, एतादृशप्रकारस्य मण्डपे त्रिभागस्य विस्तारस्य तथा पञ्चभागस्य दीर्घतायुक्तं सभाङ्गणं भवति। वर्गाकारमण्डपस्य त्रयोदश विभागा भवन्ति। एकभागस्य कूटं, इष्टदिक्षु भित्तिस्तथा चतुर्दिक्षु भद्रं भवति। पुरतो भद्रस्य (मुखभद्रस्य त्रयोदशभागेषु) नवभागा भवन्ति। १९२ स्तम्भानां सर्वालङ्कारयुक्तो द्वादशमण्डपो भवति।[३१२]

---

३०८ का.शि.४४.५४ तः ५८
३०९ का.शि.४४.५९-६०
३१० का.शि.४४.६१-६२
३११ का.शि.४४.६३-६५
३१२ का.शि.४४.६६-६८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वर्गाकारमण्डपस्य पञ्चदशभागान् कुर्यात्। ऊर्ध्वं प्रति मध्यभागे वा त्रिभागस्य कूटं भवति। मुखभद्रं त्रिभागस्य भवति। इष्टदिक्षु भित्तिर्भवति , अन्यदिक्षु स्तम्भा भवन्ति। २२४ स्तम्भानां तथा सर्वालङ्कारसंयुतस्त्रयोदशमण्डपो भवति।[३१३]

चतुर्दशमण्डपः

वर्गाकारमण्डपस्य षोडशभागान् कृत्वा मध्यभागे द्विभागस्य कूटं भवति। २५२ स्तम्भा भवन्ति। मुखभद्रस्य विस्तारः सम संख्याया भवति। अन्यदिक्षु भद्रस्य विस्तारस्तस्यापेक्षयार्धो भवति। सर्वालङ्कारयुक्तोऽयं चतुर्दशमण्डपो भवति। एवंप्रकारेण मण्डपानां चतुर्दशप्रकाराः प्रोक्ताः।[३१४]

वर्गाकारो मण्डपः

सर्वालङ्कारयुक्तः वर्गाकारमण्डपस्त्रिचत्वारिंशद् भागानां भवति। भित्तिस्तथा स्तम्भैराच्छादितः स्वामेरिच्छानुसारं रचयेत्। एवंप्रकारेण वर्गाकारमण्डपस्य वर्णनमभवत्। इदानीमायताकारमण्डपस्य वर्णनं करोति। मण्डपस्य दीर्घता तस्य विस्तारादेकभागाधिका भवेत्। विस्तारस्य यावद् भागो भवेत्, तस्मिन् त्रिस्त्रिरङ्गुलं वर्धयित्वा सप्तविंशति-अङ्गुलपर्यन्तं (विस्तारादधिकं) दीर्घता, एवंप्रकारेण आयताकारमण्डपस्य नवप्रकारा भवन्ति। दीर्घता विस्तारश्च न्यूनोऽधिको न कर्तव्यः।[३१५]

आवश्यक्तानुसारं (भाग)मण्डपमाच्छादितं कुर्यात्। इष्टदिक्षु भद्रं भवेत्। विस्तारस्यैकतृतीयांशं मुखभद्रं भवति। द्विसप्ततिस्तम्भसहितः सर्वालङ्कारयुक्तम् पञ्चमो मण्डपो भवति।[३१६]

अष्टभागा विस्तारस्य तथा दशभागा दीर्घतायाः- एवं मध्ये भागद्वयस्य विस्तारः, चतुर्भाग दीर्घताया सभोदयो भवति। मण्डपस्यैको भाग आच्छादितो भवति, मध्यभागे स्तम्भो

---

३१३ का.शि.४४.६९-७१
३१४ का.शि.४४.७२-७४
३१५ का.शि.४४.७५-७८
३१६ का.शि.४४.७९-८१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...स्य मुखभद्रो भवति। ९६ स्तम्भाः सर्वालङ्कारयुक्ताः। ...कूलः।[३१७]

नवभागस्य विस्तारस्तथैकादशभागस्य दीर्घतायाः (मण्डप)मध्ये एकभागविस्तारस्य तथा त्रिभागस्य दीर्घतायाः सभा भवति। चतुर्भागेष्वाच्छादितमण्डपस्य कल्पनां कुर्यात्। सर्वालङ्कारयुक्तोऽयमष्टमः वस्तुतः सप्तमो मण्डपो भवति।[३१८]

आवश्यक्तानुसारं दिक्षु सुन्दरमङ्गणं भवेत्। स मण्डप आच्छादितो भवेत्। एवंप्रकारेणायताकार मण्डपस्य चतुर्दशप्रकारा भवन्ति। सर्वप्रकाराणां भित्तिः, अङ्गणस्य चत्वारः,पञ्च,षट्,सप्त वा भागाः, एवं पञ्चप्रकाराणां भवति। स्तम्भस्य दीर्घतायाः समं काष्ठस्तम्भवद् वा दीर्घता भवति। सर्वमण्डपानां मुखभद्र, मण्डपस्याकाराणां समं भवति। तस्य पार्श्वे सोपानानि, गजशुण्डया विभूषितानि भवन्ति। सोपानानां विस्तारः पञ्च-षट्-सप्त-अष्ट-नव दण्डानां भवति। गजशुण्डस्योच्चता सपादा सार्धैकदण्डा वा भवति। मूलादग्रपर्यन्तं विस्तारस्यैकाष्टांशभागक्रमेण न्यूनं कुर्यात्। गजशुण्डस्य मध्येऽन्तरं समं विषम वा मानेनाष्टप्रकाराणां भवति। गजशुण्डस्य विस्तार एकदण्डः, सपाददण्डः, सार्धैकदण्डः, द्विदण्डः,त्रिदण्डो वा भवति। मनुष्याणां कृते प्रथमं समस्थाने स्थित्वा सोपानारोहणे प्रथमं दक्षिणपादः, एवंप्रकारेण भवेत्। इति मण्डप वर्णनम्।[३१९]

गोपुरलक्षणम्

विशेषरूपेण गोपुरलक्षणं प्रस्तूयते। अन्तर्मण्डल-शालादीनां वर्णनमपि प्रदीयते। द्वारशोभा, द्वारशाला, द्वारप्रासादः, द्वारहर्म्यं द्वारगोपुरं वा -एवं क्रमेण गोपुरस्य नामानि सन्ति। द्वारशोभाया एकः-द्वि-त्रि- भवनस्य वा कल्पनां कुर्यात्। द्वितीयप्राकारे द्वारशाला द्वि-त्रि-चतुर्भवनस्य वा भवति। चतुः -पञ्च भवनस्य वा द्वारप्रासादं रचयेत्।

चतुः-पञ्च-षड्भवनानां द्वारहर्म्यं भवति। पञ्च-षड्-सप्तभवनानां द्वारगोपुरं भवति। अथवा सर्व प्राकारस्य एक-द्वि-त्रि-भवनस्य गोपुरं भवति। गोपुरस्याधिष्ठानमुपपीठेन सह, उपपीठरहितं वा भवति। एवं गोपुरस्य पञ्चचत्वारिंशत् प्रकाराः सन्ति।[३२०]

---

३१७ का.शि.४४.८२-८४
३१८ का.शि.४४.८५-८६
३१९ का.शि.४४.८७ तः ९७
३२० का.शि.४५.१ तः ५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मूलप्रासादस्य विस्तारं सप्त-अष्ट-नव-दश-एकादश भागाः क्रियन्ते तर्हि तेषु एकांशन्यूनं, तावदनुक्रमेण द्वारशोभादिगोपुरस्य विस्तारो दर्शितः। विकल्पस्याभासप्रकारस्य वा मूलप्रासादस्य गोपुरस्य मानं दर्शितम् मूलप्रसादस्य विस्तारस्य चतुः-पञ्च-षट्-सप्त-अष्टभागान् कुर्यात्, एकांश न्यूनं यावत् छन्दहर्म्यस्य द्वारशोभादीनामनुक्रमेण विस्तारो भविष्यति। मूलप्रासादस्य विस्तारं त्रिभागेष्वेकभागः, एकभागेष्वर्धांशः, त्रिभागेषु भागद्वयं, चतुरंशेषु त्रि-अंशः, पञ्चभागेषु चतुरंशः जातिहर्म्यस्य भवति। एवं रीत्या मूलप्रसादमानेन, द्वारशोभया द्वारगोपुर-मानस्य कल्पनां कुर्यात्। तस्य मानं हस्तमानेन दर्शितम्। द्विहस्तात् प्रारभ्यैकैकहस्तं वर्धयित्वा द्वारशोभातो गोपुरपर्यन्तं प्रत्येकस्य त्रिस्त्रिर्मानं भवति। विकल्पस्याभासस्य वा कते इदं मानमस्ति। छन्दहर्म्यस्य कृते त्रिहस्तादारभ्यैकहस्तेन वर्धयित्वा सप्तदशहस्तपर्यन्तं शोभादि गोपुरस्य त्रिस्त्रिर्मानं भवति। जातिहर्म्यस्य कृते चतुर्हस्तादारभ्यैकहस्तेन वर्धयित्वाष्टादश हस्तपर्यन्तं शोभादीनामनुक्रमेण विस्तारो भवति।[३२१] प्रत्येकस्य त्रिस्त्रि-प्रकारस्य पञ्चप्रकाराणां गोपुरस्य ४५ प्रकारा भवन्ति।

लघुहर्म्ये द्वारशोभातो द्वारगोपुरपर्यन्तं क्रमेण हस्तमानेन विस्तारः प्रदर्शितः। एवंप्रकारेण कुर्यादन्यथा विपत्तिकारकं भवति। अथवा त्रि-चतुः-पञ्च-षट्-सप्त-अष्ट-नव हस्ताः, दश-एकादश हस्ताः एवं कनिष्ठप्रकारस्य त्रिस्त्रिप्रकारा भवन्ति। श्रेष्ठप्रासादं श्रेष्ठप्राकारः, मध्यमप्रासादं श्रेष्ठकनिष्ठयोर्मध्ये प्राकारस्य गोपुरं भवेत्। क्षुद्रलघुप्रासादयोः कृते, ये कनिष्ठस्य त्रिप्रकारा दर्शिताः, ते सर्वे (प्रकाराः) प्राकाराय भवन्ति, अथवा तत्र प्रचलितपरम्परानुसारं कुर्यात्।[३२२]

द्वितीयप्रकारस्य द्वारशोभाया विस्तारो यथा-पञ्चहस्तात् प्रारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा त्रयोदशहस्तपर्यन्तं द्वारशोभा-विस्तारस्य कल्पनां कुर्यात्। पञ्चविंशति-हस्तादारभ्य हस्तद्वयं हस्तद्वयं वर्धयित्वा त्रयस्त्रिंशद्धस्तपर्यन्तं द्वारहर्म्यस्य विस्तारस्य पञ्चप्रकाराः भवन्ति। पञ्चत्रिंशद्धस्तात् प्रारभ्य हस्तद्वयं वर्धयित्वा त्रिचत्वारिंशतद्धस्तपर्यन्तं द्वारहर्म्यस्य विस्तारस्य पञ्चप्रकाराः दर्शिताः। पञ्चचत्वारिंशद्धस्तादारभ्य हस्तद्वयं वर्धयित्वा पञ्चत्रिंशद्धस्तपर्यन्तं, अन्तिमगोपुरस्य पञ्चप्रकारा भवन्ति।[३२३]

---

३२१ का.शि.४५.६ तः १५
३२२ का.शि.४५.१६-२०
३२३ का.शि.४५.२१-२४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्वारस्य विस्तारो दर्शित:,अधुना तस्य दीर्घता वर्ण्यते । सपादं, सार्धैकं, पादोनद्वि:, द्वि:,एकं, एकतृतीयांशं, एकं, एकद्वितीयांशं यावत् दीर्घता भवति। द्वारशोभातो द्वारगोपुरपर्यन्तमुपर्युक्तानुसारं योग्यप्रमाणेन दीर्घतायां स्थापयेत्। विशेषरूपेण द्विहस्तस्य मानस्य विस्तारं गृहीत्वा दीर्घता पूर्वं दर्शिता। तत्प्रमाणेन स्वीकृतेऽनुकूला दीर्घता प्राप्ता भवति। प्रदत्तहस्तस्य वा छन्दादि प्राकारस्य मूलप्रासादस्य विस्तार-मानस्य प्रमाणेन द्वारशोभादीनां दीर्घता भवेत्।[३२४]

गोपुरोच्चता

विस्तारं सप्तभागेषु विभज्य द्वारशोभाया उच्चतैकादशभागा भविष्यति। विस्तारस्य सार्धैकगुणितं द्वारशालाया उच्चता भवति। विस्तारस्य सप्तभागा भवन्ति। एकादश द्वादश वांशास्तृतीयद्वारप्रासादस्योच्चता भवति। विस्तारस्य नवभागान् कृत्वा १४ भागाश्चतुर्थद्वारहर्म्यस्योच्चता भवति। महागोपुरस्योच्चता विस्तारस्य द्विगुणिता भवति। उच्चताया मानेन स्तूपिपर्यन्तं गणयाम:। गोपुरस्य विस्तारं दीर्घतां च यन्मानं दर्शयति तत् सूत्रं प्राग्बाह्यं कथ्यते। तत्सूत्रस्य बहि: कूट-कोष्ठादिनिर्गमनं, प्रासादस्य प्रमाणानुसारं भविष्यति। विस्तारस्य त्रिभागेष्वेको भाग:, चतुर्भागेष्वेकभाग:, पञ्चभागेषु त्रिभागा: प्राग्बाह्यस्य बहि:, कूटकोष्ठयोर्निर्गमनं भविष्यति। सार्धैकहस्तादारभ्य षट्, षड् अङ्गुलं वर्धयित्वा पञ्चहस्तपर्यन्तं क्षुद्रहर्म्यस्य द्वारशोभादीनां द्वाराणां विस्तारो भवति। लघुप्रासादस्य कृते द्वाराणां मानं- त्रिहस्तादारभ्य षड् अङ्गुलान् वर्धयित्वा सप्तहस्तपर्यन्तं द्वारस्य विस्तारो दर्शित:। चतुर्हस्तादारभ्य षड् अङ्गुलान् वर्धयित्वा १५ हस्तपर्यन्तं बृहद्द्वारस्य विस्तारो भवति। द्वारविस्तारस्य सप्तांशा: (१७ अंशा: ?) द्वारस्योच्चताया: २० अंशा विस्तारस्य सप्तांशा वा भवति तर्हि उच्चता १० अंशा द्वारस्योच्चता, तस्य विस्तार: सार्धैकगुणितं, पादोनद्विगुणितं, एकाष्टांशम्, अष्टगुणितं सपादगुणितं वा- एवमुच्चताया:, तस्य विस्तारमानेन सप्त प्रकारा: सन्ति।[३२५]

लिङ्गस्य मध्योच्चताया द्वारं दर्शयति। त्रयोदशे तथा पञ्चमध्ये विशेषतो नवांशा भवन्ति। लिङ्गस्य मध्ये वामं प्रति, उपर्युक्तानुसारं, द्वारस्य मध्यं स्थापयेत्। द्वारशोभातो गोपुरपर्यन्तं द्वारस्य मध्यस्थानमनुक्रमेण दर्शितम्। लिङ्गस्य मध्यभागस्य वामं प्रति

३२४ का.शि.४५.२५-३०
३२५ का.शि.४५.३०-४०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्वारशालायाः सप्तभागाः, द्वारप्रासादस्य मध्यद्वारस्य ...था गोपुरस्य मध्यद्वारस्य त्रयोदशभागा भवन्ति। गोपुरस्य दीर्घताया मध्यपार्श्वे, एकसमानस्तम्भा भवन्ति। द्वारस्य योजनं कपाटस्य वा (द्वारस्यैको भागः), द्वारस्य यल्लक्षणानि दर्शितानि, तत्प्रकारेण कुर्यात्। पञ्चदशादारभ्य नवदशपर्यन्तमेतावद् विभागानां विस्तारं कुर्यात्। एवं त्रिविभागस्य विस्तारस्य एतादृशीं रचनां कल्पयेत् । (द्वारशोभाविस्तारस्य पञ्चदशभागान् कृत्वा, तस्य पञ्चभागस्य-दश वा पञ्चभागस्य मध्ये, लिङ्गस्य मध्ये वामं प्रति, द्वारस्य मध्य आगच्छेत्, एवंप्रकारेण द्वारशोभायाः मध्यस्य योजनां कुर्यात्। गोपुरविस्तारस्य पञ्चभागेषु त्रि-अंशस्य गर्भगृहं भवति। एकतलभवनस्य (द्वारशोभा) भित्तेर्विस्तारः, अवशिष्टांशं यावत्, एकांशस्य भविष्यति। भित्तेर्विस्तारो एवं मानेन परितो भविष्यति।[326]

द्वितलतो सप्ततलपर्यन्तं गोपुर वर्णनम्

द्वितीयतलभवनस्य गोपुरं वर्ण्यते। विस्तारस्य पञ्चभागान् कुर्यात्, दीर्घताया अपि एतावद्भागान् कुर्यात्। अंशद्वयस्य गर्भगृहं, सार्धैकांशस्य भित्तेर्विस्तारो भवति। कर्णकूटस्यैकांशः, शालाया विस्तारो दीर्घता च, हारान्तरस्य विस्तारः, प्रत्येकमेकांशस्य भविष्यति। पञ्चविभागकृतदीर्घतायाः शालायाः दीर्घतैकांशस्य भविष्यति। हारान्तरस्य तथा कूटस्यैकांशो भविष्यति। कूटस्य दीर्घतायाः समं हारान्तरस्य दीर्घता भविष्यति।[327] हारान्तरस्यार्धप्रमाणेन भद्रं वा भद्रपञ्जरं भवेत्। एतादृशं द्वितीयभवनस्य गोपुरं दर्शितम्।

इदानीं तृतीयभवनस्य गोपुरम्। मूलप्रासादस्य विस्तारस्य ï दीर्घतायाश्च नवभागा भवेयुः, गर्भगृहं त्रि-अंशस्य भवति, भित्तिरेकांशस्य भविष्यति। एकभागस्यालिन्दः, हारस्य विस्तारः एक अंशः, शालाया विस्तारस्त्रि-अंशस्य भविष्यति। पञ्जरमेकांशस्य, हारान्तरमर्धांशस्य, एतादृशं प्रथमभवनस्य कल्पनां कुर्यात्, द्वितीयतलभवनस्य योजना पूर्वानुसारं भवेत्।[328]

नाना प्रकारेण तृतीयभवनस्य गोपुरं भवति, विस्तारो नवभागस्य, दीर्घतैकादशांशस्य कुर्यात्। गर्भगृहं त्रि-अंशस्य, भित्तिरेकांशस्य, एकभागस्य हारस्य कल्पनां कुर्यात्। गर्भगृहस्य परितोऽलिन्दो भित्तिर्वैकांशस्य भविष्यति। दीर्घताया एकपञ्चमांशेन, कोष्ठस्य दीर्घता

---

३२६ का.शि.४५.४१-४६
३२७ का.शि.४५.४७-५०
३२८ का.शि.४५.५१-५४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्वितीयतलभवनस्य तथैव भविष्यति। तृतीयतलभवनस्य ...नस्य गोपुरं वर्ण्यते। विस्तारस्य दीर्घताया दशभागाः क्रियन्ते । गर्भगृहं त्रिभागस्य, भित्तेर्विस्तारः सार्धैकांशस्य भविष्यति। अलिन्द एकभागस्य, हारस्य विस्तार एकभागस्य, पञ्जर-कर्णकूटयोरेकांशस्य कल्पनां कुर्यात्। कूटस्य विस्तारवद् दीर्घता भवति, अवशिष्टदीर्घता हारान्तरस्य भवति। शालाया दीर्घता चतुर्थांशस्य, अर्धांशस्य हारान्तरं भवति। तलभवनमेतादृशं दर्शितम्, तृतीयतलं पूर्वानुसारं भविष्यति। चतुर्थतलभवनस्य विस्तारस्य दश भागान् तथा दीर्घतायाः १२ भागान् कुर्यात्। पूर्व-पश्चिमं प्रति शाला पञ्चभागस्य, अवशिष्टं पूर्वानुसारं भवेत्, एवं चतुर्थतलं दर्शितम्।[३२९]

विस्तारस्यैकादशभागान् कुर्यात्, दीर्घताया अपि तथैव, पूर्व-पश्चिमपार्श्वं पञ्च-अंशस्य दीर्घतायाः शाला भवति। पञ्जरस्य विस्तार एकांशः, कूटस्य विस्तारोऽप्येकांशः, हारान्तरस्यार्धोंऽशः, एवंप्रकारेण प्रथमतलभवनं कल्पयेत्। तस्योपरि सर्वाणि भवनानि पूर्वानुसारं कुर्यात्। विस्तारस्यैकादशभागान् तथा दीर्घतायास्त्रयोदशभागान् कुर्यात्। गर्भगृहस्य त्रि-अंशाः, तस्य विस्तारस्य भागद्वयं, एकभागस्यालिन्दस्य कल्पनां कृत्वा हारस्यैको भागो भवेत्। पार्श्वे चतुरंशानां शाला, पुरतो वा पृष्ठभागं प्रति षडंशानां (शाला) भवेत्, हारान्तरमेकांशस्य, व्योमपञ्जरं कूटं चैकांशस्य, अवशिष्टं पूर्वानुसारं कुर्यात्। एतादृशं षष्ठभवनस्य गोपुरं भवति। विस्तारं त्रयोदशभागेषु तथा दीर्घतां तथैव विभज्य, गर्भगृहं पञ्च-अंशानाम्, द्विभागस्य भित्तिः, एकांशस्यालिन्दः, खण्डहर्म्यमेकांशस्य भविष्यति। कोष्ठस्य दीर्घता त्रि-अंशा, पञ्जरस्य षडंशाः, एकांशस्य कूटं कुर्यात्, हारान्तरमप्येकांशस्य भविष्यति। विस्तारं दशभागेषु तथा दीर्घतां पञ्चदशांशेषु विभाजितां कुर्यात्, प्रत्येकमुखसमीपे सप्ताशांनां शालायाः योजनां कुर्यात्, पार्श्वं प्रति द्वि-कोष्ठस्य दीर्घता पञ्चभागानां भवति, अवशिष्टं पूर्वानुसारं सर्वालङ्कारैः सह कुर्यात्। सप्ततलभवनानां गोपुरं महागोपुरं भविष्यति। अलिन्देन सह वा रहितं गोपुरं भविष्यति। यद्यलिन्देन रहितं गोपुरं भवति, तर्हि गर्भगृहस्य परितो या भित्तिर्भवति, तामलिन्दस्य भागे सम्मिलितां कुर्यात्। तलभवनमेवं दर्शितम्, ऊर्ध्वभवनं षड्भवनं गोपुर-प्रमाणेन भविता, सप्तभवन-गोपुरं दर्शितम्, तस्यावयवानां विभागा वण्यन्ते। मूलप्रसादस्य मूलसमीपे तलभवनस्य स्तम्भो वा अधिष्ठानस्योच्चतायाश्चतुः-पञ्च-षट्-सप्त-अष्ट-नव-दश-एकादश भागान् कृत्वा, विशेषत एकभागस्योपपीठस्योच्चता भवेत्। हस्तमानेन द्वारयोग्यं मानं दर्शितम्, तस्योच्चतायाश्चत्वार-पञ्च-षट्-सप्त-अष्ट-नव-एकादश भागान् कृत्वा विशेषत एकभागस्योपपीठस्योच्चता भवति। उपपीठस्योच्चता दर्शिता,

---
३२९ का.शि.४५.५५-६३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तस्यैकांशमधिष्ठानस्योच्चता तथा भागद्वयस्य ... मापर्यन्तं द्वारस्य मानं भवति, द्वारशोभादीनां कृते पादबन्ध-प्रकारस्याधिष्ठानं कुर्यात्। उत्तरस्योर्ध्वतः स्तूपिपर्यन्तमुच्चतां षड्भागेषु विभज्य, प्रस्तरस्योच्चता सपादांशः, गलस्य मानमेकांशः। द्वि-त्रिचतुर्थांशभागं शीर्ष तथावशिष्टांशस्य स्तूपेरुच्चता भवति। एतादृशमेकतल-गोपुरस्य मानं दर्शितम्। द्वितीयतल-गोपुरस्य मानं वर्ण्यते। उत्तरात् स्तूपिपर्यन्तमुच्चता नवभागेषु विभज्य, सपादांशस्य प्रस्तरः, द्विभागस्य स्तम्भोच्चता, मञ्चस्य मानमेकांशः, कन्धरस्योच्चता तथैव, शिखरं सार्धपञ्चांशानाम्, स्तूपेरुच्चता सपादांशस्य भवति। द्वितलभवनं दर्शितम्। तृतीयतलभवनं वर्ण्यते। उत्तरात् स्तुपिपर्यन्तमुच्चता द्वादशभागेषु विभाजिता भवति। प्रस्तरस्योच्चता सपादांशः, स्तम्भस्योच्चता सार्धद्वि-अंशाः, प्रस्तरस्यैको भागः, स्तम्भस्योच्चताया भागद्वयं, मञ्चस्य मानमेकांशं भवेत्, एकांशः कण्ठस्योच्चता भविष्यति। शिखरस्य अंशद्वयं (सपादद्वि?) भविष्यति। स्तूपेर्मानमेकांशं भविष्यति। त्रितलभवन-गोपुरमेतादृशं दर्शितम्, चतुस्तलभवन-गोपुरं वर्ण्यते। उत्तरात् स्तूपिपर्यन्तमष्टादशविभागाः क्रियन्ते, मञ्चस्योच्चतैकत्रिचतुर्थांशः, स्तम्भस्योच्चता त्रि-अंशस्य, प्रस्तरस्योच्चता सार्धैकांशः, स्तम्भस्योच्चता सार्धद्वि-अंशः, तस्यार्धप्रस्तरस्योच्चता सपादांशः, मञ्चस्य मानमेकांशः, गलस्य मानं सार्धैकांशः, शिखरस्योच्चता सार्धद्वि-अंशः, स्तूपेर्मानमेकांशः, वर्तुतलभवन-गोपुरं दर्शितं, पञ्चमतलभवन-गोपुरं वर्ण्यते। स्तूपेरग्रभागादुत्तरपर्यन्तं त्रयोविंशतिभागाः क्रियन्ते, प्रस्तरस्योच्चता भागद्वयं, स्तम्भस्योच्चता सार्धद्वि-अंशं (सार्धत्रि- अंशं) तस्यार्धं मञ्चस्य मानं सपादैकांशः, स्तम्भस्योच्चता त्रि-अंशाः, सार्धैकांशा प्रस्तरस्योच्चता, स्तम्भस्योच्चता सार्धद्वि-अंशा, सपादांशं मञ्चस्य मानं, भागद्वयस्य स्तम्भस्योच्चता, प्रस्तरस्योच्चतैकांशस्य, कन्धरस्योच्चताप्येकांशस्य भवति। सार्धद्वि-अंशा शिखरस्योच्चता, एकांशस्य स्तूपिः, पञ्चतलभवनगोपुरं प्रदर्शितम्। इदानीं षष्ठतलभवन-गोपुरं वर्ण्यते। उत्तरात् स्तूपिपर्यन्तं २९ अंशानां भागा भवन्ति। प्रस्तरस्योच्चताया भागद्वयं, स्तम्भस्योच्चतायाश्चत्वारांशाः, मञ्चस्यैकतृतीयचतुर्थांशो भागः, अवशिष्टभवनस्य मानं सामान्यत उपर्युक्तानुसारं भवति, स्तम्भस्योच्चता सार्धत्रि -अंशानाम्, तस्यार्धप्रस्तरस्योच्चता भवति। स्तूपेर्मानमेकाशं, षट्तलभवन-गोपुरमुक्तम्। सप्तमतलभवन-गोपुरं वर्ण्यते। उत्तरतः स्तूपिपर्यन्तं षट्त्रिंशदंशाः कृतमस्ति। मञ्चस्योच्चता सार्धद्वि-अंशा, सार्धैकांशस्य स्तम्भः, प्रस्तरस्योच्चता द्विभागस्य, स्तम्भस्योच्चता चतुरंशः, मञ्चस्यैकतृतीयचतुर्थांशः, सार्धत्रि-अंशस्य स्तम्भस्य मानं, मञ्चस्योच्चता सपादांशा, स्तम्भस्य मानं त्रिभागस्य, प्रस्तरस्योच्चता सार्धैकांशा, स्तम्भस्योच्चता सार्धद्वि-अंशस्य, मञ्चस्य मानं सपादभागः, द्विभागस्य स्तम्भोच्चता

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

नमेकांशः, शिखरं पादोनत्रिभागस्य तथावशिष्टो भागः,

## गोपुरस्यालंकाराः

गोपुरस्यालङ्कारा वर्ण्यन्ते। मण्डपस्य प्रमाणेन श्रेष्ठां द्वारशोभां कुर्यात्। दण्डप्रमाणेन द्वारशाला भविष्यति। द्वारप्रसादः सदनस्याकारप्रमाणो भवेत्। श्रेष्ठद्वारहर्म्यं मालिकाकारं कुर्यात्। द्वारगोपुरं शालाया आकारप्रमाणं कुर्यात्, अथवा द्वारशालातो द्वारगोपुरपर्यन्तं, शालामाकारप्रमाणेन कल्पनां कुर्यात्। द्वारशोभा एक-द्वि-त्रि भवनानां सर्वालङ्कारैः सहिता भवति। प्रत्येकमुखसमीपे महानासी भवति, पार्श्वे वंशनासिका भवति। स्वस्तिकाकृतिर्लघुनासिकोपर्युक्तानुसारं भवेत्। द्विस्तूपिना सह लुपाकारं शिखरं भवेत्, मण्डपप्रमाणेन वा शिखरं भवेत् तद् गोपुरं श्रीकान्तं कथ्यते। शीर्षं शालाया आकारस्य भवति। पुरतो मुखेनसमीपे, पृष्ठे वा षण्नासिका भवन्ति। पार्श्वे वंशनासी स्तूपिद्वयं चभवति। आभ्यान्तरं प्रति स्तम्भ उत्तरं प्रति वा द्वारशोभा-गोपुरमतिक्रान्तं कथ्यते। प्रत्येकमुखसमीपे षण्नासिकाः, पार्श्वं प्रति च पार्श्वनासिका भवति। शिखरं सभाकारं भवति, तत् स्कन्दकान्तं वा विजयं कथ्यते। एवं सर्वदा त्रिप्रकारस्य द्वारशोभायाः कल्पनां कुर्यात्। प्रत्येकमुखसमीपे वर्गाकारस्यार्धकोटि-आकारस्य महानासी भवति। महानासेराकारस्य पञ्जरं भवेत्। कोटि-धनुषः, अर्धकोटि ï अर्ध धनुषाकारः वक्राकारः। शीर्षं शालाकारं भवति। विषमः(त्रि)संख्यायाः स्तूप्या सह, विशालां वा द्वारशालां विशालालयः कथ्यते। अर्धकोटिभिः सहस्रैरङ्गैर्युक्ता भद्रनासिका पार्श्वे भवेत्, पार्श्वे वंशनाशी भवति। विषमया स्तूप्या सह भविष्यति। अल्पनासी प्रत्येकस्तम्भे भवति। सर्वावयवसमन्वितैतादृशी द्वारशाला विशेषरूपेण विप्रतीकान्तालंकारः कथ्यते। पूर्वानुसारं परन्तु भवनस्य परितो दिक्षु भद्रं भवेत्। चतुर्महानासीयुक्तः, शीर्षेण समीपे भद्रेण सहाभ्यान्तरं प्रति स्तम्भाः, तेन सह वा विषम(त्रि)स्तूप्या सह द्वारशालायास्तृतीयः प्रकारः दर्शितः, द्वारप्रसादो वर्ण्यते। आभ्यान्तरस्य स्तम्भाः, उत्तरयुक्तमण्डपाद्यलंकारेण विभूषितो भवति। द्वारस्य स्थाने द्वारस्य सर्वाङ्गैः सहितं भद्रेण सह द्वारं भवति। शालायाः पूर्व पश्चिमतो वा भद्रेण सह भद्रनासिका भवति, नानाप्रकारस्याधिष्ठानं, स्तम्भाः, वेदिका जालतोरणं च भवेत्। आभ्यान्तरे स्तम्भाः, उत्तरं प्रति मध्यभागे तोरणं भवति, पार्श्वं प्रति दण्डप्रमाणेन मुखं भवति। क्षुद्रनासिकयालंकृता भवति। शिखरं शालाकारं भवति। जालकादिभूषितं च। एतादृशो केशाविशालालंकारो भवति। भवनोर्ध्वमुपर्युक्तानुसारं पार्श्वं प्रति

---

३३० का.शि.४५.६४ तः १०३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

महानासस्यो भवन्ति। विषम(त्रि)स्तूप्या सह द्वारप्रसादो भाप्रमाणेन शीर्षं भवति। स्वस्तिकाकृतिप्रमाणेन नासिका भवति। स्तम्भा उत्तरे, तैः सह समा विषमा वा स्तूपिर्भवति। कूटस्य शिखरं नास्या सह भवति। नास्यां विषमसंख्यायाः स्तूपयो भवन्ति, कूटादिभवनस्यालंकाराणां पूर्ववत् कल्पनां कुर्यात्। पुरतो पुष्ठे च नासी भवति। विस्तारोंऽशद्वयस्य, तस्य निर्गमनं भवेत्। शिखरः शालाकारः भवति, स्तूपिकाष्टकोणाः भविष्यति। शालाया निर्गमनेन सह नानालंकारैः सहितं नानाप्रकारस्याधिष्ठानं, स्तम्भाः, तथैवोपपीठं भविष्यति। द्वारहर्म्यस्य त्रिप्रकारा दर्शिताः। द्वारगोपुरस्य लक्षणं वर्ण्यते।। चतुर्दिक्षु भद्रयुक्तं, आभ्यान्तरे स्तम्भा उत्तरश्च तेन सह, शालाया आकार प्रमाणेन शिखरं भवति। प्रत्येकस्य मुखसमीपे महानासी, पार्श्वे महानासी, प्रत्येकस्तंभेऽल्पनासी भवति। द्वारगोपुरं मात्रादण्डनाम्ना प्रसिद्धमस्ति। इदानीं श्रीविशालं वर्ण्यते। पूर्वानुसारं भवन-विभागो भवति। तलादूर्ध्वपर्यन्तं न्यूनं-न्यूनं भवति। सभाकारप्रमाणेन, शालाकारप्रमाणेन वा शिखरं भवेत्। नानाप्रकारस्याधिष्ठानं, स्तम्भाः, वेदिकादिनालंकृतो भवति। चतुर्दिक्षु महानासी भवति। उपदिक्षु क्षुद्रनासिका भवति। एतादृशं श्रीविशालगोपुरं भवति। चतुर्भुजं वर्ण्यते। भवन-विभागानुसारं भवति। मध्यभागे गजयुक्तेनैकभद्रेण सह नानाप्रकाराणां स्तम्भाः, वेदिकादिनालंकृतं भविष्यति। सभाकारानुसारं शालाकारानुसारं वा शिखरयुक्तं, प्रत्येक-मुखसमीपे महानासी, पार्श्वं प्रति द्वे द्वे नासिका युक्तं भवति। आभ्यान्तरं प्रति स्तम्भाः उत्तरेण सह वा प्रत्येकभवनोपरि प्रस्तरो भवति। आभ्यान्तरं प्रति सोपानानि भवन्ति, तस्य मध्ये गजमूर्तिर्भवति। एतादृशं चतुर्भुजं भवति। एतादृशस्य द्वारगोपुरस्य त्रिप्रकारा भवन्ति। अलिन्दो भित्तिश्च तलभवनोपर्येकसमानरूपेण भागस्य भवति। अनुकूलं प्रस्तरः सर्वावयवैः सहालिन्देन शालाकारानुसारं सभा मालिकाकारानुसारं वा यद् यद् द्वारसमीपे (गोपुरसमीपे) यद् यदनुकूलं भवति, तद् तदाकारं तत्र रचयेत्। बाह्यं प्रति स्तम्भेषु भित्यां वा स्तम्भाः, तथैव गर्भगृहं, भित्तिर्वा पूर्वानुसारं रचयेत्। अलिन्दो हारान्तरं भित्तिश्च नास्ति, एतादृशः स्तम्भः, प्रस्तरस्तस्यपोरि भवेत्, यावत् भवन पर्यन्तं गोपानादि सुशोभनं कुर्यात्। कूट-कोष्ठाद्यलंकारोऽपि यावदूर्ध्व भवनपर्यन्तं कुर्यात्। भवनस्यालंकारो गलपर्यन्तं भविष्यति। शिखरो दण्डानुसारं शालाकारप्रमाणयुक्तो वा भवेत, तर्हि तं शिखरं शालाकारं कथ्यते। लुपायाः प्रयोगं कृत्वा, आयताकारं शिखरं रचयेत् तर्हि तत् सभाकारं (शिखरं) कथ्यते। त्रिविष्टिना मण्डपेन प्रस्तरमाच्छादितं भवति, तन्मालिकाकृति कथ्यते।[३३१]

---

३३१ का.शि.४५.१०४ तः १४४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मूलप्रासादस्य प्रकारः विकल्प आभासश्च छन्दः जातिः

| प्रकाराः | १ | २ | ३ | १ | २ | ३ | १ | २ | ३ |
|---|---|---|---|---|---|---|---|---|---|
| | गोपुरस्योच्चता हस्ताः | | | | | | | | |
| द्वारशोभा | २ | ३ | ४ | ३ | ४ | ५ | ४ | ५ | ६ |
| द्वारशाला | ५ | ६ | ७ | ६ | ७ | ८ | ७ | ८ | ९ |
| द्वारप्रसादः | ८ | ९ | १० | ९ | १० | ११ | १० | ११ | १२ |
| द्वारहर्म्यं | ११ | १२ | १३ | १२ | १३ | १४ | १३ | १४ | १५ |
| द्वारगोपुरं | १४ | १५ | १६ | १५ | १६ | १७ | १६ | १७ | १८ |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# चतुर्थप्रकरणम्

## काश्यपशिल्पग्रन्थानुसारेण मूर्तिनिर्माणविषयस्याध्ययनम् ।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# चतुर्थप्रकरणम्

## काश्यपशिल्पग्रन्थानुसारेण मूर्तिनिर्माणविषयस्याध्ययनम्।

### परिवारदेवता:

काश्यपशिल्पे प्रथमं विशेषत: सम्पूर्ण: परिवार-विधिस्तथा अष्ट-षोडश-द्वात्रिंशत् - परिवारदेवता अनुक्रमेण दर्शिता:। अन्तर्हारेषु अष्ट परिवारदेवता भवन्ति। षोडश परिवारदेवता भवन्ति, तर्हि मध्यहारपर्यन्तं तासां योजना क्रियते। द्वात्रिंशत् परिवारदेवता भवन्ति, तर्हि चतुर्थप्राकारपर्यन्तं देवतानां योजना भवेत्।[३३२] प्राकारस्य मध्ये प्राकारस्य भित्तेराश्रयाद् वैता देवता भवन्ति।

मूलप्रासादेन सह सर्वभूमेर्दीर्घता-विस्तारमायातं कृत्वा, तस्य नवभागान् कुर्यात्, तस्य मध्यभागे मूलप्रासादो भवति। एवं कृते मूलप्रासादस्य देवतार्धदृष्टेर्भागात् पूर्वं प्रति क्रमेण परिवारदेवता भवन्ति। पूर्वं प्रति नन्दे: स्थापना, आग्नेयदिशायामग्निर्भवेत्, दक्षिणदिशायामग्निदुग्ध: (?) दक्षिणदिशायां सप्तमातरो वा भवन्ति। दक्षिण-दिशायां वीरभद्रो गणेशो वा भवेत्, एकैव मूर्तिर्भवति चेत्, दक्षिणे नैऋत्ये वा विघ्नविनायको गणेशो भवति। कुमार: कार्त्तिकेयस्य पश्चिमदिशायां, वायव्यदिशायां ज्येष्ठागौर्य्या मूर्ते: स्थापनां कुर्यात्। उत्तरं

---

३३२ का.शि.४६.१ त: ३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तत्र कात्यायनी भवेत्। ईशानकोणे सूर्यस्य मूर्तिर्भवेत्, अथवा तस्य प्रतिमापीठं भवेत्। प्रतिमालयं गृहेण सह कुर्वीत, अथवा पीठं चेत्, तद् गृहरहितं भवेत्। इन्द्रस्य दिक् पश्चिमे, आग्नेयदिशायामीशान्यां वा स्थापिता मूर्तिः पश्चिमाभिमुखा भवति। दक्षिण-पूर्व-वायव्यादिदिक्षु स्थापिता मूर्तिः पूर्वाभिमुखा भवति। विष्णोर्मुखं पूर्वदिशायाम्, उत्तरं प्रति दुर्गा भविष्यति, तस्या मुखं दक्षिणं प्रति भवेत्। सौम्यमुद्रायुक्ताः सप्तमातरो यद्युपदिक्षु भवन्ति, तासां मुखं पश्चिमं प्रति भवेत्।[३३३] सप्तमातृकानां वामतः स्थापितस्य विघ्नहर्तुर्मुखं पूर्वं प्रति भवेत्।

प्रथम-द्वितीय-तृतीयप्राकार-भित्त्यां चण्डेश्वरस्य देवालयो भवति। (शिल्परत्नानुसारं चण्डेश्वरस्य मुखं दक्षिणं वा पश्चिमदिशं प्रति भवति।) बलिपीठस्य पुरत-स्त्रिदण्डस्यान्तरोपरि नन्देः स्थानं भवति, अथवा सार्धत्रिदण्डस्यान्तरे भवति। द्वयोर्मध्यभागस्य सार्धत्रिदण्डस्य मध्यान्तरस्याष्टभागाः क्रियन्ते चेत्, नन्देः स्थानं बलिपीठस्य पुरतो नवप्रकारेण भवति। (अत्र दण्डस्यार्थो मूलप्रासादस्य विस्तारः स्वीकृतोऽस्ति।) (वृत्तपीठस्यार्थो बलिपीठं स्वीकृतोऽस्ति)[३३४] एवं अष्ट परिवारदेवतानां वर्णनमभवत्।

इदानीं षोडश परिवारदेवतानां वर्णनम् । क्षेत्रस्य पञ्चविंशतिभागान् कृत्वा, इन्द्रभागात् पूर्वदिशायां प्रत्यनुक्रमेण इन्द्रः-अश्विनौ-अग्निः-पितरः- यमः-रोहिणी-नैऋतिरप्सरोगणः। वरुणः-ऋषिः-वायुः-रुद्रः-चन्द्रः-क्षेत्रपालः-शंकरः-सूर्यः -एते मूलप्रासादं पश्यन्ति। तथैव प्रकारेण प्रदक्षिणाक्रमेण स्थापनं कुर्यात्। कोणेषु स्थितानां, उपदिक्षु युक्तानां, देवानां मुखं पूर्वं प्रति पश्चिमं प्रति वा भवेत्।[३३५] पश्चिमं प्रति देवानां पूर्वाभिमुखं, दक्षिणं प्रति देवानामुत्तराभिमुखं योजनं कुर्यात्। एवं षोडश परिवारदेवानां क्रमो दर्शितः।

---

३३३ का.शि.४६.४ तः ११
३३४ का.शि.४६.१२-१३
३३५ का.शि.४६.१४ तः १७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वारदेवानां क्रमो दर्श्यते। चतुर्थप्राकारपर्यन्तं क्षेत्रस्यकाशीतिविभागान् कृत्वा, बाहः प्रति चतुःषष्टिभागेषु पूर्वं प्रत्यनुक्रमेण अनन्तः-अभयः-भयः-बृहत्सूक्ष्मः- गौरी-विष्णुः-ब्रह्मा-शंकरः-भृगुः-शंकरः-कौशिकः-एकाक्षः-गणेशः-सरस्वती-लक्ष्मीः-एकरुद्रः-पशुपतिः-अष्टवसु-महादेवः-त्रिमूर्तिर्वा-कुबेरः-रुद्रः-कालाग्निः -श्रीकण्ठः-नागदेवता-भीमः-पृथ्वी-शिखण्डी-मरुत्-अत्रिः-शनैश्चरः- एते द्वात्रिंशत् परिवारदेवता भवन्ति। अथवा पृथ्व्याः स्थाने गौर्य्याः स्थापनां, गौर्य्याः स्थाने पृथ्वीं वा स्थापयेत्, अवशिष्टदेवानां स्थानं पूर्वानुसारं भविष्यति। सर्वदेवानां मुखं विशेषत आभ्यान्तरं प्रति, मूलप्रासादस्य प्रति प्रत्यावर्तितं भवेत्। गौर्य्याः कृते मालिकाया विमानस्य वा कल्पनां कुर्यात्। अन्यदेवानां कृते विमानं मण्डपो वा भवेत् । मूलप्रासादस्य पादोनगुणितं, अर्ध-सपादगुणितं गर्भगृहं यावत्, गर्भगृहस्यार्ध-पादोनगुणितं मानं त्रि-चत्वार-पञ्च हस्ता वा परिवारदेवानां देवालयो भवेत्। आभासप्रकारस्य प्रासाद एवंमानेन (परिवारदेवालयं) रचयेत्। शान्तिकादिप्रकारे मूलप्रसादानुसारं (परिवार)देवालयस्य कृते सुन्दरं सदनं कुर्यात्। पृथग्रीत्या रचयति चेत्, सदनं विपत्तिकारकं भवति।[३३६] त्रिभवन-मण्डपस्याकारस्य चतुर्द्वारयुक्तं नन्देर्गृहं कुर्यात्। अवशिष्टपरिवारदेवानां तेषामनुकूलं गुहं कुर्यात्। परिवारदेवानां गृहस्य चेत्थं ज्ञानं दर्शितम्।

इदानीं प्रतिमाया लक्षणमुच्यते। सकलमूर्तेः कृते, मूलप्रासादस्य मूर्तेः कृते, यद् द्वारे गर्भगृहे च मानं स्वीकृतं, तस्य मानानुसारं परिवारदेवतानां देवालयानां कृते मानं स्वीकुर्यात्। सर्वपरिवारदेवता उत्थिता उपविष्टाश्च भवन्ति। जातिप्रकारस्य प्रासादे द्वात्रिंशत्परिवारदेवतानां योजनां कुर्यात्। छन्दप्रकारस्य प्रासादाय षोडश परिवारदेवता भवन्ति । अवशिष्टा आभासादिप्रसादेऽष्टपरिवारदेवता भवन्ति। सर्वप्रकाराणां देवालये सर्वप्रकाराणामष्ट-षोडश- द्वात्रिंशद् वा देवतानां कल्पनां कुर्यात्।[३३७]

---

३३६ का.शि.४६.१८ तः २९
३३७ का.शि.४६.३० तः ३४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नन्दीलक्षणम्-

जात्यादिप्रकारस्य प्रसादेषु परिवारदेवतानां मानं प्रतिमालक्षणानुसारं भविष्यति। परिवारदेवानां मध्ये प्रथमवारं नन्देर्लक्षणं दर्श्यते। उच्चतायाः पञ्चदशभागाः क्रियन्ते, तदैकांशस्याङ्गुलं भवति, एतादृशं चत्वारिंशदङ्गुलितः पीठस्य पृष्ठभागपर्यन्तं नन्दे- दीर्घता भवति। (नन्देरुच्चता पञ्चदशाङ्गुल्यो दीर्घता चत्वारिंशदङ्गुल्यो वा भवति) मस्तकतो ग्रीवापर्यन्तं सप्ताङ्गुलस्यांतरं दर्शयति। ततो ग्रीवाया उच्चताष्टांशं सतो वक्षःस्थलस्यान्तपर्यन्तं षोडशाङ्गुल्यो भवन्ति। चत्वारि पादतो जङ्गाया दीर्घता षडङ्गुल्यो दर्शिता। जानोर्मानं द्विस्तथा जङ्घाया मानं षडङ्गुलं भवति। खुरस्य मानमङ्गुलद्वयं, तस्योच्चताङ्गुलद्वयं भवति। शृङ्गयोर्मध्य अन्तरमष्टांशं तथा शृङ्गयोरुच्चता चतुर्थांशा भवति। शृङ्गयोर्मूलस्योच्चता चत्वारोऽङ्गुला दर्शयति। शृङ्गयोर्विस्तारो मूलात् क्रमेण न्यूनं कुर्वन् पुरतो भागः पञ्चाङ्गुलानां भवेत्। शृङ्गयोर्मध्यभागं किञ्चिद् वक्रं स्थापयेत्। मस्तकस्य विस्तारो नवांशः, मुखस्य विस्तारः पञ्चाङ्गुलो भवेत्। मुखस्य स्थूलता पञ्चाङ्गुला, नेत्रमेकाङ्गुलस्य भविष्यति, नेत्रयोर्मध्ये कपालस्योच्चता चत्वारोऽंशा दर्शिता। नेत्रात् कर्णसीमापर्यन्तं दीर्घता पञ्चांशस्य भविष्यति। कर्णमूलस्य विस्तारोऽङ्गुलद्वयं भविष्यति। कर्णस्य मध्यभागस्य विस्तारश्चतुरङ्गुलः, पुरतो विस्तार एकाङ्गुलस्य। कर्णस्य स्थूलतार्धाङ्गुला दर्शयति। नासिकाया दीर्घता सार्धैकङ्गुलस्तथा विस्तार एकाङ्गुलो दर्शयति। अगाधतैकाङ्गुला प्रोक्ता, नासिकाया उच्चतैकाङ्गुला कथिता। मुखस्य दीर्घता पञ्चाङ्गुला, अधोष्ठस्याङ्गुलद्वयं, ऊर्ध्वोष्ठस्य त्रि-अङ्गुला- एवं युक्त्यानुक्रमेण मानं स्वीकुर्यात्। जिह्वायाः दीर्घता, विस्तारः, स्थूलता चानुक्रमेण त्रि-द्वि-एक-अङ्गुलं दर्शयति। ग्रीवाया अधोभागस्य विस्तारो दश अंशा भविष्यति। तस्य मूलस्य विस्तारो द्वादशाङ्गुलस्य भविष्यति। ग्रीवाया ऊर्ध्वभागस्य मूलस्य पृष्ठभागस्य विस्तारोऽष्टाङ्गुलस्य भविष्यति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

डङ्गुल:, ककुदस्योच्चता चत्वारोऽङ्गुला:, विस्तार: षडङ्गुलस्यास्ति। ग्रीवाया: पुरत: स्थूलता सार्धद्वि-अङ्गुलं प्रोक्ता। शरीरस्य मध्यभागस्य विस्तारश्चतुर्विंशत्यङ्गुल्यो भविष्यति। पृष्ठभागस्य विस्तारो द्वादशांशं यावद् भवेत्। पूर्वं प्रति वा पुरोभागं प्रति पादस्य जङ्घाया मूलस्य विस्तार: पञ्चाङ्गुलस्य भविष्यति। तस्य पुरोभागस्य चत्वारोऽङ्गुल्यस्तथा जङ्घाया मूलस्यापि चत्वारोऽङ्गुल्यो भविष्यति। जङ्घाया: पुरतो विस्तारस्त्रि-अङ्गुलस्य भविष्यति, खुरस्य विस्तार: सार्धत्रि-अंशा:, पश्चिमस्य वा पृष्ठपादस्य जङ्घामूलाद् विस्तारश्चतुरङ्गुलक्रमेण सूक्ष्मं कुर्यात्। पुरतो विस्तारोऽष्टाङ्गुल:, मूलस्य विस्तार: षडङ्गुल:, जङ्घाया: पुरतो विस्तारश्चत्वारोऽङ्गुल्य:, खुरस्य दीर्घता त्रि-अङ्गुला भवति। पुच्छस्य मूलसमीपे विस्तारस्त्रि-अङ्गुला पुरतो भागस्य समीपविस्तार: सार्धैकाङ्गुलो भवति। पुच्छस्य दीर्घता, जङ्घाया: पुरत: प्रति सीमापर्यन्तं सत्यन्तिमकेशानां गुच्छपर्यन्तं भवेत्। अन्तिमसीमापर्यन्तं विस्तारश्चत्वारोऽङ्गुल्यो भविष्यति। केशानां भागो वा मूलं पुरत: (अग्रत:) तस्य विस्तार एकांश: सन् केशानां दीर्घता चत्वारोऽङ्गुल्यो भवेत्। वृषाण्डस्य दीर्घता वा विस्तार: सर्वतस्त्रि-अङ्गुलो भवेत्। तस्य स्थूलताङ्गुलद्वयं, अवशिष्टभागस्य दीर्घता चत्वारोऽङ्गुल्यो भविष्यति। उच्चतायामेकाङ्गुलं यावत् स्थूलता भवति। पद्मपीठस्य भद्रपीठस्य वोपर्युत्थित: शयानो वा दर्शित:। सुवर्णस्य, ताम्रस्य लोहस्य वा नन्दीं कुर्यात्। (श्लोक: ५८,१/२ अशुद्ध:।) दीर्घता, विस्तार:, स्थूलता, अगाधतादिकं किञ्चिन्मात्रायामपि न्यूनं न भवेत्। यदि विपरीतं करोति, तर्हि निकृष्टं फलं मिलति।[३३८]

अनललक्षणम्-

अनलेश्वरस्योत्तमदशतालोच्चतां कुर्यात्। मुखद्वयं, एकं वक्ष:स्थलं, नासिकाद्वयं, षडुदराणि च भवन्ति। तिस्रो मेखला:, त्रिपादा:, सप्त जिह्वा:, दक्षिणमुखे चतस्रो जिह्वा:, वाममुखे तिस्रो जिह्वा भवन्ति। मण्डूकोपर्युपविष्ट:, चतु:शृङ्गयुक्त:, जटामुकुटेनालंकृतो भवति।

३३८ का.शि.४६.३५ त: ६१

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

ति त्रयो हस्ता भवन्ति। उषा-शक्तिः-अग्निश्च तथैव प्रमाणेन स्रुक्, स्रुवा (?) दक्षिणहस्तेष्वधस्तादूर्ध्वं भवति। (शक्तिः, अन्नं, स्रुक्, स्रुवा- दक्षिणं प्रति चतुर्हस्तेषु धारणं क्रियते। वामहस्ते विशेरूपेण तोमरं, व्यजनम्, घृतभाण्डारं च भवति। शरीरं सुवर्णवद् प्रकाशमानं दर्शितम्। नेत्रे मृदुवर्णस्य भवति। मस्तकस्य पृष्ठे प्रभामण्डलं तथा पद्मपीठस्योर्युत्थितो भवति, कौशेयवस्त्रं धारितः- एतादृशोऽनलेश्वरस्य कल्पनां कुर्यात्।[३३९]

वीरभद्रो विनायको वा

अनलस्य वामतो दक्षिणतो वानुक्रमेण वीरभद्रो विनायको वा भवेत्। वीरभद्रो वा गणेशस्तस्य चत्वारो हस्ताः, त्रिनेत्राणि जटामुकुटेन सुशोभितो भवति। सर्वालंकारयुक्तः, श्वेतवर्णस्य वृषभाकृतिध्वजो भवति। शूल-अभयमुद्रायुक्तं वामहस्तद्वयं भवति। वटवृक्षस्याधः, श्वेतकमलोपर्युपविष्टः, चतुर्मुखः, चतुर्हस्तः, सुवर्णवर्णो भवति।[३४०]

सप्तमातृकालक्षणम्

ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-वाराही-इन्द्राणी-चामुण्डा- सप्तमातरः सन्ति।

ब्राह्मी

दक्षिणहस्ते शूलम्, अभयमुद्रायुक्तो वामहस्तः, वरदमुद्रा तथाक्षमालिका धारणशीला, शतपुष्पदलानां कमलस्यासन उपविष्टा, हंसवाहनेन सुशोभिता, दर्शनीया, जटा-मुकुटेन युक्ता, पीत-कौशेयवस्त्रं धारिता, सुन्दरा, ब्रह्मवृक्षस्य समीपं , ब्रह्माणी एवंप्रकारेण वर्णिता।[३४१]

ईश्वरी

---

३३९ का.शि.४६.६२ तः ६७-१/२)
३४० का.शि.४६.६८ तः ७१
३४१ का.शि.४६.७२-७३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...तीवरक्तवर्णयुक्ता, दक्षिण हस्ते शूल-अभयमुद्रायुक्ता, वामहस्ते वरदमुद्रायां जपमाला धारयन्ती, जटामुकुटयुक्ता, शंकरेण सदृशा भासमाना- एतादृशी ईश्वरी कथिता।[३४२]

कौमारी

चत्वारो हस्ता:, त्रिनेत्रं तथा रक्तवस्त्रं धारयन्ती, सर्वाभूषणवती, रत्नै: सुशोभिता, हस्तै: शक्तिना कुक्कुटेन युक्ता , वरद-अभयमुद्रायुक्ता, मयूराङ्कितध्वजयुता, तथा औदुम्बरस्य वृक्षस्याध: स्थिता- इयं कौमारी वर्तते।[३४३]

वैष्णवी

हस्तै: शङ्खं, चक्रं च धारयन्ती, वरदाभयमुद्रायुक्ता, सुन्दरस्तनयुता, सुन्दर-मुखाकृति:, श्यामवर्णस्य सुन्दर-नेत्रयुक्ता, पीत-कौशेयवस्त्रं धारयन्ती, किरिट-मुकुटधारणशीला, राजवृक्षस्याश्रयेण स्थिता, गरुडयुक्तध्वजवती, विष्णोरलंकारैरलङ्कृता, एतादृशी वैष्णवी देवी मता।[३४४]

वाराही

करञ्जवृक्षस्य समीपे, माहिषध्वजायुता, चत्वारो हस्ता:, त्रिनेत्रं, सर्वाभूषणै: सुशोभिता, किरीट-मुकुटं धारयन्ती, विद्रुमसमानमुखयुक्ता, दक्षिणतो हस्तैके अङ्कुशं, द्वितीयहस्ते अभयमुद्रा, वामहस्ते वरदमुद्रा, शक्तिं द्वितीयहस्ते धारयन्ती - एतादृशी वाराही भवति।[३४५]

---

३४२ का.शि.४६.७४-७५
३४३ का.शि.४६.७६-७७
३४४ का.शि.४६.७८-७९
३४५ का.शि.४६.८०-८१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कल्पवृक्षस्याधो गजध्वजयुता, गजोपर्युपविष्टा - ईदृशी इन्द्राणी भवति। (अत्र प्रत्येकमूर्तेः समीपे विभिन्नप्राणेर्ध्वजः कथितः। तस्य ध्वजस्यार्थश्चिह्नं लाञ्छनं वा भवति।[346]

चामुण्डा

चत्वारो हस्ताः, त्रिनेत्रम्, रक्तवर्णोर्ध्वकेशयुक्ता, कपालं शूलं च धारयन्ती, वरद-अभयहस्तयुक्ता भवति। नरमुण्डस्य मालां धारयन्ती, पद्मपीठोपर्युपविष्टा, व्याघ्रचर्माम्बरधरा, स्तनभागो नागेन्द्राभिराच्छादितः, दीर्घदंष्ट्रायुक्ता, करालवदना, वटवृक्षं समाश्रिता - ईदृशी चामुण्डा भवति।

सर्वमातृ ृणाम् दक्षिणपादो वलितः, वामपादोऽधो लम्बितः स्यात् - एतादृश्युपविष्टा भवति ।एवं सप्तमातृकाणां लक्षणं दर्शितम्।[347]

विनायकलक्षणम्

विनायकस्य लक्षणं वर्ण्यते। पादतः शिरःपर्यन्तं चतुषष्टि-अंशा उच्चता भवति। मस्तकसीमाया अन्तररङ्गुलं दर्शितम्। अथवा (मस्तकं) (अक्षि)सूत्रस्याभ्यन्तरपर्यन्तं चतस्रोऽङ्गुल्योऽन्तरं भवति। ऊरुः सार्धषड्-अंशस्य भवति। जानुदीर्घता त्रि-अङ्गुला, जङ्घापि सार्धषड्-अंशदीर्घा, पाद-तलस्योच्चता त्रि-अंशा भवति। अङ्गुष्ठस्य सीमापर्यन्तं पादतलस्य दीर्घता सप्त-अङ्गुला भवति। अङ्गुष्ठस्य दीर्घता अंशद्वयं, कनिष्ठ-अङ्गुलेन सार्धैकांशः, तर्जनीतः कनिष्ठ-अङ्गुलीपर्यन्तं प्रत्येकाङ्गुलमुन्नतं कुर्यात्। हस्तस्य दीर्घता त्रयोदशाङ्गुला, प्रकोष्ठस्य दीर्घता नवाङ्गुला, मध्याङ्गुलेर्दीर्घता त्रि-अंशा, तर्जनी-

---

३४६ का.शि.४६.८२
३४७ का.शि.४६ .८३-८४-८५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शतियवा भविष्यति। कनिष्ठ-अङ्गुलस्य तथाङ्गुष्ठस्य दीर्घता सप्तदशयवा भविष्यति। अङ्गुष्ठात् कनिष्ठ-अङ्गुलिपर्यन्तं विस्तारः १२, ८, ९, ८, ७ यवा दर्शितः। तस्य विस्तारस्य पादोनगुणितं नखस्य विस्तारः। नखाग्रस्य विस्तारः पादोनगुणितं व्यासस्य दीर्घवृत्तानुसारं भविष्यति। प्रकोष्ठस्य (?) विस्तारश्चतुरङ्गुलः, हस्तस्य विस्तारः सार्धषडाङ्गुलः, हस्तमूलस्य विस्तारो हस्तकोष्ठस्याधो एकाङ्गुलः, अन्तोपरि अष्ट-अंशा भविष्यति। तस्याधो हस्तस्य विस्तारः सप्ताङ्गुलः, दण्डस्य मध्यभागस्य विस्तारो दशाङ्गुलो भवेत्। हस्तस्य मूलं षडङ्गुलं, तस्य दीर्घता द्वाविंशतिरंशा भविष्यति। हस्तस्य विस्तारस्तस्याग्रपर्यन्तं क्रमेण सार्धैकाङ्गुलं न्यूनं कुर्यात्। हस्तस्य मध्ये छिद्रद्वयं भविष्यति। वामदन्तस्य दीर्घता चतुरङ्गुला भवति, दक्षिणदन्तस्य केवलं मूलं भवति, वामदन्तस्य मूलं दर्शितम्। अधरोष्ठस्याङ्गुलद्वयं, नेत्रस्य दीर्घता विस्तारश्च षड् यवा दर्शितः, ग्रीवाया विस्तारः पञ्चाङ्गुलः, तस्या उच्चता तथैव भविष्यति। कर्णस्य दीर्घता मूलसमीपेऽङ्गुलद्वयं भवति। तस्य मूलसमीपे स्थूलतार्धाङ्गुला भवति। गजस्य मुखसदृशं गणेशस्य मुखं भवति। द्विहस्तस्य मध्य अन्तरं द्वात्रिंशदङ्गुलयो भवति। कक्षयोरन्तरं १९ अङ्गुलानि भवति। स्तनस्य मध्य अन्तरं दशाङ्गुलम्, हिक्काया मध्य अन्तरं विंशतिरङ्गुलयो भवति। स्तनस्य मध्यभागस्य विस्तारो यवद्वयं, स्तनस्य वृत्ताकार-व्यासो वाङ्गुलद्वयं भविष्यति। स्तनस्याधोभागस्य विस्तारः पञ्चदशाङ्गुलयो दर्शितः। उदरस्य मध्यविस्तारं द्वाविंशतिरङ्गुलयो दर्शयति। नाभेरगाधताया विस्तारः सार्धद्विरङ्गुलं भवति। लिङ्गस्य दीर्घता त्रिरङ्गुला, सार्धैकाङ्गुलो विस्तारो भविष्यति। अण्डस्य दीर्घता तथा विस्तारस्त्रि-अङ्गुलयः। ऊर्वोर्विस्तारो द्वादश अंशाः, जानोर्विस्तारो नवांशाः, जङ्घाया मूलस्य विस्तारः सप्ताङ्गुलः दर्शितः। जङ्घाया अग्रस्य विस्तारः सार्धद्वि-अङ्गुलः, जङ्घाया अग्रपर्यन्तं दीर्घता सार्धषडाङ्गुला। जानोर्दीर्घता विस्तारश्च त्रि-अङ्गुलो दर्शितः। अङ्गुष्ठात् कनिष्ठाङ्गुलिपर्यन्तं, अङ्गुलीनां दीर्घता क्रमेण सार्धद्वादश, षड्, अष्ट, पञ्च, षड् यवा भवति। तस्य विस्तारः पादाङ्गुलस्य यवद्वयं भविष्यति। नखस्य विस्तारोऽङ्गुलस्य विस्तारं पादोनगुणिते तस्यार्धव्यासस्य वृत्ताकाराकारस्य

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

उत्थितौ, पद्म-पीठोपरि वोपविष्टः, दक्षिणहस्ते दन्तः, वामहस्ते कापिण्डकः (पाश?), शुण्डे मोदकं गृहीतः, दक्षिणहस्तेऽङ्कुशं , वामहस्ते पाशः, नागो वा लघु-अक्षमाला भविष्यति। त्रिनेत्रः, सुवर्णववर्णः, कौशेयवस्त्रधारी भवति। उत्थितो गणेशो भवति, तदा अभङ्गस्य समभङ्गस्य वा कल्पनां कुर्यात् । आसने उपविष्टश्चेद् वामपादो वलितः, दक्षिणपादश्चाधो लम्बितो भवति। विशेषतो शरीरं वामभागं प्रति नमितम्। नागो यज्ञोपवीतं भवेत्। किरीट-मुकुटधारी, करण्डमुकुटः, अथवा जटामुकुटधारितः, सर्वाभूषणयुतः, महाकायः, महोदरः एतादृशो विनायको दर्शितः।[३४८]

षण्मुखलक्षणम्

लक्षण-सम्पन्नां स्कन्दस्य मूर्तिं पञ्चतालमानेन कुर्यात्। हस्तद्वयं, चत्वारो हस्ताः, षड् हस्ताः, द्वादश हस्ता वा भविष्यन्ति। दक्षिणहस्ते शक्तिः-बाणः-खड्गः-चक्रं-प्रासश्च, वामहस्ते पिच्छः-खड्गः-काकूटकः-खेटकश्च, तथैव प्रमाणेन धनुः-दण्डः-हलश्च - इयं द्वादशहस्तयुक्ता स्कन्दमूर्तिः। षड्हस्तयुक्ते दक्षिणे खड्गद्वयं-शक्तिश्च भविष्यतः, त्रिषु हस्तेष्वनुक्रमेणाधस्तादूर्ध्वं खेटकं-अक्षमाला-कुक्कुटश्च भविष्यति। (वामत एकहस्तेऽभयमुद्रा भविष्यति।) चतुर्हस्तयुक्तस्कन्दमूर्त्यां दक्षिणतो हस्तयोरेकहस्तेऽभयमुद्रा तथा द्वितीयहस्ते शक्तिर्धारिता, वामहस्ते कुक्कुटोऽक्षमाला च । द्विहस्तयुक्तमूर्तिस्तदा ï वामहस्ते कुक्कुटस्तथा दक्षिणहस्ते शक्तिर्धार्यते।[३४९]

ज्येष्ठादेव्या लक्षणम्

हस्तद्वयमग्निसमानवर्णा, अधरः दीर्घः, नासिका बृहत्युन्नता च भवति। स्तनभागो दीर्घः कटेर्वस्त्रं नीलवर्णस्य रक्तवर्णस्य वा भवति। दक्षिणहस्ते कमलं तथा वामहस्ते करकं भविष्यति। भद्रपीठस्योपरि, सुखासन उपविष्टा, पाददृयमधो लम्बितम्,

---

३४८ का.शि.४७.१ तः ३०
३४९ का.शि.४८,१ तः ५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ः सुशोभिता, काकध्वजा, अनुचरैः सहिता (मस्तकोपरि) तिलकान्विता। तस्या वामतो नन्दी वृषवाहनो वा भविष्यति। हस्तद्वययुक्ता मूर्तिः, दक्षिणहस्ते दण्डः, वामहस्ते सूचिधरा भविष्यति। दक्षिणपादो लम्बितः, वामपाद आसनोपरि वक्रो भवति। श्वेतवर्णा, भव्यशरीरा, सर्वाभूषणैर्भूषिता, करण्ड-मुकुटधारिणी, कौषेयवस्त्रं दधाना, दक्षिणतो वृषः, वामतोऽग्निः - एवं दर्शितम्।[३५०] उत्तमस्तनयुक्ता, युवतीप्रमाणाङ्गयुक्ता, सर्वप्रकाराभूषणानि धारयन्ती, कज्जलसमान- कृष्णवर्णा, रक्तवस्त्रैराभूषिता - ईदृशी ज्येष्ठा प्रोक्ता।

दुर्गालक्षणम्

दुर्गालक्षणं वर्णितं यथा- चत्वारो हस्ताः, नेत्रद्वयं, श्यामवर्णा, सौम्यदर्शना, पीताम्बरधारिणी, बृहत्स्तनजघनयुक्ता, करण्डमुकुटयुता तथा सर्वाभूषणैर्भूषिता, दक्षिणहस्तेऽभयमुद्रा, वामहस्ते कटकं धारयन्ती। ऊर्ध्वदक्षिणहस्ते चक्रं तथोर्ध्ववामहस्ते शङ्खं दधाना, पद्मपीठोपरि समपाद उत्थिता, समपादस्तना, नागेन्द्रबद्धस्तना, रक्तवर्णकञ्चुकीं धारयन्ती - ईदृशी दुर्गा उक्ता।[३५१]

विष्णोर्लक्षणम्

किरीट-मुकुट-कटिसूत्रादिना मण्डिता, पीतम्बरधरा, सौम्यमुद्रायुता, चतुर्हस्ता, विष्णो-मूर्तिर्भवति। (हस्तद्वययुक्ता मूर्तिर्भवति चेत्,) दक्षिणहस्तेऽभयमुद्रा, वामहस्ते कटकम्। (चतु-र्हस्तानां मूर्तिर्भवति चेत्,) वामहस्ते (अधस्तादूर्ध्वं प्रति) गदा तथा पद्मं, दक्षिणहस्ते शङ्खस्तथा चक्रं भवति। पद्मपीठोपरि स्थिता, सस्यश्यामवर्णा भवति। उपविष्टा वोत्थिता

---

३५० का.शि.४८.६ तः १२
३५१ का.शि.४८.१६ तः १८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

श्रिया सहिता, एकाकी वा मूर्तिर्भवति। एतादृशी विष्णुमूर्तिवर्णिता।[352]

इन्द्रः

एकं मुखं, हस्तद्वयं, जातिलिङ्गानुसारं वर्णो भवति। किञ्चिद् विकसितं कमलद्वयमूर्ध्वोत्थापितहस्तयोः, करण्ड-मुकुटं तथा सर्वाभूषणैः सुशोभितो भवति। दक्षिणहस्ते शक्तिस्तथा वामहस्तेऽङ्कुशो भवति, बृहदुदरं तथा ग्रीवा बृहती च भविष्यति। वामतश्चन्द्रो भवति, नेत्रद्वयं, सौम्यमुद्रा, सिंहासनारूढो गजोपरि वोपविष्टः- एतादृश इन्द्र प्रोक्तः।[353]

अश्विनौ

भद्रसिंहासन उपविष्टौ, विश्वस्य सुन्दर-रूपौ द्वावश्विनौ भवतः। द्वौऽपि दाडिम-पुष्पसमानौ ताम्रवर्णयुक्तौ, उपपीठे उपविष्टौ, पूर्णविकसितरक्तकमलानुकारिणे नेत्रे, हस्ते कमण्डलं धारितम्। नासत्यदस्त्रनामयुक्तौ, जटामुकुटधारिणौ, मालाभिराभूषणैर्भूषितौ, दक्षिणहस्तेऽभयमुद्रा, वामहस्ते पुस्तकं, पादद्वयं लम्बितम्, वामपाद आसने वक्रो भवति। शल्यचिकित्सकौ देवानां वैद्यौ । तस्यानुक्रमेण दक्षिणतो वामं प्रति चामरं धृत्वा धृतिर्वा संजीवन्युत्थिता भवति। पीठस्य पृष्ठं प्रति पीतस्य पिङ्गलवर्णस्य वा विशल्यकरणीनाम्न्योर्द्वे स्त्रियौ स्थितौ भवतः। वामं प्रति धन्वन्तरी तथैव प्रमाणेन वात्रेयो ऋषिर्भवति, अनुक्रमेण पीतवर्णौ रक्तवर्णौ कृष्णवस्त्रं धारयन्तौ, खड्ग-खेटकेन सह सर्वाभूषणैर्विभूषितौ - एतादृशावश्विनौ प्रोक्तौ ।[354]

पितरः

---

३५२ का.शि. ४८ .१९-२०-२१
३५३ का.शि.४८.२२ तः २५
३५४ का.शि.४८.२६ तः ३३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

बन्धनं कृताः, यज्ञोपवीतधारिणः, हस्तद्वयं, श्वेतवस्त्रं धारयन्तः, नागानामलङ्कारैः सहिताः, चन्द्रसमानप्रभायुक्तमुखाः, दीर्घमानाः, पितरः फलकाया भद्रपीठोपर्युपविष्टा भवन्ति। वामहस्ते, वामजानुनि, दक्षिणहस्तेन सूचिमुद्रां दर्शयन्ति।[355]

वैवस्वतो यमो वा

हस्तद्वयं, कृष्णवर्णः, खड्गः खेटकं च धारणं कृतमस्ति। दीर्घश्मश्रुयुक्तमुखं , रक्तवर्णस्याङ्गलेपः कृतोऽस्ति। रक्तवर्णस्य वस्त्रं धृतमस्ति। उग्रमुद्रायां, किरीट-मुकुटधारी। विकसिताङ्गारसमानरक्तनेत्रयुक्तः, भव्यमहिषोपर्युपविष्टो यमः भवति। वैवस्वतस्य पार्श्वे, तथैव समीपे द्वारस्य पार्श्वे उग्रमुद्रायां चित्रगुप्तः किन्नरो वा स्थितः। अनुक्रमेण कृष्णवर्णस्य श्यामवर्णस्य द्वावपि रक्तवर्णस्य वस्त्रं धारयन्ति। उग्रतेजोयुतौ तौ । द्वयोः पृष्ठे मृत्युः स्थितोऽस्ति।[356] नीलवर्णं रक्तप्रमाणेन रक्तवर्णस्य द्वौ चामरयुक्तौ शर्मधर्मनाम्नौ स्त्रियौ पुरतो भवतः । यमः सिहासने महिषोपरि वोपविष्टो दर्श्यते।

रोहिणीलक्षणम्

हस्तद्वयुता, करण्ड-मुकुटधारिता, रक्तवर्णा, सुन्दरी तथा सर्वाभूषणभूषिता । हस्ते नागः, श्वेतवस्त्रधृता, उपविष्टा स्थिता वा, ईदृशी सप्तसंख्यका रोहिणी भवति।[357]

निर्ऋतिः

निऋती नीलवर्णा, हस्तद्वययुता महाकाया भवति। दक्षिणहस्ते खड्गं, वामहस्ते खेटकं भवति। पीतवस्त्रधारिणी। करालमुखे दीर्घद्रंष्टायुक्ता, सर्वाभषणभूषिता। प्रेतोपर्युपविष्टा जगत्पालना, रक्तवर्णस्य केशयुक्ता, उपविष्टा स्थिता वा।[358]

---

३५५ का.शि.४८.३४ तः ३७
३५६ का.शि.४८.३८ तः ४१
३५७ का.शि.४८.४२ तः ४५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सुकान्तियुक्ता:, रक्तवर्णा:, दीर्घा: पुरत: कुण्डलिता: केशा:, नानाबन्धनसंयुक्ता:, नानापुष्पैरलङ्कृता:, सर्वा अप्सरस: काषेयवस्त्रधारिण्य:, पीन-जङ्घा-स्तन-पार्श्वभागयुता:। कृशकट्य:, सौम्यास्तथा स्मिताननाः, नानाङ्गलेपयुता:, भद्रपीठोपरि स्थिता:, समभङ्गयुता:, एवं सप्താप्सरसां समूहो भवति।[३५९]

वरुणस्य लक्षणम्

वरुण: श्वेतवर्णः, हस्तद्वयं, हस्ते पाश:, सर्वाभूषणैरलङ्कृत:, करण्ड-मुकुटं धारणं कृतमस्ति, पीतवस्त्रधारी, शान्तमुद्रायुतस्तथातिबलवान् दर्शित:। यज्ञोपवीतं धारणं कृतमस्ति। मकरोपर्युपविष्टो भवति।[३६०]

ऋषेर्लक्षणम्

ऋषि: पीतवर्णः, नानावर्णवस्त्रधारी, वृद्धः, हस्तद्वयं, शान्तमुद्रा, जटाजूटधारणं कृतमस्ति, हृदयसमीपे हस्ताञ्जलिस्तथा यज्ञोपवीतेन सह भवति। भस्मस्य त्रिपुण्डं, स्थितो भवति, दक्षिणहस्त एको दण्डस्तथा वामहस्ते छत्रं गृहीतं भवति। दण्डेन छत्रेण विनापि भवति, वामहस्तो ज्ञानमुद्रां दर्शयति, वामजानोरुपरि वामहस्त: स्थापितो भवति। भृगु-अगस्त्य-वशिष्ठ-गौतम-अङ्गीरस्-विश्वामित्र-भारद्वाजा:, एते सप्तऋषयो दर्शिता:।[३६१]

मरुल्लक्षणम्

---

३५८ का.शि.४८.४६-४८
३५९ का.शि.४८.४९-५२
३६० का.शि.४८.५३-५४
३६१ का.शि.४८.५४ त: ५८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

समाने नेत्रे, धूम्रसमाननीलवर्णः, दक्षिणहस्ते ध्वजस्तथा वामहस्ते दण्डो गृहीतोऽस्ति। नमनयुक्ते हस्ते, शबलाम्बरभूषितः, नानालङ्कारधारी। एतादृशो वायुरस्ति। तस्य केशाः प्रसारिता भवन्ति। शीघ्रं हि यात्रार्थं गन्तुमुत्सुकः, एतादृशः सिंहासने उपविष्टो भवति।[३६२]

रुद्रस्य लक्षणम्

चत्वारो हस्ताः, त्रिनेत्राणि, जटामुकुटेन भूषितः, कृष्णवर्णस्य वस्त्रं धारणं कृतमस्ति। सर्वं श्वेतवर्णस्य भवति। (सम्पूर्णं शरीरं श्वेतवर्णस्य भवति।) पद्मपीठोपयुपविष्टः, पादद्वयोपरि स्थितः (समस्थानकः) सर्वाभूषणैः सह, सर्वप्रकारपुष्पैरलङ्कृतोऽस्ति। दक्षिणद्विहस्तेष्वेको हस्तोऽभयमुद्रायां दर्शितः, द्वितीये परशुं धारयति, वामहस्ते वरदमुद्रा कृष्णमृगो धारितो भवति। महादेव-शिव-रुद्र-शङ्कर-नीललोहित-ईशान-विजय-ईश-देवदेव-भवोद्भव-कपालीशाः- एते एकादशरुद्रा दर्शिताः।[३६३]

चन्द्रः सोमो वा

सिंहासनासीनः, कुन्दपुष्पस्य शङ्खस्य वा समानं श्वेतवर्णयुक्तः, मस्तकस्य पृष्ठे प्रभामण्डलसंयुक्तः, हस्तद्वयं सौम्यमुद्रायां भवति। उपविष्टः स्थितो वा, हस्ते कुमुदम्-उत्पलं गृहीतं भवति। सुवर्णयज्ञोपवीती तथा सर्वाभरणभूषितो भवति। श्वेतवस्त्रं, शान्तमुद्रा, सर्वपुष्पैरलङ्कृतः, एतादृशश्चन्द्रो भवति।[३६४]

क्षेत्रपालः

---

३६२ का.शि.४८,५९-६०-६१
३६३ का.शि.४८,६२-६५
३६४ का.शि.४८.६६ तः ६८,१/२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

यथा ï (१) सात्त्विक: (२) राजस: (३) तामस:। श्वेतो रक्त: कृष्णश्चानुक्रमेण वर्णा भवन्ति। द्वे-चत्वारो वा हस्ता भवन्ति। शान्तोऽस्ति। राजस: षड्भुजासमन्वितो भवति। तामसोऽष्टहस्तयुक्तो भवति। त्रिनेत्रं तथा समपादुको भवति। एतादृश: पद्मपीठे भद्रपीठे वा स्थितो भवति। दक्षिणहस्ते शूलं तथा द्वितीयहस्ते कपालं धृतमस्ति। एवं हस्तद्वयं दर्शितम्। दक्षिणतो वामं प्रत्यूर्ध्वहस्तेऽनुक्रमेण खट्वाङ्गं खड्गं वा भवति। अधो हस्तो वरदमुद्रायां भवति। पूर्वानुसारमूर्ध्वहस्त:, अधो वामहस्ते द्वे घण्टिके भवत:। सात्त्विक-क्षेत्रपालस्य लक्षणमेवमस्ति।[३६५]

राजस-क्षेत्रपाल:

दक्षिणं प्रति त्रिहस्तेषु शूलं खड्गं घण्टा च भवति। दक्षिणं- वामे वा प्रति हस्ते खेटकं कपालं तथा नागपाशो भवति। तामस-क्षेत्रपालस्य दक्षिणहस्ते धनुर्बाणो धृतो भवति। (अत्र दक्षिणे धनुर्वामे च बाण:- इति युक्तं स्यात्।) अवशिष्टहस्तेषु राजसक्षेत्रपालानुसारमायुधानि भवन्ति। रक्तवर्णस्य केशा ऊर्ध्वं बद्धा: सन्ति। उग्रदृष्टिसमायुक्तस्य, नानानागैर्विभूषितस्य, त्रिनेत्रस्य, अग्निसमानरूपस्य क्षेत्रपालस्य कल्पनां कुर्यात्।[३६६]

ईश:

ईशो द्विभुजयुक्तो, शान्तमुद्रायां, सर्वाभरणभूषितो भवति। जटमुकुटेन सहित:, श्वेतवस्त्रधृतस्तथा स्थितोऽस्ति। शुक्लयज्ञोपवीतं धारित:, श्वेतकमले स्थितो भवति। दक्षिणहस्ते शूलं तथा वामहस्ते कपालं भवति।[३६७]

---

३६५ का.शि.४८.६८-२/२ त: ७३
३६६ का.शि.४८.७४ त: ७६
३६७ का.शि.४८.७७ त: ७९,१/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

हस्तद्वयं, हस्तद्वये रक्तवर्णस्य कमलं गृहीतमस्ति, पद्मासने स्थितः। रक्तप्रभामण्डलयुक्तः, करण्ड-मुकुटेन सह रक्तवस्त्रं धृतमस्ति। छन्नवीरेण सहिताः, सर्वाभरणभूषिताः, एतादृशः द्वादश भास्कराः प्रोक्ताः। विकर्तन-विवस्वान्-मार्तण्ड-भास्कर-रवि-लोकपाल-प्रकाश-लोकसाक्षी-त्रिविक्रम-आदित्य-सूर्य-अंशुमाली-दिवाकरश्च- एते द्वादश भास्कराः। उत्तरदिग्भागे क्रमेण भवन्ति।[३६८]

अनन्तः

सौम्यमुद्रा, चत्वारो हस्ताः, सर्वाभरणभूषितोऽनन्तो भवति। जपापुष्प-समान-रक्तवर्णयुक्तः, करण्ड-मुकुटेन सहितः, श्वेतवस्त्रधृतः, शान्त-मुद्रायां, त्रिनेत्रः, कमले संस्थापितः, अभयवरदमुद्रायोर्द्वौ हस्तौ, हस्तद्वये कटकं शूलं च धारणं कृतमस्ति।[३६९]

अर्कः

चतुर्हस्तः, शान्तमुद्रायां, सर्वाभरणभूषितः, सुवर्णवर्णयुक्तः, कौषेयवस्त्रधारी। अभयवरदमुद्रायुतः, ऊर्ध्व हस्तयोः खड्गं खेटकं च धारयति। पत्रपीठे स्थितः- एवमर्कस्य कल्पनां कुर्यात्।[३७०]

अभयः

३६८ का.शि.४८.७९-२/२ तः ८३
३६९ का.शि.४८.८४-८५
३७० का.शि.४८.८६-८७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कुटेनालङ्कृतः, अतिरक्तवर्णः, सर्वाभरणभूषितो भवति। अभयः सुवर्णवर्णयुक्तः, काषायवस्त्रधरः। अभयवरदमुद्रायुक्तः, शूलं पाशश्च धृतमस्ति। हस्तद्वये नागो भवति, सौम्यमुद्रायुतः, नेत्रद्वयान्वितो भवति।[३७१]

गौरी

अत्यन्तसुन्दरी, शान्तमुद्रायां, सर्वाभरणभूषिता, नानागन्ध-अङ्गलेपैर्लिप्ता, पीतवर्णस्य पुष्पैः शोभिता, करण्ड-मुकुटेन समन्विता, पद्मपीठोपरि स्थिता। कटितः किञ्चित् वक्रा, पीनजङ्घापार्श्वभागस्तनयुक्ता,नानादुकूलवस्त्रपरिधृता। सस्यश्यामा, हस्तद्वये रक्तवर्णकमलधरा, आजानुहस्तयुक्ता, सर्वत्र समभङ्गिका भवति। सूक्ष्मनीलवर्णा, शान्तमुद्रायां, हेमवस्त्रधृता, चतुर्हस्ता, त्रिनेत्रा, सर्वाभरणभूषिता, अभयवरदमुद्रायुता तथैव टङ्क-शूलधृता - एवं सकल-लक्षणानुसारं गौरीलक्षणं ख्यातम्। उपर्युक्तलक्षणानुसारं गौर्य्या मूर्तिं स्थापयेत्।।[३७२]

शर्वः

शर्वश्चतुर्हस्तः, शान्तमुद्रायां, सर्वाभरणभूषितैस्तथा जटा-मुकुटेन सह भवति। शङ्खकुन्दपुष्पसमं श्वेतवर्णः, अभयवरदमुद्रायुतो भवति। खड्गखेटकधारकः, पद्मपीठोपरि स्थितः-एतादृशः शर्वो भवति।[३७३]

ब्रह्मा

चत्वारि मुखानि, चत्वारो हस्ताः, हरितालानुसारं हरितवर्णयुक्तः, जटामुकुटेन सह, पिङ्गाक्षः, सर्पभूषितः, कृष्णाजिन-उत्तरीयवस्त्रं धारणं कृतमस्ति। यज्ञोपवीतेन सह, श्वेतवस्त्रधृतः, शान्तमुद्रायां, मेखलासहितः, कटिसूत्रयुतः। श्वेतवर्णस्याङ्गलेपेन लेपितः,

---

३७१ का.शि.४८.८८ तः ९०,१/२
३७२ का.शि.४८.९०.२/२ तः ९६-१/२
३७३ का.शि.४८.९६-२ तः ९८-१/२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तथैव कूर्चं धारयति, वामहस्ते कमण्डलुं कुशं च, तथैव दक्षिणहस्ते स्रुक्स्रुवसंयुक्तः। वामहस्ते आज्यस्थालीं कुशं च धारयेत्, अभयवरदमुद्रायुक्तव-धोहस्तौ, आसने संस्थितः, पादद्वयस्याङ्गुष्ठौ परस्परं सम्मिलितौ, तौ मेढ्रमूलोपरिष्टाद् भवतः। उपरि वामहस्तः स्थापितो भवति। दक्षिणहस्तस्तस्योपरि समानरूपेण स्थापयेत्, दक्षिणहस्तेऽक्षमाला, वामहस्ते कमण्डलुर्भवेत्, दक्षिणे सरस्वती तथा वामे सावित्री भवति। ब्रह्माणं पद्मपीठोपरि स्थितमासीनं च दर्शयति।[३७४]

शिवः

अतुलनीयश्वेतवर्णः, चतुर्हस्तः, सर्वाभरणैः संयुक्तः, श्वेतवस्त्रं यज्ञोपवीतं च धृतः, नेत्रद्वययुतः, करण्ड-मुकुटान्वितो भवति। अभयवरदमुद्रायां शूलं पाशश्च धृतोऽस्ति। पवित्रपद्मपीठोपरि पादद्वयं समं स्थापयित्वा स्थितोऽस्ति।[३७५]

भृगुः

शुकसमानवर्णः, शान्तमुद्रायुतः, श्वेतवस्त्रधृरः, करण्ड-मुकुटयुक्तः, अभयवरदमुद्रायां हस्तद्वयं, सर्वाभरणभूषितो भवति। शुभदायको भृगुः पद्मपीठोपरि स्थित उपविष्टो वा भवति। पूर्वोक्तानुसारमीशस्य तथागस्त्यस्य कल्पनां कुर्यात्। अगस्त्यानुसारमेव कौशिकस्य मूर्तिं कुर्यात्।[३७६]

एकाक्षः

---

३७४ का.शि.४८.९८-२/२ तः १०५
३७५ का.शि.४८.१०५ तः १०८-१/२
३७६ का.शि.४८. १०८-२/२ तः १११-१/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

, त्रिनेत्रेण सहितः?, क्षौमवस्त्रधारी, शान्तमुद्रायां, बन्धूकपुष्पैः सम रक्तवर्णीयः, जटामुकुटेन सह सर्वाभरणभूषितः, अभयवरदमुद्रायाम् तथा टङ्कशूल-सहितः।[३७७] गणेशस्य वर्णनं पूर्वमेव कृतम्।

सरस्वती

सरस्वती देवी चतुर्हस्ता तथा श्वेतकमलोपरि स्थिता भवति। जटामुकुटसमन्विता, श्वेतवर्णीया, श्वेतवस्त्रधरा, यज्ञोपवीतेन सहिता, रक्तकुण्डलयुक्ता, सर्वाभरणाभूषिता, कण्ठे मुक्ताहारः, सुन्दरे नेत्रे , व्याख्यानमुद्रायां, दक्षिणेऽक्षसूत्रम्, वामहस्ते पुस्तकं कुण्डिका च भवति। त्रिनेत्रा मनोहररूपा च भवति। ऋग्-यजु-सामवेदादिभिस्तथा मुनिभिः सेविता, सुन्दर लक्षणयुक्ता वाग्देवी प्रोच्यते।[३७८]

लक्ष्मीः

लक्ष्मीदेवी पद्मासने स्थिता भवति। हस्तद्वया, सुवर्णकान्तियुक्ता, कर्णयो रत्नयुक्त-सुवर्णकुण्डलेन सुशोभिता, अतीवतरुणा, मनोहराङ्गयुक्ता, तिर्यक्भ्रूः, चञ्चलनेत्रा, रक्तवर्ण-नेत्रयुता, पीनगण्डा, स्तनद्वयकञ्चुकीधरा, शिरःपृष्ठभागे प्रभामण्डलयुता, शङ्ख-चक्र-गदा-कमलसमन्विता, दक्षिणे हस्ते कमलम्, वामहस्ते श्रीफलम्, सुन्दरः कटिभागः, विशाला श्रोणी, सुन्दर-वस्त्रयुक्ता, कमरबन्धमेखलासहिता, सर्वाभरणभूषिता लक्ष्मीदेवी भवति।[३७९]

एकरुदमेकाक्षानुसारं कुर्यात् । पूर्वानुसारं पशुपतिमूर्तेः स्थापना करणीया। धर-ध्रुव-सोम-आपस्-अनल-अनिल-प्रत्यूष-प्रभावाः- एतेऽष्टवसवो रक्तवर्णाः, पीताम्बरधराः, सर्वे स्थिता आसीनाश्च भवन्ति। खड्गः खेटकं च हस्ते भवति। सर्वाभरणभूषिताः, करण्ड-मुकुटेन

३७७ का.शि.४८.१११-२/२ त: ११३
३७८ का.शि.४८.११४ त: ११७-१/२
३७९ का.शि.४८.११७-२/२ त: १२१-१/१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

महादेवं पशुपतिप्रमाणेन तथा त्रिमूर्तिमेकरुद्रानुसारं कुर्यात्।[380]

कुबेरः

कुबेरः सर्वयज्ञानां प्रमुखो भवति, सर्वाभरणाभूषितः, तप्तसुवर्णसमानवर्णः, वरदाभयमुद्रायां हस्तद्वययुतः, वामहस्ते गदाधरः, पद्मपीठासीनः, नेत्रद्वययुतः, मेघवाहनम्, रक्ताम्बरधरः, सौम्यः, शङ्खपद्मनिधियुतश्च भवति। शङ्खनिधिः पद्मनिधिश्च - भूताकारौ महाबलौ च भवतः। पद्मासनासीनौ, हस्तयोः पद्मं भवति। करण्ड-मुकुटेन सहितौ, श्वेतवस्त्रोत्तरीयौ भवतः । दक्षिणे शङ्खनिधिः, वामे पद्मनिधिश्च भवति। कुबेरस्य वामे सर्वलक्षणसम्पन्नां देवीं कल्पयेत् ।एतादृशः कुबेरः दर्शितः। पूर्वानुसारमिन्द्रं कल्पयेत्।[381]

कालाग्निरुदः

कालाग्निरुद्रमूर्तेर्लक्षणमुच्यते। चत्वारो हस्ताः, त्रिनेत्रं ज्वालासमं, मालया सुशोभितो भवति। खड्गखेटकसंयुक्तः, सुन्दरार्धचन्द्रं मस्तके धृतः, रक्तवस्त्रधरः, कोपमुद्रायां, सर्वाभरणभूषितः, रक्तोर्ध्वकेशः, सिंहासने स्थितः कालाग्निरुदो भवति।[382]

श्रीकण्ठः

चत्वारो हस्ताः, त्रिनेत्रः, नीलकमलसमवर्णः भवति। करण्ड-मुकुटेन सह सर्वाभरणभूषितः, अभयवरदमुद्रायां हस्तद्वयं, परहस्तयोः टङ्क-शूलधृत्। रक्तवस्त्राम्बरधरः, पद्मपीठोपर्युपविष्टः - एतादृशः श्रीकण्ठो दर्शितः।[383]

नागदेवः

---

३८० का.शि.४८.१२१-१/२ तः १२६-१/१
३८१ का.शि.४८.१२६ तः १३१
३८२ का.शि.४८.१३२-१३३-१३४-१/१
३८३ का.शि.४८.१३४-२/२ तः १३६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ारो हस्ता भवन्ति। सौम्यमुद्रायुक्तः, रक्त-श्वेतवस्त्रधरः, अभयवरदमुद्राया हस्तद्वयम्, हस्ते नागो गृहीतः, करण्ड-मुकुटसहितस्तथा पञ्चफणान्वितो नागो भवति। सर्वाभरणभूषितः, पद्मपीठोपरि स्थितो नागदेवो भवति।[३८४]

भीमः

भीमस्य चत्वारो हस्ता भवन्ति। कोपमुद्रायुतः, सर्वाभरणभूषितः, अभयवरदमुद्रां तथा शूलं पाशं च धारयेत्श्वेतवस्त्रधरः। -

उग्रनेत्रः, बृहद्दंष्ट्रकः, सस्याङ्कुरनिभभूमिसमो नीलवर्णः, कुण्डलितकेशो भवति - एतादृशो भीम उच्यते।[३८५]

शिखण्डः

करण्डमुकुटेन सह सर्वाभरणभूषितः शिखण्डो भवति। पीताम्बरधरः, प्रसन्नमुद्रायां भवति। उभयोर्हस्तयोः पद्ममुत्पलं च भवति। पद्मपीठासीनः स्थितो वा भवति। एतादृशः शिखण्डः कञ्जनासमः कृष्णवर्णः, चत्वारो हस्ताः, खड्गं खेटकं च धृतमस्ति। पद्मपीठोपरि स्थितो भवति शिखण्डः।[३८६]

मरुद्गणाः

मरुद्गणाः धूम्रवर्णानां भवन्ति। मुद्गरेण सह हस्तद्वयं, केशभारसमन्विताः सर्वाभरणभूषिताश्च भवन्ति। कौषेयवस्त्रधराः, नानापुष्पैरलंकृताः, टङ्कः शूलं च हस्तयो-र्भवति। स्थूलोरुपार्श्वभागवक्षोभागसंयुक्ताः, पद्मपीठोपरि स्थिताः- एते मरुद्गणाः सन्ति।[३८७]

---

३८४ का.शि.४८.१३७-१३८
३८५ का.शि.४८.१३८ तः १४०
३८६ का.शि.४८.१४१ तः १४३
३८७ का.शि.४८.१४४ तः १४६-१/१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

चतुर्हस्तास्तथा रौद्रमुद्रा उग्रस्य भवति। रक्तवस्त्रसंयुक्तः, करण्डमुकुटेन सह सर्वाभरणभूषितः, अभयमुद्रासहितः, ऊर्ध्वहस्तयोः टङ्कं शूलं च धृतमस्ति। पद्मपीठोपरिस्थितः, पवित्रश्वेतवस्त्रधरो भवति।[३८८]

शनैश्चरः -शनैश्चरः कृष्णवर्णस्य भवति। हस्तद्वयं, श्वेतवस्त्रधरः, करण्डमुकुटेन सह सर्वाभरणभूषितः, दक्षिणहस्ते दण्डः, वामहस्ते वरदमुद्रायुक्तः, पद्मपीठोपरि स्थित उपविष्टो वा भवति। किञ्चिदाकुञ्चितमिव स्थितः, किञ्चिद्ध्रस्वशरीरधरः शनैश्चरः प्रोक्तः।[३८९]

मूर्तिपीठम्

मूर्तिपीठस्य लक्षणं वर्ण्यते। प्रसादविस्तारोऽत्र दण्डः कथ्यते। चतुर्विंशतिरङ्गुल-विस्तारः, उच्चता द्वादशाङ्गुलाः, तस्मिन् पद्मस्योच्चता त्रि-अङ्गुला भवति। विस्तारः षडङ्गुलो भवति। शेषस्योर्ध्वं कम्पनीव्रकम्, पद्मस्य बहिर्भवति। शिलया, इष्टकाया, सुधया च पद्मपीठं प्रकल्पयेत्। परिवारदेवतानां कृते मानमिदं प्रोक्तमस्ति। महापीठस्य विधिः कथ्यते। अत्रापि प्रासादविस्तारो दण्डमित उच्यते। मूलहर्म्यस्य परितः षड्-अष्ट-दश-द्वादश दण्डतो वा पञ्चदशदण्डपर्यन्तम्, १६ वा १८ दण्डं यावदन्तरोपरि, महापीठं कल्पयेत्। अन्यप्रकारेणापि पीठस्थानं दर्शितम्। तृतीय-चतुर्थ-पञ्चम-प्रकारस्य भित्तेर्दीर्घता विस्तारस्य च मध्यभागे महापीठं कुर्यात्। तस्य लक्षणमुच्यते । मूलप्रासादस्य गर्भगृहस्य द्वारस्योच्चता सममुत्तमपीठस्य विस्तारो भवति। द्वारोच्चतायास्त्रिगुणितं पीठं मध्यमं प्रोक्तम्, द्वारउच्चताया अर्धविस्तारं कनिष्ठपीठमुच्यते। द्वारस्य रिक्तस्थानं विस्तारं यावत् पीठं मध्यमं, तस्य द्विगुणितं पीठस्य विस्तारं मध्यमं दर्शितम्, त्रिगुणितविस्तारस्य पीठं श्रेष्ठमुच्यते। अथवैकहस्तविस्तारस्य

३८८ का.शि.४८.१४६-२/२ तः १४८-१/१
३८९ का.शि.४८.१४८-१/२ तः १५०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible]ास्य पीठं श्रेष्ठमुच्यते।[390] महापीठस्योत्तरे भागे दुर्मुखः, वायुभूता वा भवेत्, कोणकस्याधिमाविघ्नगणेशस्य मूर्तिर्भविष्यति। तद् व्योमात्मकं कथ्यते। आग्नेयदिशायां पद्मोपरि तामसः, नैऋत्यदिग्भागे कमलपत्रे राजसः, वायव्यदिग्भागे सात्त्विकः क्षेत्रपालो भवति। ईशादिग्भागे विघ्नहर्ता भवति।

पञ्चभूतात्मिका भूमिः, अन्तरिक्षः स्वर्गं वा - एते सर्वे महापीठस्यात्मेत्युक्तम्। तामसादि-क्षेत्रपालानां शान्त्यर्थं पूजाया अन्ते बलिं दद्यात्। तेषां सन्तुष्टिये नित्योत्सवसमये प्रदक्षिणां कुर्यात्। प्रथमा भूमिप्रदक्षिणा, द्वितीयान्तरिक्षप्रदक्षिणा, तृतीया स्वर्गप्रदक्षिणा। तल्लोके निवासिनां कृते हिताय तथा सङ्कटनिवारणाय भवति ।[391] प्रासादस्य मुखं पश्चिमं प्रति भवति तर्हि किञ्चित् परिवर्तनं करणीयम्- यथा नन्देः स्थाने कुमारः, कुमारस्य स्थाने नन्दी भवेत्। पश्चिमं प्रति महापीठं भवेत्, अन्यत् पूर्वानुसारं कुर्यात्। परिवारविधिः प्रोक्तः।

लिङ्गलक्षणम्

शिवलिङ्गस्य लक्षणं प्रस्तूयते। संसारो विषयाः प्राणी तथा सम्पूर्णा सृष्टिर्यस्मिन् लयं गच्छति। यस्मात् पुनः सृष्टेर्निर्माणं भवति। अतस्तल्लिङ्गमुच्यते। संसारे निष्कलं शान्तं वाङ्मनसामतीतं, सर्वप्राणिमात्राणां मुक्तिदायकं, स्वात्मानः परमं श्रेष्ठं च , सर्वं येन व्याप्तमस्ति, गूढम्, एतादृशं सर्वलोकैकनायकं तत्त्वं लिङ्गमस्ति। तस्मात्सृष्टेरुत्पत्तेः समये शान्तितत्त्वस्योद्भवः समभवत्। शान्तेः शक्तिः संभूता, तस्मान्नादस्य जन्माभवत्। नादाद् बिन्दोरुत्पत्तिः, नादः सादाख्यं तत्त्वमुच्यते। तद् बिन्दुमानेन ख्यातम्। बिन्दुना ईश्वरस्योत्पर्त्तिजाता। ईश्वरान्महादेवस्य, तस्मात् सृष्टिः, तथा विष्णुरभवत्। तस्मात् सद्भावः प्रासादश्च, तस्माद् विशेषेण त्रिदेवाः, त्रिंशदृषयः, त्रिशतं दानवाः, षट्प्रकाराणां त्रिसहस्रयोनयोऽभवन्। सृष्टेरुत्पत्तिर्दर्शिता। आदौ त्रयो निष्कलाः (ईश्वरः, महेश्वरः, नादश्च),

---

३९० का.शि.४८.१५१ तः १६०
३९१ का.शि.४८.१६१ तः १६६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्याकृतिर्नादो ज्ञेयः। बिन्दुः पीठानुसारं दर्शितः। लिङ्गं शिवमयं समाख्यातम्। पीठस्तस्यात्मानुसार्यस्ति। शिवो वा आत्मा (लिङ्गः, पीठम्) प्रमाणेनाभिन्नमस्ति। विश्वस्य सङ्कट- निवारणाय, तथैव सर्वप्राणिनां हिताय, देवादीनां हिताय, ध्यानपूजानिमित्तकम्, लिङ्गयोनिप्रकारेण सदाख्यस्य वा तत्त्वस्योदयोऽभवत्।[३९२]

चलमचलं चलाचलं लिङ्गम्

लिङ्गं त्रिप्रकारेण प्रसिद्धमस्ति, यथा - चलमचलं चलाचलं च। रत्नस्य लोहस्य वा लिङ्गं सयोनिकं भवति। लिङ्गद्रव्याद् भिन्नद्रव्येन सुलक्षणीं योनिं कृत्वा वर्तनेन सह शीर्षं कुर्यात्। तल्लिङ्गं लक्षणोद्धारं विना भविष्यति। लिङ्गस्योच्चताया अर्धभागो वृत्ताकारो भवेत्, उच्चताया एकतृतीयांशः, एकचतुर्थांशः भागो वा वृत्ताकारो भवेत्। अवशिष्टो भागः (अर्धो, २/३, ३/४ भागो वा) पीठे प्रवेशितो भवति। इष्टस्थाने नेतुमावश्यक्ता नास्ति, तल्लिङ्गमचललिङ्गं कथ्यते। अन्यत्र नेतं शक्नुमस्तत् चललिङ्गं कथ्यते। लिङ्गस्य भागस्तथा पिण्डीं (गोलाकारमूर्तिं) चालयितुं शक्नुमः, किन्तु पीठं चालयितुं न शक्नुमः, तल्लिङ्गं चलाचललिङ्गं कथ्यते। अश्मजं सूत्रसंयुक्तं बाणलिङ्गादीनि तस्योदाहरणानि सन्ति।[३९३]

तेष्वादौ चललिङ्गलक्षणं वर्ण्यते। शुभमासः ï नक्षत्र-लग्नं ïवासारादिं दृष्ट्वा शिलां स्वीकुर्यात्। शिल्पिना सह शिलाग्रहणमाचरेत्। स्वर्ग-अन्तरिक्ष-पृथ्वीनिमित्तान्युपलक्षयेत्। दक्षिणतो वामं प्रति गतिकर्ता वायसः, तथैव श्येनः, दक्षिणतो वामं प्रति मांसेन सह गृध्रो भवेत्। कन्यागोदर्शनं, धेनोरावाहनध्वनिश्रवणं, दध्ना पूरितः कुम्भः, तथैव दुग्धकुम्भः, पुष्पम्, पुष्पधारिणम्, सह गच्छन् पुत्रः, पुत्रवती युवती स्त्री वा, अन्नं, मांसाहारः?, शिवभक्तः, उल्का,

३९२ का.शि.४९.१ तः १२-१/१
३९३ का.शि.४९.१२-२/ तः १७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...गज:, वेणीयुक्तातिसुन्दरी स्त्री-एतानि शुभानि पृथिव्यां शकुनानि भवन्ति। यदि विपरीतं भवति चेत्, अशुभं भवति।[३९४]

उल्कापात:, दिग्दाह:, महावात: - एतान्यन्तरिक्षस्याशुभानि। पृथिव्या अशण:शकुनानि यथा- मुक्तकेश: कीर्णकेशो मनुष्य:, तैलाभ्यक्त:, नग्न:, कषायवस्त्रधर:, मृत्तिकाया रिक्तभाण्डं, तैलपात्रं, लघुनासिकायुक्ता कन्या, न्यूनाङ्गोऽधिकाङ्गो वा, पुत्रहीना नारी, विधवा स्त्री, बहुभक्ष्या नारी, एतेषां सर्वेषां दर्शनं पृथिव्यामुपर्यशुभं शकुनं भवति। शुभकार्यार्थं वर्ज्याणि। शुभशकुनं भवति, तदा शिलासंग्रहणाय गन्तव्यम्, अशुभं भवति, तदा न गन्तव्यम्। अशुभेऽग्निं विस्तीर्य, शङ्करं समिध् -घृत-ओदनै: शताहुतीर्दद्यात्। नागान्नं नागभूषणं दत्त्वा शङ्करं नमस्कृत्याचार्य: शिल्पी पर्वतं, सागरं, तीर्थं, क्षेत्रं वनं गच्छेत्। क्षीरवृक्षसमीपात्, देवप्रासादसमीत:, नदीतटस्य वा शिलां शिल्पी स्वीकुर्यात्। अन्यस्थानात् शिलां स्वीकरोति तदा नाशो भवति।[३९५]

## शिलालक्षणम्

चतस्र: शिला भवन्ति। श्वेता रक्ता पीता कृष्णा च। श्वेतवर्णस्य सप्तप्रकारा: - यथा - गोदुग्धसमाना, शङ्खसमा, कुन्दपुष्पनिभा, चन्द्र-मुक्ता-स्फटिकसमा तथा मल्लिकापुष्पानकारिणी, श्वेतवर्णा । पीतवर्णापि सप्तप्रकारका वर्णिता। जपाकिंशुकयो: पुष्पवर्णानुसारा, इन्द्रगोपनिभा, जातिलिङ्गवर्णा, शशरक्तसमा, दाडिमपुष्पसमाना, बन्धूकपुष्पसमा, कोरण्डककुसुमसंकाशा- एतादृशी पीतवर्णस्य शिला भवति। कृष्णवर्णस्य दशप्रकारा: प्रोक्ता: - यथा - महिष-नेत्र-अञ्जनसमाना, नीलकमलस्य समानवर्णा, भृङ्ग-मयूरग्रीवानिभा, मषीपत्रसमा, राजावर्तनिभाकारा, कृष्णमुद्गसमा, ह्रस्वमुद्गसमाकारा -

---

३९४ का.शि.४९.१८ त: २४-१/१

३९५ का.शि.४९.२४-२/२ त: ३२-१/२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

श्वेता, रक्ता, पीता, कृष्णा च क्रमेण ब्राह्मणादीनां धर्म-अर्थ-काम-मोक्षाणां च सर्वदा दातारो भवन्ति। श्रेष्ठवर्णानां कृते श्रेष्ठो वर्णो योग्यो भवति। प्रतिलोमानुलोमानां पृथक् शिला न भवेत्। श्वेतवस्त्रधरः, श्वेतलेपनकृतः, पञ्चाभूषणैः समन्वित आचार्यः शिल्पकश्च कुठारादिं स्वीकृत्य शिलासंग्रहणाय गच्छेत्। विशेषरूपेण पाषाणं त्रोटयित्वा, दोषरहितां दृष्ट्वा, यत्र शिला भवति तत्र प्रदक्षिणां कुर्यात्। वर्षा-सूर्यस्यातपः-अग्निः - इत्यादिना भग्नां शिलां, क्षारवारिणा विशीर्णां शिलाम्, अशुद्धस्थानतटस्थितां शिलामन्यकार्यार्थं प्रयोक्तव्या, न लिङ्गस्य कृते । अधिकवालुकामृत्तिकायुक्तां, जीर्णशीर्णां,रूक्षां, रेखा-बिन्दु-कलङ्केन युक्तां शिलां वजर्येत्। सूत्रसमां, सूत्राकारां, सूर्यरश्मिसमायुक्तां, वर्षधारासमाकारां शिलां वर्जयेत्। एतादृशाः पाषाणानामुपरि त्रि-पङ्तयः (रेखाः) स्मृताः। बिन्दोस्त्रिप्रकाराः ï जम्बूफलसमाकारः, द्राक्षासमानः, अन्यो वृत्ताकारः। कलङ्कस्य चत्वारः (?) प्रकाराः भवन्ति। कृष्णलोहाकारः, कृष्णभ्रमर-समः, मयूरपिच्छसमाकारः। खर्जूरस्य पर्णाकारा, दूर्वासमाना, वैणवाङ्कुरसंकाशा, लूतापादायता, श्वेतरेखाशिलाया उपरि भवेत्,तर्हि सा सर्वप्रकाराणां सम्पत्समृद्धिदात्री भवति। कृष्णपाषाणे कृष्णा, श्वेतशिलायां कृष्णरेखा विनाशकारी भवति। अतः सर्वप्रयत्नैः पृथक् शिलां स्वीकुर्यात्। हरिता कृष्णा श्वेता च शिला विशेषरूपेण ग्राह्या। खर्जूरपर्णसदृशी, दूर्वास्तम्बाकृतिः शुभा। अन्या कृष्णा शिला वर्ज्या, अशुभा भवति। यदि वर्ज्यशिलायाः प्रयोगः शिवलिङ्गस्य कृते भवति तर्हि धेनुधान्यधनानां नाशो भवति। तेन सर्वे रोगा भवन्ति। नृपस्य राष्ट्रस्य च विनाशो ज्ञेयः। शिलाया उपरि बिन्दुर्भवति चेत्, पुत्रनाशः, सम्पत्तेः पूर्णतया नाशः, दरिद्रतागच्छति, एवं बहुधा परीक्ष्य सुलक्षणीशिलाया निर्धारणं करणीयम्। बाला युवती वृद्धा तथैव पुलिङ्ग-स्त्रीलिङ्ग-नंपुसकलिङ्गाः, एवं स्वर- आकृत्यादिभिः शिलायाः प्रकारा भवन्ति। लघ्वी, सूक्ष्मध्वनियुक्ता शिला बाला भवति। दीर्घा, घण्टाध्वनियुक्ता शिला युवती शिला प्रोच्यते। विततध्वनियुक्ता वृद्धशिला प्रोच्यते। घण्टाध्वनिसमाननादयुक्ता दीर्घा पुंशिला। तालवाद्यानुसारं मधुर-ध्वनियुक्ता शिला स्त्रीशिला कथ्यते। अस्निग्धा, झर्झरी, रूक्षा, स्वरहीना

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

शिलाप्रकाराः। स्त्रीशिला चतुरश्रा तथाष्टकोणी दर्शिता। आयताकारा वृत्ताकारा दश-द्वादश कोणका शिला पुंशिला स्मृता। सम्पूर्णवृत्ताकारा नपुंसकशिला भवति। दश-द्वादशाग्रा तथा बाला वृद्धा च शिला लिङ्गस्य कृते वर्ज्यास्ति। पुंशिलया लिङ्गं कुर्यात् तथा स्त्रीशिलया पिण्डिकां कुर्यात्। नपुंसकशिला पादाधारस्य कृते प्रयोज्या। यदि विपरीतं करोति चेत् कर्तुर्नाशं करोति। पूर्वं प्रति तथा उत्तरं प्रति शिलाया अग्रभागो भवति, तां शिलां गृह्णीयात्। पूर्वं प्रति तथा उत्तरं प्रति शिलाया अग्रभागः, स एव लिङ्गस्याग्रभागो भवेत् ।अधोभागे मुखं, पार्श्वभाग ऊर्ध्वं भवेत्।[३९६]

शिलापूजनम्

एवंरीत्या शिलायाः परीक्षां कृत्वा पञ्चगव्येन प्रक्षाल्य मनसि सत्यमन्त्रं वदेत्। गन्ध-पूष्पादि संपूज्य शिलायाः स्थापनां कुर्यात्। शिलाया ईशानदिग्भागे शान्तिहोमं कुर्यात्। अग्निकार्ये दर्शितानुसारं अग्न्याधानादिकं सर्वं कुर्यात्। हृदयमन्त्रेण समिध्, मूलमन्त्रेण घृतम्, अघोरमन्त्रेण चरुः, पुरुषमन्त्रेण तण्डुलम् - इत्यादिना होमं कुर्यात्। ईशानमन्त्रेण तिलस्य, कवचेन सर्षपस्य हवनं कुर्यात्। क्रमेण प्रत्येकस्य शतम्, पञ्चाशत्, पञ्चविंशतिवारं वा हवनं कुर्यात्। स्विष्टकृतिमग्ने इति मन्त्रेण पूर्णाहुतिं च जुहुयात्। तत्पश्चादग्निं समुद्वास्य पूजावशिष्टद्रव्यं प्रक्षिपेत्। शिलां त्रोटयितुं शस्त्रस्य मन्त्रेण पूजां कुयात्। अपसर्पणमन्त्रस्योच्चारणं कृत्वा शिलाच्छेदनं कुर्यात्।[३९७]

लिङ्गमानम्

गर्भगेहस्य पञ्चभागेषु त्रिभागाः श्रेष्ठा उच्यन्ते। गर्भगेहस्य, द्वारस्य, स्तम्भस्य, कालस्य, तालस्य, हस्तस्य, अङ्गुलस्य मानेन लिङ्गस्य मानं सप्तप्रकारेण दर्शितम्। तस्य

---
३९६ का.शि.४९.३२/२ तः ६२
३९७ का.शि.४९.६३ तः ६८

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

न्ति। गर्भागारस्य पञ्चभागान् क्रियते, तदा त्रि -अंशस्य लिङ्गं श्रेष्ठमुच्यते। गर्भस्यार्धं मध्यमं लिङ्गमुच्यते। तयोर्मध्यान्तरस्याष्टभागाः क्रियन्ते, तर्हि श्रेष्ठं, मध्यममधमं च लिङ्गं भवति। लिङ्गस्य प्रत्येकत्रिप्रकारस्य नवप्रकारा भवन्ति। गर्भागारं नवभागेषु विभाजितं कृत्वा, गर्भागारस्यार्धं लिङ्गं श्रेष्ठम्, गर्भागारस्य १/९ कनिष्ठम्, एवमुत्तमादि त्रि-त्रि प्रकारा भवन्ति। शुद्धद्धारं श्रेष्ठम्। तस्यापेक्षया २/३ कनिष्ठं लिङ्गं भवति। तस्य मध्यस्याष्टभागे कृते श्रेष्ठनवप्रकारा भवन्ति। स्तम्भस्य दीर्घता नवभागेषु विभाजिता भवति। प्रासादतलभवनोपरि स्तम्भस्योच्चता यावद् भवति, तन्मध्यमश्रेष्ठलिङ्गं नामकेन प्रसिद्धमस्ति। तस्यार्ध -उच्चताया लिङ्गमधमं भवति। तस्य मध्येऽष्टविभागाः क्रियन्ते, तर्हि तस्य नवप्रकारा भवन्ति। तत्रस्थतलभवनानामुपरि स्तम्भानां दीर्घता नवभागेषु विभाजिता भवति। स्तम्भमानेन लिङ्गस्य नवप्रकाराणां मानं भवति। अधिष्ठानस्योच्चता स्तम्भस्य मानप्रमाणेन भवति। एकहस्तादारभ्य एकाष्टामाशांशं (१ /६४) वर्धयेत्, नवहस्तपर्यन्तं ६५ संख्याया लिङ्गस्य प्रकारा भवन्ति। दशहस्तविस्तारस्य प्रासादे लिङ्गं हस्तस्य मानेन कुर्यात्। पञ्चहस्तपर्यन्तं प्रासादे लिङ्गं स्तम्भस्य मानेन कुर्यात्। विकल्पस्याभासस्य च प्रकारस्य प्रासादस्य लिङ्गमानमेकहस्तात् त्रिहस्तपर्यन्तं भविष्यति। त्रिहस्तात् षड्हस्तपर्यन्तं लिङ्गं छन्दमानेन भवति। षड्हस्तात् नवहस्तपर्यन्तं लिङ्गजातिप्रकारस्य गृहस्य कृते च योग्यं भवति। एवं हस्तस्य मानेन लिङ्गस्य मानं दर्शितम्। इदानीं तालमानेन लिङ्गस्य मानं दर्शयति। एकतालतो नवतालपर्यन्तम्, एकतालेन वर्धयित्वा लिङ्गस्य नव प्रकारा भवन्ति। जातिप्रकारस्य गृहं विनान्यप्रकारस्य गृहे तालमानेन लिङ्गं योग्यं भवति। त्रयोदशाङ्गुलादारभ्य (द्विर्द्विरङ्गुलं वर्धयित्वा) १०९ अङ्गुलपर्यन्तं, एवं लिङ्गस्य ४९ प्रकारा अङ्गलमानेन भवन्ति।

त्रिभागसहितं लिङ्गमेकहस्तस्यापेक्षया लघु न करणीयम्। एकतो लघुलिङ्गं सम्पूर्णवृत्ताकारं भवति। त्रिभागसहिते लिङ्गं (निम्नभागे) चतुरस्रं, (मध्यभागे) अष्टकोणम्,

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

रणीयम्। विकल्प आभासप्रासादे च त्रिभागस्य लिङ्गं भवेत् तस्य वृत्ताकारो भागो योनिरुपरि दृश्यमानो भवेत्। विकल्पलघुगृह एतादृशं शिवलिङ्गं न भवेत्। एकाङ्गुलादारभ्य सप्ताङ्गुलपर्यन्तं धातो रत्नस्य वा लिङ्गं भवेत्। तस्यापेक्षया बृहल्लिङ्गं पाषाणस्य वा भवेत् । त्रयोदशाङ्गुलस्य लिङ्गं पाषाणस्य न भवेत् । एवं विविधप्रकारेण लिङ्गस्य मानं दर्शितम्। नागर-द्राविड-वेसरप्रकाराणां लिङ्गस्य वर्णनं क्रियते। लिङ्गस्योच्चता चत्वारि अंशे कृते, एकांशस्य विस्तारस्य लिङ्गं कनिष्ठं भवति। लिङ्गस्योच्चतायास्त्रिरंशे कृते, एकांशविस्तारस्य लिङ्गं श्रेष्ठं ज्ञेयम्। द्वयोर्मध्येऽष्टभागे विभजिते, तस्य विस्तारस्य नवप्रकारान् दर्शयति। उच्चतायाः षोडशांशान् कृत्वा, पञ्चांशस्य विस्तारस्य लिङ्गं शान्तिकप्रकारस्य भवति। चत्वारांशस्य विस्तारस्य लिङ्गं पौष्टिकम्। त्रि-अंशस्य विस्तारस्य लिङ्गं जयदम् ।दीर्घताया अर्धविस्तारः, एतादृशस्य लिङ्गस्य विस्तारस्य चत्वारः प्रकारा भवन्ति। एवंरीत्या नागरपद्धत्या लिङ्गस्य विस्तारेण १३ प्रकारा भवन्ति। लिङ्गस्योच्चताया अष्टादश भागान् कृत्वा, षड्-पञ्च-चत्वारः ï त्रिः -अंशस्य विस्तारस्य अनुक्रमेण शान्तिकादिका द्राविडलिङ्गस्य चत्वारः प्रकारा भवन्ति। वेसरलिङ्गस्योच्चतां २० भागेषु विभज्यते, तदा अष्ट-सप्त-षड्-पञ्चभागस्य विस्तारस्यानुक्रमेण शान्तिक-पौष्टिक-जयद- अद्भुतानि च भवन्ति। एवं वेसरहर्म्यस्य लिङ्गस्य मानं तथा पिण्डिकायाश्चत्वारः प्रकारा भवन्ति। नीव्रक- आधार-शिला एक-जातेरेव भवेत्, शङ्करं न भवेत्। यत्र यल्लिङ्गस्य मानं प्रोक्तं तत् सुखसम्पत्तिवर्धनाय भवति। पद्धतिद्वयोः परस्परं मिश्रणे, तत् नृपतिदुःखदायकं भयकारकं च भवति। अतः सर्वप्रयत्नेन संकरं मा कुर्यात्। लिङ्गस्य नागरादि- प्रकारा दर्शिताः। इदानीं लिङ्गस्यायादेर्वर्णनं प्रस्तूयते। लिङ्गस्योच्चतां मानाङ्गुलेन भागं दद्यात्, अङ्गुलस्यावशिष्टं भागं पूर्णं कुर्यात् निष्कासयतु वा। श्रेष्ठस्य वाधमस्यान्तरम्, पूर्णाङ्गुल्या स्वीकुर्यात्। उच्चतायाः संख्यामष्टभिर्गुणनं कृत्वा सप्तविंशतिना भागं दद्यात्। यत् शेषमागच्छेत्, तेनाश्विन्यादिनक्षत्राणि मिलन्ति। उच्चता नवभिर्गुणनं कृत्वा, सप्तभिर्भागं दद्यात् , एकादिशेषमागच्छेत् , तेन वासरो मिलति। उच्चतायास्त्रिगुणितं

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ी, सा योनिः। उच्चतामष्टभिर्वर्धयित्वा १२ भागं दद्यात्, यत् शेषं भवति,स आय उच्यते। उच्चतां नवभिर्गुणनं कृत्वा चतुर्विंशतिना भागं दद्यात्, यत् शेषमागच्छेत् , तद् ऋणं भवति। उच्चताया नवभिर्गुणनं कृत्वा नवभिर्भागं दद्यात्, यत् शेषमागच्छति, तेन तस्कारादिरंशा मिलन्ति। आयोऽधिकः, व्ययो न्यूनो भवति, तदा स सर्वदा सम्पत्तिकारको भवति। ध्वजः, सिंहः, वृषभः, गजः - शुभयोनिरुदाहृता। नृपस्य कर्तुर्वा जन्मनक्षत्रं, लिङ्गस्य जन्मनक्षत्रं, वास्तु जन्मनक्षत्रमेव गणयेत्। शुभाशुभं पश्येत्। जन्मत्रयं (नक्षत्रं) तथा द्वि-चतुः-षड्-अष्ट-नव शुभा भवन्ति, शेषा अशुभाः भवति। एतेष्वशुभान् प्रयत्नेन त्यजेत्। रविवासरादिसंयुक्तानि सूर्यादि-हस्तादि-चत्वारि? नक्षत्राणि भवन्ति, तदानुक्रमेण शत्रुत्वं, मृत्युः, नाशस्तथा अमृतस्य प्राप्तिर्भवति। तस्करं-चर्मिणं-षण्डं-मशकं वर्जयेत्, शेषाङ्का ग्राह्या भवन्ति।[३९८]

लिङ्गस्याष्टप्रकाराः ï समलिङ्ग-वर्धमान-शैवाधिक-स्वस्तिक-सर्वतोभद्र-सार्वदेशिक-धारालिङ्ग-मुखलिङ्गाश्च। समलिङ्गं ब्राह्मणस्य कृते। वर्धमानलिङ्गं नृपतेः कृते। शैवाधिक-लिङ्गं वैश्यस्य कृते। शूद्रस्य कृते स्वस्तिक-लिङ्गं भवति। सर्वेषामितरलिङ्गं सर्वकामफलप्रदं भवति। महादेव एक एवास्ति, किन्तु मानवहिताय लिङ्गस्य प्रकारा अभवन्। दीर्घता विस्तारस्य च योग्यं वर्गाकारं कृत्वा विधिना त्रिभागं कुर्यात्। अधोभागो वर्गाकारो ब्रह्मभाग उच्यते। मध्यभागोऽष्टकोणो भवेत्, स विष्णु-अंशो कथ्यते। ऊर्ध्वभागो वृत्ताकारो भवति, स शङ्करस्यांशो भवति। प्रत्येकांशस्य नाम प्रदत्तं, तथापि सर्वे शिवात्मका भवन्ति। पूजाया भागत्रयं कृत ऊर्ध्वभागो मुखं भवति। अष्टकर्णास्य, द्वादशाक्ष्णोः, सर्वलक्षणयुक्तस्य, आयताकारस्य लिङ्गस्य दीर्घता, पिण्डिकया वेष्टिता (आच्छादिता) भवति। अथवाधिकम्, नेत्रसूत्रेण नासापुटपर्यन्तं, नासापुटस्यार्धं वर्धमानलिङ्गं भवति। चत्वारो भागाः क्रियन्ते, तदा प्रत्येकभाग एकभागादधिको भवति। तेषां गुणनं कृत्वा चतुःप्रकारस्य गलमानं भवति।

---

३९८ का.शि.४९.६९ तः १०९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

। शेषभागस्य सुलक्षणी लिङ्गाकृतिर्भवति। चतुर्मुखी वक्रमुखा, चतुर्हस्तस्य हस्तद्वयस्य वा स्तनसूत्रस्योर्ध्वभागे सुलक्षणं बिम्बं भवति। विस्तारस्याष्टभागं कृत्वा, मूलस्य पार्श्वे, मध्यभागे तथाग्रभागस्य समीपे, एकभागे न्यूनं भवति , तर्हि तल्लिङ्गं स्थूल-मूलं कथ्यते। शिवभागात् न्यूनं करोति तर्हि तत् शिरःस्थूलं कथ्यते। तल्लिङ्गमार्षं कथ्यते। श्रेष्ठलिङ्गमिदमृषिपूजनीयं भवति। पूजाया भागसमीपे बाणो भवति। तद् बाणलिङ्गं भवति। अग्रत्रययुक्तं, पञ्चकोणं षट्-सप्त-दश-द्वादशास्रकं, अस्रविहीनं वा, मनोहरं, फलक-दर्पणाकारं, रेखैकं, रेखाविहीनं वा, शिरोवर्तनारहितं, मानरहितं सदा सेव्यं, देवैरपि पूजितं लिङ्गं स्वयम्भूलिङ्गं भवति। यस्य स्थूलं सूक्ष्मं चानुक्रमेण शीर्षं मूलं च भवति , मधुवर्णम्, आनन्ददायि एतादृशं लिङ्गमुत्तरमुखनामकेन प्रसिद्धमस्ति। पीठस्य प्रवेशस्य भागः सार्वदेशिकलिङ्गानुसारेण भविष्यति। धातो रत्नस्य च लिङ्गं सार्वदेशिकलिङ्गप्रमाणेन भविष्यति।[३९९]

शिरोवर्तनम्

शिरशो वर्णनं प्रस्तूयते। लिङ्गमस्तकात् केशान्तपर्यन्तं शिरोवर्तनं भवति। लिङ्गोदयात् शिरोवर्तनं कुर्यात्। प्रथमप्रकारस्य शीर्षं छत्राकारं भवति। द्वितीयं कुक्कुटाण्डं भवति। तृतीयप्रकारस्य शिरोवर्तनं त्रिपुराकारमस्तकेऽर्धचन्द्रो भवति। लिङ्गस्य विस्तारमष्टभागेषु विभज्य, ऊर्ध्वगोलाकारस्योच्चता सार्धद्वि-अंशस्य भवति। एतादृशः (छत्रकारस्य) प्रथमः प्रकारोऽस्ति। विस्तारस्य द्वात्रिंशद् भागान् कृत्वा पञ्च-अंशस्योच्चतायाः शीर्षम्, एतादृशश्छत्राकारस्य द्वितीयः प्रकारः, सप्त-अंशस्योर्ध्वोच्चता तृतीयः प्रकारः, नवांशस्योच्चता छत्रकारस्य चतुर्थप्रकारो भवति। विप्राणां नृपाणां च कृते छत्रकार-लिङ्गं सर्वकामदं भवति। सर्वलिङ्गेषु छत्रकारलिङ्गं प्रशस्तं भवति। विस्तारस्य द्वात्रिंशद्भागेष्वनुक्रमेण

३९९ का.शि.४९.१०९ तः १३०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...त्योच्चता स्वीकृतास्ति चेत् कुक्कुटाण्डस्याकार-प्रमाणेन लिङ्गस्य चत्वारः प्रकारा भवन्ति। वर्धमानप्रकारस्य लिङ्गं क्षत्रियाणां कृते प्रशस्तम्। शीर्षस्य विस्तारस्य च द्वात्रिंशद्भागाः क्रियन्ते, तदा १०-११-१२-१३ अंशानामच्चता, एतादृशं त्रिपुराकार-लिङ्गस्य चत्वारः प्रकारा भवन्ति। शिवाधिक-लिङ्गं वैश्यानां कृते योग्यं तथा कल्याणकारकं मन्यते। उच्चतायास्त्रयत्रिंशद्भागाः क्रियन्ते, तदा २२,२१,२०,१९ अंशानामर्धचन्द्राकारं कृतमस्ति चेत् चत्वारप्रकाराणां लिङ्गं भवति। स्वस्तिक-नामकं तल्लिङ्गं शूद्राणां कृते प्रशस्तं तथोन्नतिकारकं भवति। सार्वदेशिकलिङ्गमन्येषां कृते विशेषतः प्रशस्तं भवति। छत्रादिलिङ्गं शीर्षं विना कर्तुर्विनाशस्य कारणं भवति। दैविक - आर्षज ï लिङ्गानां शीर्षं भवेत्। शिरोवर्तनस्योच्चतां त्रिभागेषु विभज्य शुद्धो भूत्वा, यज्ञोपवीतधारणं कृत्वा, स्थपतिना पूर्वोक्तानुसारमग्नेः पूजां कृत्वा स्विष्टकृत्पूर्णाहुतिं च दद्यात्। लिङ्गपीठे सूत्रबन्धनं कुर्यात्।[४००]

लिङ्गपूजा

सुवर्ण-रजत-कार्पासस्य सूत्रेण संवेष्टनं कृत्वा, प्रातः शुभमुहूर्ते लक्षणोद्धारं कुर्यात्। लिङ्गस्य शीर्षस्थाने घृतेन सह पायस-बलिं दद्यात्। रक्तसिङ्गं विहायान्यगन्धादिना पूजां कुर्यात्। रक्तसिङ्गेन लिङ्गस्य मध्यभागे सूत्रं विक्षिपेत्, मुखभागस्य मध्यभागे सुलक्षणं नालं कुर्यात्। लिङ्गमानेन नालसूत्रस्य विस्तारं दर्शयति। शिरोवर्तनेन सह लिङ्गस्योच्चताया एकादश-भागं ज्ञात्वा, तस्य चतुर्भागस्य नालस्य विस्तारो भवति। एकभाग इत्युक्तेऽङ्गलमानेन भवति। अङ्गुलस्याष्टभागान् कृत्वैकांशो यव उच्यते। उत्तमोत्तमलिङ्गानां नालसूत्रं पञ्चाङ्गुलं दीर्घं भवति। सर्वप्रकाराणां लिङ्गानां नालसूत्राणां

४०० का.शि.४९.१३१ त १४४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

धमलिङ्गस्य सूत्रविस्तार एकयवो भवति। सूत्रविस्तार एवंप्रकारेण तत्समा वा दर्शितः।

लक्षणोद्धारः

ऊर्ध्व एकांशं तथा स्तनोद्ध्र्वमेकांशं वर्जयेत्, अवशिष्टभागे लक्षणोद्धारं कुर्यात्। शिरसि लक्षणं भवति चेद् रोगः, मस्तके लक्षणं भवति चेन्मृत्युः, नेत्रे कृतेऽपस्मारो भवति। मुखस्योपरि लक्षणे कृते धान्यस्य नाशो भवति। चुबुके लक्षणं भवति, तर्हि भ्रातुर्नाशो भवति। कण्ठे स्यात् तर्हि स्कन्धस्य नाशो भवति। स्तनप्रदेशे लक्षणं भवति तर्हि पुत्रस्य नाशो भवति। अत एतादृशेषु स्थानेषु लक्षणोद्धारं वर्जयेत्। शीर्षविस्तारस्यैकादश समभागान् कृत्वा, त्रिभागेषु मुकुलाकारप्रमाणो लिङ्गस्याकारो भवेत् तर्हि ब्राह्माणानामत्युन्नत्यर्थं तथा नृपतीनां विजयस्य कारणं भवति। खङ्गद्वयसमेन, गजनेत्राकृतिना, शङ्खानुसारं श्वेतेन छत्राकारप्रकारस्य लिङ्गेन नृपस्य विजयो भवति। हस्ताञ्जलिवदाकारयुक्तं, गोकर्णाकारं लिङ्गं वैश्यस्य वृद्धिकरं तथा त्रिकोणं शूलप्रमाणेन वृत्तायतं भविष्यति तर्हि शूद्रस्य वृद्धिदायकं भविष्यति।[४०२]

त्रिसूत्रलक्षणमुच्यते, लक्षणोद्धार-भागस्यैकादशभागाः क्रियन्ते तर्हि मुकुलस्योच्चताया एकांशः, विस्तारोऽप्येकांशो भवति। तस्य मूलविस्तारस्य नवभागाः प्रोक्ताः। तस्य नालमेकसूत्रं यावत् , अथवा द्वि-त्रिसूत्राणि यावद् भविष्यति। एकसूत्रं दीर्घतायुक्तं चेत् सूत्रस्य मध्यान्तरं यवत्रयं, मूलस्य विस्तारो यवद्वयं भविष्यति। नालस्योर्ध्वं, तस्याग्रे सीमासूत्रं कर्षयेत्, तत्कण्ठो यद्येकसूत्रस्य भवति, तर्हि विशेषतो लिङ्गस्य मध्यसमीपे सूत्रं कर्षयेत्। सूत्रव्यासानुसारं मूलस्योच्चतायाः, अगाधताया दीर्घतायाश्च कल्पनां कुर्यात्। मूलस्याधः एकांशं तथोर्ध्वमेकांशं त्यजेत्। मुकुलान्तं मणिरेखाद्वयं कुर्यात्। मणिरेखाया भागो कमलस्य मूलं यावद् भविष्यति। कमलस्य विस्तारस्य त्रिभागेष्वेकभागः, चतुरंशेषु त्रि-अंशाः, पञ्च-अंशेषु त्रि-अंशा वा

---

४०१ का.शि.४९.१४४ तः १५१
४०२ का.शि.४९.१५२ तः १५८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भविष्यन्ति। मुकुलमूलान्तरमेवं भवति। मूलस्य मूलसमीपेऽन्तरमुच्यते। मूलस्य दीर्घतां यावद् वा १/८ वा ३/४ वा त्रिभागाः, पञ्चभागाः, चत्वारो भागा वा मूलस्य मूलं यावन्मणिरेखाद्वयं मध्यभागस्यान्तरं भविष्यति। मणिरेखाया अन्तरं, मूलादग्रपर्यन्तं क्रमेण न्यूनं कुर्यात्। मुकुल-मूलस्य समीपे समानान्तरं, पश्चात् तिर्यक् पार्श्वं प्रति मणिरेखां संदध्यात्। मणिरेखाया विस्तारस्य त्रिगुणितं लिङ्गस्योच्चतायाः सूत्रं भविष्यति। मणिरेखाया आधारो मूलं यावद् वा सार्धैकगुणितो भवति। तस्य मूलपर्यन्तम्, अष्टभागेषु विभागा भवन्ति। मणिरेखाया आधारानुसारं नवप्रकारान् दर्शयति। सर्वलक्षणोद्धारेषु अष्टमणिरेखाः, इदं प्रथमं लक्षणम्। लक्षणोद्धारभागस्य दशभागान् कृत्वा, मुकुलस्योच्चता एकांशम्, अष्टांशं वा मूलस्य दीर्घता भवति। नालाधस्तादेकांशं नीत्वा, शेषं पूर्वानुसारं कुर्यात्, इदं द्वितीयं लक्षणमुक्तम्। तृतीये लक्षणोद्धारभागस्य दशभागान् कृत्वा, मुकुलस्योच्चताया एकांशं नवांशं वा मूलस्य दीर्घता भविष्यति। शेषं पूर्वानुसारं भविष्यति। चतुर्थलक्षणे लक्षणोद्धारस्य भागस्य नवभागान् कृत्वा, एकांशं मुकुलं कुर्यात्, मूलस्य दीर्घता सप्तांशं भवेत्, शेषं पूर्वानुसारं भवति। पञ्चमलक्षणे लक्षणोद्धारभागस्याष्टविभागान् कृत्वा, मुकुटस्योच्चतैकांशा भविष्यति। मूलस्य दीर्घता षडांशा भवति, मूलस्याध एकांशा भविष्यति। लक्षणोद्धारभागस्याष्टभागाः क्रियन्ते, तदा सप्तभागा मूलस्य दीर्घता भविष्यति। शेषं पूर्वानुसारं भवेत्। सप्तमे लक्षणोद्धारभागस्य सार्धसप्तांशेषु मुकुलस्योच्चतैकांशा, अग्रस्य दीर्घता पञ्चांशा, शेषं पूर्वानुसारं स्यात्। लक्षणोद्धारस्य सार्धसप्तभागस्य षडांशा सार्धषडांशा वाग्रस्य दीर्घता, शेषं पूर्वानुसारं भवेत्। एवं मूल-दीर्घताया अष्टप्रकारा उदाहृताः। अग्राकारे मुकुलाकारकमले, लक्षणोद्धारभागस्य द्वादशभागान् कृत्वा यथेष्टमग्रस्य दीर्घतां स्वीकुर्यात्। इदं नवमसंख्याया लक्षणमभवत्। उपरोक्तानुसारं लिङ्गस्य सूत्रं भवति। लिङ्गस्याग्रं पुरतो नीत्वा दारुपीठे स्थापयेत्। लिङ्गं पीठ उत्तराभिमुखं स्थापयेत्। हृदय मन्त्रैर्नेककलशान् तत्र स्थापयेत्। पञ्चगव्येन गन्धोदकेन च स्नाप्य, गन्ध-पुष्पादिरर्चयेत्, दीर्घकुशसहितं सर्वालङ्कारैः सह च

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...य प्रदक्षिणां कुर्यात्। पश्चाज्जलाशयं प्राप्य जलाधिवासं कुर्यात्।

प्रतिमालक्षणम्

प्रतिमालक्षणं प्रस्तूयते। प्रतिमायास्तिस्रः प्रकाराः सन्ति। अचला चला चलाचला च। मृत्तिकाया, वालुकया, तथैव सुधया अचला प्रतिमा भवति। पाषाणेन, दारुणा, धातुना, रत्नेन च चलाचला प्रतिमा भवति, लोहस्य प्रतिमा चला भवति। अर्धचित्रं, चित्रं चित्राभासं च – एवं प्रतिमायास्तिस्रः प्रकाराः सन्ति। शरीरस्यार्धभागं दर्शयति, यद् बिम्बं तदर्धचित्रं कथ्यते। सर्वावयवसम्पूर्णं रूपं यत्र दर्शयति, तच्चित्रं कथ्यते। वस्त्रस्योपरि, भित्त्यामाभासं प्रकोष्ठादिषु दर्शयित्वा बिम्बं करोति, स चित्राभासो भवति। सुधा तथा यः पदार्थश्चित्रस्य कृत उपयुक्तो भवति, तेनार्धचित्रं रच्यते। धातुनाभासश्चित्रं चित्रार्धं च। देवानां प्रतिमा चित्राभासस्यानुसारं भवति, तर्हि श्रेष्ठं फलं मिलति। चित्रं भवति चेन्मध्यमं तथार्धचित्रं भवति चेत्कनिष्ठं फलं मिलति। इष्टकायाः पीठं (चित्रं) तस्यापेक्षयाभासः श्रेष्ठः, द्वयोरपेक्षयाभासार्धं श्रेष्ठं भवति। मृत्तिकायाः (मूर्तिः) सर्वोत्तमा भवति। मृत्तिकापेक्षया दारुश्रेष्ठा, दारुणापेक्षया पाषाण-बिम्बं श्रेष्ठम्, पाषाणस्यापेक्षया लोहस्य प्रतिमा श्रेष्ठा भवति। कर्तुस्तदनुसारं फलं मिलति। लोहादुत्तमा सुवर्णस्य, रजतस्य मध्यमा, ताम्रस्य चित्र-प्रतिमा कनिष्ठा, तदनुसारं फलप्राप्तिर्भवति। द्रव्यानुसारं श्रेष्ठा मध्यमा कनिष्ठा च प्रतिमा भवति। सर्वद्रव्येषु देवत्वं समानं विद्यते। सर्वद्रव्येषु देवत्वे समाने फलं भिन्नं कथम् । स्थलभेदेन भूमिरेका भवति, किन्तु विविधा वृक्षा भवन्ति। तथैव देवत्वं समानं भवति, किन्तु द्रव्य-प्रमाणेन तेषां फलं पृथक्-पृथग् भविष्यति। अतो यदुत्तममस्ति, तेन द्रव्येण देवमूर्तिं कुर्यात्।[४०४]

---

४०३ का.शि.४९.१५९ तः १८५

४०४ का.शि.५०.१ तः १२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सुखासनस्थिता, उमा-स्कन्देन सह, चन्द्रशेखरः, वृषवाहनः, नृतमूर्तिः, गङ्गाधरमूर्तिः, त्रिपुरारिमूर्तिः, कल्याणसुन्दरमूर्तिः, अर्धनारीनटेश्वरः, गजहारी, पाशुपातः, कङ्कालमूर्तिः, हरिहर्यर्धमूर्तिः, भिक्षाटनमूर्तिः, चण्डेश्वरप्रसादः, दक्षिणामूर्तिः, कालारुणमूर्तिः (कालारिः)- एवं शिवस्य सप्तदश मूर्तयो भवन्ति। लिङ्गस्य स्थूलभागस्य दीर्घता-विस्तारं च दर्शयति। पूजाभागस्य भागद्वयं कृत्वा, तेषां प्रत्येकस्य समानं द्वात्रिंशद् भागान् कुर्यात्। तस्मात् २७, २५, २३, २१, १९ अंशाः, १६, १३, ११, ९, ७ ,५ भागाः शिरोवर्तनस्य भविष्यन्ति। शिवभागस्य द्विभागादन्तिमभागस्य नवभागान् कुर्यात्। तस्मादेकांशादारभ्य एक-एकांशं वर्धयित्वा सप्तविंशति - अंशपर्यन्तं पूजाभागस्य सप्तविंशतिप्रकाराःभवन्ति। शिवलिङ्गं प्रतिमायाः पूजाभागस्य चोच्चतायाः ३८ प्रकारा भवन्ति। लिङ्गमानानुसारं बिम्ब-लिङ्ग-प्रतिमायाः १०३ (११४?) प्रकाराः भवन्ति। गर्भागारस्य नवभागाः क्रियन्ते, तर्हि लिङ्गस्योच्चताया नवप्रकारा भवन्ति। गर्भागारस्य सप्तविंशतिभागाः कृताः। तदेकांशादेक-एक- अंशं वर्धयित्वा सप्तविंशतिप्रकारा लिङ्गप्रतिमा भवन्ति। पञ्च -अंशस्योच्चता (लिङ्गम्) उत्तमम्। चतुर्थांशस्य मध्यमं, त्रिरंशस्याधमलिङ्गं भवति। एवं द्वारमानेन (लिङ्गस्य) त्रिप्रकारा भवन्ति। अधम-उत्तमयोर्मध्यान्तरस्याष्टभागाः क्रियन्ते तदा शिवलिङ्गस्योच्चतायाः प्रमाणं द्वारमानानुसारं नव प्रकारा भवन्ति। द्वारोच्चतां सप्तविंशतिभागेषु विभज्य, एकांशं न्यूनं कृत्वा बिम्ब-उच्चतायाः २७ प्रकारा भवन्ति। एवंरीत्या द्वारमानेन (शङ्करस्य) प्रतिमाया उच्चतायाश्च षड्त्रिंशत्प्रकारा भवन्ति। एवं प्रमाणेनाधिष्ठानेन -स्तम्भमानेन च बिम्बस्योच्चतां कल्पयेत्। अथवा प्रासाद-बाह्यविस्तारानुसारं बिम्बस्य कल्पनां कुर्यात्। एकतो नवहस्तपर्यन्तं मानेन लिङ्गस्य नवप्रकारा भवन्ति। एकतालतो नवतालपर्यन्तं लिङ्गस्य नवप्रकारा भवन्ति। कर्तुरुच्चतापर्यन्तं, यजमानस्योच्चतापर्यन्तं वा लिङ्गस्योच्चता भविष्यति। अथवा कर्तुरुच्चतां नवभागेषु विभज्य, एक-एक -अंशं न्यूनं कुर्वन् नवप्रकाराणां लिङ्गस्योच्चता प्राप्ता भवति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तेषामेकांशाङ्गुलमानेन ज्ञेयम्। मूललिङ्गस्याङ्गुलं यावत्, पुरः प्रासादस्य च मानेन मानाङ्गुलं स्वीकरोति, तदेवाङ्गुलस्य मानं स्वीकुर्यात्। कर्तुर्दक्षिणहस्तस्य मध्यमपर्वस्य दीर्घता-विस्तार समं, एवं मानाङ्गुलस्य प्रकारद्वयस्य ज्ञानमस्ति। सप्ताङ्गुलादारभ्याङ्गुलद्वयमङ्गुलद्वयं वर्धयित्वा १२६ अङ्गलपर्यन्तं मानं भविष्यति। प्रथमलिङ्गस्य मानं त्रि -अङ्गुलं भविष्यति। गृहे वा स्वकृते मानं केवलमेकाङ्गुलं भविष्यति। यदि विपरीतं मानं स्वीकरोति तर्हि कर्तुर्नाशो भवति। अङ्गलमानेन निर्मिता शिवप्रतिमा सर्वजातीनां कृते परमा भवति।[४०५]

आयादिः

प्रतिमाया आयादिषट् शुभेक्षणार्थं तस्योच्चतामङ्गुलेन वर्धयेत्। किन्तु त्रि-षड् -अङ्गुलात्, तन्मानमायादिकृते न वर्धयेत्। लिङ्गस्य मानमङ्गुल-मानं विना भवेत्, तर्हि तस्य ८४ भागान् कृत्वा, एकभागं प्रतिमा-मानेन मेलयित्वा यदंशो भवति, स ब्राह्मणस्य प्रतिमाया आयादिं निस्कासयितुं योग्यो भवति। तथैव लिङ्गमानेन षष्टिः, अधिक- द्वयं, आहत्य ६२ अंशाः क्रियन्ते, तस्यैकभागात् प्रतिमाया मानं वर्धयित्वा, नृपतेः कृते योग्यं भवति। नृपतेर्वृद्धिकारणं भवति। प्रतिमा मानस्य चतुर्विंशतिभागान् कृत्वा, तस्यामेकभागः प्रतिमाया मानमिश्रणेन, तल्लिङ्गं वैश्यस्य वृद्धेः कारणं भवति। वैश्यानामुन्नतिं करोति। प्रतिमामानस्य १६ भागान् कृत्वा, तस्यामेकभागं प्रतिमाया मानं मेलयति, तर्हि तल्लिङ्गं शूद्रस्य वृद्धिं करोति। एवंप्रकारेण वर्णानुसारमंशं वर्धयित्वा, तां संख्यामष्टभिर्गुणनं कृत्वा सप्तविंशतिना भागं दत्त्वा, यच्छेषं भवति, तेनाश्विन्यादिनक्षत्राणि मिलन्ति। प्रतिमाया जन्मनक्षत्रेण राजा कर्ता वा

---

४०५ का.शि.५०.३९ तः ४१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तत् (प्रतिमाया जन्मनक्षत्रं) शुभं भवेत् ।यदि शुभनक्षत्रं नायाति, तर्हि प्रतिमाया उच्चतायाः १३० भागान् कृत्वा, एकैकभागं तस्मिन् मेलयतु, यावत् शुभादिर्नागच्छति तावत् कुर्यात्। एवं प्रकारेण यन्मानमागच्छेत्, तत्पादत उष्णीषपर्यन्तं प्रतिमाया मानं ज्ञेयम्।

अंशमष्टभिर्गुणनं कृत्वा द्वादशसंख्याभिर्भागं दद्यात्, यच्छेषं भवति, स आयः कथ्यते। अंशमष्टभिर्गुणनं कृत्वा सप्तविंशतिना भागं दद्यात्, यच्छेषं भवति, तेनाश्विन्यादिनक्षत्राणि मिलन्ति। नवभिर्गुणनं कृत्वा सप्तविंशतिना भागं दद्यात्, शेषं व्ययः कथ्यते। अंशं त्रिभिर्गुणनं कृत्वाष्टभिर्भागं दद्यात्, यच्छेषं भवति, तेन ध्वजादियोनिर्मिलति। नवभिर्गुणनं कृत्वा सप्तभिर्भागं दद्यात्, यच्छेषं भवति, तेन रविवासरादिर्मिलति। चतुर्भिर्गुणनं कृत्वा नवभिर्भागं दत्त्वा, शेषं मिलति, स अंशकः कथ्यते। एवमायादिषड्गुणा मिलन्ति। १.आयः। २. नक्षत्रम्। ३. व्ययः। ४. योनिः। ५. अंशकः। आयोऽधिकस्तथा व्ययो न्यूनः, तथैवायोऽतीवाधिको भवति, तच्छोभनं भवति। ध्वजः-धूमः-सिंहः-श्वा-वृषभः-गर्दभः-गजः-काकः- इत्येता अष्टयोनयो भवन्ति। तस्यां ध्वज-सिंह-वृषभ-गजा लिङ्गस्य कृते शुभा भवन्ति। अन्या योनय अशुभा भवन्ति। धूमेन विपत्तिः। श्वन्योनिना शत्रुता। गर्दभयोनिना मृत्युः। काकेन सर्वनाशः। षड्-अष्ट-द्वादशनक्षत्रं (राशि?) विहाय, अन्य-नक्षत्राणि शुभनि भवन्ति। कर्तुर्जन्म नक्षत्रं, नृपतेर्वास्तोश्च जन्मनक्षत्रं, त्रिनक्षत्राद् बिम्बस्य नक्षत्र-पर्यन्तं गणयतु, यदि शुभं भवेत् तर्हि तत् स्वीकुर्यात्। सोमवासरः शुभो भवति। मङ्गलवासरं वर्जयेत्। रविवासरस्तथा शनिवासरो मध्यमः। अन्ये वासरा उत्तमा ज्ञेयाः। रविवासरेण सह विशाखादीनि चत्वारि नक्षत्राण्यनुक्रमेण विरहः-मृत्युः-विनाशः-अमृतश्च - एतानि फलानि ददते। तस्कर-भक्ति-शक्ति-वन-राज-षण्ड-अभय-धन-ऋणा नवांशा भवन्ति। एतेषु तस्कर-षण्ड-ऋणानि वर्जयेत्। गणे देवगणो मनुष्यगणश्च (बिम्बस्य कर्तुश्च) ग्राह्याः, अन्य-गणान् वर्जयेत्। एवंप्रकारेण परीक्षां कृत्वा, शुभपूर्णं फलदायकं बिम्बं कुर्यात्। उत्तमदशताल मूर्तीनां मानस्य ज्ञानं दर्शितम्। मृत्तिकायाः प्रतिमां

…धारस्य स्थापनं कुर्यात्। पाषाणस्य प्रतिमां रचयितुं लिङ्गस्य कृते दर्शितलक्षणयुक्ता शिला ग्राह्या। लोहस्य प्रतिमा रचयितुं सिक्थेन सज्जतां कुर्यात्। षोडश स्तम्भा मण्डपे, धान्यस्थण्डिलं कृत्वा कमलं दर्भं पुष्पं च तस्योपरि प्रसारयेत्। तस्योर्ध्वकाष्ठस्य फलकायादिपूर्वानुसारं कुर्यात्। आचार्यः शिल्पी कर्ता च प्रतिमायाः शुभमानं प्रकल्पयेत्। तन्मानेनोर्ध्वस्थितावयवा वालुकया कुर्यात्। प्राक्प्रतिमाया मुखोर्ध्वं दिग्प्रति फलकं निधापयेत्। गन्ध-पुष्प-धूप-दीप-अर्घ्यादिना पूजयेत्। तस्य दक्षिणपार्श्वेऽग्निं स्थापयेत्। समिध्-घृत-चरु-आदिद्रव्यैर्हुत्वाष्टशताहुतीर्दद्यात्। द्रव्यसमाप्तिपर्यन्तमाहुतीर्दत्त्वा, पूर्णाहुतिं दद्यात्। मध्यमूलस्य मध्ये प्रतिमाया अग्नेर्वा ध्यानं कुर्यात्। अग्रात्क्रमात्संधानमाचरेत्। शीर्षसंधानमीशेन, मुकुटं कवचेन कुर्यात्। अस्त्रसन्धानमस्त्रेण, पादस्य पार्श्वे समर्पयेत्। प्रारम्भे पश्चाद् वा संधानं कृत्वा क्रमेण सम्पूर्णमााचरेत्। पश्चादपाङ्गं, ततः प्रत्यङ्गं कुर्यात्। तदवयवानां (अङ्गानां) समीपेऽष्टत्रिंशत् कलान्यासं कुर्यात्। वस्त्र-आभूषण-सूत्राण्युपाङ्गं कथ्यते। हस्तप्रभृतिः प्रत्यङ्गमुच्यते।[४०६]

ताललक्षणम्

दशतालतस्त्रितालपर्यन्तं प्रत्येकतालस्य श्रेष्ठो मध्यम अधमश्चेति त्रयः प्रकारा भवन्ति। उत्तमदशतालस्य मानं चतुर्विंशतित्यधिकमेकशतमङ्गुलयो भवति। मध्यमदशतालस्य मूर्तेश्च मानं १२० अङ्गलयो भवति। ११६ अङ्गुलस्य मानमधमदशतालस्य भवति। ११२ अङ्गुलमुत्तमनवतालस्य मानमस्ति। १०८ अङ्गुलस्य मानं मध्यमनवतालस्य भवति। १०२ (१०४?) अङ्गुलमानमधमनवतालस्य भवति। प्रत्येकताल एवंरीत्या चतुरङ्गुलानि लघुर्भवति। उत्तमदशताले ब्रह्मा, विष्णु-महेश्वर-इत्यादीनां मूर्तयो भवन्ति। मध्यमदशताले उमा-सरस्वती-उषा-भूमिः -दुर्गा-लक्ष्मीस्तथा मातरश्च भवन्ति। एवंप्रकारेण मध्यम दशताले ज्येष्ठा (गौरी)

---

४०६ का.शि.५०.४२ तः ७६,१/१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ः, अश्विनौ, ऋषिः, ग्रहस्तथा, षण्मुखः, चण्डेशः, क्षत्रपालश्चाधम दशतालेन कुर्यात्। वसोरष्टमूर्तयः, विघ्नेशः, लोकपालस्तथान्ये देवा उत्तमनवतालेन कुर्यात्। यक्षः, अप्सरोगणाः, मरुद्गणाः, विद्याधरगणादीन् मध्यमनवतालेन कुर्यात्। असुरः, सिद्धगन्धर्वाः, पितरश्चाधमनवतालेन कुर्यात्। मध्यमाष्टताले तथैव, सप्ततले पिशाचं कुर्यात्। षड्ताले कुब्जम्। पञ्चतालमानेन कुबेरम्, तस्यां पञ्चतालस्य मध्यमेन, अधमेन च मानेन सर्वभूतगणान्कुर्यात्। बालकं चतुस्तालेन त्रितालेन वा, तथैव द्विताले किन्नरं, एकतालेन कूर्मम्। एवं सर्वेषामनुकूलं तालमानं प्रोक्तम्। प्रतिमाया उच्चता १२४ अंशानां कुर्यात्। (प्रतिमाया उच्चतायाश्च १२४ भागान् कुर्यात्। ) तालस्याङ्गुलमानं भवति, अङ्गुलस्याष्टभागाः क्रियन्ते, तर्हि तस्यैकांशं यवः कथ्यते। यवेनाङ्गुलेन वा, उष्णीषतः पादपर्यन्तं प्रत्येकावयवानां मानं प्रमीयते। एकाङ्गुलस्त्रियवाश्चोष्णीषस्य उच्चता दर्शिता।[४०७]

उत्तमदशतालमानम्

उष्णीषतः केशान्तपर्यन्तं षडांशं दर्शितम्। केशानां कोणतः सूत्रपर्यन्तमंशद्वयं त्रियवानामन्तरं भवति। नेत्रसूत्रान्नासिकाछेदनपर्यन्तं, नासापुटतः हनुपर्यन्तं प्रत्येकस्यांशत्रयम्, त्रियवाणामन्तरं भवति। हनुतो गलमानस्यान्तरं चत्वारो यवाः, गलस्योच्चता त्रिरङ्गुलं सप्तयवाश्च भवति। केशमूलाद् हनुसूत्रपर्यन्तं भागं हिक्कासूत्रं कथ्यते। हिक्काद् हृदयपर्यन्तं, हृदयान्नाभिपर्यन्तं, नाभितो मेढ्रमूलपर्यन्तमेकसमानाः प्रत्येकस्य त्रयोदश अंशास्त्रियवाश्च भवन्ति। मेढ्रमूलस्य मध्यभागे यत्सूत्रं भवति, तन्मध्यसूत्रं कथ्यते। मध्यसूत्रस्योर्ध्वमुरोर्दीर्घता नवभागस्य भवति। चतुरङ्गुलानां जानुः, पिण्डिकायाः (जङ्घायाः स्थूलभागस्य) दीर्घता ऊरुवन्नवभागस्य भवति। पाद-तलस्योच्चता त्रिभागेषु भवति। एवं पृथक् पृथगवयवानामुच्चता दर्शिता। अङ्गुष्ठस्याग्रभागाद् हस्तस्य मूलपर्यन्तं, हस्ततलपर्यन्तं सप्तदशाङ्गुलाः भवन्ति। हिक्कासूत्रस्याधो हस्तस्य कूर्परपर्यन्तं दीर्घता सप्ताङ्गला भविष्यति। कूर्परस्योच्चता द्विभागा

४०७ का.शि.५०.७६-१/२ तः ९२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

न्धपर्यन्तं) २१ अङ्गलयो भविष्यन्ति। मध्यमाङ्गुलीतो मणिबन्ध-पर्यन्त दीर्घता सार्धत्रयोदशाङ्गुलयो भवन्ति। ग्रीवाग्रस्य विस्तार: सार्धनवाङ्गुल:, मुखात्कर्णान्तं विस्तार: १३ अङ्गुलयो मन्यते। कण्ठाग्रस्य विस्तार: सार्धनवाङ्गुल:, कण्ठमूलस्य विस्तारो दशाङ्गुलो भवति। हृदयाद् बाहुसीमापर्यन्तमन्तरं चतुर्विंशति: सार्धचतुर्विंशतिरङ्गुलयो भवति। कक्ष-मध्यस्यान्तरं सार्धद्वाविंशतिरङ्गुलयो भवति। हस्तमूलस्य विस्तारो नवांशाश्चत्वारो यवाश्च भवेत्। हस्तस्य दीर्घता २१ अङ्गुलयो भवति। हृदयसमीपे स्तनभागस्य विस्तार: २९ अङ्गुलयो भवति। मध्यभागस्य विस्तारोऽष्टादशाङ्गुलश्चत्वारो यवाश्च, पार्श्वभागस्य विस्तार: १९ अंशा दर्शित:। कटेरुर्ध्वभागस्याष्टादशाङ्गुला:। कटिपार्श्वान्तस्य विस्तार: सार्धविंशतिरंशा भविष्यति। ऊरुमूलस्य विस्तार: पादोनचतुर्दशभागा भवति। ऊरोर्मध्यभागस्य विस्तार: सपादद्वादशअंशा भविष्यति। जानुव्यास: पादोनदशाङ्गुल:, नलिकाया विस्तार: सपादाष्टभागा भवति। गुल्फस्य विस्तारोंऽशद्वयमेकयवो वा भवति। तस्य तलादूर्ध्वपर्यन्तं स्थूलता सार्धचत्वाराङ्गुला भवति। नखस्य विस्तारो दीर्घतायार्धो भविष्यति, नखाग्रस्य पादोनभागो न्यूनो वा विस्तारो वृत्तायतो भविष्यति। पादतर्जन्या दीर्घता चत्वारांशास्त्रियवाश्च। मध्यमाङ्गुल्यायतं पादोन- चत्वारो भागा भविष्यति। अनामिकाया दीर्घता त्रिभागैकयवश्च भविष्यति। कनिष्ठाङ्गुलदीर्घकं सार्धद्विरंशं भविष्यति। नखस्य विस्तारोऽङ्गुलविस्तारादर्ध: पूर्वोक्तानुसारं ज्ञेय:। तदङ्गुलेर्विस्तारं चतुर्भागेषु विभाजितं कुर्यात्। अङ्गुलाग्रोच्चस्य विस्तारस्त्रिभागो भवति। शेषं नखस्यान्तरं भवति। हस्तमध्यस्य विस्तारोऽष्टांशस्त्रियवा वा भविष्यति। कूर्परस्य विस्तार: सपादसप्तभागा भविष्यति। प्रकोष्ठस्य मध्यविस्तार: पादोनषड्भागा:, मणिबन्धस्य विस्तार: पादोन चतुरंशा:, तलस्य दीर्घता सप्तांशा, मध्यमाङ्गुलस्य दीर्घता सार्धषडांशा भविष्यति। अनामिकाया दीर्घता सपादपञ्चभागस्य। तर्जन्या दीर्घता पञ्चांशा यवैकश्च । अङ्गुष्ठस्य तर्जन्या वा दीर्घता सपादचत्वारो भागा भवति। अङ्गुष्ठस्य मूलस्य विस्तार: सपादांश:। तर्जन्या विस्तारोऽष्टयवा:। मध्यमाङ्गुलस्य विस्तारो नवयवा भवति। अनामिकाया विस्तारोऽष्टयवा

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

यवा भविष्यति। अङ्गुष्ठात् सर्वाङ्गुलानां मूलविस्तारः, तत्तदङ्गुलस्य मूलस्य विस्तारस्य च १/१६ न्यूनं विस्तारोऽङ्गुलाग्रस्य भविष्यति। अङ्गुलाग्रस्य विस्तारः षडांशा भविष्यति। पञ्चांशो नखस्य विस्तारो भविष्यति। नखस्य पार्श्वे मांसलभागो भविष्यति। नखस्याकारो वृत्ताकारो भविष्यति। नखस्य विस्तारः सपादगुणितः, नखस्य दीर्घता द्विगुणिता, पर्वदीर्घं योग्यं ज्ञेयम्। अङ्गुष्ठमूलपर्वस्य दीर्घता सप्तदशयवा भवति। तर्जनीमूलपर्वं तथानामिकाया मूलपर्वस्य दीर्घताङ्गुलद्वयं १६ यवा भवति। मध्यमामूलपर्वस्य दीर्घता अष्टादश यवा भविष्यति। कनिष्ठामूलपर्वस्य दीर्घता त्रयोदशयवा भवति। मध्यमपर्वस्य दीर्घता, मूलाग्रपर्वस्य दीर्घता च मध्यं यावद् भविष्यति। अङ्गुष्ठं सार्धद्विपर्वस्य, अन्याङ्गुलयस्त्रिपर्वस्य भवन्ति। अङ्गुलस्याधः, तलाग्रभागस्य विस्तारोऽष्टाङ्गुलो भवेत्। हस्ततलस्य मध्यभागस्य विस्तारः षडंशा भविष्यति। तलमूलविशालं सार्धषडंशाः, अङ्गुष्ठमूलात् तर्जनीमूलपर्यन्तं दीर्घता चत्वाराङ्गुला भवति। सार्धद्वि-अंशस्य स्थूलता भविष्यति। तत् शुकोदरं कथ्यते। अङ्गुष्ठमूलान्मणिबन्धपर्यन्तं दीर्घता चत्वाराङ्गुला भवति। सार्धद्वि -अंशस्य स्थूलता भविष्यति। हस्तस्य पृष्ठभागस्य स्थूलता त्रि-अंशानाम्, अग्रभागस्य स्थूलता, अङ्गुष्ठस्य स्थूलता यावद् भविष्यति। अङ्गुलस्याध उच्चतायाः स्थूलता सार्धद्वि-अंशस्य भवति। हस्तस्य पृष्ठभागस्य विस्तारः शुकोदरस्य विस्तारं यावत् भविष्यति। शेषं मध्यतलस्य गाम्भीर्यस्य भागः ४/५ भविष्यति। तत्र सूक्ष्मरेखया शंखं-चक्रं-शूलं एवमाकृतिं कुर्यात्। कमलानुसारं  कुशानुसारं वा हस्तोर्ध्वरेखां कल्पनाल्पयेत्। रेखाया अगाधता १/८ यवा भविष्यति। गोलाकृतिरुङ्गं दर्शयितुमिच्छेत्, तदा वृत्तव्यासस्य पञ्चभागान् कृत्वा, एकांशं स्वीकुर्यात्। तस्य त्रिगुणितं विस्तारो नाहं कथ्यते। नाहेन विस्तारं कल्पयेत्। कर्णोर्ध्वमस्तकस्य मानं ३८ अङ्गुलं भवति। कर्णोर्ध्वं मस्तकस्योच्चता ११ अङ्गुलाः सप्तयवाश्च भवेत्। कर्णयोर्मध्ये पुरतोऽन्तरं २२ अङ्गुला भवेत् । कर्णमध्ये मस्तकस्य पृष्ठान्तरं द्वादशाङ्गुलं दर्शितम्। मध्यभागे कर्णस्य स्थानम्। शिरस ऊर्ध्वस्य मध्यभागस्य वृत्ताकार-व्यासश्चत्वारोऽङ्गुला भविष्यति। पुरतः

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

्। वृत्तात् कर्णस्य तथा केशान्तस्य पर्यन्तं नवाङ्गुलम्, मण्डलात् पृष्ठकेशान्तं सार्धदशाङ्गुलमन्तरं भवति। ललाट-तिर्यग्भागस्य दीर्घता नवाङ्गुला भवति। केशान्तनेत्रसूत्रयोर्मध्ये भ्रूर्भवति। भ्रूवोर्दीर्घता पञ्चाङ्गुला तथा तस्या मध्यभागस्यान्तरं यवद्वयं भवति। तस्य मध्यभागाद् भ्रूवाग्रो बालचन्द्राग्रवत् क्षीणो भवति। कर्णिकाया विस्तारो दीर्घता चैकयवा भवति। नेत्रस्य कृष्णवृत्ताकारस्य विस्तार उच्चता च षड् यवा भविष्यति। कृष्णवृत्तस्य परितः स्थितस्य श्वेतभागस्य विस्तारं यावद् भविष्यति। मत्स्याकृतिर्धनुषाकृतिरर्धचन्द्राकृतिश्च नेत्रस्याकारो भविष्यति। नेत्राकारमनुरूपं श्वेतवर्णस्य वर्तुलं भविष्यति। नेत्रान्ते यवविस्तारस्य रक्तवर्णस्य च भागो भविष्यति। कृष्णवृत्तस्य मध्ये ज्योतिमण्डलमेक-यवस्य भवति। तस्य मध्ये १/८ भागस्य दृष्टिमण्डलं भविष्यति। तत्र सार्धैकयवमानस्योर्ध्ववर्म भवेत् अधोवर्मस्य दीर्घता अष्टादश यवा भविष्यति। नेत्रयोरन्तरं सपादद्वयमङ्गुलं भवेत्। ऊर्ध्ववर्मस्य तथा भ्रुवोरन्तरं सार्धषड्यवा भवेत्। अधोवर्मस्य स्थानं तस्मात् किञ्चिद् भिन्नं भवति। अधोदृष्टिः कर्तुर्नाशं करोति। ऊर्ध्वदृष्टिर्विपत्तिकारिका भवति। पार्श्वदृष्टिर्बहुनाशं करोति। ग्रामस्य वा हानिर्भवति।[४०८] अतः सर्वप्रयत्नेन समदृष्टिर्भवेत्।

नासिकालक्षणम्

नासिकापुटबाह्यविस्तारः १८ यवा भवति। तस्यार्धनव यवा नासिकाया मध्यान्तरस्य विस्तारो भविष्यति। नासिकामूलस्य विस्तारः सार्धचतुर्यवा भविष्यति। गोजीमूलेन नासिकाग्रस्योच्चताङ्गुलद्वयं भविष्यति। नासिकापुटयोर्मध्यभित्तिरेकपुष्करो भवति। नासाग्रपुटसूत्रकं सार्धैकयवपुरत आगच्छेत्, तर्हि नासाग्रस्योच्चता दीर्घता च सार्धचतुर्यवा भविष्यति। सपादयवद्वयं विस्तारो भविष्यति। ऊर्ध्व- ओष्ठस्योर्ध्व-अगाधताया भागो गोजीनाम्ना प्रशंसितः। गोजी-विस्तार एको यवो भविष्यति। मुखस्य तिर्यग् दीर्घता सपाद चतुरंशा भविष्यति। ऊर्ध्व -ओष्ठस्य दीर्घता मुखस्य दीर्घता वैकसमानोदाहृता। उत्तरोष्ठस्य

---

४०८ का.शि.५०.९३ तः १५०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ति। प्रथमान्मुखसीमान्तं न्यूनं कृतं भवति। उत्तरोष्ठस्य पालिः स्थूलतैकयवस्य भविष्यति। पालि-विस्तारस्त्रियवाः, दीर्घतोत्तरोष्ठस्य समाना भविष्यति। अधरोष्ठस्य दीर्घताष्टादशयवाः कल्पयेत्। ओष्ठस्य विस्तार एको यवो भवति। पालिना सहोष्ठ एकयवोऽधो भवति। चिबुकादधरोष्ठस्योच्चता सार्धषडांशा भवति। मुखं किञ्चित् प्रहसिताकारं रचयेत्। अधरोष्ठात् चिबुकस्याधारः सार्धद्विरङ्गुलो भवति। चिबुकात् चिबुकान्तस्य स्थानं सार्धाष्टभागं भवति। चिबुकान्तस्य विस्तारः सार्धद्विरङ्गुलमाकारश्च वृत्तायतो भवति।चिबुकभानोः संधौ कर्णबन्धान्तरं द्वादशाङ्गुलं स्मृतम्। चिबुक-भानोर्बाह्यस्थानादारभ्य कण्ठ-प्रवेशः पादोनत्रिरुङ्गुलो भवति। तत्र प्रवेश-समीपे कर्णं भवेत्। नेत्रात् कर्णबन्धान्तमन्तरं सप्ताङ्गुलं भवेत्। कर्णस्य विस्तारोऽष्टादशाङ्गुलो भवति। नेत्रसूत्रादूर्ध्वकर्णस्योच्चताष्ट यवा भवेत्। कर्णस्योर्ध्वभागस्य नवभागा भवन्ति। शेषभागो वृत्ताकारो भवति। नेत्रसूत्रादधः कर्णबन्धोऽष्टादशयवानां भवति। तत्र नेत्रसूत्रात् कर्णनालं सार्धचतुरङ्गुलस्य दीर्घता भवति। प्रथमभागस्य गाम्भीर्यमेकोऽङ्गुलः, पश्चाद् गाम्भीर्यं सार्धैकाङ्गुलं भवति। नालविस्तारस्तस्य गाम्भीर्यादर्धाङ्गुलाधिको भवति। नालमध्यस्यान्तरं पादोनाङ्गुलम्, तस्य दीर्घता चतुरङ्गुला भवति। शेषं कर्णस्य दीर्घताष्टाङ्गुला सप्तयवाश्च भवति। पिप्पलेः स्थूलतैको भागस्तथा दीर्घता द्विगुणिता भवति। उच्चतार्धमात्रं स्यात्, मूलात् पुरतो न्यूनं भवति। पीञ्चुषीदीर्घता भागद्वयं, स्थूलता सार्धयवांशा भवति। नेत्रसूत्रस्याधः कर्णद्वारमर्धाङ्गुलं भवेत्। कर्णद्वारं नतं निम्नमेकसमानं भवेत्। कर्णस्याधोभागस्य स्थूलता सार्धैकयवा तथा नीव्रं चत्वारो यवा भवेत्। कर्णपृष्ठस्य विस्तारः सार्धैकभाग उक्तम्। केशान्तात् कर्णपृष्ठभागपर्यन्तं द्वयोर्मध्यभागस्यान्तरमर्धभागं भवेत्। पृष्ठकेशान्तात् कर्णस्यान्तरं सार्धद्विभागस्यान्तरं भवेत्। कर्णाधः पृष्ठग्रीवोच्चं त्रि-अङ्गुलं त्रियवाश्च भवेत्। कृकाटिकाधः पृष्ठग्रीवाग्रं नवाङ्गुलं भवेत्। ग्रीवापृष्ठभागस्य मूलस्य चोच्चता दशाङ्गुला भवेत्। मूलादग्रभागपर्यन्तं क्रमात् न्यूनं भवति। गोलाकारा ग्रीवा उच्यते। हिक्कासूत्रेणोर्ध्वस्कन्धस्योच्चता चत्वारोऽङ्गुला भवति। स्कन्धात् कटिसीमान्तं

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ति। वंशनविस्तारं क्रमात् सार्धषोडश यवा भविष्यति। वंशमानदधस्ताद् वंशमूलं त्रि-अङ्गुलं भवति। तस्याधस्तावदुच्चता भवति। तत्रस्थव्यासः कुक्षीमध्यान्तरं सार्धसप्तविंशतिरङ्गुलं भवति। कक्षस्याधोभागस्यांसफलकतुङ्गता सप्ताङ्गुला भवेत्। कक्षोर्ध्वं हस्तसीमान्तमन्तरं सप्ताङ्गुलं भवति। मध्यभागस्य विस्तारः सार्धविंशतिरङ्गुलो भवति। कक्षाग्रभागस्य विस्तारः सप्ताङ्गुलो भवति। नाभिसूत्रस्य विस्तारः सार्धविंशतिरङ्गुलो भवति। कटिबन्धस्य विस्तारोऽष्टादशभागेषु भवति। स्फिकपिण्डस्य विस्तारः पादोनदशभागा भवति। स्फिकपिण्डं गोलाकारं भवति, तयोर्मध्यमन्तरं चत्वारो यवा भवति। पुरतो विस्तारः प्रोक्तः। पार्श्वविस्तारस्तावदेव भवति। कक्षस्याग्रविस्तारस्य सप्ताङ्गुल उक्तः। स्तनसूत्रस्य विस्तारः सपादषोडशाङ्गुलो भवति। मध्यभागस्य स्थूलता सपादद्वादशांशभागा भवति। पार्श्वभागस्य स्थूलता सप्तदशाङ्गुला भवेत्। पार्श्वभागस्योच्चता सप्ताङ्गुला भवति। नाभिसूत्रादधश्चोर्ध्वं पार्श्वभागश्चतुर्विंशाङ्गुलो भवेत्। पार्श्वभागस्याधः श्रोणि-उच्चता सपादपञ्चाङ्गुला भवति। तस्य स्थूलता सार्धद्वादशाङ्गला भवति। स्फिक्पिण्डस्य निर्गमनमूरूमूलात् सार्धचत्वाराङ्गुलं भवति। पिण्डस्य स्थूलतार्धसूत्रादर्धाङ्गुला भवेत्। कक्षात् जठरभागस्य निम्नता सार्धद्विरङ्गुला भवति। नाभिः पूर्णगोलाकारा, तत्र गोलाकारपङ्क्तिद्वयं भवति। पङ्क्तेर्विस्तार उच्चता च चत्वारो यवा भवति। हिक्कातो नेत्रसूत्रपर्यन्तं गतं सूत्रं जानुसूत्रं कथ्यते। हिक्कामध्यात् कक्षान्तं स्तनान्तरं समं भवेत्। स्तनयोर्मध्ये हृदयस्य गर्तः सार्धैकङ्गुलस्यागाधो भवेत्। कण्ठस्य पाश्वे यन्नालं भवति, तस्योच्चता त्रियवा, दीर्घता सार्धैकङ्गुला भवति। हिक्कासूत्रस्याधः कण्ठमूलं कल्पयेत्। हिक्कासूत्राध्र्वं नीलवर्णः शङ्करमूर्तौ भवति। हृदय-स्तन-पीठस्योच्चताङ्गुलद्वया भवति। स्तनमण्डलस्य विस्तारः सप्तदश यवाः। मध्ये चूचकं भवति, तस्योच्चता विस्तारश्च यवद्वयं भवति। नाभेरपेक्षया स्तनविस्तार एकाङ्गुलो यवद्वयं चाधिको भवेत्। नाभिः प्रदक्षिणाक्रमेण वृत्ताकारा भवति। तस्या मूलविस्तारो यवद्वयं भवेत्। नाभेर्वृत्ताकारस्य केन्द्रस्थाने नाभिसूत्रं भवति। नाभेरधः पार्श्वभागस्योच्चता पञ्चाङ्गुला भवति। तत्स्थानात् कटिश्रोणी सार्धद्वि-

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

...न्तं मेढ्रपीठं चत्वारोऽङ्गुला भवति। लिङ्गस्य दैर्घ्यं पञ्चाङ्गुल दीशतम्। लिङ्गमूलविस्तारः सप्तदश यवाः, लिङ्ग-दीर्घतायास्त्रिभागेष्वेकभागोऽग्रभागस्य भवति। तत्र लिङ्गस्य पुरतो भागस्य विस्तारो मूलविस्ताराद् विस्तार एकयवोऽधिको भवति। लिङ्गस्याग्रभागो रक्तवर्णस्य कमलवद् रचयेत्। मुष्कस्य दीर्घता विस्तारश्च सार्धचत्वाराङ्गुलो भवति। स्थूलता सार्धत्रिभागा, स्थूलता क्रमशो वर्धमाना भवति। मेढ्रपीठस्य मूलविस्तारः सार्धसप्ताङ्गुलो भवति। मेढ्रपीठस्य मूलान्तादूरुमूलपर्यन्तं मांसलस्य भागो भवति। जानोर्वृत्ताकारभागस्य विस्तारः सपादचतुरङ्गुलो भवति। जानुमण्डलस्य नीव्रकं सार्धद्व्यङ्गुलकं प्रोक्तम् । पृष्ठजानोर्भागः सार्धद्व्यङ्गुलकस्य, अधोभागे नम्रो भवति। मध्यभागः पार्श्वभागस्तथा शेषभागश्च यथासुन्दरं भवेत् तथैव रचयेत्।[४०९]

मध्यमदशतालविधानम्

मध्यमदशताले स्त्रीमानं वर्णयति। सरस्वती-दुर्गा-उमा-भूमिः-सप्तमातरः-लक्ष्मीः-ज्येष्ठा च एवंप्रकारेण विधिना कुर्यात्। शङ्करः-ब्रह्मा-रथे विष्णुः-शक्तिः- इत्यादीनां कृते मध्यमदशतालमानं स्वीकुर्यात्। शङ्करस्य नासिकायाः सीमापर्यन्तं शक्तेरुच्चता, उत्तमं मानमस्ति। शङ्करस्य स्तनभागपर्यन्तं शक्तेरुच्चता अधमाधममानमस्ति। मानान्तरस्य अष्टभागान् कृत्वा, शक्तेर्नवप्रकाराणां मानं प्राप्यते। शङ्करस्य स्कन्धपर्यन्तं शक्तेरुच्चताया उत्कृष्टं मानमस्ति। शङ्करस्य स्तनपर्यन्तं मानं कनिष्ठं भवति। तयोर्मध्येऽष्टभागान् कृत्वा, शक्तेर्नवप्रकाराणां मानं प्राप्यते। एवं प्रकारेण पादादुष्णीशपर्यन्तं (शक्तेरुच्चताया) अष्टादशप्रकारा भवन्ति। तस्यांशमानेन (अङ्गुल का माप) दीर्घतायोजना कथं केन प्रकारेण, तद् दर्शयति। श्रीभङ्गासना, नृत्यं कुर्वती, एतादृशी मूर्तिः समपादस्थाने उत्थिता,

४०९ का.शि.५०.१५१ तः २०४

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कं कुर्यात्। दुर्गा, ज्येष्ठा लक्ष्मीस्तथा सप्तमातृणां मानं प्रतिमामानानुसारं कल्पयेत्। मूलालिङ्गस्य गौरीं लिङ्गमानेन कुर्यात्। स्त्रीमानान् १२० भागेषु विभजयेत्। एकांशं भाग एकाङ्गुलः कथ्यते। तस्याष्टांशं यवः कथ्यते। तदङ्गुलेन वा यवेनावयवानां मानं स्वीकुर्यात्। उमेत्यादिदेवीनां कृत एतदङ्गुलेन दीर्घता भविष्यति। उष्णीशस्योच्चताया एको भागः, केशान्तपर्यन्तमुच्चता त्रि-अङ्गुला भवति। केशान्तान्नेत्रसूत्रपर्यन्तमुच्चता पादोनपञ्चभागा, नेत्रसूत्रान्नासापुट-पर्यन्तमुच्चता सार्धचत्वारो भागा भविष्यति। नासापुटाद् हनुपर्यन्तमुच्चता त्रिपादगुणांशका भवति। ग्रीवाया मानं चतुर्भागमुदाहृतम्। हिक्कातो हृदयपर्यन्तं, हृदयान्नाभिपर्यन्तं, नाभितो योनिपर्यन्तं मानं समानं त्रयोदशाङ्गुलं भवति। ऊरूदीर्घता षड्विंशतिरंशा, जानोश्चत्वारो भागाः, ऊरूवत् पिण्डली-दीर्घता भवति। पादस्योच्चता चतुरङ्गुला भवति। पादतलस्याङ्गुष्ठस्य पृष्ठभागादग्रपर्यन्तं दीर्घता चत्वाराङ्गुला भवति। पादतर्जन्या दीर्घता चतुर्भागा भवति। मध्यमाङ्गुलस्य दीर्घता ३/१ तथानामिकाया दीर्घता त्रिभागा भवति। कनिष्ठाङ्गुलेर्दीर्घता सार्द्धद्विभागमाना भवति। अङ्गुष्ठात् कनिष्ठान्तं विस्तारः क्रमेण अष्ट, अष्ट, सार्धसप्त, सप्त वा षड् यवानां भविष्यति। नखविस्तारः २/३ भागो वृत्तायताकारो भविष्यति। अङ्गुलीनां मुखोच्चता नखविस्तारसमा भविष्यति। जानोर्मध्यभागस्य विस्तारः षडाङ्गुलो विद्यते। मध्यभागस्य विस्तारः पञ्चाङ्गुलः, पादतलान्तभागस्य विस्तारश्चत्वाराङ्गुलो भवति। पादतलस्योत्थितो भागस्तथा गुल्फयोर्मध्यभागस्य विस्तारः पञ्च भागस्य भविष्यति। नलिकाया द्वादशभागाः, जङ्घा-मध्यभागस्य विस्तारः षडाङ्गुलो भविष्यति। जानोर्विस्तारः सप्तभागेषु, ऊरोर्मूलविस्तारो द्वादशांशानां भविष्यति। कटिविस्तारः २४ अङ्गुलो भविष्यति। योनि-पीठस्य विस्तारः सप्ताङ्गुलो भविष्यति। योनिभागश्चतुरंशानां, अश्वत्थपत्रस्य पृष्ठभागवत् संकुचितो भवति। यावद् विस्तारस्तावदुच्चता, मध्यभागे भवेत्। श्रोणिविस्तारः २० अङ्गुल एकयवश्च भवति। मध्यभागस्य विस्तारः ११ अङ्गुलस्य भवति। स्तनविस्तारः सार्धत्रयोदशाङ्गुलो भवति। स्तनमध्यान्तरं नवांशं, स्तनाग्रमंशद्वयं, स्तनस्योच्चता सार्धचतुर्भागा स्तनाग्र वैकांशो

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्यन्तं सुन्दरं रचयेत्। स्तनमध्यान्तरमष्टांश एकयवश्च भवति। स्तनाक्षियोरन्तरं सप्तादशाङ्गुलं भवति। हस्तपर्यन्तं विस्तार एकत्रिंशदङ्गुलो भवति। हिक्कासूत्रादधो हस्तस्य दीर्घता षड्विंशतिरङ्गुला भवति। कफोणेरुच्चता भागद्वयं, प्रकोष्ठस्य दीर्घताष्टादशाङ्गुला भवति। मणिबन्धाद् हस्ततलपर्यन्तमन्तरं सप्ताङ्गुलं भवति। ततो मध्यमाङ्गुलपर्यन्तं दीर्घता षडाङ्गुला, पश्चात् तर्जनी, तर्जन्यार्दीर्घता पञ्चाङ्गुला भवति। अनामिकाया दीर्घता तर्जनीवद् भवति। अङ्गुष्ठस्य कनिष्ठाङ्गुलेर्वा दीर्घता चत्वाररङ्गुला भवति। अङ्गुलीनां दीर्घता हस्तद्वयं भवति। अङ्गुष्ठादि-अङ्गुलीनां विस्तारः ९,७,८,७, यवा भवति। तस्मात् षडंशो नखस्य विस्तारो भवति। नखस्य दीर्घता नवयवादधिकं न्यूना भवति। करतलस्य विस्तारः पञ्चाङ्गुलो भवति। मणिबन्धस्य विस्तारस्त्रि-अङ्गुलः, कफोणेर्विस्तारः पञ्चाङ्गुलो भवति। हस्तस्य विस्तारः षडांशः, हस्तमूलस्य विस्तारः सप्तांशो भवति। हस्तमूलान्मणिबन्ध-पर्यन्तं हस्तो वेणुवत् कृशो भवति। हस्तविस्तार एवंप्रकारेण भवति। कण्ठविस्तारः सप्तभागेषु भवति। मूलाग्रविस्तारोऽष्टांश एकयवो भवति। मुखस्य विस्तार एकादशांशः, कुक्कुटाण्डस्याकारसदृशो भवति। उत्थिताकारो भवेत्। भ्रूकेशान्तर्योमध्ये सपादद्वि-अङ्गुलस्यान्तरं भवेत्। भ्रूमध्यभागो नेत्रसूत्रस्य वा मध्यभागस्यान्तरं सार्धद्वि -अङ्गुलं भवति। पादो गजशुण्डाकारेण कुर्यात्। शेषावयवा उत्तमदशतालमानानुसारं कुर्यात्। सामान्यतः स्त्रीणां मानमेवं प्रकारेण स्वीकुर्यात्। तत्र गौरीं हस्तद्वययुतां, शान्तमुद्रायां, नेत्रद्वयान्विताम्। करण्डमुकुटधरा किरीटमुकुटधरा वा, बद्धकेशा, मुकुटधरा, सुन्दरा स्यात् तथा कुर्यात्। केशान्तान्मुकुटस्योच्चताष्टादशाङ्गुला भवति तर्हि कनिष्ठमुकुटो भवति। २१ अङ्गुलस्य मध्यमः, २४ अङ्गुलानां मुकुटः श्रेष्ठो मुकुटो भवति। मुकुटः शिरोनाहाद्यवाधिको भवति। मुकुट-मूलाग्रस्य विस्तारः १/७ वा १/८ भागो न्यूनो भवति। मूलतः क्रमात् सूक्ष्मतरः करण्डमुकुटो भवति। मुकुटाग्रं पद्मस्य मुकुलाकारं कल्पयेत्। ३, ५, ७, ९ करण्डैः सुशोभितो भवति। कर्णे चतुर्गुणितं दीर्घतायाः कुण्डलं भवति। मुकुट-कुण्डलं वा वृत्ताकारकुण्डलं कणयोर्धारितो भवति। कटक-कमरबन्धः, उपग्रीवया सह हारः, बाहुभूषणानि। यज्ञोपवीतसंयुता

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दूकुलवसना श्यामवर्णा सुन्दर-स्तना देवी भवति। दक्षिणहस्ते कमलम्, वामहस्तो लम्बतो भवति। अभङ्गमुद्रायां समभङ्गमुद्रायां वैतादृशी सुन्दरी भविष्यति। दक्षिण-पादः सुस्थितः, वामपादोऽभङ्गे त्रि-अंशानां, समभङ्गाच्चतुरंशानां कुञ्चितो भवति। नतमानं दर्शितम्। अधुना अनुक्रमेण सूत्रं वक्ष्यते। ललाटमध्यभागस्य वामे, नेत्राधश्च नासापुटोपरि, हनोर्वामे, ततः स्तनान्तरमध्यान्नाभेर्दक्षिणे वामे च, ऊरोर्वामभागे गत्वा, दक्षिणपादस्य पिण्डलेर्दक्षिणं प्रति, अभङ्ग-सूत्रं लम्बयेत्। पादाङ्गुष्ठयोश्चैव मध्यान्तरं षोडशाङ्गुलं भवति। तदन्तरस्य त्रिभागेष्वेकभागः पादपार्ष्णोर्मध्यभागस्यान्तरं भविष्यति। एवं प्रकारेणाभङ्गा भवति। अधुना समभङ्गा वक्ष्यते। ललाटमध्यनासाग्रात् पादपार्ष्णिपर्यन्तं ब्रह्मसूत्रं प्रसार्य, अन्तरं गणयेत्। ब्रह्मसूत्रेण स्तनयोर्मध्यभागं प्रति दक्षिणे त्रि-अङ्गुलं भविष्यति। सूत्रेण वामभागं प्रति नाभेर्निर्गमनमङ्गुलद्वयं भविष्यति। सूत्रेण वामे योनिमध्येऽन्तरं चत्वाराङ्गुलं भविष्यति। शेषं पूर्वोक्तानुसारं गौरी-प्रमाणेन भविष्यति। सरस्वती- शक्ति-इत्यादीनां मानं पूर्वाक्तानुसारं स्वीकुर्यात्।[४१०]

अधमदशतालविधानम्

चन्द्र-आदित्य-अश्विनी-ऋषि-गुह-आर्य-षण्मुख-चण्डेश-क्षेत्रपालादीनां रचनामधम-दशतालमानेन कारयेत्। अधमदशतालस्य मानं ११६ अंशाः स्यात्। उष्णीशं एकाङ्गुलम्, केशानां मानं त्रि-अङ्गुलम्, केशाद् हनुपर्यन्तमन्तरं सार्धद्वादशाङ्गुलं भवति। कण्ठमानं चतुरङ्गुलं भवति। हिक्कात् स्तनमूलान्तमन्तरं सार्धद्वादशाङ्गुलं भवति। स्तनान्नाभिपर्यन्तमन्तरं सार्धद्वादशाङ्गुलं भविष्यति। नाभितो मेढ्रमूलान्तमन्तरं सार्धद्वादशाङ्गुलं भविष्यति। मेढ्रमूलाद् जान्वग्रपर्यन्तमन्तरं पञ्चविंशतिरंशानां भविष्यति। जानुश्चतुर्भागानां, पिण्डली ऊरुवत् (२५ अङ्गुलानां) पादोच्चतायाश्चतुर्भागा भवन्ति।

४१० का.शि.५१.१ तः ५९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पृष्ठकेशान्तमन्तरं सार्धद्वादशाङ्गुलं भवति। उष्णीश-पाश्र्वात् पृष्ठकेशान्तमन्तरं पञ्चाङ्गुलं भवति। केशान्ताद् हनुपर्यन्तं मानस्य त्रिभागं कृत्वा, केशान्ततो नेत्रसूत्रपर्यन्तं, ततो नासापुटार्धं, ततो जानुपर्यन्तं, प्रत्येकस्यान्तरमेकभागो भवति। नेत्रयोन्तरं द्वि-अङ्गलं यवश्च भवति। नेत्रयोर्दीर्घता तावत्येव, पञ्चाङ्गुला वा भवति। भ्रूमध्यादूर्ध्वकेशान्तमन्तरं सप्तदश यवा भवति। भ्रूमध्यभागस्य विस्तार एकयवं कृशो भवति। नेत्रस्य विस्तारः षट् यवास्तथोर्ध्ववर्मस्यार्धयवः. अधोवर्मस्य तावदेव, कनीनिकाया एको व्यासो भवति। नेत्रस्य दीर्घतायास्त्रिभागं कृत्वा, एकांशः कृष्णमण्डलस्य, एको यवो ज्योतिर्मण्डलस्य भवति। ज्योतिर्मण्डलस्य मध्यभाग एकयूकामानेन दृष्टिर्भवति। अधोवर्मस्य पार्श्वे विशेषरूपेण नेत्रसूत्रं भवति। तस्य केशान्तयोर्मध्ये भ्रूस्थितिर्बालचन्दसमाना भविष्यति। कर्णस्थानं तथा कर्णमुत्तमदशतालानुसारं भवेत्। नासिकामूलस्य विस्तार एको यवो भवति। नासिकाग्रविस्तार एकाङ्गुलो भवति। ऊर्ध्व -ओष्ठस्य दीर्घताङ्गुलद्वयं, विस्तारस्तस्यार्धस्तथा चिबुकस्याङ्गुलद्वयं कल्पयेत्। चिबुकस्य विस्तारस्तत्समो निम्नोऽर्धयवो भवेत्। तस्मादधोऽधरस्य निगर्मनं सप्त यवानां भवति। वक्षस्थलस्य विस्तारः सप्तत्रिंशदङ्गुलमुक्तः। हस्तस्य दीर्घता पञ्चविंशतिरङ्गुलमुदाहृता। प्रकोष्ठस्य दीर्घता नवदशङ्गुला। मणिबन्धान्मध्यमान्तमन्तरं सार्धद्वादशाङ्गुलायतं भवति। तस्यार्धा हस्ततलस्य दीर्घता, शेषं मध्यमाङ्गुलस्य दीर्घता भवति। अङ्गुष्ठस्य दीर्घताष्टादश यवा भवति। अनामिकाया दीर्घता सार्धचत्वारोऽङ्गुलनामुक्ता। तर्जनीदीर्घता तावत्येव, कनिष्ठाङ्गुलेर्दीर्घता चतुरङ्गुला स्यात्। अङ्गुष्ठादिविस्तारः क्रमेण १०,९,८,५ यवानां भवति। तस्य मूलस्यापेक्षयाग्रभागस्य विस्तारः १/८ न्यूनो भविष्यति। अङ्गुलेरग्रभागस्य विस्तारः पञ्चांशः, नखस्य विस्तारश्चतुरांशो भविष्यति। विस्तारस्यापेक्षया नखस्य दीर्घता पादमधिका भविष्यति। अङ्गुष्ठ-नखस्य दीर्घता द्विपादा, अन्येषामङ्गुलीनां नखानां त्रिपादा भवेत्। करतलस्य मध्यभागे रेखा भवति। करतलस्य पार्श्वे शूल-प्रमाणेन रेखाकृतिं रचयेत्। हस्तमूलस्य स्थूलता कोलकमुच्यते। करतलाग्रभागस्य स्थूलता १/८ न्यूना भवति। हस्ततलस्य दीर्घता समानो हस्ततलस्य

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तारस्त्रि-अङ्गुलं यवद्वयं च भवति। प्रकोष्ठमूलविस्तारः सार्धपञ्चाङ्गुला भवेत्। करतलाग्रस्य विस्तारः सार्धषडङ्गुलानामुच्यते। हस्तमध्यभागस्य विस्तारः सप्ताङ्गुलो भविष्यति। हिक्कासूत्रात् कुक्षीपर्यन्तमन्तरमष्टाङ्गुलं भविष्यति। कक्षयोरन्तरं द्वाविंशतिरङ्गुलं प्रोक्तम्। हृदयसमीपविस्तारोऽष्टादशाङ्गुलो भवेत्। उदर-विस्तारः सप्तदशाङ्गुलस्योच्यते। श्रोणिप्रदेशस्य विस्तारो दशाङ्गुलः प्रकल्पयेत्। नाभेर्विस्तारः षडाङ्गुलस्तथा गाम्भीर्यमर्धयवं भवेत्। स्तनवृत्तस्य व्यासोऽर्धाङ्गुलस्योच्यते। स्तनाग्रोच्चता विस्तारश्च समानो भवति। जानुमध्यविस्तारः सार्धषडङ्गुलमुदाहृतः । नालविस्तारः सार्धचत्वारोऽङ्गुला भवति। पादतलाग्रभागस्य विस्तारो नवाङ्गुलं भवति। पादतलमध्यविस्तारः पञ्चाङ्गुलो भवति। पादाङ्गुष्ठस्य दीर्घता चत्वाराङ्गुला प्रकल्पयेत्। पादाङ्गुष्ठान्तात् गुल्फपर्यन्तमन्तरं सार्धद्वादशाङ्गुलं भवति। अनामिकाया दीर्घता त्रयस्त्रिंशद्यवा कारयेत्। मध्यमाङ्गुलेर्दैर्घ्यमनामिकावत्त्रयस्त्रिंशद्यवं, तस्या विस्तार एकचतुर्थांशो भविष्यति। कनिष्ठाङ्गुलस्य दीर्घता सार्धद्विरङ्गुला भविष्यति। कनिष्ठाद्यङ्गुलानां विस्तारः क्रमेण सप्त, अष्ट, नव, दश, तथा त्रयोदश यवा भवति। अङ्गुलान्त-विस्तारो मूलाग्रसम उक्तः। विस्तारस्य त्रिभागं कृत्वा नखस्य विस्तारो भागद्वयं, तस्यान्तस्याकारः वृत्तायतो भवति। तलाग्रस्य तथाङ्गुष्ठमूलस्य स्थूलताङ्गुलद्वया भवति। कनिष्ठाङ्गुलमूलस्य विस्तारो नव यवा भविष्यति। पाष्ण्युर्त्सेधमेकाङ्गुलं तथा पाष्ण्र्यन्तरमप्येकाङ्गुलं भविष्यति। वक्षस्थलस्योर्ध्वभागस्य विस्तारः पञ्चत्रिंशाङ्गुलमुदाहृतः। अक्षमध्यभागस्यान्तरं चर्तुविंशतिरङ्गुलमुच्यते। अत्र येषां मानमनुक्तं तेषां सर्वेषां कृते दशतालवन्मानमुत्तमं भवति।[४११]

उत्तमनवतालविधानम्

४११ का.शि.५२.१ तः ४४

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

लोकपालानां तथान्यदेवतानां मूर्तय उत्तम-नवतालेन कुर्यात्। मूर्तेरुच्चता द्वादशाधिकमेकशतं भागेषु विभज्य, उष्णीशस्यैको भागः, ततः केशान्तस्त्रि-अङ्गुलो भवति। केशान्तान्नेत्रसूत्रपर्यन्तं चत्वारो भागा भवन्ति। केशान्तान्नासापुटपर्यन्तं चत्वारोऽंशाः, ततश्चिबुक-पर्यन्तं चत्वारो भागा भवन्ति। गलमानस्य चत्वारो भागाः, कण्ठाद् हृदयपर्यन्तमन्तरं द्वादशाङ्गुलं भवति। हृदयान्नाभिपर्यन्तमन्तरं द्वादशाङ्गुलं भवति। ततो मेढ्रमूलपर्यन्तमन्तरं द्वादशाङ्गुलं भवति। ऊरोर्दीर्घता चतुर्विंशतिरङ्गुलमुच्यते। पिण्डली ऊरूवद् भविष्यति। जान्वोर्दीर्घता चतुरङ्गुला भविष्यति। पादयोरुच्चता चतुरंशा भवति। हिक्कासूत्रादधः, हस्तस्य दीर्घता चतुर्विंशतिभागानां भवति। प्रकोष्ठस्य दीर्घताष्टादशांशा भवति, दशांशा हस्ततलस्य दीर्घता भविष्यति। तस्मान्मध्यमाङ्गुलस्य दीर्घता षडाङ्गुला भवति। शेषावयवानां मानं कनिष्ठदशतालानुसारं भवति। प्रत्येकावयवानां कृत एवं प्रकारेण मानं स्वीकुर्यात्।[४१२]

मध्यमनवतालविधानम्

यक्ष-अप्सरःसमुदाय-अस्त्रमूर्ति-मरुद्गणादीन् मध्यमनवतालेन कुर्यात्। प्रतिमोच्चतामष्टोत्तरशतं भागैर्विभज्य, एकभागस्य उष्णीशः, केशानां पादोनभागः, केशान्तान्नेत्रसूत्रान्तपर्यन्तमन्तरं द्विरङ्गुलं सप्तयवं भवति। नेत्रसूत्रान्नासापुटपर्यन्तमन्तरं तावदेव भागो भविष्यति। ग्रीवामानं पादोनचतुरंशं भवति। हिक्काद् हृदयपर्यन्तमन्तरमेकादशाङ्गुलं पञ्चयवाश्च भवति। हृदयान्नाभिपर्यन्तं तावदेव, नाभितो मेढ्रमूलपर्यन्तमन्तरमपि तथैव भविष्यति। ऊरोर्दीर्घता सपादत्रयोविंशतिरङ्गला प्रोच्यते। जानुर्ग्रीवासमा भवेत्। जङ्घाया दीर्घता सपादत्रयोविंशतिरङ्गुलनामुदाहृता। पादो जानुवत्

---

४१२ का.शि.५३.१ तः ९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

रङ्गुला भवेत्। हस्ततलस्य दीर्घता पञ्चांशं सप्त यवाः, शेषावयवानां मानं युक्तिपूर्वकं कुर्यात्।[413]

अधमनवतालविधानम्

विद्याधरगणाः, असुरा, पितरः, सिद्धाः, गन्धर्वाः - अधमनवतालेनैतान् रचयेत्। मूर्तेरुच्चतां १०४ भागेषु विभज्य, उष्णीशं पादोनांशं भवेत्, केशान्तभागः सार्धत्रि-अङ्गुलानां भवेत्। केशान्तान्नेत्रसूत्रपर्यन्तमन्तरं पादोनचतुरंशकं भवति। नेत्रसूत्राच्चिबुकपर्यन्तमन्तरं तस्माद् द्विगुणितं सार्धसप्ताङ्गुलं प्रकल्पयेत्। ग्रीवाया मानं पादोनचतुरंशं भवेत्। ग्रीवा-पाद-जानु - इत्यादीनामुच्चतैकसमाना चतुरङ्गुलानामुदाहृता। ऊरुस्तथा पिण्डली समाना भवति। बाहुरूरुसमो भवेत्। प्रकोष्ठस्य दीर्घता षोडशाङ्गुला। हस्ततलस्य दीर्घता पञ्चांशा तथा मध्याङ्गुलस्य दीर्घता तत्समा भवेत्। शेषावयवानां रचना युक्त्या करणीया।[414]

अष्टतालविधानम्

अधुना विशेषेणाष्टतालविधानं वर्ण्यते। मूर्तेरुच्चतायाः शतभागान् कुर्यात्। उष्णीशस्योच्चतैकभागस्य भविष्यति। उष्णीशात् केशान्तमन्तरं सार्धद्विरङ्गुलं भवति। केशान्तात् चिबुकपर्यन्तमन्तरं पादोनदशभागं भवति। अयमन्तरं मानत्रिभागे विभाज्यते, तर्हि नेत्रसूत्रान्नासापुटपर्यन्तं, नासापुटाच्चिबुकपर्यन्तं भवति। ग्रीवाया उच्चता सार्धत्रिभागा भवति। हिक्काद् हृदयपर्यन्तमन्तरमेकादशाङ्गुलं यवद्वयं च भवति। हृदयान्नाभिपर्यन्तं नाभितो वा मेढ्रमूलस्यान्तरं तावदेव भवति। ऊरोर्दीर्घता सार्धैकविंशतिभागा भवति। जानोरुच्चता कण्ठसमा भवति। पिण्डलेर्दीर्घता ऊरुवद् भविष्यति। पादजानुवद् बाह्वोर्दीर्घता भवति। प्रकोष्ठस्य दीर्घता षोडशभागा भवति। हस्ततलस्य दीर्घता सार्धपञ्चभागा भविष्यति।

---

४१३ का.शि.५४.१ तः ८

४१४ का.शि.५५. १ तः ६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवति। शेषमानं पूर्वानुसारं भवति। यन्नोक्तं तत्सर्वमर्धमदशतालप्रमाणेन कुर्यात्।[415]

सप्ततालविधानम्

सप्ततालविधिर्वर्ण्यते। पिशाच-प्रतिमाया उच्चताया अष्टाशीतिभागान् कुर्यात्। उष्णीशस्यार्धो भागः। केशान्तस्यैको भागः, नेत्रान्तमन्तरं सार्धद्विभागं भवति। ततो नासापुटपर्यन्तमन्तरं सार्धत्रिभागं भवति। ततश्चिबुकपर्यन्तमन्तरं सार्धत्रिअंशं भवति। ग्रीवाया उच्चता चतुरंशका भवति। ग्रीवात्स्तनान्तमन्तरं सप्तभागं, स्तनान्तान्नाभिपर्यन्तमन्तरमेकादशभागं भवति। योनिमूलस्यान्तरमेकादशाङ्गुलं भवति। ऊरोर्दीर्घता विंशतिरंशा, जानोर्मानं भागद्वयं, पिण्डली ऊरुवद् भवति। पादस्योच्चता भागद्वयं भवति। तलस्य दीर्घता चतुर्दशांशा भवति। बाहुरूरुवद् भवति। प्रकोष्ठस्य दीर्घता पञ्चदशांशानां भविष्यति। हस्ततलस्य दीर्घता पञ्चांशा, तस्य विस्तारश्चतुरंशको भवति। हस्ततलस्य दीर्घता समं मध्यमाङ्गुलस्य दीर्घता भवति। शेषावयवाः पूर्वोक्तानुसारं ह्रस्वा भविष्यन्ति।[416]

पिण्डिकालक्षणम्

प्रारम्भे नागरादीनां, लिङ्गानां पीठलक्षणात् सकललक्षणस्य वर्णनं क्रियते। पाषाणलिङ्गस्य पीठं पाषाणेन, सुधया, इष्टकया च कुर्यात्। काष्ठलिङ्गस्य पीठं काष्ठेनेष्टकया च भविष्यति। रत्नस्य लोहस्य च लिङ्गस्य योनिः (पीठं) रत्नेन लोहेन च भवेत्। लिङ्गस्योच्चता समो पीठस्य विस्तारो भवति चेत्, सर्वोत्तमं पीठं भवति। लिङ्गपूजांशोच्चसमं पीठस्य विस्तारो भवति तर्हि कनिष्ठ-पीठमुच्यते। द्वयोर्मध्येऽष्टभागान्

---

४१५ का.शि.५६. १ तः ७

४१६ का.शि.५७. १ तः ७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवन्ति। पीठस्य विस्तारस्त्रिभागेषु विभाजितो भवति। तस्योच्चताया भागद्वयं भवति। इदमुत्तमं पीठं भवति। कनिष्ठपीठे विस्तारास्यार्धोच्चता भवति। द्वयोर्विस्तारस्यान्तरस्य चाष्टभागान् कृत्वा, पीठस्योच्चताया उत्तमादित्रयस्त्रयः, आहत्य नवप्रकारा भवन्ति। अनुक्रमेण नागरपीठमुक्तम्। (का.शि.५८. १ तः ६) लिङ्गस्योच्चतासमं विस्तारो भवति चेत् श्रेष्ठं पीठम्, पूजालिङ्गस्योच्चतासमं विस्तारः कनिष्ठ-पीठं भवति। द्वयोर्मध्यान्तरस्याष्टभागान् कृत्वा पीठस्य नवप्रकाराणां विस्तारः प्राप्यते। पीठविस्तारस्य नवप्रकारा भवन्ति। ब्रह्माविष्णोरुच्चतामष्टभागं विभजेत्, भागद्वयं, वैको भागः, अथवा स्थलांशं निष्कास्य, शेषभागः पीठस्योच्चता भवति। इदं द्राविडपद्धत्याः पीठं भवति। पूजाभागस्य परिधिसमविस्तारयुक्तं पीठं श्रेष्ठं भवति। पूजाभागस्य परिधिं षोडशभागेषु विभज्य, द्वादशभागानां विस्तारस्य पीठमधमं भवति। तस्य मध्यान्तरस्याष्टभागान् कृत्वा, पीठविस्तारस्य नवप्रकारा भवन्ति। लिङ्गव्याससमं चतुरस्रकृते सति, तस्य कर्णं द्विगुणितं, सार्धद्विगुणितं त्रिगुणितं वा विस्तारः, पीठस्य विस्तारो विशेषतो भवति। गर्भागारस्य त्रिभागं कृत्वा, एको भागो वा चतुर्भागं कृत्वा, एको भागः पीठस्य विस्तारो भवति। विष्णुभागसमा तस्योच्चता भवति। सामान्यनागरादीनां सर्वप्रकाराणां लिङ्गानामुपानबाह्यविस्तारः पीठविस्तारसमो भवति। पीठाग्रस्य विस्तारोऽष्ट-नव-दश-अंशन्यूनो भवति। पीठस्योच्चता विष्णुभागवत् सपादगुणिता वा सार्धैकगुणिता भवति। सामान्यनागरादिपीठिकानामुच्चता विस्तारसमा भवति। सकलस्योच्चताया नवभागान् कृत्वा, कनिष्ठपीठस्योच्चतैकभागस्य भवति। श्रेष्ठपीठस्योच्चता त्रिभागस्य भवति। तस्य मध्यान्तरस्याष्टभागान् क्रियते तर्हि पीठस्य नवप्रकाराणामुच्चता भवति। तस्य पीठस्य विस्तारो दर्श्यते। पीठस्य विस्तारवदुच्चता भवति चेत् पीठमधममुच्यते। पीठस्योच्चतातो द्विगुणितविस्तारस्य पीठमुत्तमं कथ्यते। तस्य मध्यस्याष्टभागान् कृत्वा सकलस्य विस्तारस्य नवप्रकारा भवन्ति। लिङ्गस्य पिण्डिका गोमुखप्रमाणेन कुर्यात्। विशेषतः सकलपीठं गोमुखाकृतिः समानं भवति। लिङ्गपीठं समानं पार्श्वे, वैकसमानं वृत्तयुक्तं भवेत्। अथवायताकारं वृत्तायताकारं च भविष्यति। पद्मपीठं, भद्रपीठं, वेदिका, वेदिपीठम् -

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भवन्ति। पीठस्योच्चतायाः षोडशभागान् कृत्वा, उपानस्योच्चताया भागद्वयं, पद्मस्योच्चतायाः पञ्चभागाः, कण्ठः पादुकावद् (भागद्वयस्य) भवति। ऊर्ध्वपद्मस्य चत्वारो भागाः, पट्टिकाया उच्चताया भागद्वयं, कमलस्य षोडशदलैः संयुता प्रतिरेकभागस्य भवति। कमलस्य षोडशदलमध्ये लघुदलानि भवन्ति। अष्ट वा महादलानि भवन्ति। दलाग्रस्योच्चतार्धाङ्गुला, एकं मानाङ्गुलं वा भवति। पीठविस्तारस्य त्रिभागेष्वैको भागो गोमुखस्य दीर्घता भवति। तस्य दीर्घतासमो मूलविस्तारो भविष्यति। मूलविस्तारस्य त्रिभागेष्वेको भागो गोमुखाग्रस्य विस्तारो भविष्यति। मूलादग्रपर्यन्तं क्रमेण न्यूनं कुर्यात्। तस्य स्थूलतां विस्तारप्रमाणेन क्रमेण न्यूना, (मूलादग्रपर्यन्तं) पादोनगुणिता, अर्धा, सपादगुणिता, एकाष्टांशा। विस्तारस्य त्रिभागेष्वेको भागः शिलामार्गस्य विस्तारो भविष्यति। पट्टिकाया अन्तर्गमनं तस्योच्चतासमं भविष्यति। न्यूनमस्ति चेत् कनिष्ठं ज्ञेयम्। उपानाद्यवयवा यथा सुन्दरा भवेयुस्तथैव करणीयाः, अधिष्ठानस्य प्रवेशस्य निगर्मनस्य च कल्पनां कुर्यात्। पद्मपीठं दर्शितं, भद्रपीठस्य वर्णनं क्रियते। उच्चतायाः षोडशभागान् कृत्वा, एकभागस्योपानं भवति। जगतेरुच्चता चतुर्भागा, त्रिभागस्योच्चता कुमुदस्य, पट्टिकाया मानमेकभागस्य, कण्ठस्य मानं त्रिभागस्य भवति। तस्योपरि पट्टस्यैको भागः, पट्टिकाया भागद्वयं, एकभागस्य घृतवारि भवति। इदं सम्पूर्णं भद्रपीठमभवत्। पीठस्योच्चतायाः षोडशभागाः क्रियन्ते तर्हि, पादुकाया उच्चताया भागद्वयं भवति। जगतेरुच्चता त्रिभागस्य भवति। कुमुदस्योच्चता तावदेव भविष्यति। पट्टस्य मानमेको भागः, कण्ठस्योच्चता भागद्वयं, तस्योपरि कम्पस्यैको भागः, पट्टिका त्रिभागस्य, घृतवार्यैकभागस्य भवति। इदं वेदीभद्रमुच्यते। त्रयोदशांशं पीठोच्चं भूत्वा, पादुकाया उच्चताया भागद्वयं, तस्योपरि पद्मस्य भागद्वयं, कम्पस्यैको भागो भवति। कम्पस्य भागद्वयं भवति, ऊर्ध्वकम्पस्यैको भागो भवति। तस्योपरि पद्मस्य भागद्वयं भवति, पट्टकस्यापि भागद्वयं भवति। एकभागस्योच्चता युक्ता घृतावरि भवति। पीठस्योच्चताया अष्टभागान् कृत्वा, उपानस्योच्चतैकभागस्य, घृतवयैकभागस्य, शेषा वेदी युगास्रका भवति। एवं प्रकारेण वेदिकापीठमुक्तम्। द्विभागस्य

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

त्रिप्रकारा भवन्ति। पद्मपीठं, भद्रपीठं, वृत्तपीठं/परिमण्डलं च। एतेषामवयवानां कल्पनामधिष्ठानानुसारं भवति। उपपीठप्रमाणानामवयवाद् बन्धप्रकारात् तत्ततद्बन्धनाम्ना पीठं भवति। वर्गाकार-पीठं जयप्रदं भवति, योन्याकारं पीठं प्रजाकरं भवति। धनुषाकारं पीठं शान्तिकारकं भवति। त्रिगुणाकारं पीठं शत्रुनाशं करोति। वृत्ताकारं पीठं समृद्धिदायकं भवति। पञ्चकोणपीठं पुष्टि-तुष्टिकारकं भवति। षट्कोणपीठं रोगनाशकं भवति। यद्यष्टपीठानां जीर्णोद्धारः करणीयश्चेत् पूर्वाकृतिसमं करणीयं, यदि पूर्ववदाकारो न भवति, तर्हि कर्तुर्नाशो भवति। तस्मात्सर्वप्रयत्नेन पूर्वाकारमेव पीठानां दद्यात्। विस्तार-प्रमाणेन पीठस्य विस्तारः सपादगुणितो वा सार्धैकगुणितो भविष्यति। आजयं, मुखभद्रं, भद्रं वोपभद्रेण सह लिङ्गपीठमायताकारं कदापि न करणीयम्। समसंख्यायाः कोणो भवेत् तर्हि वर्गाकारं, समवृत्ताकारम्, आयताकारं, वान्याकारं पीठमनुक्रमेण सम्पत्तिकारकं भवति।[४१७]

पीठिकालक्षणम्

अधुना विशेषरूपेण पादशैलादिलक्षणं वक्ष्ये। पादशिला लिङ्गविस्तारस्य त्रिगुणिता भवति। उच्चता सपादगुणिता भवति। श्रेष्ठ-मध्यम-कनिष्ठलिङ्गस्य तेषां मध्येऽष्टभागे विभाजिते, उच्चताया नवप्रकारा भवन्ति। वेसरलिङ्गस्योच्चता पादांशा भवति। लिङ्गविस्तारं द्विगुणितं कृत्वा, अष्टभागेन विभज्य, लिङ्मूलवदाकृतेरेकांशं गर्ते स्थापयेत्। नवरत्नानुसारं नवकोष्ठं रचयेत्। अथवाधारशिलया सह समतलं कुर्यात्। तस्मात्पीठान्तं नन्द्यावर्तशिलाया उच्चता भवति। लिङ्गपीठस्य समानं वा १, २, ३ अङ्गुलमधिकं भवेत्। नागरपद्धत्याः (लिङ्गस्य) पादशिलाविस्तारो वृत्तमतिरिक्तमन्याकारो मा भवेत्। द्राविडपद्धत्यां पीठविस्तारस्योच्चताया भिन्नाकारस्य पादशिला भवति। अथवा पीठविस्तारात् २-३ अङ्गुलमधिका भवेत्। वेसरपद्धत्यां लिङ्गविस्तारस्य चतुर्भागान् कृत्वा, पीठादेकैकभागस्य वर्धनं कुर्वन् नन्द्यावर्तशिलाया नवप्रकारा भवन्ति। लिङ्गस्य परितः (उपर्युक्तानुसारं मानेन)

---

४१७ का.शि.५८.१ तः ५०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

चताया दीर्घतायाश्च मानमुदाहृतम्। पूर्वभागे उत्तरं प्रति पाषाणस्याग्रभागे आगच्छेत्, एवंप्रकारेण चतुरस्रपाषाणं स्थापयेत्। पश्चिमभागे उत्तरस्य भागं न्यसेत्। उत्तरभागे पूर्वाग्रमागच्छेत्, तथैव पाषाणं स्थापयेत्। प्रथमः पाषाणाग्रः शङ्करभागे (ऐशान्यां), द्वितीयस्याग्रोऽनलभागे (आग्नेय्यां), तृतीयाग्रस्य निर्ऋतिभागे, चतुर्थमूलं वायुभागे, एवं नन्द्यावर्तशिलामुपर्युक्तप्रमाणेन योजयेत्। तस्योपर्यष्टबन्धनं कृत्वा, तस्योपरि पिण्डिकां स्थापयेत्। सुधया वज्रबन्धेन च लेपं कृत्वा, तस्योपरि पीठं स्थापयेत्। उत्तमपीठमेकांशं, द्वि-अंशस्य मध्यमपीठं भवति। ३-४-५ अंशानां पीठं कनिष्ठमुच्यते। तस्योपरि पीठस्य भागमेक-पाषाणेन कुर्यात्। यत्र पीठं गलेन सन्धिं करोति, तं भागं भिन्न-भिन्न वस्तुना सुदृढं कुर्यात्। गलस्याधः कोणयुक्तः पाषाणद्वयं भवति, तह्येकः पूर्वदिग्भागे तथा द्वितीयः पश्चिमभागं प्रति स्थापयेत्। पीठोर्ध्वभागो द्विपाषाणाभ्यां रचनीयोऽस्ति चेत्, पाषाणः कथं स्थापनीयस्तस्य वर्णनं क्रियते। द्विपाषाणस्यैकपार्श्वे, अन्यपार्श्वात् कर्तनं कृत्वा, तस्य पुरतः पार्श्वे वृत्ताकारो भवति। त्रयः पाषाणा भवन्ति, तह्येकं मध्यभागे स्थापयेत्। अन्यद्द्वयं वाम-दक्षियोश्च स्थापयेत्। चतःपाषाणानां पीठे द्विद्रोणाकृतेश्चतुरस्रं कल्पयेत्। पञ्च षट् पाषाणस्य वा लक्षणसहितां पिण्डिकां कुर्यात्। पाषाणान् सुधयाष्टबन्धेन वा सुदृढान् निच्छिद्रान् च कुर्यात्। इष्टकाभिः शिलाभिर्वा सुधया पीठं सुदृढं कुर्यात्। लोहस्य राजतस्य प्रयोगं कृत्वा यथा सुदृढं भवेत् तथैव कुर्यात्। सर्वत्र बन्धकद्रव्यमष्टबन्धं च भवेत्। विष्णुभागोर्ध्वसीमा पिण्डिकाया ऊर्ध्वभागस्य समतला भवेत्। नतोन्नतं न कर्तव्यं, नो चेत् कर्तुर्नाशो भवति। लिङ्गस्य मुखनिर्माणविधिलक्षणोद्धारमुच्यते। प्रासादस्य पुरत ऐशान्यां दक्षिणदिग्भागे वैकहस्तोच्चताया दर्पणवत् समतलं कुर्यात्। गोमयलेपनं कृत्वा, पिण्डीं चूर्णेनालङ्कृतं कुर्यात्। भिन्न-भिन्नधूप-दीपैः, भिन्न-भिन्नपुष्पैरलङ्कुर्यात्। वेदिकायामक्षत-तीर्थ-दर्भ-शालि-पुष्पादिभिरलङ्कृत्य शालिस्थण्डिलं कुर्यात्। त्रि-अधमलिङ्गानां कृते एवंप्रकारेण मण्डपं रचयेत्। दीर्घतासमां विस्तारयुक्तां वेदिकां रचयेत्। तस्यास्त्रिगुणितं मण्डपस्य विस्तारो भवति। अन्ये सर्वेऽलङ्कारा वेदिकायाः पूर्ववत् कुर्यात्। विध्यनन्तरं सावधानः स्थपतिः लिङ्गं पूर्वं प्रति शिरः कृत्वा,

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ष्टकलशान् (लिङ्गस्य) परितः स्थापयेत्। नूतनवस्त्रेण गन्धोदकेन च कलशं पूरयेत्। अष्टलोकपालान् स्वनाम्ना गन्ध-पुष्प-दीपैश्च पूजयेत्। लिङ्गमूलस्य विपरीतं पिण्डिकायां पाषाणं स्थापयेत्। रक्तवस्त्रादिनावृत्य लिङ्गपीठमर्चयेत् । वेदिकायाः सत्त्वे (उत्तरे) वैन्द्रभागे (पश्चिमे) कुण्डं वा स्थण्डिलं कुर्यात्। अग्निकार्ये दर्शितानुसारमन्यद् विधिना कुर्यात्। ब्रह्मवृक्षस्य समिधया विधिपूर्वकं होमं कुर्यात्। आपोहिष्ठादिमन्त्रैः, विष्णुमन्त्रेण तथा ब्रह्मजज्ञानमन्त्रेण घृतस्याहुतिं दद्यात्। अघोरमन्त्रेण चरुहोमं कुर्यात्। प्रत्येकाहुतिरष्टादश (१०८) वारं दद्यात्। रात्रिजागरणं कृत्वा प्रातः काले शुभमुहूर्ते श्वेतवर्णस्य वस्त्रं वोत्तरीयं धारयित्वा, गन्धलेपनं कृत्वा, श्वेतयज्ञोपवीतं धारयित्वा स्थपतिः शुद्धो भूत्वा पूर्वानुसारमग्निपूजां कृत्वा स्विष्टपूर्णाहुतिं दद्यात्। श्रेष्ठलिङ्गपीठे प्रतिसरं बन्धयेत्। सुवर्ण-राजत-कार्पाससूत्रेणावेष्ट्य, प्रातः शुभमुहूर्ते लक्षणोद्धारं कुर्यात्। लिङ्गशीर्षस्थाने घृतेन सह पायसबलिं दद्यात्। रक्तशान्तिं परित्यज्य गन्धादिना अर्चयेत्। रक्तशान्तिना लिङ्गस्य मध्यभागे सूत्रं योजयेत्। मुखभागस्य मध्यभागे सुलक्षणीं नालं कुर्यात्। लिङ्गमानेन (नालस्य) सूत्रविस्तारो दर्शितः। शिर-आवर्तनेन सह लिङ्गस्योच्चतामेकादशभागं ज्ञात्वा, तस्य (नालस्य) विस्तारश्चत्वारभागेषु भवति। एकभागमित्युक्ते एकाङ्गुलस्य मानं, अङ्गुलस्याष्टभागान् कृत्वैकांशमेको यवः कथ्यते। उत्तमोत्तमलिङ्गस्य नालीसूत्रस्य दीर्घतामर्धयवं न्यूनां कुर्यात्।

अधमाधमलिङ्गसूत्रस्य विस्तार एकयवो भविष्यति। शिरशि लक्षणं भवति चेत्, रोगः, मस्तके लक्षणं भवति चेत्, मृत्युः। नेत्रे कृते, अपस्मारो भवति। मुखे लक्षणं कृते धान्यनाशः, चिबुके लक्षणं भवति चेत् भ्रातुर्नाशः, स्तनप्रदेशे सुतनाशः, अत एतानि स्थानानि वर्जयेत्। तत्र लक्षणोद्धारो न करणीयः। ऊर्ध्वमेकांशं, स्तनोर्ध्वमेकांशं वर्जयेत्, अवशिष्टभागे लक्षणोद्धारः करणीयः। शीर्षविस्तारस्यैकादशसमभागान् कृत्वा, त्रिभागस्य मुकुलाकारः कमल-प्रमाणेन लिङ्गाकारो भवति चेत्, अत्यधिकोन्नतिस्तथा नृपाणां कृते विजयकारको भवति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्वा, शङ्खानुसारं श्वेतं, छत्राकारप्रकारयुक्तं लिङ्गं नृपतीनां वृद्धिप्रदं भवति। हस्ताञ्जलिसमाकारं, गोकर्णानुसारं लिङ्गं वैश्यानां कृते तथा त्रिकोणं शूलप्रमाणेन वृत्तायतं भवति चेत् शूद्रवृद्धिकरं भवति। अधुना त्रिसूत्रलक्षणम्। लक्षणोद्धारस्यैकादशभागाः क्रियन्ते तर्हि मुकुलस्योच्चतैकांशा, विस्तारस्तथैव भविष्यति। तस्य मूलविस्तारस्य नवभागाः प्रोक्ताः, तस्य नालं एकसूत्रं, द्विसूत्रं, त्रिसूत्रं यावत् भविष्यति। एकसूत्रदीर्घतायुक्तं सूत्रस्य मध्यान्तरं त्रियवस्य तथा मूलविस्तारो यवद्वयस्य भवति। नालमूलाधोऽग्रसीमासूत्रं कर्षयेत्, तत्कण्ठो यद्येकसूत्रस्य भवति, तर्हि लिङ्गमध्यपार्श्वे सीमासूत्रं लिखेत्। सूत्रे दर्शितानुसारं मूलविस्तारस्यागाधताया दीर्घतायाः कल्पनां कुर्यात्। मूलस्यार्ध्वं तथाध एकांशं त्यजेत्। मुकुलस्याभ्यन्तरं गच्छन्तं मणिरेखाद्वयं तत्र कुर्यात्। मणिरेखाया भागः कमलमूलं यावद् भविष्यति। अथवा कमलविस्तारस्य त्रिभागेष्वैको भागः, चत्वारांशेषु त्रि-अंशाः, पञ्च अंशेषु त्रि-अंशाः, कमलविस्तारवद् भविष्यन्ति। मुकुलस्य मूलपार्श्वे इदमन्तरं भविष्यति। नालमूलस्यान्तरं मूलविस्तारं यावत्, अथवा अेकाष्टाशं, त्रिचतुरंशं, त्रिभागं, पञ्चभागं, चतुभागं वा। नालमूलविस्तारं यावत् द्विमणिरेखाया मध्यान्तरं भविष्यति। मणिरेखाया अन्तरं मूलादग्रपर्यन्तं क्रमेण न्यूनं कुर्यात्। मुकुलस्य मूलसमीपे एकसमानमन्तरं भूत्वा, पश्चात् तिर्यङ् नीत्वा पार्श्वं प्रति मणिरेखा मिलेत्। मणिरेखाया विस्तारत्रिगुणितं लिङ्गस्योच्चतायाः सूत्रं भवेत्। मणिरेखाया आधारो नालं यावत् वा तस्य सार्धैकगुणितो भविष्यति। तस्य मूलपर्यन्तमष्टविभागाः । मणिरेखाया आधारानुसारं नवप्रकारान् दर्शयति। सर्वलक्षणोद्धारेऽष्टमणिरेखा, इदं प्रथमं लक्षणमुक्तम्, द्वितीयमतिरिक्तमस्ति। लक्षणोद्धारभागस्य दशभागान् कृत्वा, मुकुलस्योच्चताया एकांशस्तथा मूलस्य दीर्घता नवांशा भविष्यति। अवशिष्टं पूर्वानुसारं भविष्यति। चतुर्थलक्षणम्-लक्षणोद्धारभागस्य नवभागान् कृत्वा, एकांशं मुकुलस्य, नालस्य दीर्घता सप्तांशा, अवशिष्टं पूर्वानुसारं कुर्यात्। पञ्चमलक्षणं - लक्षणोद्धारभागस्याष्टभागे कृते, मुकुटस्योच्चतैकांशा भविष्यति। मूलस्य दीर्घता षडांशा भवति, मूलस्याध एकांशो भविष्यति। अत्र लक्षणोद्धारभागस्याष्टभागे कृते सप्तभागस्य दीर्घता

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कुर्यात्। षष्ठं लक्षणमुदाहृतम्। सप्तमलक्षणं - लक्षणोद्धारभागस्य सार्धसप्तांशेषु मुकुटस्योच्चतैकांशस्य, मूलस्य दीर्घता पञ्चांशस्य, शेषं पूर्वानुसारं कुर्यात्। लक्षणोद्धारभागस्य सार्धसप्तभागेषु षडांशा सार्धषडांशा वा मूलस्य दीर्घता भवति, अवशिष्टं पूर्वानुसारं कुर्यात्। एवं प्रकारेण नालस्याष्टप्रकारा दर्शिताः। अग्रभागे मुकुलाकारं कमलं भवेत्, लक्षणोद्धारभागस्य द्वादशभागा भवेयुः, तावन्मूलस्य दीर्घतां स्वीकुर्यात्। इदं नवमं लक्षणमस्ति। उपर्युक्तानुसारं लिङ्गसूत्रं भविष्यति। पश्चात् लिङ्गाग्रं पुरतो नीत्वा काष्ठपीठे स्थापनां कुर्यात्। लिङ्गं पीठे स्थापयेदुत्तराभिमुखे वा। हृदयमन्त्रेणानेक-कलशान् तत्र स्थापयेत्। पञ्चगव्यं गन्धोदकं दत्त्वा गन्धपुष्पादिकमर्पयेत्। दीर्घकुशसहितं सर्वालङ्कारैः सहितं स्यन्दने वा शिबिकायां स्थापयित्वा ग्रामप्रदक्षिणां कुर्यात्। पश्चात् सरः-समीपमानीय जलाधिवासं कारयेत्।[४१८]

सकलस्थापनाविधिः

शङ्करलिङ्गस्य स्थापनानन्तरं विष्णुप्रतिमायाः स्थापनाविधिं दर्शयामि। नगरस्य पश्चिमदिग्भागे मध्यभागे वा विष्णोर्मूर्तिरत्यन्तमुत्तमा भविष्यति। मत्स्यावतराद् कल्की-अवतारपर्यन्तं विष्णोर्मूतयो भविष्यन्ति। तस्य पादसमीपे वास्तुदेवतास्थापनां कुर्यात्। विष्णोः समीपे पुरतो पूर्वं प्रति वाञ्जलिद्धं गरुडपक्षीं रचयेत् । देवालयेऽरण्ये नदीतटसमीपे, पवित्रतीर्थक्षेत्रे, ग्रामे वास्तुमध्ये वा, पूर्वाभिमुखा उत्तराभिमुखा वा विष्णोर्मूर्तिर्भविष्यति। वरुणस्थाने (पश्चिमं प्रति), वैश्यस्थाने, यममिन्द्रं स्थापयेत्। पिशाच-अग्नि-स्थाने निर्ऋतिं वायुमर्चयेत् । अधुना विशेषेण शङ्करस्य मूर्तिकृते उत्तमस्थानं वर्णयति। ईशान्यां शङ्करो नृत्तमूर्तिः, आग्नेय्यां प्रति वृषवाहनो भविष्यति। सोमस्कन्दो निर्ऋत्यां, कङ्कालो वायुदिग्भागे, भिक्षाटनो जयन्तपदे, सत्यपदे सुखासनः, विधिपदे त्रिपुरान्तक-मूर्तिर्भविष्यति। सुग्रीवपदे हरिहरः, गन्धर्वपदे चन्द्रशेखरस्य मूर्तिः भविष्यति। शेषांशं, मुख्यपदोपरि कालारिमूर्तेः स्थापनां

---

४१८ का.शि.५९. १ तः ७४

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

कल्याणमूर्तिः, पर्जन्यपदे क्षेत्रपालः, दक्षिणं प्रति दक्षिणेश्वरस्य मूर्तिर्भविष्यति। पश्चिमे लिङ्गोद्भवस्य, उत्तरे गजहारि-मूर्तिर्भविष्यति। एवं प्रमाणेन देवालयोर्ध्वं, अन्तरालमध्ये (शङ्करस्य मूर्तिं) कल्पयेत्। देवालये गर्भागारे सकलस्य स्थापनां कुर्यात्। प्राकारे अष्टदिक्षु चतुर्दिक्षु वा द्वारशोभादिं कुर्यात्। प्राकारस्योच्चताया मध्ये दीर्घताया मध्यभागे, हर्म्यमध्यभागे, मूलप्रासादस्य पार्श्वभागेष्वेकभागे मूर्तिर्भवेत्।[४१९]

सुखासनमूर्तिः

अधुना विशेषरूपेण सुखासनमूर्तिविषये वक्ष्यते। आसनमूर्ती राजसभावे भवति। भद्रपीठासने भवति। वामाङ्घ्रिं छादयेत्पीठे, दक्षिणपादो लम्बयेत्। शरीरस्य सरलरेखानुसारा स्थितिः भवति। आसनोर्ध्वे सार्धचत्वाराङ्गलापेक्षयाधिकमानं स्फिक-पिण्डस्य भवति। आसनपुरतः केशान्तं जान्वोर्बाह्यसीमापर्यन्तं वामसूत्रं, जानूर्ध्वं पुरतः केशान्तपर्यन्तं दक्षिणसूत्रं, जानुकण्ठस्य बाह्यभागे वा मुखस्य बहिर्भागे वामसूत्रं, ऊर्ध्वहस्तस्य मणिबन्धमध्यात् सूत्रं गच्छति। आसनस्य मूर्तेः स्वसूत्रं भवति। जटामध्यभागे, नासाग्रे, स्तनमध्यभागे, नाभेः केन्द्रबिन्दुः पूर्वसूत्रं ज्ञेयः। वामपादस्य गुल्फमध्यभागात् ब्रह्मसूत्रं प्रलम्बयेत्। (ब्रह्मसूत्राद्) दक्षिणजानुसीमा एकत्रिंशदङ्गुलान्तरे भवति। त्रिंशदङ्गुलमेकोनत्रिंशदङ्गुलं वा भविष्यति। सूत्रात् तस्य (दक्षिणपादस्य) अङ्गुष्ठस्य नलिकाया अन्तरं द्वादशाङ्गुलं भविष्यति। तदन्तरं त्रयोदशाङ्गुलं दशाङ्गुलं भविष्यति। पादपीठस्य पृष्ठभागस्य बहिर्निगमनं द्वि-त्रिरङ्गुलं भविष्यति। तत् सूत्रमभयमुद्रायुक्ततलहस्तमध्यरेखान्तं मध्यान्तरं चतुर्दशाङ्गुलं दर्शितम्। जङ्घाध्वं द्विमणिबन्धसीमाया निर्गमनं द्वि-त्रिरङ्गुलं भवेत्। कटक-सिंहकर्णे (मुद्रा) स द्वितीयो हस्तो भविष्यति एवं विधानमस्ति। तर्जनीतः कनिष्ठाङ्गुलीपर्यन्ता अङ्गुलयो वक्रा भवन्ति।

४१९ का.शि.६०. १ तः १३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ति। एवं रीत्या कटकस्य मुद्राया आकारो भवति। मध्यमाङ्गुली हस्ततलं प्रति वक्रा तथानामिका वक्रा, शेषाङ्गुलयः पूर्वानुसारं कटकमुद्रानुसारं वक्रा भवन्ति। एतादृशी सिंहकर्णमुद्रा भवति। ऊर्ध्वहस्ताग्रभागो हिक्कासूत्रात् समतलो भविष्यति। अनामिकाङ्गुष्ठौ च वक्रौ भूत्वा, हस्ततलमध्येऽवस्थाय, कनिष्ठाङ्गुलीरपि किञ्चिद् वक्रा, शेषाङ्गुलीनां सरलरेखानुसारा स्थितिर्भवति। एतादृशीं सुलक्षणां सुन्दरीमाकृतिं कुर्यात्। कर्पूरात् श्रोणिपार्श्वं पञ्च-षट्-सप्ताङ्गुलं भविष्यति। कुक्षिमध्ये तथा नासिकाग्रे पूर्वसूत्रं स्पर्शेत तथा भवेत्। मेढ्रमूलं. वामपादस्य गुल्फमध्यात् षडङ्गुलं सप्ताङ्गुलमथवा पञ्चाङ्गुलमन्तरे भवेत्। नाभिमध्यभागाद् वामपादस्य नालिकाग्रं चतुर्दशाङ्गुलं, पञ्चदशाङ्गुलं, द्वादशाङ्गुलं चान्तरे भवेत्। जटायाः पुरतो भागो मध्यसूत्रं, द्वयोर्मध्यन्तरं चतुर्दशाङ्गुलं, सार्धत्रयोदशाङ्गुलं भवेत्। सुखासनः, प्रवालसदृशं रक्तवर्णः, त्रिनेत्रयुक्तसुन्दरमुखः, राजसगुणसम्पन्नः, व्याघ्राजिनाम्बरधारी - एतादृशः शङ्करो भवेत्। ऊर्ध्वौ द्वौ हस्तौ कर्तरीमुद्रायां, मुखं बाह्यं प्रति, आभ्यान्तरं प्रति वा भवति। दक्षिणहस्ते परशुस्तथा वामहस्ते कृष्णसारमृगो भविष्यति। दक्षिणहस्तोऽभयमुद्रायां, वामहस्तः सिंहकर्णानुसारं कटकमुद्रायां, विशेषरूपेण वामकर्णे शङ्खपत्रं भविष्यति। शङ्खपत्रस्य विस्तारस्त्रि-चतुः: ï पञ्चाङ्गुलो भविष्यति। कर्णस्य नालं यावत् स्थूलता तथा तस्य त्रिगुणितं शङ्खपत्रस्य विस्तारो भविष्यति। एतादृशी शङ्खपत्रस्य स्थूलता दर्शिता। श्वेतवर्णं तथात्यन्तमार्दवयुक्तं मुखं भविष्यति। दक्षिणकर्णे मकरकुण्डलं सिंहकुण्डलं वा भविष्यति। त्रि-चतुः ï पञ्चाङ्गुलं विस्तारस्तथोच्चतायुक्तं कुण्डलं कर्णस्कन्धोपरि न्यसेत्। कर्णे वृत्ताकारं कुण्डलं धारयेत्। वृत्ताकारकुण्डलस्य विस्तारोऽष्टादशयवा भविष्यति। तस्योच्चता चत्वाराङ्गुलकं, कुम्भाब्जं मुकुलोदयश्च प्रमाणेनान्यरीत्या वा सौन्दर्यपूर्णं वृत्ताकारं कल्पयेत्। समसंख्याजटया सह जटामुकुटं भविष्यति। मुकुटस्योच्चता २४-२१-१८ अङ्गुलानि भविष्यति। केशान्तान्मुकुटस्योच्चतां गणयेत्। मस्तके मुकुटं पट्टेन सह भवेत्। मुखान्तसदृशं

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तस्य सप्त-अष्ट-नवांशा मुकुटाग्रस्य विस्तारो न्यूनं भविष्यति। चतुःपूरिमं भविष्यति। पूरिमोदयं द्वादशांशं भविष्यति। दक्षिणं प्रति नागार्कपुष्पौ तथार्धचन्द्रं स्थापयेत्। अथवा शङ्करस्य दक्षिणं प्रत्यर्धचन्द्रः, वामे नागस्तथा नागार्कपुष्पौ धारितानि सन्ति, कटिसूत्रं त्रिसंख्यासूत्रं तथा विस्तार एको यवो भविष्यति। कटेरूर्ध्वमर्धभाग-समीपे, कटिसूत्रं बन्धयेत्। पञ्च-षड्-सप्ताङ्गुलं कीर्तिमुखस्य विस्तारो भविष्यति। मेढ्रोर्ध्वं (कीर्तिमुखस्य) विस्तारवदुच्चता भविष्यति। कटिसूत्रादुरोः १/३ भागः, ऊरु-ऊर्ध्वसूत्रं भविष्यति। ऊरु-ऊर्ध्वं मुक्तमालाया अन्तरं, अन्तरोपरि रत्नानि भवन्ति। एतादृशं कटिसूत्रं दर्शितम्। कटकं वलयेन सह भविष्यति। प्रकोष्ठोर्ध्वं कटकवलयेन सह कनिष्ठाङ्गुलेः परिधिवत् परिधिर्भवति। वलयं मार्दवं हितम्। वलयस्य स्थूलता द्वि-त्रियवा भवति। वलययुग्मं अध ऊर्ध्वं च हस्तस्य प्रकोष्ठस्योपरि भविष्यति। सौन्दर्यपूर्णं रत्नबन्धं वलयस्योपरि कुर्यात्। केयूरः कूर्पूरे स्यात्। मुकुटं घनान्वितं भवति। केयूर एकाकारो भविष्यति। तदष्टकमलदलैः सह भवति, तथा तस्मिन् भिन्नभिन्नानि रत्नानि भविष्यन्ति। अथवा नागबन्धो भविष्यति। हस्तमध्यभागे (दण्डोपरि) पर्णाकारस्य पूरिमं भविष्यति। पर्णाकारस्य पूरिममूलं केयूरानुसारं घनीकृतं भविष्यति। तत्पूरिमादधो मूलहस्तस्य परितो द्वि-त्रि-चतुः-पञ्च परिधयो भवन्ति। पत्रपूरिमविस्तारस्य सार्धैकं, पादोनद्विः, द्विगुणितं वा हस्तवलयस्योच्चता भविष्यति। मध्यमाङ्गुलीर्विहायान्याङ्गुल्यो मुद्रिकान्विता भविष्यन्ति। अङ्गुष्ठ-अङ्गुलीमूलसमीपे पर्वं रत्नसहितं भवेत्। उदरबन्धं यवद्वयं भवति। तद्बन्धो भिन्न-भिन्नालङ्कारैः, विविधिरत्नैश्च सुशोभितं सन्, नाभेरूर्ध्वं त्रि-अंशामथवाधिकं वर्धितं भवति। पादमध्यमाङ्गुलीं विनान्याङ्गुलीषु मुद्रिका भवेत्। तस्य भ्रमिद्वयं कृत्वा, अङ्गुलेर्मध्यभागस्य वलयं दर्शितमस्ति। पादगुल्फसमीपे नालयुक्तं जालकबन्धसूत्रं भवेत्। तस्य स्थूलता यवद्वयस्य भवति। जालकसूत्रस्य मूलस्य ३/५ यवमानस्य स्थूलता भविष्यति। जालकमूलस्योच्चता त्रियवाः, शेषोच्चताया जालकं भविष्यति। पादस्योच्चतावज्जालकबन्धसूत्रस्य विस्तारो भविष्यति। तथा यवमानं तथैव भविष्यति। शेषं हीनं घनं गाढं यथायोग्यमुचितं स्यात्, तथैव कुर्यात्। गाढावृत्तौ

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ं कथ्यते। रत्नविहीनं भवति चेत् गाढनीव्रमुच्यते। परशोहारणश्च दीर्घता द्वादशाङ्गुला भवति। परशुं हरिणीं वा द्वयमपि वा यथायोग्यं भवेत् तथैव स्थापयेत्। यज्ञोपवीतस्य स्थूलता १/८ यवो भवति। यज्ञोपवीतं द्विसूत्रं भविष्यति। उत्तरीयं वस्त्रं स्कन्धोर्ध्वं संस्थाप्य नाभेरध एकाङ्गुलं भवति। यज्ञोपवीतस्य सूत्रं दक्षिणं प्रति भवेत्। ऊर्ध्वं प्रति वामभागे स्कन्धोपरि यज्ञोपवीतं भवेत्। वक्षःस्थलस्योपरि मालाया आधारेण नीत्वा स्तनस्याधोऽष्टाङ्गुलं भवति। छन्नवीरं स्कन्धद्वये भवति। गलस्य हारः, हिक्कासूत्रस्याधः षडाङ्गुलं दैर्घ्यं भवति। तस्य विस्तारश्चत्वारोऽङ्गुलानि, स्थूलता त्रियवानां भविष्यति। भिन्न-भिन्नरत्नजडितसुवर्णस्य हारं कुर्यात्। हिक्कासूत्रस्योपरि रुद्राक्षं, रत्नं, सुवर्णसूत्रेण रचयित्वोपग्रीवं बन्धयेत्। नानापुष्पविराजितानि सर्वाण्यवयवानि सुन्दराणि स्युः। एतादृशः सुखासनः दर्शितः।[४२०]

सोमस्कन्देश्वरः

सोमस्कन्देश्वरस्य लक्षणं सुखासने यथा प्रोक्तं तथैवात्र भवेत्। देवस्य वामपार्श्वे सुखासने स्थिता पार्वती भवति। तस्या वामपादो वक्राकारस्तथा दक्षिणपादो लम्बितो भवति। आसनस्योपरि स्विष्टयश्चतुरङ्गुलानां भवन्ति। आसनोपरि शरीरमुर्ध्वकायसमायुक्तं भवति। शङ्करस्य मुखं देवीं प्रति किञ्चिद् वक्रं भवेत्। मुखं सुन्दरं तथा तेजोमयं भवेत्। वामहस्ते वरदमुद्रा तथा दक्षिणहस्ते कमलं भवति। वामहस्ततलस्याङ्गुल्यः किञ्चिद् वक्राकारा भवन्ति। केवलं हस्ततलमूर्ध्वं प्रति वक्रं भवति। इदं वरदमुद्रया प्रसिद्धमस्ति। पुष्पं धारितः, सिंहकर्णमुद्रायां भवति।[४२१]

देवीः

---

४२० का.शि.६१.१ तः ५९
४२१ का.शि.६२.१ तः ५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

छन्नवीरेण सहितां देवीं देवस्य वामाङ्के स्थापयेत्। अथवा भिन्नप्रकारेण द्व्यासने यथा- वामोरूर्यत्र पीठस्य बहिर्भवति, तत्र वामहस्ततलं स्थापयेत्। उपर्युक्तानुसारं दक्षिणहस्ते कमलं, वामं प्रति जानुपीठात् किञ्चिदूर्ध्वं भवति। पीठस्य जान्वोश्चान्तरं त्रि-चतुः-पञ्चाङ्गुलं वा भवेत्। अथवा षड्-सप्त-अष्टाङ्गुलं जानु-पीठयोर्मध्यान्तरं भविष्यति। द्विविधमुद्रायुक्तां देवीं दर्शयामि। स्त्रीमानानुसारं देव्या मानं स्वीकुर्यात्। देवेशः शङ्करो यदि उत्थितः, तर्हि देव्यपि पार्वत्यप्युत्थिता भवेत्। यदि शङ्कर उपविष्टोऽस्ति चेत्, देव्यप्युपविष्टा भवेत्। विपरीतं कृतमस्ति चेत्, विपत्तिकारकं भवति।[४२२]

स्कन्दः

देवीदेवेशयोर्मध्ये स्कन्दस्य कार्तिकेयस्य लघुमूर्तेः स्थापनां कुर्यात्। स्कन्दस्योच्चता देव्या हिक्कासूत्रस्याधःपर्यन्तमुत्तमा भवति। स्तनसूत्रपर्यन्तमुच्चता कनिष्ठा भवति। उत्तम-मध्यमयोर्मानमष्टभागे विभज्य स्कन्दस्य नवमानानि प्राप्तानि भवन्ति। उत्तमात् कनिष्ठपर्यन्तं एवं प्रकारेण त्रिस्त्रिमानानि प्राप्तानि भवन्ति। कषायवस्त्रं धरस्तथा वस्त्रं विनापि भवति। स्कन्दमानस्योच्चतायाः सार्ध चतुःषष्टि-अंशेषु विभाजनं करोति, तदैकांशस्याङ्गुलस्य मानं भवति। तस्याष्टभागो यवो भवति। शिरसो मानमेकाङ्गुलं भवति। तथैव ततः केशान्तान्तरमेकाङ्गुलं भवति। ततो नेत्रसूत्रपर्यन्तमन्तरं त्रिभागस्य। तथैव नासापुटपर्यन्तं मानं भवति। नासापुटाद् हनुसीमान्तं त्रि-अंशाः, गलस्योच्चतांशद्वयस्य भवति। हिक्कासूत्रात् स्तनसीमान्तरं नवभागानां भवति। स्तनसूत्रान्नाभिपर्यन्तमन्तरमष्टाङ्गुलकं भवति। नाभितो मेढ्रमूलपर्यन्तमन्तरं सप्ताङ्गुलं भवति। ऊरोदीर्घता द्वादशांशा भवति। जानोरङ्गुलद्वयं, पिण्डली ऊरूवद् भविष्यति। पादयोरुच्चताङ्गलद्वयं भविष्यति। पादतलस्य दीर्घता दशांशा, हस्तदीर्घता चतुर्दशाङ्गुला, प्रकोष्ठस्य दीर्घता दशांशा, हस्ततलस्य चतुरङ्गुला भविष्यति।

---

४२२ का.शि.६२.६ तः ११

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

अनामिकाया: सार्धत्रि-अंशा, तद्वत् तर्जनी-अङ्गुलस्य दीर्घता भविष्यति। कनिष्ठाङ्गुल त्रि-अङ्गुलानां भविष्यति। अङ्गुष्ठस्य दीर्घता त्रि-अंशानां, हस्ततलस्य विस्तारश्चतुरंशानां, प्रकोष्ठाग्रस्य विस्तारस्त्रिरंशानां, प्रकोष्ठमूलविस्तार:,चतुरङ्गुलानां भविष्यति। हस्तमूलस्य विस्तार: पञ्चांशानां, मुखविस्तार: सार्धाष्टांशानां, कर्णस्य विस्तार: सप्ताशांनां भविष्यति। कुक्षीमध्यान्तरस्य दीर्घता त्रयोदशाङ्गुलानां भविष्यति। वक्षस्थलस्य विस्तार: पञ्चाशानां (१२?) भविष्यति।

मध्यभागविस्तार एकादशांशानां भविष्यति। श्रोणीविस्तारो द्वादशांशानां, कटेर्विस्तारस्त्रयोदशांशानां, ऊरुमूलविस्तारोऽष्टाङ्गुलानां भविष्यति। जानुविस्तार: षडाङ्गुलानां भविष्यति। पिण्डलीमूलविस्तारश्चतुरङ्गुलानां, नालविस्तारस्त्रि-अंशानां, तलविस्तार: षडाङ्गुलानां, पार्ष्णिव्यास: षडांशानां भविष्यति। शेषावयवा युक्त्या कुर्यात्। करण्डमुकुटधरो हस्तयो: पुष्पं भवेत्। वामहस्तो वरदमुद्रायामथवा कटक-सिंहकर्णमुद्रायां भवेत्। दक्षिणहस्ते पुष्पं बिल्वफलमाम्रफलं वा भवेत्। कटिसूत्रधृतं नग्नं छन्नवीरसमन्वितं वा भवति। मृदुकेशा:, कण्ठे बालभूषणैर्भूषितं, आसीनं स्थितं वा, अथवा नृत्यं कुर्वन् स्कन्दमूर्तिं रचयेत्।[४२३]

उमास्कन्द:

स्कन्द आसीनोऽस्ति चेत्, पादद्वयं पीठोपरि भवेत्। स्थितो भवति चेत् पादतलद्वयं स्थलभङ्गमुद्राप्रमेणन स्थापितं भवेत्। पादद्वयं किञ्चिद् वक्रं, जानु: किञ्चिद् बहि:, पादौ किञ्चित् तिर्यग्, किञ्चित् चलन्तौ भवत:, एवंप्रकारेण स्कन्द: स्थितो भवति। नृत्यं करोति चेत् पादौ स्वस्तिकमुद्रायां, दक्षिणपादो वक्राकार:, वामपाद: पीठात् सप्त-षट्-पञ्च वा अङ्गुलानामुद्धृतो भवति। दक्षिणहस्त: फलेन सह वरदमुद्रायां, द्वितीयहस्तो सूचिमुद्रायां

४२३ का.शि.६२.१२ त: ३०

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

...ति। हिक्कासूत्रात् कर्णबन्धस्योर्ध्वान्तं समतलं भवेत्। द्वयोर्मध्यान्तरे लम्बसूत्रं कथ्यते।[424]

चन्द्रशेखरः

चन्द्रशेखरस्य मूर्तेस्तिस्रप्रकारा भवन्ति यथा - केवलं शङ्करः, गौर्य्या सह शङ्करः, गौरीमालिङ्गन् शङ्करः। केवलं गौरीरहितः, गौर्य्या सह, सहजभावे गौरीसंयुतः, आलिङ्गनयुक्त इत्युक्ते देवो देवी च परस्परमेकहस्तेनालिङ्गनं ददतः। केवलं मूर्तिः समपादमुद्रायां स्थानके स्थिता भवति। समभङ्गं त्रिभङ्गमभङ्गं वा मुद्रायां चन्द्रशेखरस्य मूर्तिर्दर्शिता। अभयमुद्रया सह समपादं स्थानकसहिता भवति। दीर्घतामानमुपमानं विस्तारस्य क्रमेण दर्शयति। प्रलम्ब-फलकस्य दीर्घता द्वादशाङ्गुलानां भविष्यति। तस्य विस्तारोऽष्टादशाङ्गुलानां तथा स्थूलता सार्धचतुरङ्गुलानां भविष्यति। चतुष्पादसमायुक्ता, तस्योच्चता प्रतिमावद् भविष्यति। पादविस्तारः सप्ताङ्गुलो भविष्यति। तत्फलकं समतले स्थापयेत् । प्रलम्बफलकस्योपरि समसूत्रस्थानं निश्चित्य पुरतः पृष्ठे तथा पार्श्वं प्रति मानसूत्रस्य दीर्घतां प्रलम्बयेत्। तस्य पार्श्वे मानसूत्रस्य मध्यभागे स्थानं रिक्तमस्तीति ज्ञात्वा सूत्रं प्रलम्बयेत्। सूत्रान्तं लम्बयेत्। तत्सूत्रं धृत्वा प्रतिमां कुर्यात्। प्रतिमायाः पुरतः, पृष्ठं प्रति, शरीरस्य मध्यभागात्, तद् दीर्घसूत्रं प्रलम्बयेत्। अत्र पञ्चसूत्रं ब्रह्मसूत्रं कथ्यते। कक्षान्तरे मुखविस्तारस्य पार्श्वं प्रति द्वे द्वे सूत्रे प्रलम्बयेत्। एवं नवसूत्रात्मिका, आसीना स्थिता च मूर्तिर्भविष्यति। मुकुटमध्यभागे, ललाटमध्यभागे, नासाग्रमध्यभागे, हनुमध्ये, स्कन्धमध्यभागे, वक्षःस्थलमध्यभागे, नाभिमध्ये, लिङ्गमध्ये, पादतलयोर्मध्ये पूर्वसूत्रं लम्बयेत्। अपरसूत्रं वक्ष्यते। मुकुटमध्यभागे, कृकाटिका-मध्ये, पार्श्वभागस्य मध्ये, स्फिक-पिण्डान्तरस्य मध्यभागे, ऊरु-पिण्डलीं प्रति, पादपार्ष्णि-अन्तरस्य मध्यभाग एवमपरसूत्रं प्रलम्बयेत्। पार्श्वयोः कर्णवलयान्ते, गलमध्यभागस्योर्ध्वं, शरीर-बाह्ये, मध्यभागस्योर्ध्वं, पादगुल्फमध्यादूर्ध्वं प्रति

४२४ का.शि.६२.३१ ततः ३६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तानि पञ्चसूत्राणि कल्पयेत्। कर्णाभ्यन्तरं गतं सूत्रमेव स्तनाग्रस्य मध्याध्व, पाद-ऊर्वामध्य किन्तु बाह्यभागाद् गच्छन् दीर्घसूत्रमूर्ध्वादधः प्रलम्बयेत्। पूर्वसूत्रं जटाग्रमध्यं द्वादशाङ्गुलं भविष्यति। जटाग्रस्य मध्ये षडङ्गुलमूर्ध्वं भविष्यति। पूर्वसूत्राल्ललाटान्तमन्तरमङ्गुलद्वयं भविष्यति। अपरसूत्रं शिरसः पृष्ठे सपादत्रि-अङ्गुलं भविष्यति। पूर्वसूत्रात् चिबुकान्तमङ्गुलद्वयं यवश्च भविष्यति। कृकाटिकापरसूत्रं द्वयोर्मध्यान्तरमङ्गुलद्वयं सप्तयवाश्च भविष्यति। हिक्कासीमान्तं पूर्वसूत्रयोर्मध्यान्तरं षडङ्गुलं भविष्यति। ककुदोऽपरसूत्रात् षोडशयवान्तरं भविष्यति। स्तन-पूर्वसूत्रयोर्मध्यान्तरमङ्गुलद्वयं भविष्यति। ककुद्-अपरसूत्रयोर्मध्यान्तरं सार्धचतुर्दशयवा भवेत्। उदरमध्यभागस्य तथा पूर्वसूत्रस्यान्तरमपि सार्धचतुर्दशाङ्गुलं भविष्यति। वंशनिम्नपरं सूत्रस्यागाधता पादोनद्विरअङ्गुला भविष्यति। पूर्वसूत्रान्नाभिमध्यभागमध्यान्तरं सार्धैकाङ्गुलं भविष्यति। नाभि-अपरसूत्रयोर्मध्यान्तरं सार्धद्वि-अङ्गुलं भविष्यति। पूर्वसूत्रान्मेढ्रमूलस्य सीमा त्रि-अङ्गुला दर्शिता। अपरसूत्रान्मेढ्रमूलसीमान्तमन्तरमङ्गुलद्वयं भविष्यति। ऊरूमध्ये पुरतो, तथैव जटामध्यभागे, पिण्डलीमध्यभागे, नालपुरतो मध्यभागे, तिर्यक् सूत्रं कल्पयित्वा तेषां मध्यान्तरं गणयेत्। तत्तत्स्थाने पुरतस्तिर्यक्सूत्रस्य कल्पनां कुर्यात्। ऊरूमध्याङ्गसूत्रस्य पूर्वसूत्रस्य वान्तरमङ्गुलद्वयं भविष्यति। तत्रापरसूत्रस्य मध्यान्तरं षड्विंशतियवा भविष्यति। जानुमध्याद् गच्छन् सूत्रस्य पूर्वसूत्रस्य चान्तरं षडङ्गुलं भविष्यति। तत्रापरसूत्रं पादोनपञ्चाङ्गुलं भवेत्। पिण्डलीमध्यभागस्य तथा पूर्वसूत्रस्य मध्यान्तरमष्टाङ्गुलं भविष्यति। तत्रापरसूत्रसीमापर्यन्तमन्तरं षड्विंशतियवा भवेत्। पूर्वसूत्रान्नालमध्यान्तरं सार्धाष्टाङ्गुलानां भविष्यति। नालमध्यभागस्य तथापरसूत्रसीमाया अन्तरं पादोनपञ्चागुलं भविष्यति। पूर्वसूत्रादङ्गुष्ठाग्रः सार्धद्वि-अङ्गुलो भवेत्। पूर्वसूत्रात्पार्ष्णिपर्यन्तमन्तरं सार्धचतुर्दशाङ्गुलं भविष्यति। पूर्वसूत्रात् शरीरस्य मध्यभागं गच्छन् सूत्रस्यान्तरं सार्धनवाङ्गुलं भविष्यति। शरीरस्य मध्यभागाद् गच्छन् सूत्रं तथा शिरसः पृष्ठभागस्यैवं द्वयोर्मध्यान्तरं चतुरङ्गुलानां भविष्यति। शरीरस्य मध्याद् गच्छन् सूत्रात्ककुद्

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वक्षःस्थलस्य पृष्ठभागे षडाङ्गुलं तथोदरमध्यभागात् पृष्ठभागस्य सूत्रं सार्धचतुरङ्गुलानां भविष्यति। नाभिभागस्य पृष्ठभागस्य सूत्रं पञ्चाङ्गुलानां भविष्यति। कटिनिर्गमनं षडंशांनां भविष्यति। स्फिक-पिण्डस्य पुरतो भागस्यान्तरं सार्धाष्टाशांनां भविष्यति। तत्सूत्रेण ऊरूमध्यश्चतुरंशानां, जानुपृष्ठं तथैव, पिण्डलीमध्यभागस्य त्रि-अंशाः, नालस्याङ्गुलद्वयं, गुल्फयोश्चत्वारोऽङ्गुला अपरसूत्रं गच्छति। पार्श्वसूत्रस्य मध्यभागे समसूत्रे पार्ष्णिर्भवति। पार्श्वसूत्रस्य पुरतो बाहुपर्यन्तमन्तरं चतुरङ्गुलकं भविष्यति। तत्सूत्रेण हस्तस्यान्तरमष्टाङ्गुलानां भविष्यति। ऊर्ध्वाधो हस्तः कर्पूरपर्यन्तमेकसमानो भविष्यति। तत्सूत्रस्य पार्श्वेऽन्तरं चतुरङ्गुलकं भविष्यति। ऊर्ध्वहस्तस्याग्रो कर्तरिमुद्रायां भविष्यति। तदग्रं हिक्कासूत्रपर्यन्तं भवति। हस्तयोर्मध्यमाङ्गुलाग्रं स्तनसूत्रपर्यन्तं भवेत्। दक्षिणहस्तोऽभयमुद्रायां, वामहस्तो वरदमुद्रायां भवति। पूर्वसूत्रादभयमुद्राया हस्तस्य मध्यभागान्तरं पञ्चदशाङ्गुलानां भविष्यति। वामहस्ततलं वरदमुद्रायामधः प्रति कल्पयेत्। हस्तमूलं कटिं स्पृशति। तस्याग्रं मेढ्रवत् समतलं भविष्यति। मध्यमाङ्गुलाग्रादूरोर्निर्गमनं चतुरङ्गुलकं भविष्यति। ऊरोर्मुखसमीपे वरदहस्तस्य पृष्ठभागो नाभिसमतलपर्यन्तमुद्धृतो भवति। वरदहस्ततलस्य मध्यं पूर्वसूत्रात् षोडशाङ्गुलानां भवति। कर्तरिमुद्रायां, मणिबन्धाद् हस्तस्य बहिर्मुखं भवति। अथवा हस्ततलमध्ये पूर्वसूत्रेणैकादशाङ्गुलमथवा दशाङ्गुलकं भविष्यति। पूर्वसूत्रसीमान्तं कूर्परपर्यन्तं निर्गमनं सप्तदशाङ्गुलकं भविष्यति। पूर्वसूत्रेण पिण्डली नवदशाङ्गुलानां, ऊरूमूलमङ्गुलद्वयं, तथैव गुल्फस्यान्तरमेकाङ्गुलं भविष्यति। ऊरोर्मध्यान्तरं विंशतिरङ्गुलकं भविष्यति। जानुमध्यान्तरं चतुरङ्गुलकं भविष्यति। पिण्डलीमध्यान्तरं पञ्चाङ्गुलकं भविष्यति। नालमध्यान्तरं षडशांनां, पादाङ्गुष्ठयोर्मध्यान्तरमष्टाङ्गुलकं भविष्यति। मुखोपरि आर्जवं वा राजसभावं कल्पयेत्। ऊर्ध्वहस्तद्वयं कर्तरिमुद्रायां, दक्षिणहस्ते टङ्कं तथा वामहस्ते हरिणी भवति। टङ्कस्य मुखं बाह्यं प्रति भवेत्। हरिणीमुखमाभ्यन्तरं प्रति भवति। जटामुकुटेन संयुतो वामे दक्षिणे चन्द्रो भवेत्। प्रवालानुसारं रक्तं त्रिनेत्रं भवति। सौम्यमुद्रा, सर्वाभूषणैराभूषितः, पीतवस्त्रधरः,

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्श्वभागे वस्त्रं, ऊरूमध्ये प्रदर्शयेत्। वामं प्रति गौरीसहितं शङ्करस्य ज्ञानं वक्ष्यते। भिन्नासने एकासने वा, भङ्गादिना (अभङ्गादिना वा) सह गौरीसयुंतः शङ्करो भवति। अथवा तस्य शङ्करस्य ऊरोः पीठे, भिन्नपीठासीना गौरीसहितः शङ्करो भवति। उपर्युक्तानुसारं भङ्गेन सह देवीदेवौ परस्परमालिङ्गनबद्धौ भवतः। भगवत एको हस्तो वरदमुद्रायां, द्वितीयो हस्तो देव्याः स्तन-नाभिमध्यान्तरे, वामभागेनालिङ्गनं कुर्यात्। अथवा पार्श्वसूत्रस्याध्र्वं वामहस्तेनालिङ्गनबद्धो भवति। देवीदक्षिणहस्तेन शङ्करस्य दक्षिणकटिसूत्रोर्ध्वमालिङ्गनं दत्तमस्ति। वामहस्ते पुष्पं धृतमस्ति। शङ्करस्य मूर्तिः पूर्वानुसारम्। देव्या दक्षिणहस्ते पुष्पं भवति। वामहस्तोऽधो लम्बितो भवति। एवमालिङ्गनबद्ध-मूर्तेस्त्रिप्रकारान् कल्पयेत्। सर्वाभूषणैः सह प्रभामण्डलयुक्तश्चन्द्रशेखर आख्यातः।[४२५]

वृषवाहनमूर्तिलक्षणम्

वृषारूढ-शङ्करस्य मूर्तेर्लक्षणं वक्ष्यते। समभङ्गमतिभङ्गमुद्रायां वा मूर्तेः कल्पनां कुर्यात्। दक्षिणपादः स्वस्तिको भवेत्, वामपादः किञ्चित् कुञ्चितो भवेत्। उष्णीषमध्ये वामं प्रति, मस्तकस्य मध्ये दक्षिणं प्रति, वामनेत्रान्तं, वामनासिकापुटान्तके, स्तनभागस्य दक्षिणे, नाभेर्मध्ये वामं प्रति, वाम-ऊरोर्मध्योर्ध्वं, पार्ष्णोर्मध्योर्ध्वं मध्यसूत्रं प्रलम्बयेत्। एवं समभङ्ग-सूत्रमभवत्। उच्चताया मानं चतुरङ्गुलकं न्यूनं भविष्यति। मुखं समभङ्गे पूर्वोक्तानुसारेण, तथैव दक्षिणस्तनस्य भागः, नाभेर्दक्षिणं प्रति त्रि-अंशानामूर्ध्वं, वामोरोर्मध्योर्ध्वं सरलरेखानुसारं स्थितेः पादात्, गुल्फमध्यान्मध्यसूत्रं प्रलम्बयेत्। एवमतिभङ्गमुद्रा कथ्यते। मूतेरुच्चताया मानं पञ्चाङ्गुलान्न्यूनं भवति। नन्देः शिर उपरि शङ्करस्य वामकूर्परं स्थापयेत्। नन्देरुच्चता दर्शितम्। पादद्वयं स्थानकमुद्रायां भविष्यति। नन्देः शिर उपरि, हस्तमध्यमाङ्गुलेः सीमान्तं, नाभिसूत्रं समतलं कुर्यात्। नाभिसूत्रादध ऊर्ध्वमेकाङ्गुलं भविष्यति। तद् हस्तस्य

---

४२५ का.शि.६३.१ तः ६१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

भविष्यति। नन्दे: शिर उपरि हस्तोऽधोमुखो प्रसारितश्च भविष्यति। दक्षिणे प्रत्यधोहस्तस्य मध्यभाग:, नाभेरध: पञ्चदश षोडशाङ्गुलान् वा स्थापयेत् तर्हि सिंहकर्णानुसारं मुद्रा भविष्यति। तद् हस्ते वक्राकारदण्डस्यायुधं भविष्यति। सरलस्थितिरेखानुसारं पाद:, यस्मिन् पादे भारो दत्तोऽस्ति,तज्जानुरूर्ध्वान्ताद् हिक्कासूत्रपर्यन्तं, तावद् दैर्घ्यं, कनिष्ठाङ्गुलकं यावत् स्थूलता वा। पुरतस्त्रिमुखयुक्तं, लोहस्य काष्ठस्य वा वक्रदण्डं भविष्यति। यस्मिन् हस्ते वक्रदण्डमस्ति, तद् हस्तस्य मणिबन्धाद् ऊरूमूलपर्यन्तमन्तरं पञ्च-षट्-सप्त-अष्ट-नवाङ्गुलानां भविष्यति। जटामुकुटसंयुत:, जटाभारो लम्बित:, अथवा जटाबन्ध: शिर उपरि भवति। कर्तुरिच्छानुसारं कुर्यात्। सर्वाभूषणै रक्तवर्णस्य रक्तमुखस्य च शङ्करस्य मूर्तिर्भविष्यति। उमादेवी वामपार्श्वे, विशेषरूपेण दक्षिणे भवेत्। दक्षिणपाद: स्वस्तिकमुद्रायां, वामपाद: किञ्चिद् वक्राकारो भवति। दक्षिणहस्ते कमलं, वामहस्त: प्रसारितो भवति। स्त्रीमूर्तिमानानुसारं देवीं पार्वतीं कुर्यात्।[४२६]

नृत्तमूर्तिलक्षणम्

शङ्करस्योत्साहं वर्धयितुं दुर्गाया चर्ममुण्डिकाया जन्माभवत्। सर्वलोकानां हिताय, देवानां सङ्कटनाशहेतवे राजा राष्ट्रस्य वोन्नत्यर्थं शङ्करो नृत्यति। नृत्यस्याष्टदश प्रकारा भवन्ति। पूर्वानुसारं मूर्तेर्मानं भविष्यति। सर्वेऽवयवा उत्तमदशतालमानेन कल्पयेत्। द्वादश-एकादश-दशाङ्गुलानामुच्चता भवति। उष्णीशमध्ये वामं प्रति, मस्तकमध्यभागे दक्षिणं प्रति एकाङ्गुलान्तरं, वामनेत्रसीमातो वामनासिकापुटान्तम्, ऊर्ध्वं हनोर्वामं प्रत्यूर्ध्वं, स्कन्धमध्यभागादुपरि, नाभिमध्यभागात् सरलरेखास्थित्यनुसारं पादात्, गुल्फाभ्यान्तरे मध्याद् वामं प्रति, तथैव शिरस: पृष्ठभागे प्रभामण्डलस्य मध्यभागात् पूर्वसूत्रं प्रलम्बयेत्। मस्तकात् पूर्वसूत्रस्य निर्गमनं त्रिभागस्य सार्धद्विभागस्य वा भवति। स्कन्धमध्यात् पूर्वसूत्रस्य निर्गमनं सार्धसप्त नवाङ्गुलकं वा भवेत्। पूर्वसूत्रं मुकुटस्य तथा कक्षाग्रस्य मध्यान्तरं तावदेव

४२६ का.शि.६४.१ त: १९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्रलम्बयेत्। तत् पूर्वसूत्रात् डोलमुद्रायां हस्तसीमान्तं साधेषोडशाङ्गुलानां भविष्यति। पूर्वसूत्राद् हस्तस्याग्रं चतुरङ्गुलकं भवति। पूर्वसूत्रेणाग्निकराग्रान्तमष्टत्रिंशत्-चत्वारिंशत्-त्रिचत्वारिंशदङ्गुलकं भवन्ति। हिक्कासूत्रेण समतलं हस्तस्य मध्यमाङ्गुलाग्रं भवति। तद् हस्ततलस्य मध्यभागः, मध्यमाङ्गुलान्तमेको यवः, मध्यपर्वे पात्रसहितो रहितो वाग्निर्भविष्यति। तस्य विस्तारः पञ्चाङ्गुलानां भविष्यति। अग्नेरुच्चता सप्त-अष्ट-नवाङ्गुलानां भविष्यति। अग्निस्त्रि-पञ्च-सप्त जिह्वायुक्तो भवति। मध्यजिह्वां विहाय, अन्यजिह्वानां दक्षिणं प्रति मुखं भवेत्, तथैव कुर्यात्। पूर्वसूत्रस्य दक्षिणं प्रति हस्ताग्रं विंशतिरङ्गुलानामन्तरोपरि भविष्यति। डमरुकधारिहस्तस्य मणिबन्धस्य बहिर्भागेऽष्टत्रिंशत् चत्वारिंशद् वाङ्गुलकं भविष्यति। अथवा वामहस्ताद् दक्षिणहस्तं प्रति चत्वारिंशदङ्गुलानामन्तरोपरि डमरुकधारिहस्तो भविष्यति। तद् हस्तस्य मणिबन्धस्योर्ध्वभागो हिक्कासूत्रस्य समतलो भविष्यति। डमरुकस्य मध्यभागः सूचिकर्णमुद्रायां भवति। तर्जन्यग्रं सूचीमुद्राप्रमाणेन भवति। डमरुकस्य चर्मवाद्यं मध्यमाङ्गुलकमुपरि भवेत्। अनामिकाङ्गुलकेन गृहीतं भवति। डमरुकस्य दीर्घता विस्तारश्चानुक्रमेणाष्ट पञ्च वाङ्गुलानां भविष्यति। मध्यभागे तस्य विस्तारस्त्रि-अङ्गुलानां, तत् कमलाकारानुसारं भविष्यति। द्विवलययुक्तं, धेनुचर्मसूत्रेण बन्धितं डमरुकं भविष्यति। तर्जनी सूचीप्रमाणेनाग्रात् कर्णसीमान्तं चत्वारिंशदङ्गुलानामन्तरोपरि भविष्यति, अथवा पञ्चचत्वारिंशत् पञ्चाशदङ्गुलानां वा भविष्यति। सूचीप्रमाणेन मध्यमां तर्जनीं विहायान्याङ्गुलीनां पार्श्वसूत्रं समतलं भवति। दक्षिणं प्रति, अधो हस्तमभयमुद्रायां कल्पयेत्। पूर्वसूत्रादभयमुद्रायुक्तो हस्तस्य मध्यभागश्चतुर्विंशतिरङ्गुलानामन्तरोपरि भवति। मध्यमाङ्गुलकाग्रं हिक्कासूत्रेण समतलं भविष्यति। पूर्वसूत्रात् कूर्पारस्य निर्गमनं द्विचत्वारिंशदङ्गुलानां भविष्यति। अभयमुद्रायुक्तो हस्तः। प्रकोष्ठमध्यभागे नागवलयं स्थापयेत्। तस्य परिधिः प्रकोष्ठमध्यभागं यावद् भविष्यति। तस्य विस्तारः सपादाङ्गुलकं भविष्यति। तत्सूत्रोर्ध्वं (वलयोर्ध्वं) फणां द्वादशाङ्गुलानां भविष्यति। फणाया विस्तारः सप्ताङ्गुलको भविष्यति। पुरतः स्थितान्मुखाद् बहिर्जिह्वा

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कल्पनां कुर्यात्। पूर्वसूत्रं कुक्षेर्वामं प्रति मध्यमान्तरं द्वादशाङ्गुलानां भविष्यति। पूर्वसूत्राद् वामं प्रति मध्योदरं नवाङ्गुलानां भवति। पूर्वसूत्राद् वामं प्रति वृषाण्डस्य निर्गमनमष्टादशाङ्गुलानां भविष्यति। पूर्वसूत्राद् वक्र-जानोरन्तरं दशाङ्गुलानां भविष्यति। नव-अष्टाङ्गुलानामनुक्रमेण जानोर्निर्गमनं भविष्यति। द्वादश-एकादश-दशाङ्गुलानां नतमानं भवेत्। तावदुच्चता न्यूना भवेत्। स्थितजान्वोर्बहिर्जान्वोर्निर्गमनं षोडशाङ्गुलानां भविष्यति। पञ्चदश चतुर्दशाङ्गुलानां वा जानुद्वयस्य मध्यान्तरं भविष्यति। स्थितपादनालमध्याद् वामपादस्य पृष्ठभागस्यान्तरं ४४-४७-४६ अङ्गुलानां भविष्यति। स्थितपादजानुत उद्धृतः पादपृष्ठस्य भागस्यान्तरं ३४ अङ्गुलानां भविष्यति। उद्धृतपादजानुर्नाभिसूत्रसमा भवति। डोलहस्तस्य कुर्परो नाभिसूत्राद् दशाङ्गुलानामन्तरोपरि भविष्यति। अथवा कर्पूरस्य सीमापर्यन्तम् (नाभिसूत्रादन्तरं) एकादशाङ्गुलानां कल्पनां कुर्यात्। तद् हस्तस्य मणिबन्धाद् वामजान्वोर्मध्यान्तरं १०-९ अङ्गुलानां भविष्यति। डोलहस्तस्य मध्यमाङ्गुलाग्राद् वामपादजान्वोरन्तरं १०-९-११ अङ्गुलानां वा भविष्यति। डोलहस्तस्तथाभयमुद्रायुक्तहस्तस्य मध्यानन्तरं दशाङ्गुलानां भविष्यति। परस्परं मध्यानन्तरं यथा सुन्दरं भवेत् तथैव करणीयम्। केशान्ताद्वकपक्षस्योच्चताष्टादशाङ्गुलका, सप्तादशाङ्गुलका, षोडशाङ्गुलका वा भविष्यति। तस्यार्धं पादोनगुणितं वा तस्य विस्तारो भविष्यति। उत्तमरीत्या प्रसारितो जटाभारः पञ्च-षट्-सप्त-नव-एकादश संख्यापर्यन्तं पार्श्वे जटा भवति। द्वात्रिंशदङ्गुलादारभ्यैकमेकमङ्गुलकं वर्धयित्वैकषष्टिरङ्गुलपर्यन्तं जटाया दीर्घता भवति। कनिष्ठाङ्गुलेः परिधिं यावज्जटायाः परिधिः प्रोक्ता। जटान्ते पुष्पमाला, नागस्तथैवार्कपुष्पं, धत्तूरकुसुमं, हस्तिशिरीषपुष्पं, करोटिस्तथा रत्नवदुत्तमालङ्कारा भवन्ति। एवंरीत्यालङ्कृत-मुकुटस्योपरि दक्षिणं प्रति चन्द्रशेखरो भवति। सिन्धूरेणालङ्कृतो भवति। कण्ठेऽष्टमाला भवन्ति। सम्पूर्णशरीरे भस्म, मुखं किञ्चित् प्रहसितं भवति। हरसूत्रेण सह यज्ञोपवीतं भवति। व्याघ्रचर्माम्बरधरः, नृत्यगत्या सह डोलमुद्रायां भवति। हस्तमूलात् तदुत्तरीयवस्त्रं षड्त्रिंशदङ्गुलानां दीर्घं भवति। तस्यार्धोऽथवा पादोनगुणितश्चक्रमण्डलस्य

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सर्वाभरणभूषितौ, हस्तपादयोः सर्वाङ्गुलीषु रत्नमुद्रिका भवन्ति। मध्यमाङ्गुली विहाय सर्वाङ्गुलीषु मुद्रिका भवन्ति। दक्षिणपादः कुञ्चितो भवति। अपस्मारोपरि भवति। महेश्वरस्य पादतलं नृत्येन तिर्यग् भवति। वामपादस्तत उद्धृत्य तिर्यग् भवति। दक्षिणं प्रति वक्राकारो भवति। तत्रैव डोलमुद्रा हस्ते भवति। अपस्मारो वर्ण्यते।

त्रि-चतुः-पञ्चाङ्गुलानामपस्मारस्य दीर्घता भवति। अपस्मारस्योच्चताष्टचत्वारिंशद् भागानां कुर्यात्। अपस्मारस्योष्णीशस्यैको भागः, ततः केशान्तं भागद्वयं, केशान्तात् नेत्रसूत्रपर्यन्तमङ्गुलद्वयं, नेत्रसूत्रान्नासापुटान्तमङ्गुलद्वयं, नासापुटाद् हनुपर्यन्तं त्रिरङ्गुलकं भवति। कण्ठस्योच्चता त्रिरङ्गुलका, हिक्कासूत्रात्स्तनसूत्रपर्यन्तं नवाङ्गुलकं (६?) हृदयान्नाभिपर्यन्तं तावदेवान्तरं भविष्यति। नाभितो मेढ्रमूलपर्यन्तं षड्भागानां मानं भवति। ऊरुः सप्ताङ्गुलानां, जान्वोरङ्गुलद्वयं, पिण्डलेर्दीर्घता ऊरूसमा, पादस्योच्चतैकाङ्गर्णका भवति। स्कन्धान्मध्यमाङ्गुलीसीमान्तमन्तरं चतुर्दशभागानां भविष्यति। शेषावयवा युक्त्या कुर्यात्। अपस्मारमधोमुखं तिर्यक् शाययेत्। शङ्करस्य वामं प्रत्यपस्मारस्य पादौ भवतः। अपस्मारस्योदरस्योच्चता दश-नव-अष्ट भागानां भवति। तस्य मुखं बालकस्य क्रीडनकवद् भवति। वामहस्ते नागः, दक्षिणहस्ते इन्द्रियं भवति। सस्यशामवत् वर्णस्यापस्मारो भवति। पद्मपीठस्योच्चता षोडशभागा भवति। विस्तारस्तस्माच्चतर्गुणितो (चतुःषष्टि-अङ्गुलकं) भवति। तस्य दीर्घता विस्तारात् सपादगुणिता, पादोनद्विगुणिता, द्विगुणिता वा भवति। उपरिष्टादधः पद्मं तथा पिण्डली प्रोक्तानुसारं भवति। शङ्करस्य नृत्यमूर्तिं प्रभामण्डलेन सह कुर्यात्। ढ-अङ्गुलादारभ्यैकशतमङ्गुलकपर्यन्तं, अथवा त्रि-अङ्गुलादारभ्य षण्णवति-अङ्गुलपर्यन्तं प्रभामण्डलस्योच्चता भवति। एकाङ्गुलादारभ्यैकैकं यवं वर्धयेत्। तस्मिन् १/८ न्यूनं, एवं ऊर्ध्वोर्ध्वं गच्छेत् तदा विस्तारं क्रमेण न्यूनं कुर्यात्। एक-द्वि-त्रि-चतु-पञ्च-षट्-सप्त-अष्टाङ्गुलकं, एवं पुनः पुनस्तद्दण्डस्य संख्या सुनिश्चितां कुर्यात्। कर्तुरिच्छानुसारं तत्र दण्डस्य संख्या भविष्यति। नानालता-पुष्पादिभिः सुशोभितं कुर्यात्। तस्योर्ध्वं हस्तमानस्य

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

एकतालान्न्यूनमानेन शिखरं कुर्यात्। सूर्यमण्डलं तथा प्रभामण्डलं एवं प्रमाणेन कुर्यात्। शङ्करस्य वामे उमादेव्या मूर्तिं प्रागुक्तविधिना कुर्यात्। सर्वलोकानां हिताय कल्याणकारिणी प्रथमा नृत्तमूर्तिर्भवति। उपर्युक्तानुसारं, किन्तु जटा दक्षिणभागे तथा पार्श्वे गङ्गा भवति। शङ्करस्य मूर्तेरुच्चतायाः षोडशाङ्गुलानां गङ्गा भवति। स्त्रीमानानुसारं भवति। हृदयसमीपे हस्तो नमस्कारमुद्रायां भवति। जाह्नव्याः सह द्वितीयप्रकारस्य नृत्तमूर्तिर्भवति। उपर्युक्तानुसारं किन्तु वामपादोऽपस्मारस्योपरि भवति। तथा दक्षिणपाद उद्धृतो भवति। वामपादः प्रसारितो भवति। मस्तकस्य मध्यभागे, वामं प्रति, वामनासापुटात्, स्थितपादस्य जान्वोरुपरि ब्रह्मसूत्रं प्रलम्बयेत्। शेषं पूर्वानुसारं कुर्यात्। नृत्यमूर्तेस्तृतीयप्रकारो भवति। अवकीर्णजटाभारः, जटामुकुटं, जटमण्डलेन सह प्रथमनृत्तमूर्तिप्रमाणेन, सर्वप्राणिमात्रस्य हिताय चतुर्थनृत्तमूर्तिर्भवति। कर्णपर्यन्तं दक्षिणपाद उद्धृतस्तथा वामपादो वक्राकारो भवति। दक्षिणहस्तेऽभयमुद्रा, शूलं, पाशः, डमरुकं च भवति। कपालः, अग्निपात्रं, घण्टादिर्वामहस्ते भवति। गजस्य शुण्डप्रमाणेन वामदक्षियोः प्रति वक्राकारो भवति। सर्वसूत्राणि प्रथमनृत्तमूर्तिसमानानि भविष्यन्ति। एतादृशी पञ्चमी नृत्तमूर्तिर्भवति। षोडशहस्तयुक्तः, वामं प्रति गौरी भवति। द्वौ हस्तवूर्ध्वौ भवतः। ततः स्कन्धमुद्धृतं, स्तनभागः प्रसारितो भवति। अभयमुद्रा, शूलं, पाशः, खड्गं, लघुडमरुकं, ध्वजः, वैतालः, सूचिमुद्रा - एवं प्रकारेण दक्षिणं प्रत्यष्ट हस्ता भवन्ति। अग्निः, गजहस्तसमं, खेटकं, विस्मयमुद्रा, घण्टा, कपालः, छुरिका, सूचिमुद्रा, एवं प्रकारेण वामं प्रति अष्टहस्ता भवन्ति। शेषं पञ्चमीमूर्तिवत् कुर्यात्। एवं षष्ठी नृत्तमूर्तिर्भवति। इयं मूर्ती राजराष्ट्रसुखावहा भवति। त्रिनेत्रमष्टहस्ताः, मनोहरः प्रसारितो जटाभारः, वामपादः कुञ्चितो भवति। अपस्मारस्योपरि स्थापितो भवति। शिरसो वामं प्रति, स्थितपादस्याङ्गुष्ठस्य दक्षिणं प्रति, दक्षिणपादस्याग्रं स्पर्शं कुर्यात्। तथैवाङ्गुष्ठाद् द्वादशाङ्गुलानां निर्गमनयुक्तं पूर्वसूत्रं भवति। अभयमुद्रा, शूलं, पाशस्तथा डमरुकं दक्षिणहस्ते भवति। कपालम्, अग्निपात्रं, विस्मयमुद्रा, गजशुण्डानुसारं वामं प्रति चत्वारो हस्ता भवन्ति। दक्षिणहस्तो गजशुण्डानुसारं, वामहस्तो

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्रति, स्थितपादमध्यात् वामपादस्य नालमध्यात् गच्छद् ब्रह्मसूत्र प्रलम्बयत्। तत्सूत्राद् वामपादस्य सीमा नवाङ्गुलानां बहिर्भवेत्। उच्चता दशाङ्गुलानां न्यूना भवति। वामं प्रति गौरी भवति। जगतो दुःखनाशकर्त्री सप्तमी नृत्तमूर्तिर्भवति। उपर्युक्तानुसारं षड् हस्ताः, अभयमुद्रा, डमरुकं, शूलं च दक्षिणहस्ते भवति। कपालं, विस्मयमुद्रा, गजशुण्डसमं वामं प्रति त्रिहस्ता भवन्ति। ( अष्टमी नृत्तमूर्तिर्दर्शिता।) त्रिनेत्रं, चत्वारो हस्ताः, जटामुकुटेन सह सुन्दरा भवेत्। अभयमुद्रासहितं तथा डमरुकयुक्तं दक्षिणं प्रति हस्तद्वयं, अग्निसहितं तथा गजशुण्डासमानं वामं हस्तद्वयं भवति। अपस्मारो न भवति। पीठं प्रति कुञ्चितो वामपादः स्थापितो भवति। वामपादस्य कनिष्ठाङ्गुलकं पीठस्य पुरतो भवति। एवं पादो युक्त्या कुञ्चितो भवति। एषा नवंमी मूर्तिः भवति।[४२७]

गङ्गाधरमूर्तिः

दक्षिणपादः स्थितो भवति। वामपादो वक्राकारो भवति। मस्तकमध्यान् नवयवानामन्तरं भवति। नेत्रसीमायां तथा नासापुटमध्ये, स्कन्धमध्ये तथा नाभेर्वामं प्रत्यङ्गुलद्वयमन्तरं, मेढ्रमूलमध्ये दक्षिणं प्रति चतुरङ्गुलानामन्तरं, पीठपृष्ठं प्रति मध्यभागे हिक्कासूत्रं प्रलम्बयेत्। उच्चता चतुरंशैर्हीना भवति। पादद्वयोर्मध्यान्तरमष्टादशाङ्गुलानां भवति। पादपृष्ठं प्रत्यन्तरं त्रि-अंशानां भविष्यति। जटाबन्धो मुखं वामं प्रति किञ्चित् कुञ्चितं भवति। दक्षिणं प्रत्यधोहस्तो देव्याः स्तने भवति। वामाधोहस्तो देवीमालिङ्गनबद्धो भवति। दक्षिणं प्रत्यूर्ध्वहस्तो जटाया उपरि गङ्गासमीपे उष्णीशपर्यन्तं भवति। वामहस्ते कृष्णमृगो धारितो भवति। भगवतो वामं प्रति विहितकाननमुखयुक्ता देवी भवति। तस्या वामपादः स्वस्तिकमुद्रायां भवति। दक्षिणपादः कुञ्चितो भवति। पिण्डलीद्वयं समसूत्रे भवति। दक्षिणहस्तोऽधोलम्बितो भवति। वामहस्ते पुष्पं भवति। दक्षिणहस्तः प्रकोष्ठे त्रिस्थानेषु बन्धितो भवति। दक्षिणहस्तः

४२७ का.शि.६५.१ तः ९६

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

स्वप्नस्थितिसमो भवति। सर्ववस्त्रैः, सर्वालङ्कारैः सह भवति। भगीरथमुनिदक्षिणं प्रति भवति।[४२८]

त्रिपुरान्तकमूर्तिलक्षणम्

त्रिपुरान्तकमूर्तेर्लक्षणं वर्ण्यते। तस्या उच्चतामनुक्रमेण त्रिः-चतुः-पञ्चाङ्गुलैर्न्यूनां कुर्यात्। अभङ्गा, समभङ्गा, अतिभङ्गा- एवं मूर्तेर्मुद्रायास्त्रिप्रकाराः सन्ति। तस्य मानं कल्पयेत्। पादस्याङ्गुष्ठद्वयस्य मध्यान्तरं षोडशाङ्गुलानां भवति। सा अभङ्गोच्यते । समभङ्गेऽन्तरमष्टादशाङ्गुलानां भवति। विंशतिरङ्गुलानामतिभङ्गं कथ्यते। अङ्गुष्ठस्य मध्यान्तरं त्रिभागेषु विभज्यते। पृष्ठभागस्यान्तरम् (पाष्णिर्मध्ये) एको भागो भवति। उष्णीषस्य वामं प्रति, नेत्रसीमान्तात्, नासिकापुटात् सीमातो हनुर्वामभागात्, दक्षिणस्तनस्य वामं प्रति, नाभेर्दक्षिणं प्रति, ऊरोर्दक्षिणं तथैवाङ्गुष्ठस्य पृष्ठं प्रति, वामं प्रति पूर्वसूत्रं प्रलम्बयेत्। अभङ्गमुद्रायाः सूत्रमुक्तम्। अधुना समभङ्गायाः पूर्वसूत्रं यथा- मस्तकमध्योर्ध्वान्नासाग्रं, पाष्ण्योर्मध्यान्तरात् सूत्रं प्रलम्बयेत्। तत्सूत्रेण वामं प्रति स्कन्धस्य मध्यभाग एकाङ्गुलान्तरं भवति। तत्सूत्रेण वामं प्रति हृदयस्य मध्यान्तरमर्धाङ्गुलकं भवति। तत्सूत्रेण दक्षिणं प्रति नाभिमेढ्रमूलयोर्मध्यान्तरं चतुरङ्गुलानां भवति। तत्सूत्रेण वामजानोर्मध्यान्तरमर्धाङ्गुलकं भवति। एवं समभङ्गा प्रोक्ता। अतिभङ्गा वर्ण्यते- उष्णीशस्य वामं प्रति, नेत्रान्तान्नासापुटं, ततः स्तनमध्ये दक्षिणजानुसीमापर्यन्तमन्तरमर्धाङ्गुलकं भवति। वामपादस्य पृष्ठभागं प्रति, दक्षिणपार्श्वे पूर्वसूत्रं प्रलम्बयेत्। तत्पार्श्वसूत्रस्य स्पर्शोऽन्यावयवैः सह, तथान्तर्गमनं निर्गमनं च समपादस्थानस्य प्रमाणेन भवति। एवं त्रिभङ्गस्य सूत्राणि प्रोक्तानि। तेषां मिश्रणं न कुर्यात्। अतिभङ्गं सूत्रं त्रिपुरान्तकमूर्तेः कृते उत्तमं, समभङ्गं मध्यमं, अभङ्गमधमं भवति। दक्षिणपादः स्वस्तिकं तथा वामपादः कुञ्चितो भवति। दक्षिणं प्रत्यधो हस्तोर्ध्वान् नाभिसूत्रपर्यन्तमूर्ध्वे सूत्रद्वयं भवति। सिंहकर्णमुद्रया मध्यभागे गृहीतो बाणो भवति। बाणस्य

---

४२८ का.शि. ६६.१ तः ११

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तस्य परिधिः कनिष्ठाङ्गुलवद् भवति। बाणमुखस्य विस्तारः पञ्चाङ्गुलानां भवति। तस्योच्चता विस्तारवद् भवति। तस्योच्चतैकाङ्गुलादधिका भवति। अधो वामहस्तः कुक्षिसीमान्तं, एकहस्तोच्चता परि धनुर्गृहीतं भवति। नेत्रोर्ध्वाध एक-द्वि-त्रिरङ्गुलानां भवति। तस्योच्चतैकशतमङ्गुलकं, पञ्च-सप्त-नवाङ्गुलानामधिकं-न्यूनं वा भवति। एवं धनुर्दीर्घताया नवप्रकारा भवन्ति। धनुःपरिधिः पूर्णमुष्टिवद् भवति। तस्य विस्तारस्य मध्यभागौ क्रमेण हीनौ कुर्यात्। तस्य सीमाविस्तारो मध्यमाङ्गुलेर्विस्तारवद् भवति। वर्णैश्चित्रितो भवेत्। बाणविस्तारादेकतृतीयांशं स्थूलता धनूरज्जोर्भवति। धनुर्दीर्घतामष्टभागैर्विभज्यते, तदा रज्जोर्दीर्घता सप्तभागानां भवति। धनुस्त्रिस्थाने वक्रमथवा बालचन्द्रानुसारं कुञ्चितं भवति। धनुषं धातुना काष्ठेन वा रचयेत्। ऊर्ध्वहस्तद्वयं कर्तरीमुद्रायां भवति। टङ्कः कृष्णमृगो गृहीतो भवति। दक्षिणहस्ते टङ्को भवति। वामहस्ते मृगो गृहीतो भवति। जटामुकुटेन सह सर्वालङ्कारैः सह भूषिता भवति। प्रवालसदृशा रक्तकान्तिर्गौरीवामहस्ते भवति। प्रथमप्रकारस्य त्रिपुरान्तकमूर्तिलक्षणं प्रोक्तम्। भगवतो वामपादोऽपस्मारोपरि स्थापितो भवति। शेषं पूर्वानुसारं कुर्यात्। एवं द्वितीयप्रकारस्य त्रिपुरान्तकमूर्तेर्लक्षणं प्रोक्तम्। वामपादः स्वस्तिकासने तथा दक्षिणपादः कुञ्चितो भवति। पूर्वस्यान्तरं द्वितीयं प्रति गणयेत्। शेषं पूर्वानुसारं कुर्यात्। एवं तृतीयप्रकारस्य त्रिपुरान्तकमूर्तेर्लक्षणमुदाहृतम्। चतुर्थं वक्ष्यते। उपर्युक्तानुसारं किन्तु वामपादोऽपस्मारस्य शिरस उपरि भवति। शेषं पूर्वानुसारं भवति। एवं चतुर्थं हितकारकं लक्षणं उक्तम्। कटौ बाण-गृहीतं भवति। मध्यरेखान्तरं षोडश-पञ्चदश-चतुर्दश-त्रयोदश-द्वादश-एकादशाङ्गुलानां भवति। एवं प्रकारेण षड् प्रकारा भवन्ति। तत्र दक्षिणोर्ध्वहस्तस्य कूर्परः, श्रोणीपार्श्वादन्तरं तथैव भविष्यति। कक्षातो धनुःपर्यन्तं, ततो धनुर्गृहीतहस्तस्य, मणिबन्धस्य मध्यान्तरमपि तथैव भविष्यति। तद् हस्तस्य कूर्परो हृदयसीमापर्यन्तमुद्धृतो भवति। अथवा तस्य सीमा एक-द्वि-त्रि-चतुः-पञ्चाङ्गुलानां भवति। सर्वेषां मध्यान्तरं सामान्यरूपेण दर्शितं, तथैव कुर्यात्। उपर्युक्तानुसारं किन्त्वधो हस्तद्वयं हृदयपार्श्वे कटकमुद्रायां भवति। वाम-

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

णस्य मूलं दक्षिणहस्ते भवति। वामहस्ते तस्याग्रं गृहीतं भवति। दक्षिणं प्रत्यूर्ध्वहस्ते टङ्कं तथा वामहस्ते ऊर्ध्वे धनुर्भवति। दक्षिणं प्रति भृगुस्तथा वामभागे गौरी भवति। पादस्याधोऽपस्मारो न भवति। एतादृशी पञ्चमीमूर्तिरुच्यते। एवं चतुर्हस्तयुक्तत्रिपुरान्तकमूर्तेः पञ्चप्रकारा भवन्ति। अधुनातिभङ्गमूर्तेस्तथाष्टहस्तयुक्तमूर्तेर्लक्षणं वर्ण्यते। दक्षिणहस्ते बाणः, परशुः, खड्गः, यज्ञकुण्डं च भवति। धनुः, विस्मयमुद्रा, खेटं, हिरणं च वामहस्ते भवति। दक्षिणं प्रत्यधो हस्ते, वामं प्रति हस्तपर्यन्तमनुक्रमेणायुधानि धारितानि भवन्ति। यथासुन्दरं भवेत् तथोच्चतापर्यन्तं पार्वत्या मूर्तिर्भवति। षष्ठी मूर्तिरेवं प्रोक्ता। सप्तमी वक्ष्यते । बाणः, चक्रं, शूलं, टङ्कं, वज्रं, च दक्षिणहस्ते भवति। धनुः, शङ्खं, सूचिः, विस्मयः, खेटकं च वामं प्रति भवति। वामं प्रति पञ्च हस्तानां वर्णनं करोति। मूर्तिरतिभङ्गे भवति तथैव, परन्तु दक्षिणजानुर्वामजान्वोरुपरि स्थापिता भवति। तस्य प्रथमो वामपादोऽधो रथस्योपरि भवति। रथोऽर्धपुटितकमलवत्, तत् कमलं रज्वा परीतमावृत्तं भवति। अर्धपुटितकमले चतुर्मुखस्य, चतुर्हस्तस्य ब्रह्मा भवति। तस्य दक्षिणहस्तयोर्वेणुदण्डस्तथा कमण्डलं भवति। वामं प्रति हस्तयोः कुण्डिका तथा पद्मपाशो भवति। तदर्धपुटितकमलसमानयुक्तरथस्याधः कान्तिमान् नन्दी भवति। पूर्वानुसारं रथं कुर्यात्। त्रिपुरान्तकमूर्तेरष्टप्रकारा दर्शिताः। प्रवालसदृशं तेजस्वी, सात्त्विकराजसभावसंयुतो भवति। सर्वालङ्कारैर्भूषितः, मेघवन्मुखः, त्रिनेत्रो भवति। पूर्वोक्तानुसारं देव्या मूर्तिर्भवेत्। उपर्युक्तानुसारं सामान्यलक्षणस्य त्रिपुरान्तकमूर्तिं कुर्यात्।[४२९]

## कल्याणमूर्तिलक्षणम्

ललाटस्य मध्ये वामं प्रति, वामनेत्रसीमान्तात्, वामनासापुटान्तात्, हिक्कामध्यात् पूर्वसूत्रं प्रलम्बयेत्। नाभिमध्याद् दक्षिणं प्रति, चतुः-त्रिः-अङ्गुलोपरि सूत्रं भवति। स्थितपादाद् गुल्फमध्यात्, एवमनुक्रमेण सूत्रं प्रलम्बयेत्। समभङ्गेऽङ्गुलद्वयमुच्चता न्यूना भवति।

४२९ का.शि.६७.१ तः ४८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ञ्चितो भवति.। दक्षिणं प्रत्यधोहस्तेन गौर्य्या दक्षिणहस्तो गृहीतो भवति। वामं प्रत्यधोहस्तो वरदमुद्रायां भवति। पार्श्वं प्रत्यूर्ध्वहस्ते दक्षिणं प्रति परशुस्तथा वामं प्रति कृष्णमृगो भवति। जटामुकुटेन सह सर्वालङ्कारैर्भूषिता भवति। प्रवालसदृशकान्तियुक्तो देवो भवति। तस्य पार्श्वे सस्यश्यामवत्, पूर्वोक्तानुसारं देवी भवति। तस्य दक्षिणहस्ते कमलं भवति। लम्बितो दक्षिणहस्तः शङ्करस्य दक्षिणहस्तेन गृहीतो भवति। पार्वत्याः सख्यौ श्रीस्तथा भूः सर्वालङ्कारैः भूषिते गौरीकटिसमीपे  दर्शिते। देवस्य पुरतः कुण्डं रचयेत्। होमं कुर्वन् ब्रह्माणं दर्शयेत्। प्रजापतेरुच्चता शङ्करस्य स्तनपर्यन्तं भवति। चत्वारो हस्ताः, चतुर्मुखानि, सर्वालङ्कारैर्भूषितो भवति। मृगचर्म, रुद्राक्षमाला, अनुक्रमेण दक्षिणे तथा वामहस्ते स्रुक्स्रुवधारणं कृतमस्ति। उत्तराभिमुखः, पद्मपीठोपरि स्थितः प्रजापतिर्भवति। देव्यास्तथा महादेवस्य पुरतः स पूर्वं प्रति भवति। देवी शङ्करस्य दक्षिणं प्रति भवति। दक्षिणं प्रति मुखं भवति। विष्णुर्होमकुण्डस्योत्तरदिग्भागे स्थितो भवति। शङ्करस्य नासिकापर्यन्तं विष्णुमूर्तिर्भवति। अथवा स्तनपर्यन्तं कनिष्ठविष्णोर्मूर्तिर्भवति। तदनन्तरस्य मध्यान्तरस्याष्टभागाः क्रियन्ते तर्हि केशवस्योच्चताप्रमाणेन नवप्रकारा भवन्ति। श्यामवर्णस्य समभङ्गमुद्रायां, हस्ते शङ्खं चक्रं च भवति। अधोहस्तयोरेकहस्त उत्तमं तीर्थोदकं सुवर्णकमण्डलं गृहीतं भवति। द्वितीयः सर्वदा वरदमुद्रायां भवति। अनादिगोत्रे समुत्पन्नः श्रीशङ्करः, परमेश्वरादिगोत्रमुमागौरीं भवते ददामि, एवमुक्त्वा वरदहस्तेन विष्णुतीर्थोदकं दद्यात्। अष्ट लोकपालाः, गणेशः, सिद्धाः, यक्षगणादिः, ऋषिः-गन्धर्वः-अप्सरसः-देवाश्च भवन्ति।[४३०]

## अर्धनारीश्वरलक्षणम्

अर्धनारीश्वरस्य चतुः-षट्-द्विहस्तानां मूर्तिर्भवति। समभङ्ग-स्थानक-मुद्रानुसारं तस्या उच्चता हीनाधिका च भवति। दक्षिणपादः सरलरेखायां, वामपादः कुञ्चितो भवति। वामं

४३० का.शि.६८.१ तः १७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्यर्धो भागो महादेवसमानो भवति। अभयमुद्रा, परशुश्च वामहस्ते भवति। वृषभमूर्तरुपरि वामहस्तस्य कूर्परो भवति। तस्य मध्यान्तरमेकाङ्गुलकं भवति। तस्य भिन्न ऊर्ध्ववामहस्तः कटकमुद्रायां, पुष्पं धारितं भवति। हस्तद्वयस्य मूर्तिर्भवति चेत्, दक्षिणहस्तो वरदमुद्रायां, वामहस्ते पुष्पं धारितं भवति। दक्षिणं प्रति वस्त्रं शङ्करानुसारं तथा वामं प्रति वस्त्रं पार्वत्यनुसारं भवति। दक्षिणं प्रति पुरुषसमानः स्तनस्तथा वामं प्रति स्त्री-अनुसारं पयोधरं भवति। दक्षिणहस्ते शूलं तथा वामहस्ते पुष्पं भवति। दक्षिणहस्तो वरदमुद्रायां तथा वामहस्तो बलीवर्दस्य शिरस उपरि भवति। दक्षिणहस्ते कपालस्तथा वामहस्तः प्रसारितोऽधो लम्बितो भवति। दक्षिणनेत्रमुग्रं तथा वामनेत्रं सौम्य-शीतलं च भवति। कषायवस्त्रं दक्षिणं प्रति ऊरूपर्यन्तं तथा वामं प्रति जानुपर्यन्तं भवति। एवं विस्तारेणार्धनारीश्वरस्य लक्षणमुदाहृतम्।[४३१]

गजहामूर्तिलक्षणम्

कपालमध्यभागान्नासिकाग्रोर्ध्वं, स्तनमध्ये वामं प्रति, वृषाण्डमध्ये वामं प्रति पूर्वसूत्रं प्रलम्बयेत्। तत्सूत्रेण दक्षिण-वामपादस्य पृष्ठभागे मध्यान्तरमष्टत्रिंशदङ्गुलानां षट्त्रिंशदङ्गुलानां वा भविष्यति। तत्सूत्रेण वामं प्रति दक्षिणपादस्यान्तरमेकविंशतिर्नव-दशाङ्गुलानां भवति। चत्वारः पादास्तथाष्ट हस्ता भवन्ति। सर्वालङ्कारैः सह मूर्तिर्भवति। चत्वारो हस्ता भवन्ति चेत्, पाशस्तथा गजचर्म दक्षिणहस्ते तथा वामहस्ते गजमुखं गजचर्म च भवति। गजदन्तः, कपालं, गजचर्म, विस्मयमुद्रा - दक्षिणं प्रति हस्तैर्भवन्ति। शङ्करस्य वामपादस्याधो गजमस्तकं भवति। मुकुटस्योपरि गजपुच्छं दर्शयेत्। पार्श्वे गजपादौ । शेषं गजचर्म प्रभामण्डलानुसारं दर्शयेत्। यद्यष्टहस्ता, दक्षिणहस्ते शूलं, खड्गं, गजचर्म, गजदन्तश्च धारितो भवति। वामहस्ते कपालं, खेटकं, खड्गं, गजचर्म च भवति। मस्तकमध्यात्, नासिकापुरस्तात्, दक्षिणस्तनस्य मध्यभागात्, वामस्फिकपिण्डमध्यभागाद्

४३१ का.शि.६९.१ तः ९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...त: पादो गजस्य मस्तकोपरि भवति। दक्षिणपाद उद्धृतो भवति, वामपाद उत्कुटितमुद्राया भवति। तत् पादस्य पार्ष्णिस्फिकपिण्डाच्चतुरङ्गुलानामन्तरं भवति। तस्य जान्वोर्वामं प्रति कक्षसूत्रं कुक्षिपर्यन्तं न्यसेत्। एवं प्रकारेण गजहामूर्तिः प्रोक्ता, शङ्करस्य वामं प्रति कुक्षीपर्यन्तमागता भीता च पार्वती भवति। एवं प्रकारेण कृता मूर्तिर्नृपतिं विजयदात्री भवति।[४३२]

## पाशुपतमूर्तिलक्षणम्

पाशुपातमूर्तेर्लक्षणं वर्ण्यते। चन्द्रशेखरमूर्तेरनुसारं समपादस्थानके भवति। त्रिनेत्रं, चत्वारो हस्ताः, ऊर्ध्वं पृष्ठभागे केशा भवन्ति। हस्ते धनुर्भवति। दक्षिणं प्रति हस्तद्वयं, वरदमुद्रा, रुद्राक्षमाला वा भवति। प्रवालसदृशी कान्तिर्भवति। नेत्रे सौम्ये शान्ते भवतः। सर्वालङ्कारैः सह, किञ्चित् प्रहसितं मुखं, सर्वदोत्सवाय मूर्तेरुपयोगो भवेत्। मूर्तिरासीना स्थिता वा भवति। उपर्युक्तानुसारं परन्त्वग्निसमाना तेजस्वी, कान्तियुक्ता भवति। रक्तनेत्रे, कुटिला भ्रूः, यज्ञोपवीतधरा, केशा अग्निज्वालासमानाः, अतिरत्नानिवेशयुता। शूलमधोमुखं भवति। वरदमुद्रा हस्ते कपालं च भवति। अथवा हस्तोऽभयमुद्रायां न भवति। तद् हस्ते शूलमूलं भवति। वरदमुद्रा हस्ते शूलाग्रं भवति। एतादृशं शूलं तिर्यग् धारितमस्ति। दक्षिणहस्तो वरदमुद्रायां, हस्ते टङ्कं भवति। वामहस्ते खड्गो भवति। इदं पाशुपातमूर्तेः बलिलिङ्गसमीपे पूजां कुर्यात्। ध्यान-पूजार्थं मूर्तिर्दर्शिता। पाशुपातमूर्तिं ध्यात्वा, शीघ्रातीशीघ्रं शस्त्रस्य नाशो भवति। एतादृशी रौद्रमूर्तिः प्रतिमा च कदापि नैव कुर्यात्।[४३३]

---

४३२ का.शि.७०.१ त: १५
४३३ का.शि.७१.१ त: १०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कङ्कालमूर्तेर्लक्षणं वर्ण्यते। पादे पादुका भवति। भिक्षायाचकस्य (भिक्षुकङ्काललक्षणम्) कङ्कालमूर्तेर्लक्षणं यथा- रक्षणार्थं परिवारार्थं मोक्षार्थं वा मूर्तिं रचयेत्। स्थिता मूर्तिः, गमनमुत्सवाय - एतादृशी मूर्तिर्योग्या ज्ञेया। स्थिता मूर्तिर्मूलमूर्तिर्भवति। चलन्ती मूर्तिरुत्सवाय भवति। काष्ठ-लोह-धातु-सुधा-मृत्तिका-वालुकाभिर्मूर्तिं रचयेत्। पाषाणस्योपरि चित्रितामथवा प्रोक्तानुसारं प्रतिमां कुर्यात्। प्रतिमामानमुन्मानादिमानप्रमाणेन कुर्यात्। प्रमाणमानेनावयवानां मानं स्वीकृत्य, अङ्गुल-यव-हस्त-ताल-वितस्ति - इत्यादिना मानं स्वीकुर्यात्। आयादिः शुभं भवेत्। एवंरीत्या मूर्तेः शुद्धतायाः कृते मानं भवेत्। (मूर्तेः कृते) स्तम्भ-अधिष्ठान-द्वारोच्चतायाः समं भवति। अथवा मूललिङ्गस्योच्चता समं, तस्मात् सार्धषड्यवा अधिकां वोच्चतां स्वीकुर्यात्। ऊर्ध्वमानद्वयस्य मध्यान्तरस्याष्टभागान् कृत्वा, मूर्तेरुच्चताया नवप्रकारा भवन्ति। उत्सवस्योद्योगः, तदनुसारं सर्वो विधिरुच्यते। वामपादः पादुकायां भवति। दक्षिणपादः कुञ्चितो भवति। वामपादस्य पार्ष्णि - ऊर्ध्वं दृग्भवेत्, तस्योपरि ब्रह्मसूत्रं प्रलम्बयेत्। दक्षिणाधो हस्ते कर्षकं धृतमस्ति। अथवा दक्षिणाधोहस्तस्य तर्जनी-अङ्गुष्ठो मृगं स्पर्शति। दूर्वाङ्कुरं योनिसीमापर्यन्तमागच्छेत्। वामहस्तो नाभिसीमान्तं समतलो भवेत्। वामहस्ते डमरुकं, चिबुकान्तं समतलं भवति। वामहस्ते मयूरपिच्छेन सह, शूलं भवति। शूलान्तसमीपे कङ्कालस्य हस्तं, यत्र समाप्तं भवति तत्र हृदयपर्यन्तं बन्धयेत् । उच्चताया मानमेकं-द्वि-त्रि-चतुरङ्गुलकं न्यूनमधिकं वा भवति। स्थानकपूर्वसूत्रस्याथवा भङ्गस्य मानं वर्ण्यते। मस्तकस्य वामं प्रति, नेत्रान्तादूर्ध्वं, नासिकापुटसीमातः, चिबुकस्य वामं प्रति, स्कन्धमध्यात् त्रि-अङ्गुलोपर्यन्तरं, हृदयाच्चतुरङ्गुलकमन्तरं, सूत्रं नाभेर्वामं प्रति, द्विरङ्गुलकं भवति। योनिनिर्गमनं दक्षिणं प्रति, त्रि-चतुरङ्गुलकं भवति। स्थितं भवति चेद् वामपादात्, पादयोर्मध्यान्तरे पूर्वसूत्रं प्रलम्बयेत्। एवं स्थानकमुद्रायाः पूर्वसूत्रं दर्शितम्। गमन-

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सूत्रं, मस्तकस्य वामं प्रत्यूर्ध्वं, वामपादस्य पार्ष्णिमध्ये, तस्य पार्श्वं प्रति मध्ये ऊर्ध्वं सूत्रं प्रलम्बयेत्। पूर्वसूत्रं मस्तकमध्ये दक्षिणं प्रत्यङ्गुलद्वयमन्तरोपरि, वामं प्रति नासिकापुटात् पार्श्वोर्ध्वं, स्कन्धे हृदये वा मध्यभागोर्ध्वं, नाभेर्वामं प्रत्यङ्गुलद्वयमन्तरोपरि, योनिर्वामं प्रति चतुरङ्गुलानामुपरि, वामपादस्य पार्ष्णिं स्पर्शति। एवं गमनमूर्त्यर्थं सूत्रं प्रलम्बयेत्। अभङ्गमुद्रायां मध्ये, प्रागुक्तानुसारमुच्चतां न्यूनां कुर्यात्। गमनमूर्तेः पूर्वसूत्राद् हस्तनिर्गमनमधो दत्तानुसारं भविष्यति। वामहस्तस्य निर्गमनस्य पूर्वसूत्रं च द्वयोर्मध्यान्तरं चतुर्विंशतिस्त्रयोविंशतिर्वाङ्गुलानां भविष्यति। मणिबन्धमध्यात् पार्श्वं प्रति, एवं वामहस्तस्य निर्गमनस्य त्रयः प्रकारा भवन्ति। वामहस्ते पात्रं भवति। तस्य निर्गमनं पूर्वसूत्रात् षोडश-सप्तदश-अष्टदशाङ्गुलानां भवति। तस्य वामहस्तात् कूर्परो नाभिपर्यन्तं च। तस्य निर्गमनं चतुर्दश-पञ्चदश-षोडशाङ्गुलानां भवति। दक्षिणहस्ते तृणं योनिसीमापर्यन्तं भवति। एक-द्वि-त्रि-चतुरङ्गुलानामन्तरोपरि मृगसूत्रं प्रलम्बयेत्। दक्षिणहस्तस्याङ्गुलकं, ज्ञानमुद्रा, सिंहकर्णमुद्रा वा प्रमाणेन यथा सुन्दरा भवेत् तथा कुर्यात्। वामं प्रति शूलधरः, हस्तसीमासमीपे पूर्वसूत्रमुपर्युक्तानुसारं, जटान्निर्गमनं चतुर्विंशतिरङ्गुलानां भविष्यति। शूलात् सीमान्ते कङ्कालं बन्धयेत्। वामं प्रत्यूर्ध्वहस्ते डमरुकं, तस्य मध्यभागसमीपे पाशो भवति। डमरुकस्य मध्योच्चता नवभागं यावद् भविष्यति। कटिपार्श्वे कमलाकारस्य त्रि-अङ्गुलानां लघुमण्डं भवति। वामोर्ध्वहस्तस्य तर्जनी सरलरेखास्थित्यनुसारं, तर्जन्यां वलयद्वयं भवति। एतादृशी तर्जनी, हनुसीमापर्यन्तं भवति। मणिबन्धः पूर्वसूत्रादनन्तरं ४४-४५ अङ्गुलानां भवति। वामहस्ते कपालपात्रं(भिक्षापात्रं) भवति। तस्य पूर्वसूत्रान्निर्गमनं द्वादश, षडङ्गुलानां वा भवति। तत् पात्रमेकाङ्गुलकं स्थूलं भवति। गोलाकारं व्रणरहितं वा भवति। दक्षिणं प्रति कर्णे मकरकुण्डलं, वामं प्रति शङ्खपत्रकुण्डलं भवति। जटाभारः प्रसारितः, विकीर्णं केशमण्डलं च भवति। दक्षिणं प्रति चन्द्रः, वामं प्रति गङ्गा भवति। जटभारस्य ग्रन्थिसमीपे, कपालं भवति। धुत्तूरकुसुमाद् बकयक्षमाच्छादितं भवति। तथैवार्कपुष्पैः दूर्वया च शिरो-जटाभार आच्छादितो भवति। कट्यां रुद्राक्षमाला भवति। कोष्ठे नागकङ्कणं भवति। नानारत्नैर्भूषितं

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ः, भस्मादिना तेजस्वी भवति। किञ्चित् प्रहसितं मुखं भवति। एतादृशी कङ्कालमूर्तिर्भवति। अनेके मनुष्याः, प्राणिनः, स्त्रियश्च सेवन्ते वन्दन्ति च। सुवर्णबलिपात्रं गृहीतं भूतमग्रे भवति। तत् पात्रेऽन्नं क्षिपन्तीं स्त्रियं दर्शयेत्। कटेर्दक्षिणं प्रति लघुक्षुरिकां बन्धयेत्। सुवर्णसमानवर्णयुक्तां क्षुरिका उपबन्धेन बन्धिता भवति। उभयोः पार्श्वयोर्हस्ते भिन्न-भिन्ननागैर्विभूषिते भवतः। हृदये कलिसंयुताः, सम्भ्रमितमानसाः सर्वदानन्ददं -शङ्करं ऋषयः, गन्धर्वाः, सिद्धाः, विद्यादरादयः पूजायन्ति। मार्गं सम्मार्जयन्ति, पर्जन्यो जलसेचनं कुर्वन् भवति। स्तोत्रपाठका ऋषयः, पुष्पवृष्टिं कुर्वन्तो देवाः, ऋग्यजुःसामाथर्वाणः स्तुतिं कुर्वन्ति। पुनः पुनश्चर्मवाद्येन, कांसवाद्येन, वीणया, छिद्रयुक्त-वाद्येन, शङ्खेन, पञ्चप्रकाराणां वाद्यानां रवैः, (ध्वनिभिः), तुम्बुरैः, नारदादिलक्षणैः सह जयवाद्य-नादं कुर्वन्ति। चन्द्र-सूर्ययोर्जाये चामरं चेष्टयतः। एतादृशी मूर्तिः सर्वलोकानामुपकाराय रचयेत्। देवैः सह, भूतेन संयुतं, योनिसीमान्तं वस्त्रं धृतं भवति।[४३४]

हर्यर्धहरमूर्तिलक्षणम्

हर्यर्धहरमूर्तिलक्षणं वर्ण्यते। आर्जवं, स्वस्तिकं, स्थानकं, समपादमुद्रायां भवति। दक्षिणहस्तोऽभयमुद्रायां, वामहस्ते पूरिमया सह कटकं भवति। दक्षिणहस्ते परशुः, वामहस्ते शङ्खम्, आयुधं च (गदा, चक्रं वा) भवति। वामं प्रति मुकुटं, दक्षिणं प्रति जटामुकुटं सुशोभितं भवति। दक्षिणं प्रति शरीरप्रवालसदृशं वर्णस्य, वामं प्रति शरीरं श्यामवर्णस्य भवति। तत्तद्भागो (शङ्कर-विष्णोरर्धभागे) यथोचितालङ्कारान्वितो भवति। दक्षिणनेत्र उग्रदृष्टिस्तथा वामनेत्रे शीतलता भवेत्। तस्य मस्तके किञ्चिन्मात्रायां दृश्येत्, तादृशं तृतीयनेत्रं भवति। एकभागे वस्त्रं तथा द्वितीयस्थाने दिगम्बररूपं भवति। शिरसि चक्रं भवति। तस्य लक्षणं वर्ण्यते। चक्रस्य विस्तार एकादश-अंशानां, तस्य स्थूलतैकभागस्य भवति। तत्पूर्णरूपेण वक्राकारं कमलाकारं च भवति। शिर ऊर्ध्वं चक्रस्य विस्तारः सप्तभागेष्वेको भागो भवति। शिरसि स्थापित-

---

४३४ का.शि.७२.१ तः ४८

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मस्तकयोर्मध्यान्तरं चक्रविस्तारस्यैक-तृतीयांशं भवति। ललाटपट्टस्याग्रं, मस्तकोर्ध्वं चक्रनालं भवति। चक्रं तर्जन्या गृहीतं भवति। तस्य मध्यभागे पुष्पमाला भवति। सर्वदेवदेवीनां तथैव समाचरेत्।[४३५]

भिक्षाटनमूर्तिलक्षणम्

भिक्षार्थमटन् महेश्वरस्य मूर्तेर्लक्षणं वर्ण्यते। पादे पादुका भवति, वामपादः स्वस्तिके भवति। दक्षिणपादः किञ्चिदुद्धृतो भवति। पादस्योच्चता नवयवानां भवति। कपालमध्ये दक्षिणं प्रति, नव-अष्ट यवानामन्तरं, नासिकाग्रात्, अधरोष्ठस्य वामं प्रति, स्कन्धमध्ये वामं प्रति, हृदयमध्यभागादत्, नाभेर्दक्षिणं प्रति षोडशयवानामन्तरं भवति। स्वस्त्याङ्घ्रिगुल्फयोर्मध्ये पूर्वसूत्रं प्रलम्बयेत्। उच्चतां न्यूनं कृत्वा, अभङ्गमुद्रायां समभङ्गमुद्रायां वा भवति। पादः पादुकारहितं सहितो वा भवति। जटाभारः प्रसारितो बन्धितो वा भवति। जटाभारस्याधो भागो नग्नरूपमधोमुखं भवति। मस्तके ललाटपट्टसंयुक्तं, तत्कपालात् सुशोभितं भवति। कटिबन्धं विहाय, सर्वाभरणभूषितः, श्वेतवर्णः, नागैर्विभूषितो भवति। दक्षिणं प्रत्यधो हस्ते मृगस्य मुखं भवति। वामं प्रत्यधो हस्तो वरदमुद्रायां, भिक्षापात्रं गृहीतं भवति। दक्षिणं प्रत्यूर्ध्वहस्ते डमरुकं भवति। वामं प्रत्यूर्ध्वहस्ते शिखिपिच्छं भवति। उत्तरीय-वस्त्रं श्वेतवर्णस्य भवति। कट्यां नागो वेष्टितो भवति। श्वेतयज्ञोपवीतं, नीलवर्णस्य त्रिपुण्ड्रं भवति। पद्मपीठस्योपरि मूर्तिर्भवति। शेषं सर्वलक्षणानि कङ्कालमूर्तिसमं कुर्यात्।[४३६]

चण्डेशानुग्रहमूर्तिलक्षणम्

चण्डेशानुग्रहमूर्तिलक्षणं वर्ण्यते। उमासहितमूर्तेरिव सर्वं भवति। मुखं वामं प्रति किञ्चित् कुञ्चितं भवति। दक्षिणहस्तोऽभयमुद्रायां न भवति, किन्तु वरदमुद्रायां भवति। अधःप्रति चण्डमूर्तेरुपरि कटकधारितवामहस्तो भवति। हृदयसमीपे, भक्तिपूर्वकं द्वौ

४३५ का.शि.७३.१ तः ९
४३६ का.शि.७४.१ तः११

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ासीनश्चण्डेशो भवति। देवीमहादेवयोर्मध्ये स्कन्दमूर्तिं न स्थापयेत्। चण्डेशानुग्रहमूर्तिलक्षणं प्रोक्तम्।[४३७]

दक्षिणामूर्तिलक्षणम्

दक्षिणामूर्तिलक्षणं वर्ण्यते। दक्षिणपादो लम्बितो भवति। वामपादनालाग्रं, दक्षिणपादस्याग्रसमीपे भवेत्, वामपादः कुञ्चितो भवति। मस्तकस्य दक्षिणं प्रति, दक्षिणनेत्रान्तं नासिकापुटस्यान्तरोपरि, नाभिमध्यभागात्, मेढ्रमूलमध्यभागादूर्ध्वं पूर्वसूत्रं प्रलम्बयेत्। किञ्चिदधोमुखं, चत्वारो हस्ताः, दक्षिणं प्रत्यधो हस्ते रुद्राक्षमाला भवति। वामं प्रत्यधो हस्तो वरदमुद्रायां, तथाष्टहस्तानां मूर्तिर्भवति। वामजान्वोरुपरि वरदमुद्राहस्तस्य हस्ततलं भवति। वामजानोरुपरि दण्डं भवति। कूर्परं स्थापयेत्। वामहस्तेऽग्निर्नागो वा भवति। विकीर्णजटाभारो भवति। जटाया ऊर्ध्वं वामं प्रति धत्तूरपुष्पं नागो वा भवति। दक्षिणं प्रति चन्द्रशेखरो भवति। मुखं हास्ययुक्तं भवति। सर्वालङ्कारैर्भूषितं भवति। श्वेतमुत्तरीयवस्त्रं, श्वेतयज्ञोपवीतं भवति। त्रिनेत्रं भवति। धवलवर्णो भवति। दक्षिण-वामकर्णे मकरकुण्डलं भवति। कर्णयोः शङ्खपत्रं भवति। अथवा वलयाकार-कुण्डलेनालङ्कृतं भवति। कण्ठे रुद्राक्षमाला, अथवा हारैर्भूषिता मूर्तिर्भवति व्याघ्रचमाम्बरधरा। सर्वदुःखानां त्यागं कृतमस्ति, एतादृशी मूर्तिर्भविष्यति। नारदः, जमदग्निः, वसिष्ठः, तथा भृगुर्मूर्तेर्दक्षिणं प्रति भवन्ति। मूर्तेर्वामं प्रति भारद्वाजः, शुनकः, अगस्त्यश्च भवति। वटवृक्षस्याधः, किन्नरादयो नमस्कारमुद्रायां भवन्ति। दीर्घपादस्य पादतलमपस्मारोपरि स्थापितं भवति। तद्दीर्घपादस्य पार्ष्णिश्चतुर्दशाङ्गुलानामन्तरोपरि पूर्वसूत्रं प्रलम्बयेत्। तद्दीर्घपादजानुतः पूर्वसूत्रस्यान्तरं द्वादशाङ्गुलानां भवति। अपस्मारं कृष्णवर्णस्य भवति। नागं फणासहितः स्थितो भवति। मुखमूर्ध्वं कृतं भवति। उपर्युक्तानुसारं परन्तु वामपादः कुटिकासनमुद्रायां भवति। अधो हस्तयोर्युक्त्या वीणा धृता भवति। अन्यत्सर्वं

४३७ का.शि.७५.१ तः ४

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

[illegible] मूर्तिं कुर्यात्। उपर्युक्तानुसारं किन्तु वीणां विहाय, अधः प्रति हस्तयोर्ज्ञानमुद्रा अभयमुद्रा च भवतः। वामं प्रति हस्तः प्रसारितो भवति। जान्वोरुपरि कूर्पारं स्थापयेत्। दक्षिणोर्ध्वहस्ते रुद्राक्षमाला, वामोर्ध्वहस्ते कमलं भवति। शुद्धश्वेतवर्णो भवेत्, अन्यत्सर्वं पूर्वानुसारं कुर्यात्। सर्वालङ्कारसहिता ज्ञानमूर्तिर्भवति। स्फिकपिण्डाधः पादतलयोः परस्परं संश्लेषो भवति। हृदयसमीपे आभ्यान्तरे हस्तः कुञ्चितो ज्ञानमुद्रायां भवति। वामहस्तं वरदमुद्रायां मेढ्रपीठे स्थापयेत्। दक्षिणोर्ध्वहस्ते रुद्राक्षमाला, वामोर्ध्वे कमलं भवति। नासाग्रदृष्टिः, शरीरमार्जवमुद्रायां भवति। दीर्घाजटायुक्त ऋषिः, एवं योगमूर्तिर्भवति। एतस्या ध्यानं दुःखस्य निवृत्तिं करोति। दक्षिणपादं लम्बयेत्, वामपादं कुटिकासनमुद्रायां भवति। शरीरं कुटिकामुद्रायुक्तं वामपादो योगपट्टेन बन्धितो भवति। वामजानोर्वामहस्तः प्रसारितो भवति। शेषं सर्वं पूर्वानुसारं भवति। एतादृशी मूर्तिर्योगमूर्तिः कथ्यते। ऊरोरूर्ध्वं परस्परं विरुद्धपादस्य पार्ष्णिं स्थापयेत्। पिण्डलीमध्यात् योगपट्टिकयोपेता भवति। अधो हस्तौ प्रसारितौ भवतः। (द्वौ जान्वोरुपरि भवतः) दक्षिणं प्रत्यूर्ध्वहस्ते रुद्राक्षमाला तथा वामोर्ध्वहस्ते कमण्डलं भवति। जटा वृत्ताकारा भवति। मस्तकोपरि करोटी चन्द्रशेखरं च भवति। ग्रीवा नीलवर्णस्य, शङ्खकुन्द-इन्दु-संनिभा श्वेतवर्णस्य मूर्तिर्भवति। पृष्ठभागे वृक्षो नानासर्पैर्भूषितो भवति। कण्ठे माला भवति। कर्णोर्ध्वे माला तथा हृदये दूर्वा भवति। वटवृक्षस्याधो भवति। तमृषयः सेवन्ति। एतादृशी सर्वपापानां नाशकर्त्री योगमूर्तिः प्रसिद्धास्ति। एवं दक्षिणामूर्तिलक्षणस्यानेकभेदाः सन्ति।[४३८]

कालहामूर्तिलक्षणम्

अधुना कालहामूर्तिलक्षणं वर्ण्यते। उच्चता अष्ट-नव-दशाङ्गुलात् न्यूनां कुर्यात्। अथवा एकादश-द्वादश अङ्गुलात् न्यूना भवति। मस्तके दक्षिणं प्रति, दक्षिणनेत्रमध्यात्, हिक्कासूत्रेण वामं प्रति, दक्षिणस्तनस्य प्रति, नाभिमध्ये वामं प्रति, अष्ट यवानामन्तरोपरि

---

४३८ का.शि.७७.१ तः २८

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

प्रति षडङ्गुलानां, स्थितपादस्य गुल्फमध्यात् पूर्वसूत्रं प्रलम्बयत्। प्रथमनृत्तमूर्तदक्षिण प्रति पादवत् स्थितमुद्रायां भवति। तथैव प्रमाणेन वामपाद उद्धृतः कुञ्चितश्च भवति। पादतलमुद्धृतं भवति। ऊर्ध्वपादाग्रं कालस्य हृदयोपरि स्थापितं भवति। त्रिनेत्रं, सुदृष्टिः, जटामुकुटेनालङ्कृतो भवति। चत्वारो हस्ता अष्टहस्ता वा भवन्ति। दक्षिणं प्रति हस्ते शूलं खट्वाङ्गं च धृतमस्ति। हस्तो वरदमुद्रायां भवति। वामं प्रत्यधो हस्तः सूचिमुद्रायां भवति। नाभिसीमान्तं समतलं भवति। सूच्यग्रात् पूर्वसूत्रं चतुर्दशाङ्गुलानां भवति। शूलधरो हस्तो मणिबन्धस्य कर्णात् तथैवान्तरं भविष्यति। वामं प्रत्यूर्ध्वहस्तो विस्मयमुद्रायां भवति। हिक्कासूत्रात् समतलं टङ्कधृतहस्तः, तस्य मुखादन्तरं षोडश-चतुर्दशाङ्गुलानां भवति। विस्मयमुद्रायामनामिकाग्रं, उष्णीशसीमान्तं समतलमुद्धृतं भवति। मूर्तेर्ग्रीवाया अन्ते शूलधरो हस्तो मणिबन्धान्तं समतलो भवति। एतादृशी चतुर्हस्तानां मूर्तिदर्शिता । वामहस्ते शूलं, परशुः, वज्रं खड्गं च भवति। पदयोर्हस्तयोश्च सुदंष्ट्रं पाशं भवति। करण्डमुकुटोपेतः, रक्ताधारा, भयभीता, हृदयसमीपे हस्ते पाशः, नमस्कारमुद्रायां, पादः प्रसारितः, मुखमूर्ध्वं भवति। एतादृशी कालहामूर्तिर्भवति।[४३९]

लिङ्गोद्भवलक्षणम्

लिङ्गोद्भवलक्षणं वर्ण्यते। लिङ्गाकारमध्ये, चन्द्रशेखरमूर्तिः (शङ्करस्य मूर्तिः) प्रमाणेन भवति। नालादधः पादे लिङ्गं समाविष्टं तथा लिङ्गं गूढं भवति। वामं प्रत्यूर्ध्वभागे (शरीरस्य) ब्रह्माहंसरूपेण तथा विष्णुर्वराहरूपेण दक्षिणभागे भवति। हृदयसमीपे हस्तोऽञ्जलिमुद्रायां स्थितो भवति। लिङ्गं मूर्तिः कथ्यते। लिङ्गं विष्णुर्ब्रह्मा चानुक्रमेण रक्त-कृष्ण-हिरण्यवर्णानां भवति। एतादृशी लिङ्गोद्भवमूर्तिर्भवति।[४४०]

वृक्षसंग्रहणम्

---

४३९ का.शि.७८.१ तः १५
४४० का.शि.७९.१ तः ५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वृक्षसंग्रहणस्य विधिर्वर्ण्यते। देव-देवीमूर्तेः शूलार्थं वृक्षमुच्यते। वृक्षाणां त्रिभेदा भवन्ति यथा स्त्रीलिङ्गं-पुरुषलिङ्गं-नपुंसकलिङ्गम्।

सुषिराः, स्निग्धभूमावुद्गमं यान्ति, कार्यार्थं कठिनाः, अल्पगन्धयुक्ताः, फलपुष्पयुक्ताः, दृढा घनाश्च, शीतलोष्णाः, सुन्दराः - एतादृशाः पुल्लिङ्गवृक्षाः कथ्यते। देवमूर्तिकृते काष्ठस्य स्वरूपाधारस्यार्थं शुभावहा भवन्ति। स्निग्धं, स्निग्धभूमावुद्गमं यान्ति, कार्यार्थमतिमार्दुलाः, मूलादग्रपर्यन्तं कृशाः, दीर्घपुष्पाणि भवन्ति, अतीवमार्दवा भवन्ति, स्पर्शेऽतीव शीतलाः, स्नेहयुक्ताः, रसयुक्ताः - एवमेते वृक्षाः स्त्रीलिङ्गवृक्षाः प्रोच्यन्ते। यस्य मूलं, फलं, पुष्पं चाकारेण लघुस्तथात्यन्तं निर्बलो वृक्षः षण्डरूपो नपुंसकलिङ्गवृक्षो भवति।[४४१]

उत्तमवृक्षाः

चन्दनं, चम्पकं, रक्तचन्दनं, चालं(?), खादिरं, सोमशीर्षं, तिन्दुकं, अर्धनारीशिवं, राजातं, मयूरकं, पद्मकं, कूटजं, सप्तपर्णी, सत्त्वकमनुक्रमेण शूलार्थं योग्यमुक्तम्। तस्यान्तर्भागं स्वीकुर्यात्।[४४२]

वृक्षदोषाः

येषां पर्णानि जीर्णशीर्णानि भवन्ति। नैसर्गिकं वैभवं पृथक् जातमस्ति, शीर्षं न भवति। अथवा त्रिशिखा भवन्ति। स्वयं पतिता वृक्षाः, स्वयमेव शोषिता भवन्ति। दुःस्थितियुक्ताः, अत्यन्तकठिनाः, यस्याश्रयेण पशु-पक्षिणः सन्ति। नृपमन्दिरमाश्रित्य, कर्मकराणां निवाससमीपे,

४४१ का.शि.७९.१ तः ७
४४२ का.शि.७९.८-९

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

एते वृक्षाः प्रयत्नेन त्यजेत्। यद्युपयोगं करोति चेत्, कार्यनाशो भवति। दोषयुक्तवृक्षान् पूर्णरूपेण वर्जयेत्।[४४३]

वृक्षपूजा

शुभपक्षे, नक्षत्रे, शुभवासरे च योग्यवृक्षाणां सङ्ग्रहणं कुर्यात्। आचार्यः शिल्पी च वृक्षस्थाने गच्छेत्। वृक्षास्याधस्तृणादिकं निष्कास्य, लेपनं कुर्यात्। मन्त्रमुच्चर्याष्टदिक्षु बलिं दद्यात्। वृक्षाश्रिता देव-दानव-गन्धर्व-सिद्ध-विद्याधरादिका भवन्ति। तेषां प्रार्थनां कृत्वा मूर्तिनिर्माणाय वृक्षः प्रयुज्यते, अतस्ते स्वयं स्वहिताय वृक्षं त्यजेयुः। एवमुक्त्वा पुष्पैः सह, रक्तचन्दनगन्धजलेन सह दधि-ओदनस्य बलिं दद्यात्। वृक्षस्येशानभागे कर्ता होमं कुर्यात्। सैकतेनैकहस्तमानस्य स्थण्डिलं कुर्यात्। अग्निकार्ये उक्तानुसारमग्न्याधानादिकं सर्वं कुर्यात्। समिध्-आज्य-चरुभिः पवित्रहोमं कुर्यात्। हृदयमन्त्रेण समिधस्तथा मूलमन्त्रेण घृतं होमयेत्। अघोरमन्त्रेण चरुं हुत्वा, प्रत्येकं १०८ आहुतिं दद्यात्। जयादारभ्याभ्यातानराष्ट्रभृत्पर्यन्तं होमं कुर्यात्। तत्पश्चादग्निर्निर्वापणं कृत्वा, पवित्रजलेन वृक्षस्य प्रोक्षणं कुर्यात्। शिवात्मक-मन्त्रस्य जपं कृत्वा वृक्षस्य स्पर्शं कुर्यात्। वृक्षस्य पूर्वदिग्भागे तस्य मुखं तथा पश्चिमं प्रति पीठं भवति। दक्षिणं प्रति दक्षिणदिशा तथा वामं प्रति उत्तरदिशा भवतीति ज्ञात्वालक्षयित्वा वृक्षं कर्तयेत्। अस्त्रमन्त्रस्य जपं कृत्वा, वृक्षस्य भागद्वयं, मूलस्यैकभागः, एवं त्रिभागं कुर्यात्। वृक्षस्य दुग्धं श्रेष्ठस्रुक्स्रुवार्थे शोभनम्। अस्त्रस्रुवमन्त्रेण शक्तिहोमं कुर्यात्। वृक्षमूलस्य, तथा शेषभागस्य क्रमेण स्थपतिर्जपं कुर्यात्। पूर्वमुत्तरं प्रति च वृक्षं पतति तर्हि शुभदायकं भवति। अन्यदिग्भागे पतति, तर्हि वृक्षं प्रयत्नेन त्यजेत्। तत्पश्चात् वृक्षस्य स्कन्धस्य छेदनं कुर्यात्। वृक्षप्रकाण्डभागं कमलप्रमाणेन कुर्यात्। पञ्चगव्य-गन्धजलेन स्नानं कारयित्वा, गन्धमाल्यैरलङ्कुर्यात्। नूतनवस्त्रेणाच्छादयेत्। दर्भस्य सूक्ष्मरज्जुना स्यन्दने शिबिकायां वा स्थापयेत्। अथवा स्कन्धोपरि संस्थाप्य नयेत्। कर्ममण्डपे जल-मार्जनं कृत्वा, गोमयेन लेपनं कुर्यात्। पञ्चगव्य-

४४३ का.शि.७९.१० तः १३

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

...ङ्कृत्य, यत्र काष्ठानि स्थापितानि भवन्ति, तत् स्थानं अलङ्कुर्यात्। पिष्टचूर्णेन वालङ्कृत्य काष्ठानि स्थापयेत्। शूलस्य दीर्घतासममायताकारं स्थण्डिलं कुर्यात्। तस्योर्ध्वं पूर्वं प्रत्यग्रभाग आगच्छेत्। अधो मुखमागच्छेत्, एवं प्रकारेण शूलार्थं काष्ठं स्थापयेत्। काष्ठानां समपक्षं पञ्चदशदिनानि यावत् शुष्कानि भवन्ति, तावत् पर्यन्तं रक्षा करणीया।[४४४]

शूललक्षणम्

अधुनोत्तमशूललक्षणं वर्ण्यते। दण्डस्य दीर्घता शरीरसमा दर्शिता। उदरस्थानस्य मध्यभागस्य विस्तारस्य चतुर्भागेष्वेको भागो भवति। दण्डमूलविस्तारस्याष्टभागानां न्यूनं विस्तारस्याग्रं भवति। दण्डनाभिपर्यन्तं चतुरस्रं, स्कन्धपर्यन्तमष्टकोणं भवति। तस्योर्ध्वभागो वृत्ताकारो भवति। शेषभागोऽपि गोलाकारो भवति। वंशदण्डस्य दीर्घता द्वात्रिंशदङ्गुलानां भवति। विस्तारः सार्धषडङ्गुलानां सार्धसप्ताङ्गुलानां वा भवति। विस्तारस्यार्धा स्थूलता भवति। वक्षोदण्डस्याग्रं चतुरङ्गुलानां भवति। मध्यात् सीमापर्यन्तं, क्रमेण वक्षोदण्डं न्यूनं भवति। वक्षोदण्डस्य मध्यभागे विस्ताराध त्रि-अङ्गुलानां छिद्राणि भवन्ति। हिक्कासूत्रस्योच्चता अर्धात् चतुर्दशाङ्गुलपर्यन्तं वक्षोदण्डस्योर्ध्वभागो भवति। तत्र वंशदण्डस्य योजनां कुर्यात्। कटिदण्डस्य दीर्घता षोडशाङ्गुलानां भवति। तस्य विस्तारोऽष्टाङ्गुलानां तथा स्थूलता चतुरङ्गुलानां भवति। कटिदण्डस्य मध्यभागे चतुरङ्गुलानां छिद्राणि भवन्ति। तन्नाभेरधः पञ्चाङ्गुलानां भवति। कटिदण्डस्योर्ध्वभागसीमा दण्डद्वयं योजयेत्। वंशदण्डं कटिदण्डेन बन्धितं भवति। एवं विधिना, तद् दण्डं कुर्यात्। एक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्त-अष्ट हस्तानां कृते तथा पादस्य कृते कुञ्चितं दण्डो भवति। तद्दण्डस्य विस्तारोऽङ्गुलद्वयस्य भवति। तस्य संख्या हस्तसंख्यैः समा भवति। वक्षोदण्डस्य विस्तारो हस्तसंख्यया भाजिते भवति। भागेन शिखाया विस्तार आगच्छति। दण्डविस्तारो मूलं प्रति, अग्रं प्रति क्रमेण न्यूनो

---

४४४ का.शि.७९.१४ तः ३३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

रङ्गुलानां भवति। तस्य विस्तारः सार्धैकङ्गुलो भवति। तद् गोलाकारं भवति। तस्य स्थूलता तावदेव भविष्यति। मूर्तिः स्थिता भवति चेत्, ऊरोर्दीर्घता अष्टाङ्गुलैरधिका भवति। तावदुरोः शूलस्य दीर्घता भवति। ऊरोर्दीर्घतायामधिकमष्टाङ्गुलकं योजयित्वोरुदण्डं कुर्यात्। ऊरूयुक्तदण्डं गोलच्छिद्रं कृत्वा कटिदण्डस्य सीमायुक्तशिखान्तं समायोजयेत्। ऊरू पिण्डली च, तस्य सीमासमीपे जान्वोर्भागद्वयं कुर्यात्। तस्मिन् ऊरूदण्डस्य शिखां समायोजयेत्। तदा जङ्घाया दीर्घता, ऊरोर्दीर्घतायास्त्रि-अङ्गुलमधिकं योजयित्वा वर्धयेत्। यः पादः स्थानकमुद्रायां, तस्य सन्धिर्न करणीयः, पाददण्डो भवति। पिण्डलेर्दीर्घतायाः पश्चात् नालार्थं शूलं स्थापयेत्। ऊरोर्मध्यभागविस्तारस्य त्रिभागेष्वेकभागस्योरुदण्डस्य विस्तारो भवति। ऊरूदण्डस्य सीमाविस्तारस्तस्मात्पादोनगुणितो भवति। जङ्घामूलसमीपे विस्तारः पादोनगुणितो भवति। पादतलस्याग्रभागस्य विस्तारः, मूलदण्डादेकभागहीनो भवति। नालदीर्घतायास्त्रिभागाः, तस्य द्विभागस्य दीर्घता पाददण्डस्य भवति। तस्याग्रविस्तारो दण्डभागविस्तारस्य द्वितृतीयांशो भवति। एवं पादयोर्दण्डस्य विस्तारो भवति। पाददण्डं, यत्र पिण्डलीदण्डं योजयितुं छेदं कृत्वा, स्निग्धं कृत्वा दृढं समायोजयेत्। अधुना हस्तस्य कृते उपयुक्तदण्डस्य विषयं वर्ण्यते। हस्तमूलसमीपे दण्डस्य विस्तारस्त्रि-अङ्गुलको भवति। हस्ताग्रविस्तारोऽङ्गुलद्वयं, प्रकोष्ठमूलसमीपविस्तारोऽप्यङ्गुलद्वयस्य भवति। प्रकोष्ठदण्डमूलविस्तारस्याङ्गुलद्वयं भवति। प्रकोष्ठाग्रस्य विस्तारः सार्धैकङ्गुलो भवति। हस्त-प्रकोष्ठस्य कर्पूरसन्धिर्जान्वोः सन्धिसमाना भवति। शिखाया मानमङ्गुलद्वयं कुर्यात्, येन सन्धिर्दृढा भवति। वंशदण्डस्य पार्श्वं प्रति पार्श्वदण्डस्य योजनां कुर्यात्। तस्य दीर्घता कटिपर्यन्तं भवति। विस्तारस्त्रि-अङ्गुलकानां भवति। पार्श्वदण्डस्य निर्गमनं दण्डसमं भवति। अध ऊर्ध्वं तस्य शिखा भवन्ति। वक्षोदण्डस्याग्रसमीपे पार्श्वदण्डस्याग्रं स्थापयेत्। पार्श्वदण्डस्य मूलाग्रं समायोजयेत् (अनुक्रमेण कटिदण्डे वक्षोदण्डे च)। हस्तपादयोस्तलाग्रं ताम्रपत्रसमं कुर्यात्। एवं प्रकारेण देवानां शूलं कुर्यात्। देव्याः कृते शूलं वर्ण्यते। मध्यभागविस्तारस्य विस्तारस्य त्रिभागाः, एको भागो वंशदण्डस्य विस्तारो भविष्यति।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वति। तत् पूर्णं गोलाकारं भवति। वक्षोदण्डस्य दीर्घता हस्तपर्यन्त भवति। अथवा हस्तादर्धानन्तरसमा भवति। शेषभागो वक्षोदण्डस्य दीर्घता भवति। तस्य विस्तारोऽर्धो भवति (वंशदण्डविस्तारस्य) तस्यार्धं स्थूलता भवति। अधुना कटिदण्डं वक्ष्ये। तस्य विस्तारः पञ्चाङ्गुलकस्तथा दीर्घता त्रि-अङ्गुलका भवति। शेषदण्डः पूर्वानुसारं कुर्यात्। आसनमुद्रायाः शूलं शृणु। आसीना मूर्तिर्वंशदण्डादष्टाङ्गुलानमन्तरोपरि स्थापयेत्। पीठस्य मानं चतुरङ्गुलकं भवति। शेषं वंशदण्डस्य छिद्रे समायोजयेत्। मूर्तेर्गर्भे यावत् दण्डस्य प्रवेशो भवति तावन्मूर्तेरधो दण्डस्य भागो भवति। शूलं एवं दर्शितम्। अधुना उपशूलस्य लक्षणं वर्ण्यते। भित्तेः स्थूलमध्यात् प्रारभ्य वक्षोदण्डपर्यन्तमुपशूलस्य दीर्घता भवति। (वक्षोदण्डस्यापेक्षया उपशूलमष्टाङ्गुलं न्यूनं भवति। उपशूलस्य निर्गमनं चतुरङ्गुलकं भवति। समतलशूलस्य योग्यं स्थापयेत्। शूलविस्तारस्य समं मध्ये छिद्रं भवति। तत्र शिखाद्वयं भवति। उपशूलस्य मूलं भित्तेर्मध्यभागे भवति। मूलं दृढं बन्धयेत्। वक्षोदण्डं, कटिदण्डं, वंशदण्डं च छिद्रे सुदृढं कुर्यात्। तत् सन्धिं कीलेनाधिकं दृढं कुर्यात्। उपशूलस्य शिखा वंशदण्डाग्रसमीपे कृते छिद्रे समायोजयेत्। तत् सन्धिं लोहेन, काष्ठकीलैर्दृढां कुर्यात्।[४४५]

शूलस्थापना

शूलस्थापना वर्ण्यते। सिद्धभूम्यां शुभे मासे-वासरे-लग्ने शूलस्य स्थापनां कुर्यात्। तत्पश्चादङ्कुरार्पणं कुर्यात्। प्रसादस्य पुरतश्चतुरस्रमण्डपं रचयेत्। पञ्च-सप्त-त्रिपदस्य दीर्घता, षोडश-द्वादशस्तम्भानां मण्डपं रचयेत्। मण्डपस्य भूमिरष्टाङ्गुलानामुच्चतायां भवेत्। भित्तेर्विस्तारमुच्चतां यथा द्रव्यं मिलति तथैव कुर्यात्। सर्वतस्तस्य निर्गमनेन सह सुदृढं भवति। वलयेषु तथा स्तम्भस्योपरि, यत्र तिर्यग् वंशा भवन्ति, तत्र गोलाकारच्छिद्रं स्थापयेत्। नारिकेलादिविधानेन मण्डपे स्थापयेत्। मौक्तिकं पुरतो योजयेत्। एवं दर्भस्य हारो भवति।

---

४४५ का.शि. ८०.१-४३

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

तं कुर्यात्। चतुर्द्वारेण सह स्तम्भेन समायोजित एतादृशं मण्डपं कुर्यात्। चतुर्द्वारं विहायान्यत्र कुत्रापि छिद्रं न भवेत्। एकं लघुजालकं भवति। मण्डपस्य त्रिषु भागेष्वेकभागस्य वेदिकाया उच्चता भवति। त्रिरङ्गुलानां विस्तारस्तथोच्चता मध्ये रिक्ता भवति। एतादृशी लघुपेटिका दर्पणानुसारं चिक्कणीकृत्य, समतलं स्थापयित्वा, तन्मूर्ते रेखाङ्कनं कुर्यात् । अधोदत्तपद्धत्यनुसारं परितोऽग्निकुण्डं कुर्यात्। पूर्वदिग्भागादनुक्रमेण चतुरस्रकं, धनुषाकारं, वृत्ताकारं तथा पद्मानुसारं कुण्डं भवति। शङ्करस्य (ईशपदे) , इन्द्रपदस्य मध्ये, वृत्ताकारं कुण्डं भवति। विशेषत: केवलं शङ्कर-मूर्ते: कुण्डं दर्शितम्। यदि मूर्तिर्गौर्य्या सहास्ति, तर्हि गौरी यस्मिन् कोणेऽस्ति, तस्मिन् कोणेऽर्धपर्णानुसारं कुण्डं भवति। शेषकुण्डान्युपर्युक्तानुसारं भवन्ति। ब्रह्मकुण्डस्य लक्षणानुसारं सर्वाणि कुण्डानि कुर्यात्। गोमयेन लेपनं कृत्वा, पिष्ट-चूर्णेनालङ्करणीयम्। तत्र ब्राह्मणा भोजनं कुर्यु:। तत्पश्चात् पुण्याहवाचनं कुर्यात्। महेन्द्रपदपर्यन्तं विधिपूर्वकं होमं कुर्यात्। वेदिकाग्निकुण्डसमीपे च पर्यग्निकरणं कुर्यात्। मूर्ते: स्थापाना कृते निश्चितदिनस्य प्राग्रात्रौ तत्र मण्डपे निवास: कर्तव्य:। वेदिकाया उपरि स्थण्डिलमष्टद्रोणधान्येन कुर्यात्। मूलेन सह नारिकेलस्याष्टपर्णै:, अक्षतै:, तिलै:, दर्भै:, लाजाभि:, पुष्पैश्च स्थण्डिलमलङ्कुर्यात्। शयनस्थाने शूलं तत्र तिर्यगं स्थापयेत्, वस्त्रं स्थापयेत्, धूप-दीपेन सह काष्ठासनं स्थापयेत्। ब्राह्मणस्तस्योपरि शूलस्य पूर्वाभिमुखे स्थापनां कृत्वा, पञ्चगव्येनाभिषेकं कुर्यात्। शुचिहव्येति मन्त्रेण गन्धोदकेन च स्नानं करणीयम्। एवंरीत्या देवस्य -देव्या: स्थापनां कृत्वा, गन्ध-पुष्पै: पूजां कुर्यात्। तत्पश्चाद् देवीदेवतानां दक्षिणहस्ते कौतुकं बन्धयेत्। सुवर्णकार्पाससूत्रेण कवचैर्वा तत् कौतुकं बन्धयेत्। वाद्यनादसमायुक्तं, कुश-तृणस्य दीर्घयष्टिकया गुच्छेन सह शूलं, मस्तकं पूर्वं प्रति तथा मुखमूर्ध्वं भवति। एवं प्रकारेण तिर्यक् स्थापयेत्। तस्य वामभागे उमादेव्या: शूलं तिर्यग् स्थापयेत्। तत् (देवीदेवानां शूलस्य) आग्नेयभागे वस्त्रद्वयं स्थापयेत्। कुशस्य पुटेन सर्वाङ्गमाच्छादितं कुर्यात्। सूत्र-वस्त्रेण पुटीकृत्य, एकद्रोणजलेन पूरितं कुम्भं शिवकुम्भं कथ्यते। अर्धद्रोणं यावत् जलेन पूरितं, पूर्वानुसारं सूत्रादिना सह गौरीबीजयुक्तं

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ीशूलस्य वा) मूलमध्यसमीपे कुम्भं स्थापयित्वा गन्धादिनालङ्कुर्यात्। विशेषतो गौरीकुम्भे तस्या मन्त्रमुक्त्वा स्थापयेत्। तस्य परितः सूत्रदिना सहाष्टघटान् स्थापयित्वा, विघ्नेशस्य (गणेशस्य) मूलमन्त्रेण स्थापनां कुर्यात्। वास्तुहोमादिकुण्डेऽग्नेः स्थापनां कृत्वा, अग्निकार्ये उक्तानुसारमग्न्याधानादिकं कुर्यात्। अग्निकृते पूर्वं प्रति कुण्ड आग्नेयदिशमग्निं स्थापयेत्। दक्षिणं प्रत्यौदुम्बरं, निर्ऋतिं प्रति खदिरस्य काष्ठं कुण्डे रचयेत् । प्रतिमास्ति चेत्, पश्चिमं प्रति मयूरचित्रं, वायव्यं प्रति वस्त्रम्, उत्तरं प्रति कुण्डे खदिरस्य काष्ठं भवेत्। गौरीसहिता शङ्करस्य मूर्तिरस्ति चेत्, प्रमुखा ब्रह्मवृक्षस्य समिधा भवेत्। केवलं शङ्करस्य मूर्तिर्भवति चेत् विद्याकुण्डे ब्रह्मवृक्षस्य समिधं स्थापयेत्। हृदयमन्त्रेण समिधं, पुरुषमन्त्रेणाज्याहुतिं दद्यात्। अघोरेण चरुहोमं कुर्यात्। प्रथमाहुतिर्वामं प्रति दद्यात्। चरुमीशानमन्त्रेण, तिलस्य शिरसा होमं कुर्यात्। सर्षपस्य कवचमन्त्रेणाहुतिं दद्यात्। तत् शिखामङ्गलं कथ्यते। गलमस्त्रेण मन्त्रेण प्रत्येकस्य शतमाहुतीर्दद्यात्। देव-देवीमनुकूलमेकसमानसंख्याया व्याहृत्याहुतिं दद्यात्। जयादि - अभ्यातान-राष्ट्रभृन्मन्त्रेण होमं पूर्णं कुर्यात्। दिशानुसारं वेद-ऋचां वदेयुः। देव-देव्या मूलमन्त्रेण घृतस्याष्टादशाहुतिर्दद्यात्। पश्चात् भस्मस्नानं कारयेत्। श्वेतमुत्तरवस्त्रं धारयेत्, श्वेतं यज्ञोपवीतं धारयेत्, श्वेतमालां च , गन्धादिना लेपं कुर्यात्। प्रसन्नमुद्रया, पवित्रः,उत्तमकुलः, आचार्यो गर्भागारं प्रवेश्य, एकाशीतिपदानि रचयेत्, अथवा मण्डूकपदं कुर्यात्। अथवा ४९ पदानां विन्यासं कुर्यात्। आकृतिं ब्रह्मस्थाने संस्थाप्य,गर्भगृहस्य पृष्ठभागं प्रति देव्या देवानामंशे स्थानकां, मानुषपद आसीनां स्थापयेत्। आसीनामूर्तिर्भवति चेत्, भद्रपीठे भवति। स्थिता मूर्तिर्भवति चेत्, आसनं वेदिकाया भविष्यति। पूर्वोक्तानुसारं पीठस्योच्चता विस्तारो भविष्यति। (अ.५८ द्रष्टव्यः) तस्याधारशिला तले सुन्दरा भवेत्। पीठस्य दीर्घता समं तस्यार्धस्थूलता भवति। ईश्वरस्य मूर्तिः स्थानकमुद्रायां भवति चेत्, पादस्याधः, आधारशिलोपरि रत्नमुद्रिकां स्थापयेत्। तस्य गाम्भीर्यं षडङ्गुलानां भवति। विस्तारस्त्रिरङ्गुलकं भवति। तस्य गर्तस्य मूले नवरत्नानि, हेमपात्रं च स्थापयेत्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दृढं कुर्यात्। मूलमन्त्रस्योच्चारणं कुर्वन् गर्भगृहे प्रवेशं कुर्यात्। उपरिदर्शितानुसारपदोपरि सुदृढाष्टगन्धेन, विशेषतः सुधया, मूलमन्त्रेण सह शूलं दृढं कुर्यात्। तत्पश्चात् वामं प्रति पार्वत्याः शूलं, विधिना दृढं कुर्यात्। आधारशिलायताकारा भवति। तस्या भागद्वयं कुर्यात्। पञ्च-षड्-सप्त - अङ्गुलानां व्यासस्य गर्तं कृत्वा, तत्र गर्भगृहेन सह गर्भान्यासं कुर्यात्। पूर्वोक्तविधिना गन्ध-पुष्पैः सम्पूर्णां पूजां कुर्यात्। इतः परं कार्यं विशेषरूपेण शिल्पिनः करणीयं भवति। सर्वलक्षणसम्पन्नः स्थपतिः शिल्पी कथ्यते। शिल्पिनः कार्यकर्ता स्थपतिर्योग्यरीत्या मूर्तिं कुर्यात्। अथवा भिन्ना मूर्तिर्भवेत्। स्वामेरिच्छानुसारं कुर्यात्। तत्र आचार्याय सुवर्णस्य पञ्च निष्कं दत्त्वा पूजयेत्।[४४६]

रज्जुबन्धलक्षणम्

अधुना विशेषेण विस्तारपूर्वकं रज्जुबन्धो वर्ण्यते। शूलस्य सर्वबन्धं ताम्रपत्रैर्वेष्टनं कुर्यात्। शूलमष्टबन्धेन लेपनं कृत्वा वस्त्रेण वेष्टयेत्। श्रीवेष्टकं, कुन्दरुष्कं, गुग्गुलं, गुडः, सर्जकं, गैरिकं - सर्वेषां घृतेऽथवा तैले मिश्रणं कृतेऽष्टबन्धो भवति। श्रीवेष्टकस्य चत्वारः भागान्, कुन्दरुष्कस्य त्रिभागान्, गुग्गुलस्य पञ्चभागान्, गुडस्यैकं भागं, सर्जकस्याष्टभागान्, गैरिकस्य त्रिभागान् स्वीकुर्यात्। सूक्ष्मं कृत्वा, घृतं-तैलस्य मिश्रणं कुर्यात्। पात्रे संस्थाप्य (मन्दाग्निना) उत्तमप्रकारेण कुर्यात्। एवं प्रकारेण निर्मितमष्टबन्धेन शूलस्य लेपनं कृत्वा पश्चाद् रज्जुबन्धं कुर्यात्। वस्त्रस्य मध्ये, नाभिर्भवति, मूलाधारादूर्ध्वं प्रति त्रि-सूत्राणि (वस्त्राणि) भवन्ति। मध्यरज्जुबन्धं सुषुम्ना नाम्ना प्रसिद्धमस्ति। पिङ्गला तस्य दक्षिणे तथा इडा वामं प्रति भवति। तस्योर्ध्वं गमन्यो मुख्यास्त्रिनाड्यो भवन्ति। तस्य परिधिरङ्गुलद्वयस्य भवति। तस्य त्रिवर्तिका भवन्ति। त्रिनाड्यो मूलमेढ्रावसानके भवन्ति। तत्र नाडीमूलाद् भिन्नभिन्ना अष्टादशनाड्यो निर्गच्छन्ति। तासां नामानि यथा ï विमला-घोषिणी-पृथ्वी-

४४६ का.शि.८१.१ तः ५३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

घोषिणी-रसवर्ती-मृदङ्गी-स्रंसिनी-शब्दा-स्पृशाङ्गी-पूर्णा-सुसहा-वारिधारिणी-वाहिनी-तामसी - एवं नाड्योऽष्टादश प्रोक्ता:। प्रत्येकस्या व्यासस्त्रियवस्य भवति। अथवा त्रिवर्तिका भवन्ति। अथवा द्विवर्तिके भवत:। तासामादौ षड् नाड्य ऊरूमूलस्य समीपे भवति। ऊरूमूलान्निगत्य, क्रमेण नालपर्यन्तं दीर्घा गच्छन्ति। पिंगलानाडीमूलान् निर्गता भवति। शब्द-स्पृशाङ्गी - आदि-षड्नाड्य इडामूलान्निर्गत्य वामपादे वेष्टयेत्। विमलातो वायवीपर्यन्ता षड् नाड्य: पिङ्गलान्निर्गत्य, दक्षिणपादे वेष्टयेत्। सुषुम्ना-इडा-पिङ्गलावंशदण्डादारभ्य भ्रूमध्यपर्यन्तमेकत्रिता भवन्ति। पुनर्नाड्यो भिन्न-भिन्नसप्तभागेषु विभाजिता भवन्ति। ता नाड्यो यथा- कुहू-पुष्पा-गान्धारी-हस्तिजीवा-यशस्विनी-शङ्खिनी-अलम्बूषा। गान्धारीनाडी सर्वावयवेषु, हस्तिजिह्वा हृदयपर्यन्तं, पुष्पा दक्षिणकर्णपर्यन्तं, यशस्विनी वामकर्णपर्यन्तं, अलम्बूषा मेढ्रमूलपर्यन्तं, कुहू गुदापर्यन्तं, शङ्खिनी नाभिपर्यन्तं भवति। प्रथमचतस्रनाडीनां व्यासस्त्रियवा:, शेषं चतस्रनाडीनां व्यासश्चतुरङ्गुलकानां भवति। नालाग्रपुरत: षण् नाडीनां सीमा भिन्ना भिन्ना भवति। शेषा वंशपार्श्वाङ्गरोहिता भवन्ति। सुषुम्ना मूलात् तथा शेषा पार्श्वादारोहिता भवन्ति। पक्षदण्डोर्ध्वं हस्तं प्रति तिर्यग् गता मध्या गगनी। मर्दनीरोहिणीनाड्यौ दक्षिणहस्ते वेष्टयेत्। रसवर्ती-मृदंगी-स्रंसिनी वामहस्ते भवन्ति। हस्तमूलाद् हस्ताग्रसमीपे तासामग्रमेकत्रितं भवति। तस्य पुरतो दक्षिणस्तथा वामप्रकोष्ठे (प्रत्येकप्रकोष्ठोपरि) अष्टशाखा भवन्ति। बाहुमूलाद् हस्ततलपर्यन्तमष्टनाड्यो गता भवन्ति। तस्याग्रे मणिबन्धसमीपे एकत्रितं कुर्यात्। एवं रीत्या वामहस्ते रेखिलं वेष्टयेत्। एतादृशी मूर्तेरष्टाविंशतिप्रमुखनाडीनां कल्पनां कुर्यात्। तस्माद् भिन्नभिन्ना अष्ट नाड्यो निर्गच्छन्ति। ता सर्वावयवेषु भवन्ति। चतु:सहस्राणि नाड्य: प्रोक्ता:। नाडय आच्छादितशूलोपरि जीर्णशूलपात्रवद् दृश्यन्ते। पक्वनारिकेलस्य शिखां घृते मेलयित्वा उपर्युक्तभागं स्वीकुर्यात्, निरुपयोगिनं भागं निष्कासयेत्। एवं प्रकारेण नाडय: शूले योजयित्वा, पश्चात् तस्योपरि गोलाकार: षड् यवपरिघां रज्जुं दृढं बन्धयेत्। तत्पश्चाद् रज्जुं प्रदक्षिणाक्रमेण बन्धयेत्। हृदयोपरि रज्ज्वावष्टदलयुक्तं कमलं बन्धयेत्। तस्य (कमलस्य) मूलं

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दर्शितं, तत् शूलस्य जीवस्थाने भवति। मूलमन्त्रस्य स्मरणं कृत्वा पश्चाद् रज्जुबन्धं कुर्यात्।[४४७]

मृत्संस्कारलक्षणम्

अधुना मृत्संस्कारः संक्षेपेण वर्ण्यते। मृत्तिका त्रिविधा यथा जाङ्गला, जानुरूपा (अनूपा), संमिश्रा च। एकाङ्गुलकस्य गर्ते कृते तत्र कठिना भवति, सा जाङ्गलमृतिकोच्यते। न्यूना वालुका, खनने सरला, त्रिहस्तयुक्ता सुन्दरी- एतादृशी सुदृढा अनूपप्रकारस्य मृत्तिका भवति। तस्यां मिश्रणप्रमाणेन गुण-धर्मयुक्ता मृत्तिका संमिश्रमृत्तिका कथ्यते। पवित्रा सुन्दरस्थाने जलवेगान्नदीतटात्, तडागात् वहन्ती समागता, श्वेत-रक्त-पीत-कृष्णवर्णयुक्ता, आर्द्रा च मृत्तिका पात्रे एकत्रीकृत्य, तस्यां जलं क्षिपेत्, पात्रे आर्द्रा मृत्तिका, तस्यां किञ्चिज्जलं भवेत्। दृढा शुष्का च भवति, तदा लक्षक्षीरवृक्षस्य त्वचः सिद्धां खदिरजलेन मृत्तिकाया अधिकं पेषणं कुर्यात्। किञ्चिद् जलमवशिष्टं भवति तदा मृत्तिकायाः गोलाकाराणि रचयेत्। क्षीरवृक्षस्य त्वचोऽष्टगुणितं जलं नीत्वा उद्वालनं कारयेत्। मृत्तिकाया अष्टयवानां व्यासेन गोलाकाराणि रचयेत्। एकादशाङ्गुलानां परिधिव्यासयुक्तं पाषाणं मुक्ता कथ्यते। वालुकां पाषाणं च मृत्तिकासमं सूक्ष्मं कुर्यात्। उपर्युक्तानुसारं सिद्धमृत्तिकायाश्चतुर्भागेष्वेकभागः पाषाणेन सह वालुकां मेलयेत्, अथवा त्रिफलाया जलं प्रक्षेपयेत्। तद् दश-अष्ट-सप्त दिनपर्यन्तमुत्तमरीत्या मेलयेत्। यव-गोधूम-माष-अतसी- इत्यादीनां पर्णानां चूर्णं मृत्तिकायामष्टमांशभागं मेलयेत् । तस्मिन् नारिकेलजलं प्रक्षेपयेत्, पश्चात्पात्रे तदष्ट-सप्त दिनपर्यन्तमत्तमरीत्या पेषणं कुर्यात्। श्रीवेष्टकं, गुग्गुलं, कुन्दरुष्कं, सर्जरसायाश्चूर्णस्य समभागमिश्रणं मृत्तिकायां पञ्चदशभागेष्वेकभागः क्षिपेत्। पात्रे मृत्तिकायां क्षिप्त्वा दशदिनपर्यन्तं समीचीनतया मर्दनं कुर्यात्। चूर्णी-पिप्पली-मरीचि-रसनी- इत्यादीनां समभागं चूर्णं कृत्वा, १/१० भागो मृत्तिकायां मेलयेत्। मधु-क्षीर-घृतैश्च पात्रे

४४७ का.शि.८२. १ तः २७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ल्व-निर्यासादीन् समभागे नीत्वा मृत्तिकां १/१५ भागे तैलसमं मेलयेत्। अथवाधिकं पेषणं कुर्यात्। तस्मिन् कुष्ठ-गैरिकं-हरितालमपि मेलयेत्। चन्दन-अगुरु-कर्पूर-गोरोचनादीनां समभागचूर्णं मृत्तिकायास्त्रिशंदंशेषु मेलयेत्। अतसीतैलेन सह मृत्तिकायां मर्दयेत्। सुवर्ण-रजतचूर्णं भिन्न-भिन्नदिक्षु धान्यानां समुद्रस्य, हलतलस्य, गजदन्तस्योर्ध्वभागस्य, बलीवर्द-शृङ्गस्य, विशेषतो धेनोः, हिरणशृङ्गस्य, यद् मिलति तस्य भिन्न-भिन्नसुगन्धयुक्तां मृत्तिकां, कपित्थ-निर्याससमां मधुनिर्याससमामधिकं मर्दयेत्। पञ्चरात्रिपर्यन्तमेवं कृत्वा, नारिकेलस्य शिखायाः सार्धैकतो द्वि-अङ्गुलकं दीर्घताया अंशान् कृत्वा, मृत्तिकायाश्चतुर्भागसमं, अथवार्धभागसमं मृत्तिकायां मेलयेत्। रज्जुना बद्धकाष्ठस्य भागे मृत्तिकाया एक-द्वि-त्रिरङ्गुलानां स्थूलतायाः स्तरं कुर्यात्। तत्पश्चान्मृत्तिकालेपो शुष्को भवेत्, मृत्तिकायाः प्रत्येकनूतनस्तरस्य शुष्कतानन्तरं निरीक्षणं कृत्वा, शनैः शनैर्लेपं कुर्यात्। शूलस्य बाह्यविस्तारस्य चतुर्भागं कृत्वा, एको भागोऽधिकस्थूलताया मृत्तिकायाः स्तरं योग्यं भवेत् तथैव कुर्यात्। शुष्कानन्तरं स्थूलतैकचतुर्थांशा भविष्यति। पश्चाद् द्वितीयभागस्तृतीयभागपर्यन्तं, तत्तत्स्थाने यावत्यनुकूलस्थूलताया मृत्तिकाया लेपं कुर्यात्। मृत्तिकायाः स्तरं स्थूलताधिका न्यूना वा भवितुं शक्नोति। शेषभागं किञ्चित्समयपर्यन्तं तथैव रक्षेत् । चतुथर्भागं वल्कलेनाच्छादितं कुर्यात्, अवशिष्टभागं कर्पाससूत्रेण सह कल्कं भवति चेत् पूर्णं कुर्यात्। बाह्यकल्कं समायोजयेत्। मृत्संस्कारः समाख्यातः।[४४८]

कल्कसंस्कारलक्षणम्

अधुनानुक्रमेण कल्कसंस्कारविधिर्वर्ण्यते। नदी-सरोवर-महत्कूपसस्यक्षेत्राज्जलाद् वहन्त्यागता, कठिना, भस्मसमाना सूक्ष्मा, किञ्चित्स्थूलां वालुकामेवं सूक्ष्मवालुकामेकीकृत्य, स्वच्छां कृत्वा निस्कासयेत्। वालुकां शुष्कीकृत्य, पश्चात् तस्याः सूक्ष्मं भस्मं कुर्यात्।

---

४४८ का.शि.८३.१ तः २७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

लाकाराणि कृत्वा शुष्कानि कुर्यात्। कपित्थ-निर्यासं त्रिप्रकारेण मेलयेत्। एकभागनिर्यासे पञ्च-सार्धपञ्च-षड्गुणितं जलं मेलयेत्। कृते मिश्रणेऽनुक्रमेण स्वश्नुतं, स्वाचलं, सैकतं जलं कथ्यते। गोलाकारेषु स्वजलं, सेकजलं च क्रमेण मेलयित्वा, तन्मिश्रणं नवनीतसदृशं भवेत्, तावत्पर्यन्तं मर्दयेत्। कार्पासतन्तुनाधिकं कोमलं कृत्वा स्वीकुर्यात्। कदलीदण्डमध्यसमानो तन्तुर्दृश्येत्, तथैव कार्पासस्य तन्तुर्दृश्येत्, तथा तन्मिश्रणं मर्दनं च कुर्यात्। एतत् प्रथमं कल्कं भवति। अथवा प्रथम लेयर उक्त्वा स्थापयेत्। सृतजलं क्षिप्त्वा, तत् प्रथमं कल्कं, तस्य प्रथमो लेपं दद्यात्। द्वितीयतृतीयलेपस्य कृतेऽनुक्रमेण स्वजलं सेकजलं च क्षिप्त्वा, वालुकां मर्दयेत्। अनुक्रमेण द्वितीयतृतीयस्तरस्य कल्कस्य प्रयोगं कुर्यात्। निर्यासस्य त्रिगुणितं, सार्धत्रिगुणितं, चतुर्गुणितमेवं प्रमाणेन कृष्णमरीचमथवा त्रिफलाया चूर्णं स्वीकुर्यात्। तत् त्रियवं कथ्यते। मिश्रणमुपर्युक्तानुसारमनुक्रमेण सृत-स्वच्छजलं, सेकजलं च मेलयित्वा, जले क्षिप्त्वा कल्के मेलयेत्, तत् मर्दयित्वा निस्कासयेत्। पश्चात् क्रमेण द्वि-त्रि यवानां स्थूलतायाः कल्कस्य लेपं कुर्यात्। सर्वत्र लेपं कुर्यात्, छिद्राद्यप्यवशिष्टं न भवेत्। अर्थात् पूर्णरीत्या लेपयेत्, शनैः शनैर्लेपयेत्। तद् द्वि-सार्धैकमासपर्यन्तं शोषयेत्। नारिकेलकूर्चिकया घर्षणं कृत्वा पश्चात्स्वच्छजले कल्कं समायोजयेत्। अवयवानां मानं पूर्णं कुर्यात्। मानापेक्षया तत् कल्कमधिकं योजयेत्। मानं त्रुटिरहितमस्ति न वा , तत् शोध्यमानसमं नयेत्। अङ्गोपाङ्गं प्रत्यङ्गं च लक्षणानुसारं कुर्यात्। हस्त-पाद-उदरादि-अङ्गं कथ्यते। (अङ्गोपरि) आभरणमुपाङ्गं कथ्यते। मूर्तेश्चिह्नं वाहनादिप्रत्यङ्गं कथ्यते। कपित्थनिर्यासं जलमेकेषु सार्धत्रिप्रमाणेन नीत्वा निमज्जितवस्त्रेण मूर्तिं वेष्टयेत्। तत्पश्चात्कल्कस्य लेपं दद्यात्। कल्कस्य लेपं १/८ अथवा १/१० स्थूलताया भवति। कपित्थ-निर्यासस्य जलं नारिकेलशिखया प्रोक्षयेत्। तत्कूर्चेन घर्षणं कुर्यात्। तस्योर्ध्वं कल्कं, तल्लेपोपरि चिक्कणेनाभूषणानां, तस्य लक्षणानुसारं कुर्यात्। तस्योपरि (सर्वमूर्तिषु) श्वेतवर्णस्य लेपं दद्यात्। एवं मूर्तेः कल्कसंस्कारः प्रोक्तः।[४४९]

४४९ का.शि.८४.१ तः १७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

अधुना विशेषरुपेण वर्णसंस्कारस्य लक्षणं वर्ण्यते। शङ्करात् परमसद्भावस्य निर्माणमभवत्। द्रव्यात् चन्द्रस्य जन्माभवत्। शङ्करात् शक्तेर्निर्माणमभवत्। तेन नादः। तेन सर्वेषामुत्पत्तिर्जाता- अग्नेस्ततो वायोस्ततो जलम्। तस्मात् श्वेत-रक्त-पीत-कृष्णवर्णा चतुःप्रकारा पृथ्वी जाता। जलात् श्वेतस्य, अग्नितो रक्तस्य पृथ्वीतः पीतस्य, आकाशान्नीलस्य, नीलात्कृष्णवर्णस्य निर्माणं सञ्जातम्।[४५०]

विष्णु-महेश्वर-गौरी-रुद्रा अनुक्रमेण तत्तद्वर्णस्याधिपोऽस्ति। ब्राह्मणक्षत्रियवैश्यशूद्राणां वर्णा अनुक्रमेण श्वेतादिका भवन्ति।[४५१]

श्वेत-रक्त-पीत-कृष्णा एते वर्णस्य चत्वारो मुख्यप्रकारा भवन्ति।[४५२]

श्वेत-शुक्ल-धवल-अत्तकं मुक्ताप्रमाणेन श्वेतवर्णम्। श्वेतवर्णस्य मुख्याः पञ्चप्रकाराः सन्ति। शङ्खसमानं श्वेतवर्णः शुक्लोऽत्युत्तमः। गोदुग्धसमानो धवलवर्णो भवति। तारावर्णसमानः श्वेतवर्णोऽतारकः कथ्यते।[४५३]

अरुण-रक्त-शोण-अग्निसमानः - एवं रक्तवर्णस्य चत्वारः प्रकाराः सन्ति। अरुणोऽशोकसमानः, कमलपुष्पसमानो रक्तवर्णः, शुकपुष्पसमानः शोणवर्णः,तथाग्निसमानः। पाटलसमानः वर्णो राक्षसानाम्। स्वर्णः, पिङ्गः, पीतः, हरितालः - एवं पीतवर्णस्य चत्वारः प्रकाराः सन्ति। सुवर्णसमानो मनोहरः, पुण्ड्रकमलस्य समानः पीतः, हरिद्रासमानः पीतः, हरितालसमानः पीतवर्णो भवति। नीलः-श्यामः-कालः -कृष्णः - एवं कृष्णवर्णस्य चत्वारः

---

४५० का.शि.८५.१-३
४५१ का.शि.८५.४
४५२ का.शि.८५.५
४५३ का.शि.८५.६

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

...:, श्यामो नीलकमलसमान:, मयूरसमान: कालवर्ण:, मृगुपत्रसमान: कृष्णवर्णो भवति। एवं मुख्यवर्णानां षोडशप्रकारा भवन्ति।

भूमौ पतितरक्तप्रमाणेन जातिलिङ्गसमान: - एवं रक्तवर्णस्य प्रकारद्वयं भवति। गोदावरीनदीसमीपे प्राप्तहरिताल समान:, अलसीपुष्पसमान एवं पीतवर्णस्य प्रकारद्वयं भवति। कृष्णपाषाणचूर्णवत् श्यामो वर्णो भवति। दीपस्य कालिमासमान: कृष्णवर्णो भवति। षोडशवर्णानां विभिन्नानुपातेन मेलनेनानेकप्रकाराणां वर्णा भवन्ति। काश्यपवर्णसंस्कारलक्षणं समाप्तम्।

## पञ्चमं प्रकरणम्

## काश्यपशिल्पस्य समीक्षात्मकमध्ययनम्।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# पञ्चमं प्रकरणम्

## काश्यपशिल्पस्य समीक्षात्मकमध्ययनम्।

### प्रास्ताविकम्

इतः पूर्वं तृतीयचतुर्थप्रकरणयोः काश्यपमहर्षिप्रोक्ते काश्यपशिल्पे वर्णितानां वास्तुशास्त्रविषयकाणां मूर्तिकलाविषयकाणां च विविधपटलोक्तविषयाणां विवेचनं ग्रन्थानुसारेण प्रदत्तमस्ति। अधुना पञ्चमेऽस्मिन् प्रकरणे तद्विषयाणां नारदशिल्पादिविविधग्रन्थानां साकं तुलनां कृत्वा तेषां समीक्षात्मकमध्ययनं प्रस्तूयते। वास्तुशास्त्रे त्रिविधाः पद्धतयो नागर-वेसर-द्राविडाः प्रसिद्धाः सन्ति। तत् तत् पद्धत्यनुसारं समग्रे भारते वास्तुशिल्पानि निर्मितानि दरीदृश्यन्ते। काश्यपशिल्प ग्रन्थे द्राविडसम्प्रदायानुसारं वर्णनं सम्प्राप्यते। काश्यपशिल्पं ग्रन्थो वस्तुतोंऽशुमद्भेदागमोक्त विषयाणां साकं साम्यं धारयति। किन्तु तस्य ग्रन्थस्य प्रकाशनमद्यावधि नाऽभवत्। शैवागमस्य विविध आगम ग्रन्थानां मध्ये तस्य महत्त्वं वर्तते। काश्यपशिल्पं ग्रन्थोऽपि शैवपरम्परायाः प्रतिपादको ग्रन्थः तस्य शैवागमैस्साकं साम्यं च वर्तते। शैवभक्तानां कृते मूर्त्यादिनिर्माणे विविधं सुसूक्ष्मं पद्धतिपूर्णं विविध मानादि सहितं वर्णनं अत्र ग्रन्थे प्राप्यते। अतोऽस्य महत्त्वं शैवपरम्परा दृष्ट्या अतीव वर्तते। शिवस्य प्रासादनिर्माणार्थं

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...पूजा दृष्ट्या तथा च शिवपरिवारदेवतानां ज्ञानार्थं आवश्यकी सर्वासामग्री ग्रन्थेऽस्मिन् प्राप्यते। वास्तुनिर्माणस्य विविध पदानां तेषां देवतानां तत् तत् स्थानगत विविध प्रासादोपकरणानां विवेचनं अतीव सूक्ष्मतया वर्णितं ग्रन्थे। अत्र न केवलं विविधतल एकादि षोडशतलपर्यन्तानां प्रासादानां वर्णनं प्राप्यते। अपि तु विविधतलसम्पन्नां गोपुराणां च। यतो हि ग्रन्थः शैवसम्प्रदायस्य भवति। अत्र शिवसम्बिद्धिनी एव विविधानि विषयाणि स्पष्टी कृतानि सन्ति। भूम्यादि सम्पादनं प्रादनिर्माणं आयादि विचारः मन्दिरनिर्माणं मूर्तिनिर्माणं सर्वेऽपि विषयाः शैवसम्प्रदायानुसारमेव वर्णिताः सन्ति। अतएव अस्मिन् ग्रन्थे विविधानां विष्णुमूर्तिनां अथवा विविधानां देव्यादि मूर्तिनां विविध गणेश मूर्तिनां वर्णनं नविशदीकृतम्। काश्यपशिल्पे केवलमेकस्थानैव जैनसम्प्रदायस्योल्लेखः वर्तते। किन्तु कुत्रापि जैनसम्प्रदायस्य चतुर्विंशतिः तीर्थङ्कराणामुल्लेखः मूर्तिवर्णनं वा न प्राप्यते। भारते बौद्धसम्प्रदायोऽपि अतीव प्राचीनः वर्तते। तथाऽपि ग्रन्थकारेण कुत्रापि बौद्धमूर्तिनां विवेचनं न कृतम्। यतो हि ग्रन्थः प्राचीनो वर्तते। अतएव इस्लाम-खिस्तादि अन्यधर्मीयाणां शिल्पादि विषये विचारणा नैव सम्भाव्यते।

काश्यपशिल्पे शिवपरिवाराणां विविधदेवतानां परिपूर्णं अङ्गाङ्गमानसहितं वर्णनं प्राप्यते। परिवारदेवेषु अनलेश्वरम्। सप्तमातृका। विनायकः। षण्मुखः। ज्येष्ठादेवी। विष्णुः। अश्विनौ। पितरः। वैवस्वतः। रोहिणी। निर्ऋति। अप्सरस्। वरुण। मरुत्। रूद्रः। भास्करः। सरस्वती। लक्ष्मी। परिवारदेवतानां वर्णनमन्तरं शिवलिङ्गस्य विविधप्रकाराणां तथा च विविधप्रकारकशिवमूर्तिनां विवरणं प्राप्यते। शिवमूर्तिषु चन्द्रशेखरः। वृषवाहनम्। नृतमूर्ति। गङ्गाधरः। त्रिपूरान्तकः। कल्याणः। अर्धनारीश्वरः। गजहा। पाशुपात। कंकालः। हर्यर्धरः। भिक्षाटनः। चण्डेशः।दक्षिणा। कालहा।

शिवस्य सुन्दरमूर्तिनां वर्णनेन साकं काश्यपशिल्पे महर्षिणा केषाञ्चन भयङ्कर मूर्तिनां वर्णनमपि कृतमस्ति। वर्णनं कृतेऽपि अनन्तरं निमार्णे निषेधोऽपि विहितः।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

काश्यपोक्तं शिल्पं काश्यपशिल्पं नाम्ना प्रसिद्धं तथैव नारदमहिर्षिणाऽपि शिल्पशास्त्रं प्रोक्तं तत् नारदशिल्पनाम्ना प्रसिद्धमस्ति। तथापि अद्यावधि तत् शिल्पशास्त्रं प्रकाशितं नास्ति। हस्तलिखितग्रन्थेष्वेव सन्निहितमस्ति। सद्भाग्येन वडोदरा स्थित प्राच्यविद्यामन्दिरस्य ग्रन्थागारे नारदशिल्पस्य प्रतीकृतिः क्रमाङ्कः १३५१५ संस्कृतदेवनागरी कर्गजोपरि १२० पृष्ठानि सङ्गृहीता वर्तते। तस्याप्यध्ययनं काश्यपशिल्पेना साकं तुलना समीक्षा च करणे मया प्रयत्नः कृतः। हस्तलिखितस्य विषये ज्ञानप्रदानार्थं तथा च तस्याः प्रतिकृति सीडीरूपेण प्रदानार्थं मम मार्गदर्शकानां सहाय्यं बहुमूल्यमस्ति। काश्यपस्य नारदस्य च वास्तुविषयकाणां मूर्तिशिल्पविषयकाणां विचाराणां तुलनया काश्यपशिल्पस्य ग्रन्थस्य वैशिष्ट्यं सुस्पष्टं भविष्यति। तथा च द्वयोः विशिष्ट परम्पराणां शैव-वैष्णव सम्प्रदायानां वैशिष्टयानि अवगतानि भविष्यन्ति। अतएव तयोः काश्यपशिल्पस्य नारदशिल्पस्य च तुलनां कृत्वा काश्यपशिल्पस्य समीक्षायाः विषयोऽत्र प्रस्तूयते।

विष्णुधर्मोत्तरपुराणम्

विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डस्य ४४ अध्ययात् ८५ अध्यायपर्यन्तं विविधप्रतिमानां त्रिमूर्ति-पद्म-ब्रह्म-विष्णु-महादेव-नासत्य-शक्र-यम-वरुण-वैश्रवण-विष्णुध्वज-गौरीश्वर-अग्निरूप-निर्ऋति-वायु-भैरव-विष्णु-भूमि-आकाश-ब्रह्मा-सरस्वती-शेष-देवीचतुष्टयसहित तुम्बरु-आदित्य-सोम-भौमादिग्रह-मनु-कुमारादि-वसु-देवता-लिङ्ग-व्योम-नरनारायण-धर्म-वैराग्य-नृसिंह-वराह-हयग्रीव-पद्मनाभ-लक्ष्मी-ऐडूक-एतासां स्वरूपनिर्माणस्य विवरणमस्ति। किन्तु तत्र वर्णनं तत्त्वज्ञानपरिपूर्णं वर्तते। मानविषयकं विवेचनमत्यन्तं स्वल्पमस्ति। तत्र प्रायेण विविधविष्णुमूर्तीनां रूपनिर्माणस्य विशेषतो वर्णनं विहितमस्ति। तथापि तत्र शिवस्याप्यध्यायद्वये वर्णनं वर्तते। तत्र महादेवरूपनिर्माणनामके ४८ तमेऽध्याये तथा च ७४ तमेऽध्याये विशेषतो लिङ्गरूपनिर्माणस्य वर्णनं प्राप्यते। विष्णुधर्मोत्तरपुराणे महादेवरूपनिर्माणे शिवस्य यद् वर्णनं वर्तते तत्र जटधारिणः, त्रिशूलसहितस्य, चापबाणधरस्य, शिवस्य तथा

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...पस्य वर्णनं वर्तते। अत्र भैरवस्य शिवस्य च महादेवरूपनिर्माणे साम्यं प्रतीयते। अत्र त्रिशूलस्योल्लेखो विशेषत्वेन महत्त्वपूर्णो वर्तते। काश्यपशिल्पे प्रायेण सर्वत्र शूलस्योल्लेखो न, त्रिशूलस्य। चापबाणवर्णनं तु वर्तते। त्रिलोचनत्वं सर्वत्र समानम्। सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशान-इति पञ्चशिवरूपाणामुल्लेखो वर्तते। शिवः पञ्चवक्त्रः कथितः। तानि मुखानि महादेव-भैरव-नन्दीवक्त्र-उमावक्त्र-सदाशिव-इति पञ्चविधानि।[४५४] एतादृशं विवेचनं पञ्चवक्त्रस्य काश्यपशिल्पे नैव प्राप्यते।

लिङ्रूपनिर्माणस्य वर्णनं ७४ तमेऽध्याये केवलं पञ्चश्लोकस्यैव विष्णुधर्मोत्तरे वर्तते।

लिङ्गस्य रूपनिर्माणं कथयस्व ममानघ।

लिङ्गे हि पूजिते पूजा कृता तु जगतो भवेत्।
भोगोऽस्य वृत्तः कर्तव्यो भागमष्टास्रमेव तु।।
चतुरस्रं तथा भागं कर्तव्यं भूरिदक्षिणम्।
वृत्तं दृश्यन्तु कर्तव्यमष्टास्रं पिण्डिकागतम्।।
चतुरस्रं तु कर्तव्यं ब्रह्मपीठं विदुर्बुधाः।।
लिङ्गोपरिष्टात्तु गता पुरस्तात्
लेखा सुवृत्ता तु तथैव कार्या।
ऊर्ध्वायता च द्विगुणा तथान्या
या ब्रह्मसूत्रे विबुधैः प्रदिष्टा।।[४५५]

काश्यपशिल्पे तु लिङ्गविषयकं मानादिसहितमत्यन्तं विस्तृतं विवेचनं प्राप्यते। विष्णुधर्मोत्तरपुराणे केवलं पञ्चश्लोकेषु स्वल्पं वर्णनं वर्तते। काश्यपशिल्पस्य शिवलिङ्निर्माण दृष्ट्या महत्त्वं प्रतीयते।

---

४५४ वि.धर्मो.अ.४८.१ तः २०
४५५ वि.धर्मो.अ.७४. १-५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...राणे सरस्वत्याश्चतुर्भुजाः कथिताः । चतुर्हस्तेषु पुस्तकमक्षमाला-वीणा-कमण्डलुरिति दक्षिण-वामयोरनुक्रमेण वर्णितम्। काश्यपशिल्पे तु वैणवी वीणायाः समुल्लेखो नास्ति, किन्तु तत्र व्याख्यानमुद्रा वर्णिता। तथा च तस्याः श्वेतवस्त्रत्वं वर्णितं यस्योल्लेखो विष्णुधर्मोत्तरपुराणे न वर्तते।

देवी सरस्वती कार्या सर्वाभरणभूषिता।
चतुर्भुजा सा कर्तव्या तथैव च समुत्थिता।।
पुस्तकं चाक्षमालां(?ला) च तस्या दक्षिणहस्तयोः।
वामयोश्च तथा कार्या वैणवी(?वीणैव) च कमण्डलुः।।[४५६]

समराङ्गणसूत्रधारः

भोजदेवविरचितसमराङ्गणसूत्रधारे ग्रन्थे त्रि-अशीतिरध्यायेषु विस्तारपूर्वकं वास्तुशास्त्रस्य शिल्पशास्त्रस्य मूर्तिकलायाश्च विविध-विषयाणां सङ्ग्रहः संदृश्यते। ते सर्वे विषया विविधकार्याणां कृते समुपयुक्ताः सन्ति। काश्यपशिल्पे सर्वेषां विवेचनं नास्ति। तत्र भोजदेवेनाष्टमेऽध्याये भूमिपरीक्षाया विषयो वर्णितः। भोजदेववर्णितं जाङ्गलादिभेदेन त्रैविध्यं तथा विविधलक्षणानुसारं षोडश प्रविभागानां वर्णनं काश्यपशिल्पे न दृश्यते। विविधदुर्ग-पुर-निवेशार्थं प्रशस्तभूमीनां वर्णनं समराङ्गणे प्राप्यते। समराङ्गणसूत्रधारेऽपि विविधवर्णानां कृते वर्णानुसारं चतुर्विधा भूमिः प्रशस्ता वर्णिता। एतत् तु काश्यपशिल्पेन समानं वर्तते। समराङ्गणसूत्रधारे वर्णितं यथा ï

सिता रक्ता पीता च कृष्णा चैव क्रमान्मही।
विप्रादीनां हि वर्णानां सर्वेषामथवा हिता।। [४५७]

स्वाद-स्पर्श-शब्द-गन्ध - इत्यादिभिर्भूमेः प्रशसस्तत्वं समराङ्गणे वर्णितं न तादृशं वर्णनं काश्यपशिल्पे प्राप्यते।

---

४५६ विष्णुधर्मोत्तरपुराणम् ६४.१-२
४५७ समरा.८.४८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

विविधमानप्रमाणं निम्नलिखितानुसारं वर्तते। तस्य काश्यपशिल्पेन[459] साकं तुलनात्मकं कोष्टकम्। (अ.२३. १ तः ९) मानसारेऽपि मानविषयकं (अ.२.२०-२७) विवेचनं प्राप्यते।

| | |
|---|---|
| ८ रेणुः ï १ बालाग्रम् | ८ यूका ï १ यवः |
| ८ बालाग्रम् ï १ लिक्षा | ८ पिंपी ï १ धरः |
| ८ लिक्षा ï १ यूका | ८ पिशूनां ï १ बालाग्रम् |
| ८ यूका ï १ यवः | ७ यवाः ï १ मध्यमाङ्गुली |
| ८ यवाः ï १ अङ्गुलकम् (१.८७५ से.मी) | ६ यवाः ï १ अधमाङ्गुली |
| २४ अङ्गुलाः ï १ हस्तः (१.५ फूट) | ४ शाली ï १ उत्तमाङ्गुली |
| ४ हस्तः ï १ दण्डः (६, फूट) | ३ शाली ï १ अधमाङ्गुली |
| - | २ रक्तशाली ï १ अङ्गुली<br>८ यवाः ï १ उत्तमाङ्गुली |

रेण्वष्टकेन वालाग्रं लिक्षा स्यादष्टभिस्तु तैः।

भवेद् यूकाष्टकाभिर्यवमध्यं तदष्टकात्।।

अष्टाभिः सप्तभिः षड्भिरङ्गुलानि यवोदरैः।

४५८ समरा.९.४-५
४५९ का.शि.२३. १ तः ९

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ध्य-कनिष्ठानि तच्चतुर्विंशतिः करः।।[४६०]

समराङ्गणसूत्रधारस्य ११ तमेऽध्याय एकाशीतिवास्तुपददेवतावर्णनं प्राप्यते। तत्र पूर्वदिशायां षट्पदानामधिपतिरर्यमा वर्णितः।[४६१] काश्यपशिल्पे समरी निर्दिष्टा। वायव्यदिशायां यक्ष्मा रुद्रश्च द्विपदानामधिष्ठाता वर्णितः।[४६२] काश्यपशिल्पे तु रुद्रो रुद्रजयः प्रदत्तः। राक्षसस्य स्थाने गृहक्षतः समराङ्गणे।[४६३] मृषास्थाने समराङ्गणे मृगः।[४६४] निर्ऋतिस्थाने समराङ्गणे पितरो वर्तन्ते।[४६५] असुरशोषपापयक्ष्मारोग - इति क्रमः समराङ्गणसूत्रधारे[४६६] तत्स्थाने काश्यपशिल्पे शोषरोगपापक्षय- इति क्रमः प्रदत्तः, किन्त्वसुरस्योल्लेखो नास्ति। चरकस्य स्थाने ऋग् इति काश्यपशिल्पे।

समराङ्गणसूत्रधारे ६३ तः ६५ अध्यायेषु द्राविड-नागर-भूमिजप्रासादानां वर्णनं प्राप्यते। तत्र ६२ तमेऽध्याये द्राविडप्रासादलक्षण एकभूमिकतो द्वादशभूमिकपर्यन्तं द्वादशविधप्रासादानां वर्णनं प्राप्यते। किन्तु काश्यपशिल्पे त्वेकतो षोडशतलपर्यन्तं प्रासादानां वर्णनं द्राविडपद्धत्या प्राप्यते। काश्यपशिल्पे प्रासादानां वर्णनमतिसूक्ष्मतया वर्तते, तथा समराङ्गणसूत्रधारे न वर्तते। समराङ्गणसूत्रधारे ६६ तमेऽध्याये तथा ६७ तमेऽध्याये विविधमण्डपानां वर्णनं प्राप्यते। तत्र प्रथमं भद्रादि-अष्टप्रकाराणां मण्डपानां वर्णनं वर्तते। ६७ तमेऽध्याये विविधानां सप्तविंशतिमण्डपानां वर्णनं प्राप्यते। काश्यपशिल्पे तु केवलं देवमण्डपदृष्ट्या यथा मुखमण्डपः, प्रतिमामण्डपः,स्नानमण्डपः,नृत्यमण्डपः - इति चतुर्णामेव वर्णनं समुपलभ्यते।

---

४६० समरा.९.४-५
४६१ समरा.११.२
४६२ समरा.११.४
४६३ समरा.अ.११.८
४६४ समरा.११.८
४६५ समरा.अ.११.८
४६६ समरा.११.९-१०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ेऽध्याये विविधदेव-देवीनां प्रतिमानिर्माणविषये लक्षणानि प्रदत्तानि। तत्र ब्रह्मा-शिव-कार्त्तिकेय-बलभद्र-विष्णु-अष्टदिक्पाल-लक्ष्मी-कौशिकी-अश्विनौ-दैत्यपिशाचयक्षगन्धर्वमूर्तीनां चित्राणां वा निर्माणविषये लक्षणानि तेषामायुधसहितानि वर्णितानि सन्ति। बृहत्संहिता-विष्णुधर्मोत्तरपुराणं-मत्स्यपुराणं-अग्निपुराणं-पद्मपुराणं-गरुडपुराणं-अपराजितपृच्छा-रूपमण्डन-देवतामूर्तिप्रकरण-शिल्परत्न-मानसोल्लास-इत्यादिषु ग्रन्थेषु तथा पञ्चरात्रसंहितासु विविधमूर्तीनां बहुविस्तृतं वर्णनं प्राप्यते। किन्तु भोजराजेन संक्षिप्तरूपेणैतासां मूर्तीनां वर्णनं समराङ्गणे प्रस्तुतम्।

काश्यपशिल्पे ब्रह्मणो वर्णनं विस्तृतं वर्तते। चतुर्हस्तानि मुखानि च श्वेतवस्त्रधारित्वम्- इति समराङ्गणसूत्रधारेऽपि प्राप्यते। किन्तु चतुर्हस्तेषु दण्ड-कमण्डलु-अक्षमाला-वरदमुद्रा वर्णितास्ति। काश्यपशिल्पे अक्षमाला-कूर्च-कमण्डलु-कुश-स्त्रुक्-स्रुवौ तथा आज्यस्थाली-कुश-अभय-वरदसहितत्वम्- इति द्विविधं वर्णनं दृश्यते।

ब्रह्मानलार्चिः प्रतिमः कर्तव्यः सुमहाद्युतिः।

स्थूलाङ्गः श्वेतपुष्पश्च श्वेतवेष्टनवेष्टितः।।

कृष्णाजिनोत्तरीयश्च श्वेतवासाश्चतुर्मुखः।।

दण्डः कमण्डलुश्चास्य कर्तव्यो वामहस्तयोः।

अक्षसूत्रधरस्तद्वा(द्वद्) मौञ्जया मेखलया वृतः।।

कार्या(र्यो) वर्धयमानस्तु जगद् दक्षिणपाणिना।

एवं कृते तु लोके(शे) क्षेमं भवति सर्वतः।।[४६७]

---

४६७ समरा. ७७.२-५

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

शिवप्रतिमावर्णने ७७.९ तः १८ केवलं सामान्यरूपेण स्मशानवासी शिवस्य तथा ग्राम-पत्तन-निहितशिवप्रतिमाया वर्णनं कृतम्। चन्द्राङ्किकतजटाधारी, नीलकण्ठः, विचित्रमुकुटः, पन्नगाजिनयुतः, नेत्रत्रयविभूषितो शिवो वर्णितः। श्मशानवासी महेश्वरः करालो भयङ्करश्च वर्णितः। शिवस्य द्वि-चतुः- अष्टादश-विंशतिः-शतं-सहस्र-भुजत्वमपि निर्दिष्टम्। किन्तु काश्यपशिल्पे यथा विविधवृषारूढ-त्रिपुरान्तक-दक्षिणामूर्ति-इत्यादिस्वरूपाणां वैविध्यपूर्णं वर्णनं प्राप्यते, न तथा समराङ्गणसूत्रधारे। शिवलिङ्गस्य वर्णनं समराङ्गणे न दृश्यत इति विशेषः। काश्यपशिल्पे शिवप्रतिमानां साकं लिङ्गपूजाया विस्तृतं मानसहितं विविधप्रकारयुतं वर्णनमस्तीति विशेषः। बलभद्रस्य लक्षणवर्णनं समराङ्गणसूत्रधारे वर्तते,[४६८] काश्यपशिल्पे नास्ति।

कार्त्तिकेयलक्षणं समराङ्गणसूत्रधारे वर्णितम् ।[४६९] कार्त्तिकेयस्य मूर्तेर्वर्णने स एकमुखो षण्मुखो वा वर्णितः। स्थानानुसारेण तस्य हस्तानि विविधानि वर्णितानि। नगरे द्वादशभुजः, खेटके षड्भुजः, ग्रामे भुजाद्वययुक्तो वर्णितः। काश्यपशिल्पेऽपि स्कन्दस्य भुजा द्वि-चतुः-षड्-द्वादश वर्णिताः। समराङ्गणे चतुर्भुजस्योल्लेखो नास्ति।

नगरे द्वादशभुजः खेटके षड्भुजो भवेत्।

ग्रामे भुजद्वयोपेतः कर्तव्यः शुभमिच्छता।।

शक्तिः शरस्तथा खड्गो मुसृण्डी मुद्गरोऽपि च।

हस्तेषु दक्षिणेष्वेतान्यायुधान्यस्य दर्शयेत्।।

एकः प्रसारितश्चान्यः षष्ठो हस्तः प्रकीर्तितः।

(चतुः?) पताका घण्टा च खेटः कुक्कुट(क)स्तथा।।

---

४६८ समरा.७७.३६-३८
४६९ समरा.७७.२३-३५

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

ु षष्ठस्तु तत्र (शोजर्जन?) करः।

एवमायुधसम्पन्नः सङ्ग्रामस्थो विधीयते।।[४७०]

तस्य दक्षिणहस्तेषु शक्तिः-शरः-खड्गः-भुशुण्डी, मुद्गरः - इत्यायुधानि सन्ति, एको हस्तः प्रसारितः वर्तते। वामहस्तेषु धनुः-पताका-घण्टा-खेटः-कुक्कुटः-इत्येतानि सन्ति। एको हस्तः संवर्धनस्वरूपः कथितः। काश्यपशिल्पे द्वादशहस्तवर्णने- दक्षिणकरे शक्तिः-बाणः-खड्गः-चक्रं-प्रासश्च वर्णितः। वामकरे पिच्छः-खड्गः-काकूटकः-खेटकः - धनुः-दण्डः-हलश्चेत्यायुधानि वर्तन्ते। अत्र भेदः स्पष्टः।[४७१] समराङ्गणसूत्रधारे वर्णितश्रीविष्णुमूर्तेः वर्णनं[४७२] प्रायेण काश्यपशिल्पसमानं वर्तते। चतुर्भुजा मूर्तिः शङ्ख-चक्र-गदा-पद्मसहिता, पीतवस्त्रवृता, श्रिया सहिता, वैडूर्यसङ्काशा समराङ्गणे वर्णिता। काश्यपशिल्पे सस्यश्यामा द्विभुजापि विष्णुमूर्तिर्वर्णितास्ति। सा श्रिया सहिता एकाकी वा भवेत्।[४७३] समराङ्गणसूत्रधारे इन्द्रो वज्रहस्तः, गदायुतः, श्वेताम्बरो वर्णितः।[४७४]

त्रिदशेशः सहस्राक्षौ(क्षो) वज्रभूत् सुभुजो बली।।

किरीटी सगदः श्रीमाञ् श्वेताम्बरधरस्तथा।

श्रोणिसूत्रेण महा(हता) दिव्याभरभूषितः।।[४७५]

काश्यपशिल्पे इन्द्रो द्विनेत्रोऽङ्कुशशक्तिसहितः, सिंहासनस्थो गजोपरिस्थितो वा वर्तते।[४७६]

---

४७० समरा.७७.२६-२९
४७१ का.शि.४८.१-२-३
४७२ समरा.७७.३९-४१
४७३ का.शि. ४८ .१९-२१
४७४ समरा.७७.४२-४३
४७५ उपर्युक्तम्
४७६ का.शि.४८.२४-२५

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्णनं विस्तृतं स्पष्टं चास्ति। स महिषारूढः कृष्णवर्णो रक्तवस्त्रो रक्तनेत्रो वर्णितः।[477] समराङ्गणस्य वैवस्वतवर्णनं न समीचीनं प्रतिभाति। यतो हि तत्र स पीतवासाश्चन्द्रवर्णो वर्णितः।[478] समराङ्गणसूत्रधारेऽनल-समीर-सौम्य-ईशानमूर्तीनां वर्णनमेकस्मिन्नेव श्लोकेऽस्पष्टरीत्योल्लेखमात्रमस्ति।

अर्चिष्मान् क्ष(ज्व)लनः कार्यः (यत्कण्ठाश्च?) समीरणः।

सौम्यः कार्यस्तथा (विस्या?)+ + रुद्रशरीरिणः।।[479]

किन्तु काश्यपशिल्पे काश्यपेन प्रत्येकस्य सर्वलक्षणसंयुक्तं, भिन्न-भिन्नश्लोकेषु विस्तृतं वर्णनं कृतम्।[480]

विनायकस्य वर्णनं समराङ्गणे ७७ तमे प्रतिमालक्षणाध्याये न प्राप्यते। तथैवाश्विनावैक एव श्लोके सूत्रमाल्याम्बरधरौ, जाम्बूनदविभूषितौ, शुभदायकौ वर्णितौ ।[481] काश्यपशिल्पे विस्तृतरूपेण तयोर्विविधलक्षणसहितं वर्णनं दृश्यते।[482] एतेन सिद्धं भवति, यत्काश्यपशिल्पे सर्वासां परिवारदेवतानां शिवमूर्तीनां विविधशिवलिङ्गानां च यादृशं समीचीनं सूक्ष्ममानसहितं विविधलक्षणयुतं विस्तृतं वर्णनं प्राप्यते, न तादृशं स्पष्टं विस्तृतं च वर्णनं भोजदेवेन समराङ्गणसूत्रधारे कृतम्। एतेन काश्यपशिल्पस्य मूर्तिकला दृष्ट्या महत्त्वं वैशिष्ट्यं च विद्योतते।

---

४७७ का.शि.४८.३८-४१
४७८ समरा.७७.४४-४६
४७९ समरा.७७.४८
४८० का.शि.४६.६२ तः ६७
४८१ समरा.७७.५५-५६
४८२ का.शि.४८,३४-३७

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्रतिमानिर्माणं वास्तुशास्त्रस्य महत्त्वपूर्णमङ्गमस्ति। मयमतग्रन्थे ३६ तमेऽध्याये शिव-विष्णु-देवी-देवतानां तथा दिक्पाल-मरुद्गण-सप्तमातृकाणां प्रतिमानिर्माणविषये विवेचनं प्राप्यते। तत्र बुद्ध-जिनप्रतिमानां विवेचनमपि स्पष्टतया प्राप्यते। ब्रह्मा-विष्णु-वराह-त्रिविक्रम-अनन्तशयन-देवी-यक्षिणी-कार्त्तिकेय-गणपति-सूर्य-इन्द्र-अष्टदिक्पाल-मरुद्गण-क्षेत्रपाल-इत्यादीनां प्रमुखानां तथा गौणदेवतानां प्रतिमावर्णनमस्ति। शिवप्रतिमाविषये षोडशविविधस्वरूपाणां वर्णनं वर्तते। सुखासन-विवाह-उमास्कन्द-वृषारूढ-नृत्त-चन्द्रशेखर-अर्धनारीश्वर-चण्डेशानुग्रह-कामारी-कालनाश-दक्षिणामूर्ति-भिक्षाटन-मुखलिङ्ग-लिङ्ग-सम्भूत -इति षोडशस्वरूपाणां वर्णनं द्वि-त्रिश्लोकैर्मयमते प्राप्यते। (३६.४३ तः ११८ पर्यन्तम्)। काश्यपशिल्पे केवलं शिवमूर्तिषु चन्द्रशेखरः,वृषवाहनः,नृतमूर्तिः, गङ्गाधरः, त्रिपुरान्तकः, कल्याणः, अर्धनारीश्वरः, गजहा, पाशुपातः, कंकालः, हर्यर्धरः, भिक्षाटनः, चण्डेशः, दक्षिणामूर्तिः, कालहा - एतासां पञ्चदशशिवमूर्तीनां वर्णनमत्यन्तविस्तृतरूपेण वर्तते। तत्र केवलमुमास्कन्द-सुखासन-वृषारूढ-नृत्तमूर्ति-चन्द्रशेखर-अर्धनारीश्वर-हर्यर्धर-चण्डेश-कालहा-दक्षिणामूर्ति-भिक्षाटन-एता मूर्तयो द्वयोरपि ग्रन्थयोः -काश्यपशिल्पे मयमते च समानरूपेण प्राप्यन्ते। किन्तु मयमते वर्णितानामन्यशिवस्वरूपानां ï विवाह-पुरारि-कामरि-एतासां स्वरूपाणां काश्यपशिल्पे वर्णनं नास्ति। चन्द्रशेखरमूर्तेर्हस्तेषु वरदाभयमुद्रा तथा मृगः परशुश्च मयमते श्लोकेनैकेन वर्णितानि।[४८३] एतानि काश्यपशिल्पेऽपि वर्तन्ते। किन्तु तस्य समग्रमानसहितं विस्तृतं विवेचनं मूर्तिविषयकं काश्यपशिल्पे बहुषु श्लोकेषु प्राप्यते। एवमेव सर्वासां मूर्तिस्वरूपविषये सूक्ष्मेक्षिकया तुलनाकरणे काश्यपशिल्पस्य वर्णनं वैविध्यपूर्णं सूक्ष्ममानसहितं परिपूर्णं सुस्पष्टं च दरीदृश्यते। मयमते सप्तमातृकाणामपि ï ब्राह्मी-माहेश्वरी-

४८३ मयमतम्.अ.३६.८०

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

डा - एतासां वर्णनं विस्तृतरूपेण प्राप्यते।[४८४] काश्यपशिल्पे तासां वर्णनं स्वल्पं किन्तु मयमतेन समानरूपं वर्तते। काश्यपशिल्पे मातृकाणां वर्णनं शिवपरिवारदेवतारूपेणैव। तत्र मयमते चामुण्डा अष्टभुजा, दशभुजा, द्वादशभुजा, षोडशभुजा च वर्णितास्ति।[४८५] काश्यपशिल्पे चामुण्डा चतुर्भुजा वर्ण्यते।

नारदशिल्पशास्त्रम्

काश्यपोक्तं शिल्पं काश्यपशिल्पं नाम्ना प्रसिद्धं तथैव नारदमहिर्षिणापि शिल्पशास्त्रं प्रोक्तं तन्नारदशिल्पनाम्ना प्रसिद्धमस्ति। तथाप्यद्यावधि तत् शिल्पशास्त्रं प्रकाशितं नास्ति। हस्तलिखितग्रन्थेष्वेव सन्निहितमस्ति। सद्भाग्येन वडोदरास्थितप्राच्यविद्यामन्दिरस्य ग्रन्थागारे नारदशिल्पस्य प्रतिकृतिः (क्रमाङ्कः १३५१५ संस्कृतदेवनागरी कर्गजोपरि १२०) पृष्ठानि सङ्गृहीता वर्तते। तस्याप्यध्ययनं काश्यपशिल्पेन साकं तुलना समीक्षा च करणे मया प्रयत्नः कृतः। हस्तलिखितस्य विषये ज्ञानप्रदानार्थं तथा च तस्याः प्रतिकृतिसीडीरूपेण प्रदानार्थं मम मार्गदर्शकानां सहाय्यं बहुमूल्यमस्ति। काश्यपस्य नारदस्य च वास्तुविषयकाणां मूर्तिशिल्पविषयकाणां विचाराणां तुलनया काश्यपशिल्पस्य ग्रन्थस्य वैशिष्ट्यं सुस्पष्टं भविष्यति। तथा च द्वयोविशिष्टपरम्पराणां वैशिष्ट्यान्यवगतानि भविष्यन्ति। अत एव तयोः - काश्यपशिल्पस्य नारदशिल्पस्य च तुलनां कृत्वा काश्यपशिल्पस्य समीक्षाया विषयोऽत्र प्रस्तूयते।

नारदशिल्पशास्त्रग्रन्थे त्रि-अशीतिरध्यायाः सन्ति। तत्राध्यायस्य कृते पाठ इति नामाभिधानम्। काश्यपशिल्पेऽष्टाशीतिरध्यायाः सन्ति। तत्र विवरणं श्लोकबद्धं नास्ति, केवलं गद्य रूपेण नारदः लोकहितार्थं वास्तुशास्त्रं प्रोवाच। काश्यपशिल्पे श्लोकबद्धं विवेचनं वर्तते। नारदशिल्पग्रन्थोऽर्वाचीनो प्रतिभाति, न काश्यपशिल्पवद् बहु प्राचीनः। नारदशिल्पग्रन्थो

---

४८४ मयमतम्. ३६.२१६ तः २३४
४८५ मयमतम्. ३६.२२९-३०, २४१

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

पशिल्पेन साकं तुलना स्यादिति हेतुना नारदशिल्पस्य विविधाध्यायगता विषया अत्रोल्लिखिताः सन्ति विदुषां ज्ञानार्थम्। यथा ï

अध्यायः विषयः

(१) कल्पादौ वर्षधारया बाधितानां जनानां विलापः।

(२) जनकृतशिवस्तुतिः।

(३) तत्र नारदागमनम्। तेन महर्षिणा जनानां निलयनिर्माणोपदेशः।

(४) वास्तुपुरुषमहिमा। स्थानभेदात्तत्स्वरूपभेदश्च।

(५) भवनयोग्यभूमिलक्षणकथनम्। भूमिपरीक्षाक्रमश्च।

(६) ग्रामसीमान्तलक्षणकथनम्।

(७) ग्रामादिस्थलसमीकरणलक्षणम्।

(८) मार्गकथनलक्षणम्।

(९) जलाशयतटाकलक्षणकथनम्।

(१०) प्रणालीसेतुलक्षणकथनम्।

(११) ग्रहादीनामायादीनामानकथनम्।

(१२) दशविद्याग्रामलक्षणकथनम्।

(१३) ग्रामलक्षणकथनम्।

(१४) महाग्रामलक्षणकथनम्।

(१५) ब्रह्मपथग्रामलक्षणकथनम्।

(१६) शाङ्करग्रामलक्षणकथनम्।

(१७) वासवग्रामलक्षणकथनम्।

(१८) संकीर्णग्रामलक्षणकथनम्।

(१९) मुखभद्रग्रामलक्षणकथनम्।

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

म्।

(२१) शुभग्रामलक्षणकथनम्।

(२२) चतुर्दशविधनगरनिर्माणलक्षणकथनम्।

(२३) प्रस्तरनगरलक्षणकथनम्।

(२४) निगमनगरलक्षणकथनम्।

(२५) पट्टलक्षणकथनम्।

(२६) सर्वतोभद्रनगरलक्षणकथनम्।

(२७) कार्मुकनगरलक्षणम्।

(२८) स्वस्तिकनगरलक्षणकथनम्।

(२९) चतुर्मुखनगरलक्षणकथनम्।

(३०) अष्टमुखनगरलक्षणकथनम्।

(३१) वैजयन्तनगरलक्षणकथनम्।

(३२) भूपालनगरलक्षणकथनम्।

(३३) देवेशनगरलक्षणकथनम्।

(३४) पुरन्दरनगरलक्षणकथनम्।

(३५) श्रीनगरलक्षणकथनम्।

(३६) पञ्चविधदुर्गनिर्माणक्रमः।

(३७) गिरिदुर्गलक्षणकथनम्।

(३८) जलदुर्गलक्षणकथनम्।

(३९) वाहिनीदुर्गलक्षणकथनम्।

(४०) युद्धदुर्गलक्षणकथनम्।

(४१) संकीर्णनगरलक्षणकथनम्।

(४२) ग्रामवीथीनगरवीथीप्रमाणादिः।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(४४) नगरसदनभवनप्रमाणलक्षणम्।

(४५) क्षत्रियप्रासादनिर्माणक्रमः।

(४६) राजभवनद्वारलक्षणम्।

(४७) पट्टमहिषीभवनद्वारशालालक्षणम्।

(४८) विवाहशालालक्षणकथनम्।

(४९) भूमिलम्बनलक्षणकथनम्।

(५०) भित्तिलक्षणलक्षणम्।

(५१) अधिष्ठानलक्षणकथनम्।

(५२) उपपीठलक्षणकथनम्।

(५३) नानास्तम्भलक्षणम्।

(५४) भौमभित्तिलक्षणकथनम्।

(५५) सन्धिकर्मनिर्माणविधिः।

(५६) तिर्यक्दारुकविधिकथनम्।

(५७) चन्द्रशालालक्षणकथनम्।

(५८) शिखरकलशस्थापनविधिः।

(५९) भौमान्तर्गेहादिप्रमाणक्रमः।

(६०) शयनशालालक्षणक्रमः।

(६१) भोजनशालालक्षणकथनम्।

(६२) नानागेहलक्षणकथनम्।

(६३) चत्वरप्रकल्पनविधिः।

(६४) नीतिशालालक्षणकथनम्।

(६५) नाटकशालालक्षणकथनम्।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

(६७) गवाक्षलक्षणकथनम्।

(६८) डोलालक्षणकथनम्।

(६९) पर्यङ्कशिबिकालक्षणकथनम्।

(७०) सिंहासनलक्षणकथनम्।

(७१) चित्रालंकृतिरचनाविधिः।

(७२) देवालयबलिकर्मविधिः।

(७३) दैवगर्भविन्यासविधिः।

(७४) देवप्रासादगर्भग्रहलक्षणम्।

(७५) गोपुरकल्पनविधिः।

(७६) प्राकारलक्षणकथनम्।

(७७) नानामण्डपलक्षणकथनम्।

(७८) बलिपीठलक्षणम्।

(७९) ध्वजस्तम्भलक्षणकथनम्।

(८०) देवबिम्बनिर्माणक्रमः।

(८१) बिम्बपीठनिर्माणक्रमः।

(८२) ग्रहप्रवेशक्रमकथनम्।

(८३) नानायाननिर्माणक्रमः।

वास्तुपुरुषमहिमावर्णनपरे चतुर्थपाठे वास्तुलक्षणव्याख्यानसमये वास्तुपुरुषश्चतुर्विधां भूंमिमाक्रम्योर्ध्वकायः कन्यादिषु त्रिषु प्राक्शिरस्तो धनुरादौ दक्षिणाशिरस्को, मीनत्रिषु प्रतीची शिरस्को मिथिनाद्युदीचिदिशिरस्को स्वपिति। अधोनेत्रः शुभार्थी तद् दृष्टिं वर्जयित्वा शुभकाले गृहनिर्माणकार्ये यतेत। इत्येवं विशेषतः प्रतिपादितम्। यद् वर्णनं काश्यपशिल्पे न प्राप्यते।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दृष्ट्या महत्त्वपूर्णस्य वास्तुपदविन्यासस्य विविधदेवतानां पदविभागस्य विवेचनं न कृतं, यत् काश्यपशिल्पादिविविधवास्तुशास्त्रग्रन्थेषु संप्राप्यते।

पञ्चमे पाठे भवनयोग्यभूमिलक्षणे भूमिपरीक्षाकरणे च तेन सिद्ध -असिद्ध -साध्येति त्रिविधं भूमेः स्वरूपं वर्णयित्वा तस्यास्त्रिविधभेदैरुत्तम-मध्यम-अधमत्वं परीक्ष्य शुभकाले भूमिसमाकारं नीत्वा ब्रह्माणं ध्यायन् कार्यारम्भं कुर्यात् -इति वर्णितम्। सिद्ध -असाध्य-साध्येति भूमेस्त्रिविधत्वं नारदेन प्रोक्तम्। (नारद.पा.५) काश्यपशिल्पे केवलं वर्णविषयिणी परीक्षा दृश्यते। वास्तुशास्त्रग्रन्थेषु वर्ण-स्वाद-गन्ध-ध्वन्यादिभिः परीक्षा भूमेर्वर्णिता। न तथा नारदशिल्पे। नारदशिल्पे वर्णितं यत् -

पुण्याश्रममहीधरनद्यन्तिकस्थाः सिद्धास्तदितरे कृष्यर्हीकृताः क्षेत्रवास्तुभागा असिद्धाः साध्याः क्वचिन्नदीजलप्रस्रवणनिम्नोन्नता भूभागाश्चेति माकण्डवनसमुन्नगार्जुनसरलसर्जकमालत्यादिवर्धनकारिण्युत्तमभूर्वेणुपाटलतिनीश-मधूकारग्वधवर्धनकारिणी मध्यमा ,त्वधमा कण्टकवृक्षविदारिका दुष्टप्राणदूषितेऽपि[४८६] (पाठ.५)

नारदशिल्पशास्त्रे विविधपाठेषु दशविध-महाग्राम-ब्रह्मपथग्राम-शाङ्करग्राम-वासवग्रामादिविविधग्रामाणां तथा चतुर्दशविधनगरनिर्माणस्य वर्णनं विविधपाठेषु विशेषतः प्राप्यते। तदनन्तरं पञ्चविधदुर्गनिर्माणस्य प्रासाद-राजभवननिर्माणस्य च विवरणं वर्तते। एते विषया वस्तुशास्त्रदृष्ट्या महत्त्वपूर्णाः सन्ति। किन्तु काश्यपशिल्प एतेषां वर्णनं न वर्तते। यतो हि तस्योद्देशः प्रायेण देवप्रासादस्य वर्णने, तत्रापि शिवप्रासादनिर्माणे शिवमूर्तिनिर्माणविषये वर्तते। नारदशिल्पे भित्ति-अधिष्ठान-उपपीठ-नानास्तम्भ-विविधमण्डप-निर्माणस्य वर्णनं पाठेषु ५०-५१-५२-५३-७७-वर्तते। तथैव देवगर्भविन्यास-गोपुरकल्पन-प्राकारलक्षण-देवबिम्बनिर्माणेति विषयाः ७३-७४-७५-७६-८०-पाठेषु दरीदृश्यन्ते। गद्यसूत्रात्मकशैल्या विवरणमिदं प्राप्यते। तत्र देवप्रतिमानिर्माणेऽपि सामान्यतया देवमूर्तीनां निर्माणविवेचनं

---

४८६ नारद.शि.शा.पा.५,पृ.४

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्तैर्विविधायुधमानसहितं विवरणं न प्राप्यते। एतेन स्पष्टं भवति यन्नारदशिल्पे मूर्तिकलाया विषयो न तथा विवेचितः, यथा काश्यपशिल्पे विस्तृतरूपेण स्पष्टतया विवेच्यते। स्तम्भानां विषये नारदशिल्पे षड्विधत्वं प्रतिपाद्य तेषां नानाविधत्वं लक्षणान्तरभेदान्निर्दिष्टम्। यथा-

अथ वै स्तम्भकल्पनानि नानारूपण्यथो वर्तुलानि, चतुरश्रकाणि, वा षडश्रकाणि, अष्टाश्रकाणि,दशाश्रकाणि वा द्वादशकानि - इति षट् संख्याकावन्ति।[४८७]

काश्यपशिल्पे तु देवालयस्य विविधस्तम्भानां विविधप्रकारा ब्रह्मकान्त-विष्णुकान्त-रुद्रकान्त-चन्द्राकान्तादिका वर्गाकाराः, षट्कोणाः, अष्टकोणाः,षोडशकोणाः, वर्तुलाकाराः,कुम्भमण्डादियुता विस्तारपूर्वकं वर्णिताः।[४८८]

नारदशिल्पशास्त्रे देवबिम्बनिर्माणक्रमेऽशीतितमे पाठे पञ्चलोह-सौवर्ण-राजत-ताम्रादिभिर्देवबिम्बनिर्माणस्य वर्णनं प्रदत्तम्। तत्र लिखितं यथा-

सिद्धीकृतैः पञ्चलोहपटलकैर्वाहो पृथक् सौवर्णै राजकतकैस्ताम्रैरन्यकैर्वाहो सल्लोहैः।[४८९]

काश्यपशिल्पे तु विविधाः प्रतिमाश्चल-अचल-चलाचलरूपा वर्णिताः। तासु चलाचलप्रतिमासु मृत्तिकाया, बालवालुकया, सुधया निर्मिता प्रतिमा अचला कथिता। रत्नधातूनां चलाचलरूपा प्रतिमा वर्णिता। तथैव लोहस्य प्रतिमा चलप्रतिमा वर्णिता।[४९०]

अथामुष्मिन् वै सार्वजातिके उभयशैलीको वाथो विविधतालप्रमाणे सार्वमानके सहनखरेखिकापादौ नूपुराभरणकौ जङ्घे पृथुलसारके ऊरुजघनं नाभिरयो वक्षः पृथुलबाहुदलिकाः कण्ठोपरि मुखं किरीटकं ललाटकमौलिभद्रके कचिद्वै शीर्षकं वाहो करण्डकमभिजनकं प्रकृत्वा नानाभरणशोभितान्यङ्गानि लावण्यवन्त्यो

४८७ नारद.शि.शा.पा.५३
४८८ का.शि.८.१०-११-१२
४८९ नारद.शि.शा.पा.८०
४९० का.शि.५०.१-२

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्यथामानं हरिहरविरिञ्चिदिक्पतिमुखदेवानामथो देवीनां स्थानकयोग्य वाहा वास्तुकयोग्यं नानारूपपीठम्।[४९१]

उपर्युक्तसन्दर्भे नारदशिल्पे विविधदेवीदेवतानां केवलं निर्देशं कृत्वा तेषां प्रतिमानिर्माणविषये सामान्यतो वर्णनं प्रस्तुतमस्ति। काश्यपशिल्पे तु विविधशैलीनां समन्वयस्य निषेधः स्पष्टरूपेण वर्तते। अत्र नारदशिल्प उभयशैलीकस्य निर्देशो वर्तते। न कस्यापि देवताया मानसहितमायुधादिसहितं सुस्पष्टं वर्णनं प्राप्यते। काश्यपशिल्पे तु विविधपरिवारदेवतानां तथा शिवप्रतिमानां लिङ्गप्रभेदानां नन्दीवर्णनसहितं विविधमानायुधादिसहितं विशिष्टं वर्णनं संप्राप्यते, इति तस्य विशेषो दृग्गोचरी भवति।

नारदेन ७७ तमे पाठे दैविकमण्डपलक्षणं व्याख्यातम्। तत्र ब्रह्मपदे गन्धर्वपदे वा दैविकमण्डपस्य स्थापनं वर्णितम्। नानास्तम्भाधारितं नानाङ्गणयुक्तं तथान्तस्थले चतुष्पादकम्-अष्टपादकं-द्वादशाघ्रिङ्कं-षोडशाङ्घ्रिकं-चतुर्विंशत्पादकं-द्वात्रिंशत्पादकं वा प्रकल्पितम्।[४९२] काश्यपशिल्पे तु प्रथमं मुख-प्रतिमा-स्नान-नृत्येंति चतुर्विधत्वं मण्डपानां प्रतिपाद्यानन्तरमाकारानुसारं वैविध्यपूर्णं विविधमण्डपानामाभास-छन्द-जाति-वर्गाकारादीनां चतुर्दशाधिकानां विवरणं मानसहितं प्राप्यते।

नारदशिल्पशास्त्रे ७५ तमे पाठे गोपुरकल्पनविधिर्विस्तारेण वर्णितः। मन्दिरेषु देवानां प्रासादेषु देवीनां च पुरतः क्वचित् पश्चाद् भागे चतुर्षु भागेषूत्तुङ्गं गोपुरं निर्मापयेयुः। त्रिभूमिक उत्तुङ्गं गोपुरं निर्दिष्टम्। तत्र पार्श्वपट्टिटाकासु देव-यक्ष-गन्धर्व-किन्नर-दिक्पालमुखानां बिम्बानां क्वचित् सात्त्विकं, क्वचिद् भैरवं, क्वचिच्छान्तं तथा संकीर्णकं नानाभेदकं रूपं देवदेवीनां च वर्णितम्। काश्यपशिल्पे सप्ततलपर्यन्तानां विविधगोपुराणां दीर्घता-विस्तार-अलङ्कारसहितं विस्तृतं वर्णनं प्राप्यते। एतेन द्वयोर्भिन्नता काश्यपशिल्पस्य च महत्त्वं वैशिष्ट्यं च प्रकटीभवति।

---

४९१ नारद.शि.शा.पा.८०
४९२ नारद.शि.शा.पाठ.७७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

र्वा-

सोमेश्वरराज्ञा विरचिता मानसोल्लासः - अथवा अभिलषितार्थचिन्तामणिः सर्वसङ्ग्राहको ग्रन्थो वर्तते। तस्य द्वितीयप्रविभागे छन्दोबद्धैः श्लोकैर्वास्तुशास्त्रस्य मूर्तिकलायाश्च विषयो विवर्णितो वर्तते। भूमिलक्षणविषये तत्र काश्यपशिल्पसमानमेव भूमेश्चतुर्विधत्वं वर्णानुसारं तथा परीक्षा श्लोकेनैकेन विवर्णिता। वर्ण-स्वाद-गन्ध-ध्वनि - इत्यादिभिर्भूमेश्चतुर्विधं लक्षणं न प्रस्तुतम्। यथा-

विप्राणां पाण्डुरा भूमिर्लोहिता क्षत्रजन्मनाम्।
पीता विशां समाख्याता वृषलेषु च मेषका।।
रत्निमात्रकृतं गर्तं पूरयेत्तन्मृदा पुनः।
लाभमभ्यधिके विन्द्याद्धीने हानि समे समम्।
धनिष्ठादीनि सन्त्यज्य पञ्चर्क्षाणि प्रयत्नतः।।[४९३]

मानसोल्लासे प्रथमेऽध्याये तृतीयविंशत्यां १३२ तः १७९ पर्यन्तं चित्रविषयकं वर्णनं वर्तते। यत्र शुद्धद्रव्याणि, मिश्रवर्णानि, चित्रवर्णानि चेंति विविधा वर्णभेदाः, वर्णानां मिश्रणमित्यादिका विषया वर्णिताः। काश्यपशिल्पेऽपि पटलद्वये वर्णसंस्कारस्य लक्षणं तथा वर्णलेपनं विवर्णितमस्ति।[४९४] तत्रापि वर्णानामुपयोगविषये मिश्रीकरणविषये च महत्त्वपूर्णं वर्णनं वर्तते। मानसोल्लासे प्रथमाध्यायस्य तृतीयविंशत्यां (६८६ तः ८३५ पर्यन्तं) विविधदेवतानां मूर्तीणां तथा च चित्राणां निर्माणार्थं तेषां लक्षणानि स्थूलमानेन प्रदत्तानि सन्ति। तत्र केशवादिचतुर्विंशतिमूर्तिभेदाः, अष्टबाहुहरिः, वामनश्रीरामनृवराहनरसिंहत्रिविक्रममत्स्यकूर्म (जिन-बुद्ध-कल्कीरहितम्)विविधावताराः ब्रह्म- देव - दैत्य - दानव - पिशाच -वेताल- क्षेत्रपाल-कामदेव-राहुकेतुसहिता नवग्रहाः -एतेषां वर्णनं प्राप्यते। तथैव महादेव-स्वच्छन्दभैरव-अर्धनारीश्वर-उमामहेश्वर-हरिहर-मूर्तीनां साकं शिवपरिवारस्य कार्त्तिकस्वामी-गणेश-काली-

---

४९३ मानसोल्लासः, अ.१, विंशतिः ३.१४-१६
४९४ का.शि.प.८५-८६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

कुबेर-ईशान-मातृका-नाग-एतेषामपि स्वल्पविवरणसहितं वर्णनं प्राप्यते।

अत्र विशेषतो वर्णितं यत् महादेवश्चतु:-अष्ट -दश-षोडश-अष्टादशुजयुक्तो वर्तते। तथा चैतेषु हस्तेषु विविधानि शस्त्राणि धृतानि वर्णितानि। गजासुरहन्ता, त्रिपुरारि-स्वच्छन्दभैरव-शान्तमूर्ति-शिवो वर्णित:। अनन्तरं चार्धनारीश्वरस्य लक्षणं वर्तते। दक्षिणहस्ते त्रिशूलं वामहस्ते दर्पणमिति वर्णनं कृतं सोमेश्वरेण।[४९५]

अर्धनारीश्वरो देव: कथ्यते लक्षणान्वित:।
दक्षिणं पुरुषाकारं वामं योषिन्मयं वपु:।।
त्रिशूलं दक्षिणे हस्ते वामहस्ते च दर्पणम्।
उत्पलं वा प्रकुर्वन्ति केयूरवलयान्वितम्।
दक्षिणे श्रवणे नागं वामे कर्णे तु कुण्डलम्।
जटाभारो दक्षिणे स्यादर्ध(थ) चन्द्रार्धभूषित:।।[४९६]

एतादृशं वर्णनं त्रिशूलस्य दर्पणस्य चोल्लेख: काश्यपशिल्पे न प्राप्यते। इति द्वयोर्वैशिष्ट्यं प्रतिभाति। त्रिशूलस्य नैकवारमुल्लेखो मानसोल्लासे प्राप्यते।

अक्षमालामसिं शक्तिं दण्डं शूलं च दक्षिणे।
खट्वाङ्गं भुजगं चैव कपालं खेटकं तथा।।[४९७]

काश्यपशिल्पे शूलस्योल्लेखो न स्पष्टतया त्रिशूलस्य। उमामहेश्वरस्वरूपं मानसोल्लासे वर्णितम्। उमामहेश्वरो त्रिनेत्रो द्विभुजश्चतुर्भुजो वा जटाधारी, पार्वतस्कन्धविन्यस्तैककर:, द्वितीय: कुचे, शूलमुत्पलकं धारयति सव्यकरे- इत्थं वर्णितम्।

नरनारीमयं देवमेवं चित्रे प्रकल्पयेत्।
उमामहेश्वरस्यापि स्वरूपं वर्ण्यतेऽधुना।।

---

४९५ मानसोल्लास:,१.विंशति: ३, श्लो-७३४ त: ७४०, पृ.६६
४९६ मानसोल्लास: अ.१.विंशति: ३, ७३४-७३६
४९७ मानसोल्लास: अ.१.विंशति: ३,७२७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

। चतुर्बाहुं जटामण्डलमण्डितम्।

त्रनत्र पार्वतीस्कन्धविन्यस्तैककरं कुचे।।

करं द्वितीयं सव्ये तु शूलमुत्पलकं लिखेत्।

वामं पद्मासनं पादं दक्षिणं किञ्चिदञ्चितम्।।

एवमर्धेन्दुसंस्थाने निविष्टं शङ्करं लिखेत्।

वामोरुवर्तिनीं देवीं हरवक्त्रावलोकिनीम्।।

स्पृशन्तीं देवदेवस्य वामांसं लीलया लिखेत्।

दक्षिणैः करजैः स्कन्धं स्पृशन्तीं कुक्षिमेव वा।।

उत्पलं वामहस्तेन दर्पणं वापि विभ्रतीम्।

जयां च विजयां पार्श्वे गणेशं षण्मुखं लिखेत्।।

उमामहेश्वरस्यैवं स्वरूपं परिकीर्तितम्।

देवं हरिहरं वक्ष्ये सर्वपातकनाशनम्।।[४९८]

मानसोल्लासे हरिहरस्वरूपवर्णनं प्राप्यन्ते।[४९९] अस्यैव वर्णनं काश्यपशिल्पे हर्यर्धहरनाम्ना वर्णितमस्ति। दक्षिणे वरदमुद्रा तथा शूलं, वामभागे शङ्खचक्रौ वर्णितौ। काश्यपशिल्पे तु दक्षिणेऽभयं परशुस्तथा वामे शङ्खं कटकं चेत्यायुधानि वर्णितानि। शिवभागः सुधांशुधवलः कार्यः - इति मानसोल्लासे वर्णितम्, किन्तु काश्यपशिल्पे प्रवालश्यामरूपं वर्णितम्। दक्षिणे उग्रदृष्टिः, वामे शीतलदृष्टिः - इति विशेषतो काश्यपशिल्पे निर्दिष्टं वर्तते। एवंरीत्या महादेव-स्वच्छन्दभैरव-अर्धनारीश्वर-उमामहेश्वर-हरीहरेत्येतेषां शिवस्वरूपाणां वर्णनं केषुचित् श्लोकेषु मानादिविचाररहितं मानसोल्लासे दृश्यते। काश्यपवर्णितानां सुखासन-कङ्काल-दक्षिणामूर्ति-वृषभारूढ-इत्यादीनां स्वरूपाणामुल्लेखो मानसोल्लासे न दृश्यते।

---

४९८ मानसोल्लासः,अ.१ विंशतिः ३.७४०-७४६
४९९ अ.१ विंशति-३ ७४६ तः ७५३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तु:-द्वादश-भुजा निर्दिष्टा:। काश्यपशिल्पे तु द्वि-चतु:-षड्-द्वादश-हस्ता: कथिता। हस्तेष्वायुधानां वर्णने द्वयोरपि काश्यपशिल्पे मानसोल्लासे च कुक्कुटस्योल्लेखो विशेषरूपेण प्राप्यते। मानसोल्लासे कार्त्तिकेयस्य वाहनरूपेण मयूरस्योल्लेखो वर्तते।

विनायकस्य स्वरूपस्य वर्णनं मानसोल्लासे ७६० त: ७६४ श्लोकेषु वर्तते। तत्र गजमुखस्य त्रिनेत्रस्य महोदरस्य चतुर्बाहुयुक्तस्य वर्णनं वर्तते। एकहस्ते भग्नदन्त:, अन्यहस्ते उत्पलं तथा वामहस्तयो: कुठारं लड्डुकं च धारयति। सिद्धिबुद्धिसहित आखुवाहनयुतो विनायक: कार्य:। अत्र यत् सिद्धिबुद्धिसहितस्याखुवाहनस्य वर्णनं कृतं न तथा काश्यपशिल्पे प्राप्यते। काश्यपशिल्पे हस्तेषु पाश-अङ्कुश-भग्नदन्त-मोदकानि वर्णितानि। अपवादरूपेण वामहस्तेषु पाश:, नाग: लघु-अक्षमाला वा निर्दिष्टा।

मानसोल्लासे वह्ने: स्वरूपं वर्णितम्। तत्र मेषपृष्ठस्थितो भुजद्वयसमन्वित: शीर्षे सप्तज्वालाभि: समन्वितो वर्णित:। तस्य दक्षिणहस्तेऽक्षसूत्रं, वामे कमण्डलुर्वर्तते। (७६६-७८१) काश्यपशिल्पे तु भिन्नं वर्णनं प्राप्यते। सप्तजिह्वा मुखद्वययुत: षडुदर: सप्तहस्तो वर्णित:। तस्य हस्तेषु शक्ति:, अन्नं, स्रुक्, स्रुवा- दक्षिणं प्रति चतुर्हस्तेषु , वामहस्ते तोमरं, व्यजनम्, घृतभाण्डारं च भवति। अत्र मेषपृष्ठे स्थितस्योल्लेखो नास्ति।

सप्तमातृकानां केवलं नामनिर्देशो मानसोल्लासे प्राप्यते। प्रत्येकस्या: पृथक्-पृथगायुधादिसहितं लक्षणसंयुतं वर्णनं नास्ति। काश्यपशिल्पे तु प्रत्येकस्या मातृकाया लक्षणायुधादिसमन्वितं परिपूर्णं पृथक् पृथक् च वर्णनं वर्तते।

मानसोल्लासेऽष्टबाहुहरिमूर्तेरायुधसहितं विवरणं प्राप्यते।

अष्टबाहोर्हरेर्मूर्तेरायुधानि वदाम्यहम्।
नन्दकश्च गदा बाण(:) पद्म(द्मं)दक्षिणबाहुषु।।
शङ्खो धनुस्तथा चक्रं खेटकं वामबाहुषु।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

नृसिंहश्च दशतालौ प्रकीर्तितौ।।[५००]

किन्तु काश्यपशिल्पे तु चतुर्बाहोर्द्विबाहोर्वा विष्णोर्मूर्तेर्वर्णनं प्राप्यते, नाष्टबाहोः।

मानसोल्लासे सुरराजस्येन्द्रस्य वर्णने इन्द्राण्यास्तथा च छत्रचामरधारिण्यः स्त्रियश्चोल्लेखो वर्तते। तत्र हस्तद्वयेषु दक्षिणे कुलिशं वामे उत्पलं निर्दिष्टम्।

सुरराजं प्रवक्ष्येऽहमैरावणसमाश्रितम्।।
किरीटकुण्डलधरं भुजद्वयसमन्वितम्।
कुलिशं दक्षिणे पाणौ वामहस्ते तथोत्पलम्।।
दिव्यरत्नविभूषाढ्यं दिव्यचीनांशुकैर्युतम्।
छत्रचामरधारिण्यः स्त्रियः पार्श्वे च कल्पयेत्।।
सिंहासनस्थमथवा लिखेद् गन्धर्वसंयुतम्।
इन्द्राणीं वामतस्तस्य लिखेन्दुत्पलधारिणीम्।।
दिव्यशृङ्गारसंयुक्तामिन्द्रवक्त्रावलोकिनीम्।[५०१]

काश्यपशिल्पे इन्द्राण्या उल्लेखो नास्ति। दक्षिणे हस्ते शक्तिः, वामहस्तेऽङ्कुशस्य च निर्देशो वर्तते। विशेषतो तत्र बृहदुदरस्य, बृहद्ग्रीवायाश्च समुल्लेखो महत्त्वपूर्णोऽस्ति।

यमस्य वर्णनं द्वयोर्ग्रन्थयोः प्रायेण समानं वर्तते। तत्र केवलमायुधविषये भेदो मानसोल्लासे दण्डपार्श्वधरो यमो वर्णितः।

दण्डपार्श्वधरं दोर्भ्यां प्रदीप्ताग्निविलोचनम्।
महामहिषमारूढं सिंहासनमथापि वा।।[५०२]

काश्यपशिल्पे तु खड्ग-खेटकधरो यमो वर्णितः। वरुणः शुक्लाम्बरधरस्तथा पाशपङ्कजहस्तो मानसोल्लासे वर्णितः। काश्यपशिल्पे पाशहस्तः, शान्तमुद्रायां पीतवस्त्रधारी वर्णितः। मकरोपर्युपविष्टत्वं द्वयोः समानम्।

---

५०० मानसोल्लासः, अ.१ .विंशतिः ३ .६९५,६९६
५०१ मानसोल्लासः अ.१ .विंशतिः३ .७७२-७७६
५०२ मानसोल्लासः १ .विंशतिः ३ ,७८२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...य हरिणवाहनत्वं तथा दक्षिणे हस्ते वरदत्वं वामे हस्ते पताकाधारित्वं वर्णितम्।

चित्राम्बरधरं देवं चित्ररत्नविभूषितम्।
वरदं दक्षिणं हस्तं वामं युक्तं पताकया।।[५०३]

किन्तु काश्यपशिल्पे तस्य दक्षिणहस्ते ध्वजो वामहस्ते दण्डो वर्णितः। हरिणस्योल्लेखो नास्ति।

कुबेरमूर्तिवर्णनं प्रायेण समानं प्राप्यते। मानसोल्लासे तस्याष्टनिधियुक्तत्वं वर्णितम्।

हरमित्रं प्रवक्ष्यामि दिव्यहारविभूषितम्।।
किरीटकुण्डलयुतं श्वेताम्बरविराजितम्।
नरयुक्तविमानस्थं गदापाणिं वरप्रदम्।।
महोदरं महाबाहुं गौरवर्णं मनोहरम्।
अष्टाभिर्निधिभिर्युक्तं द्रविणव्यग्रपाणिभिः।।[५०४]

काश्यपशिल्पे तु पद्मनिधिः शङ्खनिधिश्च द्वयोरेवोल्लेखः।

श्रीदेव्या वर्णनं मानसोल्लासे ७९९ तः ८०३ श्लोकेषु वर्तते। तत्र विशेषो यत् श्रीदेवी श्वेतपद्मासना श्वेतवस्त्रधारिणी वर्णिता। तया दक्षिणहस्ते श्रीफलं वामे च पद्मं धारितम्। काश्यपशिल्पेऽस्य विपरीतं दक्षिणे हस्ते पद्मं वामे श्रीफलं वर्णितम्।

श्रीफलं दक्षिणे पाणौ वामे पद्मं तु बिभ्रतीम्।
श्वेतपद्मासनासीनां श्वेतवस्त्रविभूषिताम्।।[५०५]

शिल्परत्नाकरः

शिल्परत्नाकरे देवतास्वरूपलक्षणाधिकार एकादशरत्ने शिवमूर्तीनां स्वरूपवर्णनं क्रियते। तत्र सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशान-मृत्यञ्जय-हिरणाक्ष-श्रीकण्ठ-अहिर्बुध्न-

---

५०३ मानसोल्लासः अ.१ .विंशतिः ३, ७८९
५०४ मानसोल्लासः अ.१ .विंशतिः ३, ७९०-७९२
५०५ मानसोल्लासः, अ.१ .विंशतिः ३ .८०१

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

द्रमूर्तीनां विशेषतो वर्णनं प्राप्यते। (शिल्परत्ने-१८४-२०९) काश्यपशिल्पे एतासां मूर्तीनां वर्णनं न प्राप्यते। यद्यपि काश्यपशिल्पग्रन्थः शिवमूर्तिवर्णनप्राधान्ययुक्तः, तथाप्येकादशरुद्राणां स्वरूपविवरणं तत्र नास्ति, इति विचारणीयम्।

शिल्परत्नाकरे उमामहेश्वरमूर्तिर्लक्षणवर्णनमुमयासहितस्य शङ्करस्य वर्णनं वर्तते। तत्र विशेषतो वृषभस्य कुमारस्य गणेशस्य भृगीरटस्य च निर्देशो ध्यानाकर्षकः। शिववर्णने काश्यपशिल्पे कार्त्तिकेयस्योल्लेखो वर्तते, किन्तु गणेशो विनायकः केवलं परिवारदेवतारूपेण न तु समीपस्थो वर्णितः।

शिल्परत्नाकरे हरिहरमूर्तिवर्णने वरदमुद्रा-त्रिशूल-चक्र-अब्जधारिहस्तयुतस्तथा दक्षिणपार्श्वे वृषभो वामे गरुडो निर्दिष्टः। अयं विशेषः।

कार्यो हरिहरस्यापि दक्षिणार्धे शिवः सदा।
हृषीकेशश्च वामार्धे श्वेतनीलाकृतिः।।
वरत्रिशूलचक्राब्जधारिणौ बाहुषु क्रमात्।
दक्षिणे वृषभः पार्श्वे वामे विहगराडिति।।[५०६]

काश्यपशिल्पे तु हर्यर्धहरवर्णने वामहस्तयोः शङ्खं-गदा चक्रं वा, दक्षिणहस्ते परशुरभयमुद्रा च विवर्णिता। वृषभस्य गरुडस्य चोल्लेखो नास्ति।

दन्तपरशुपद्ममोदकानि हस्तेषु विभ्राणो गजाननो मूषकारूढः शिल्परत्नाकरे वर्णितः।

दन्तश्च परशुं पद्मं मोदकञ्च गजाननः।
गणेशो मूषकारूढो बिभ्राणः सर्वकामदः।।[५०७]

काश्यपशिल्पे हस्तेषु पाश-अङ्कुश-भग्नदन्त-मोदकानां निर्देशः। मूषकवाहनस्य न निर्देशः। वामहस्ते पाशः, अक्षमाला नागो वा काश्यपेन वर्णितः।

---

५०६ शिल्परत्नाकरः ११.२१३-२१४
५०७ शिल्परत्नाकरः ११.३०६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ने बाणलिङ्गं मुखलिङ्गमेव वर्णितम्। काश्यपशिल्पे तु विविधाष्टप्रकाराणां लिङ्गानां वर्णनं दृश्यते।

शिल्परत्नाकरे कार्त्तिकस्वामिनो वर्णने मयूरवाहनस्य द्वि-चतुः -द्वादश-वा हस्ता निर्दिष्टाः। तत्र दक्षिणहस्तेषु शक्तिः-पाशः-खड्गः-बाणः-त्रिशूलं-वरदमुद्रा अभयमुद्रा वा वर्णिता। वामहस्तेषु धनुःï पताका-मुष्टिः-तर्जनी-खेटकं-ताम्रचूडश्च वर्णितः। द्विभुजेषु दक्षिणहस्ते शक्तिः, वामहस्ते कुक्कुटः। चतुर्भुजेषु दक्षिणहस्तेषु असिः-वरदमुद्रा अभयमुद्रा वा, वामहस्तयोः शक्तिः पाशो वर्तते।[५०८] काश्यपशिल्पे कार्त्तिकस्वामिनो मूर्तिर्द्धिः-चतुः-षड्-द्वादश हस्ता वा वर्णिताः। हस्तयोर्वामहस्ते कुक्कुटः, दक्षिणहस्ते शक्तिर्वर्तते। दक्षिणहस्तयोरभयं शक्तिश्च वामहस्तयोः कुक्कुटम्-अक्षमाला च वर्तते। द्वादशहस्ताः सन्ति, तदा दक्षिणहस्तेषु शक्तिः-बाणः-खड्गः-चक्रं-प्रासः, एको हस्तः प्रसारितः, वामहस्ते पिच्छः-खड्गः-काकूटकः-खेटकश्च, तथैव प्रमाणेन धनुः-दण्डः-हलश्च वर्तन्ते।

काश्यपशिल्पे चामुण्डा चतुर्हस्ता वर्णिता। शिल्परत्नाकरे तु षोडशहस्ता भुजङ्गाभरणयुक्ता शवारूढा चामुण्डा वर्णिता। तस्याः षोडशहस्तेषु त्रिशूल-खेट-अङ्कुश-खड्ग-धनुः-पाश-पद्म-कुठार-दर्पण-घण्टा-शङ्ख-चक्र-गदा-वज्र-दण्ड-मुद्गरा इत्यायुधानि सन्ति।

चामुण्डा क्रूररूपा च पिङ्गकेशा कृशोदरी।
रक्ताक्षी मग्ननेत्रा च निर्मांसा विकृतानना।।
व्याघ्रचर्मपरीधाना भुजङ्गाभरणान्विता।
कपालमालिनी कृष्णा शवारूढा भयावहा।।
शूलखेटांकुशा खड्गो धनुः पाशः कुशेशयम्।
कुठारो दर्पणं घण्टा शङ्खश्चक्रं गदा पविः।।
दण्डो मुद्गर इत्येतैर्यथास्थायुधसंयुता।

५०८ शिल्परत्नाकरः,११.३१७-३२२

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

...संयुक्ता चण्डमुण्डविघातिनी ।।[509]

काश्यपशिल्पे तु चतुर्हस्ता त्रिनेत्रा च वर्णिता। तस्या हस्तयोरभयवरदमुद्रा तथा शूलं कपालं च वर्तते।

शिल्परत्नाकरे लक्ष्मीश्चतुर्हस्ता वर्णिता। तस्या ऊर्ध्वहस्तयोः पङ्कजौ तथा वामहस्तेऽमृतघटः, दक्षिणहस्ते मातुलिङ्गकं वर्णितम्।

अष्टपत्राम्बुजस्योर्ध्वे लक्ष्मीः सिंहासने शुभे।
विनायकवदासीना सर्वाभरणभूषिता ।।
ऊर्ध्वहस्तौ प्रकर्तव्यौ देव्याः पङ्कजधारिणौ।
वामेऽमृतघटं धत्ते दक्षिणे मातुलिङ्गकम् ।।[510]

काश्यपशिल्पे तु लक्ष्मीर्हस्तद्वयान्विता वर्णिता। तस्या हस्तयोः कमलं श्रीफलं च वर्तते।

शिल्परत्नाकरे सरस्वती वर-अक्ष-अब्ज-पुस्तकधारिणी चतुर्हस्ता वर्णिता।

अक्षाब्जवीणापुस्तका महाविद्या प्रकीर्तिता।
वराक्षाब्जपुस्तका च सरस्वती शुभावहा ।।[511]

काश्यपशिल्पे तु तस्या चतुर्षुहस्तेषु व्याख्यानमुद्रा-अक्षसूत्रं-पुस्तकं कुण्डिका च समुल्लिखिता।

शिल्परत्नाकरे सप्तमातृकाणां वर्णनं (श्लो.३५४ तः ३६३ पर्यन्तं) तत्र प्रत्येकस्या मातुर्भिन्न-भिन्नश्लोकेषु स्पष्टरूपेण वर्णनं प्राप्यते। ब्रह्माण्यधोहस्तद्वयेऽक्षमालां कमण्डलुं धारयन्ती, ऊर्ध्वहस्तयोः स्रुचं पुस्तकं धत्ते। काश्यपशिल्पे सा शूलम्-अभयवरदमुद्राम्-अक्षमालिकां च धारयति। शिल्परत्नाकरे माहेश्वरी कपाल-शूल-खट्वाङ्गा वरदा चतुर्भुजयुक्ता च प्रकीर्तिता। काश्यपशिल्पे सा चतुर्षु हस्तेषु शूलं वरदाभयमुद्रां जपमालां च धारयतीति वर्णितम्। कौमारी शिल्परत्नाकरे वर-त्रिशूल-शक्ति-गदाधारिणी कीर्तिता। काश्यपशिल्पे सा

---

५०९ शिल्परत्नाकरः ११.३२९-३३२
५१० शिल्परत्नाकरः.११.३४८-३४९
५११ शिल्परत्नाकरः,११.३५३

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

…द्रां च धारयन्ती वर्णिता। वैष्णवी चतुर्बाहुयुक्ता शङ्ख-चक्र-गदाधरा वरदा च निर्दिष्टा शिल्परत्नाकरे। काश्यपशिल्पे सा शङ्खं चक्रम्, अभयवरदमुद्रां हस्तेषु धारयन्ती वर्णिता। वाराही घण्टा-चामरधारिणी गदाचक्रधरा शिल्परत्नाकरे वर्णिता। काश्यपशिल्पे त्वङ्कुशम्-अभयमुद्रा-वरदमुद्रा-शक्तिश्चैतैर्युता वर्णिता।

शिल्परत्नाकरे चतुर्हस्तः क्षेत्रपालो दिगम्बरो घण्टाविभूषितो मुण्डपालोपवीतिकः सर्पशेखरो वर्णितः। तस्य दक्षिणहस्तयोः कर्त्तिका डमरुश्च, वामहस्तयोः शूलं कपालं च वर्णितम्।

क्षेत्रपालो विधातव्यो दिग्वासा घण्टभूषितः।
कर्त्तिकां डमरुं बिभ्रद् दक्षिणे तु करद्वये।।
वामे शूलं कपालञ्च मुण्डमालोपवीतिकः।
ह्रस्वहस्तो महोरस्कः सर्पग्रन्थितशेखरः।।[५१२]

काश्यपशिल्पे तस्य सात्त्विक-राजस-तामसरूपेण त्रिविधं स्वरुपं वर्णितम्। तस्य द्वि-चतुः-षड्-अष्टहस्तयुक्तं विविधं रूपं वर्णितम्। हस्तद्वये शूलं, कपालं, खट्वाङ्गं, खड्गं, वरदमुद्रा, वामहस्ते द्वे घण्टिके, राजसक्षेत्रपालस्य हस्तेषु शूलं, खड्गं, घण्टा, खेटकं, कपालं, नागपाशो भवति। तामसे तु दक्षिणहस्ते धनुर्बाणं धृतं भवति।

बृहत्संहिता

वराहमिहिरविरचितो बृहत्संहिताग्रन्थः सर्वसमावेशको वर्तते। तत्र विशेषतो ज्योतिषस्य फलादेशस्य च विवरणं प्राप्यते। किन्तु तस्य १०७ अध्यायेषु विविधान्यवैज्ञानिकतथ्यानां विवेचनमपि वर्तते। तस्य ५३तमेऽध्याये वास्तुविद्यायास्तथा ५६तमेऽध्याये प्रासादलक्षणस्य, ५८तमेऽध्याये प्रतिमालक्षणस्य च सिद्धान्ताः प्रतिपाद्यन्ते। काश्यपशिल्पे स्तम्भानां विविधाः प्रकारा वर्णिताः - यथा ब्रह्मकान्तः, विष्णुकान्तः, रुद्रकान्तः, चन्द्रकान्तः, शिवच्छन्दः, व्यालपादः - इत्यादिनाम्ना वर्णिताः। ते च वृत्ताकाराः, चतुरस्राः, आयताकाराः, चतुष्कोणाः,

५१२ शिल्परत्नाकरः,११,३६५,३६६

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

दिवैशिष्ट्ययुक्ता विवर्णिता विस्तारेण। बृहत्संहितायां श्लोकनकन स्तम्भस्य प्रकाराः समचतुरस्रो रुचकः, अष्टकोणो वज्रः, षोडशकोणो द्विवज्रः, द्वात्रिंशत्कोणः प्रलीनकः, वर्तुलत्वेन वृत्तः - एवं प्रकारेण पञ्चस्तम्भानां वर्णनं वर्तते।[५१३]

बृहत्संहितायाः ५३तमेऽध्याये ८१ पदवास्तुदेवतावर्णनपरेषु (श्लोकेषु ४२ तः ५० पर्यन्तम्) अन्तर्भागे त्रयोदशसुराः, बहिर्द्वात्रिंशद् देवतानां पदविभागो वर्णितोऽस्ति। काश्यपशिल्पेऽर्यमा स्थाने समरी, बृहत्क्षतस्थाने राक्षसः, मृगस्थाने मृषा, पितृस्थाने निर्ऋतिः, वरुणानन्तरमसुरस्थाने शोषोऽस्ति, अनन्तरं पददेवतानां क्रमो भिन्नोऽस्ति। ऋक् - इति देवतोल्लेखः काश्यपशिल्पे वर्तते, बृहत्संहितायां तस्य स्थाने भुजगो वर्तते। सर्पस्य स्थाने नागो वर्णितः ।

बृहत्संहितायां ५३तमेऽध्याये ९१ तः ९७ श्लोकेषु ब्राह्मणादिवर्णानां कृते प्रशस्तभूमेः वर्णनं वर्तते। तत्र प्लव-वर्ण-गन्ध-कुशादि-स्वाद-इत्याद्यनुसारं वर्णनं वर्णानुसारं प्राप्यते। ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां कृते क्रमानुसारं उदक्-पूर्व-दक्षिण-पश्चिमप्लवः, श्वेत-रक्त-पीत-कृष्णवर्णाः, घृत-रुधिर-अन्न-मधुसमगन्धा, कृश-शर-दूर्वा-काशयुता तथा मधुर-कषाय-आम्ल-कटु-स्वादयुक्ता प्रशस्ता भूमिः कथिता। काश्यपशिल्पे केवलं वर्णानुसारं विवेचनं वर्तते। तत्र प्लव-स्वाद-गन्ध-कुशादीनां चतुर्वणानां कृते विचारो न प्रस्तुतः।

काश्यपशिल्पानुसारम्/ बृहत्संहितानुसारम्

| भूमिः | वर्णः | भूमिः | वर्णः |
|---|---|---|---|
| श्वेता | ब्राह्मणः | श्वेता | ब्राह्मणः |
| रक्ता | क्षत्रियः | रक्ता | क्षत्रियः |
| पीता | शूद्रः | पीता | शूद्रः |

५१३ का.शि.५३.२८

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | |
|---|---|---|---|
| | वैश्यः | कृष्णा | वैश्यः |

बृहत्संहितायां ५८तमेऽध्याये विविधदेवतानां मूर्तिनिर्माणस्य कृते प्रतिमालक्षणं वर्णितमस्ति। तत्र विशेषो वर्तते यद् वैदिकदेवतानां प्रतिमानां वर्णनेन साकं जिन-बौद्धप्रतिमानां लक्षणमपि प्रदत्तमस्ति। काश्यपशिल्पे बौद्ध-जिनप्रतिमानां नामोल्लेखोऽपि न भवति। वराहमिहिरेण केवलं विष्णुः-बलदेवः-एकानांशः-शम्भुः-प्रद्युम्नः-ब्रह्मा-कार्त्तिकेयः-इन्द्रः-शिवः-सूर्यः-शिवलिङ्गम्-मातृगणः-यमः-वरुणः-कुबेरः-गणेशः-एतासां प्रतिमानां लक्षणं केवलं श्लोकेनैकेन वार्धेनात्यन्तं स्वल्पं मानरहितं विशिष्टायुधादिवर्णनरहितं कृतम्। काश्यपशिल्पस्य वर्णनं तु विस्तृतं मानसहितम्, आयुधादिसहितं वर्तते - तेन महत्वपूर्णमस्ति। विष्णुमूर्तिवर्णने बृहत्संहितायां तस्याष्टभुजत्वं, चतुर्भुजत्वं, द्विभुजत्वं वा कार्यमिति निर्दिष्टम्। काश्यपशिल्पे तस्याष्टभुजत्वं न वर्णितम्। चतुर्भुजविष्णोर्मूर्तेर्दक्षिणहस्तयोरभयमुद्रा गदा च, वामहस्तयोः शङ्खश्चक्रं च वर्णितं बृहत्संहितायाम्। तथा च द्विभुजस्य दक्षिणे हस्तेऽभयमुद्रा वामे शङ्खधारीति वर्णितम् (३१ तः ३५)। काश्यपशिल्पे तु वामहस्ते गदा पद्मं च तथा दक्षिणहस्ते शङ्खश्चक्रं च ।तथा द्विभुजस्य विष्णुर्मूर्तेर्वामे कटकम्, दक्षिणेऽभयमुद्रा वर्णिता। बलदेवस्य वर्णनं काश्यपशिल्पे न वर्तते। इन्द्रः शुक्लगजोपर्युपविष्टः, वज्रपाणिः, ललाटस्थिततिर्यक्तृतीयलोचनयुतो वर्णितः बृहत्संहितायाम्(श्लोकः ४२)। काश्यपशिल्पे गजस्य श्वेतत्वमिन्द्रस्य वज्रपाणित्वं तृतीयलोचनत्वं च नोपवर्णितम्। बृहत्संहितायां श्लोकार्धेनैव ब्रह्मालक्षणं(श्लोकः४१)वर्णितम्। काश्यपशिल्पे तु ब्रह्मावर्णनं विस्तृतं वर्तते। द्वयोरपि वर्णने तस्य कमण्डलुधारित्वं, चतुर्मुखत्वं, पङ्कजासनत्वं समानं वर्तते। शिवमूर्तीनां विषये बृहत्संहितायां श्लोकेनैकेनैव वर्णनं प्राप्यते (४३)। वृषंभध्वजः, त्रिनेत्रधारी शिरसि इन्दुकालयुतः, शूल-धनुः-पिनाकयुतः, वामे गिरिसुता सहितो वर्णितः। काश्यपशिल्पे तु नैकविधशिवमूर्तीनां मानसहितं विस्तृतं वर्णनं प्राप्यते। त्रिषु (४६-४८) श्लोकेषु सूर्यप्रतिमाया

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

तयोः पङ्कजं तथा च कमलद्युतिर्वर्णितः। काश्यपशिल्पे त्वकस्य द्वादशादित्यानां च वर्णनं भिन्नरूपेण प्राप्यते। रक्तवर्णत्वमुभयोः समानम्। शिवलिङ्गस्य वर्णनं श्लोकद्वयेषु बृहत्संहितायां (५३-५४) प्राप्यते। तत्र शिवलिङ्गस्य द्विभागेषु मूले चतुरस्रं, मध्येऽष्टास्रम्, उपरिभागे वृत्तं भवेत्। चतुरस्रभागो भूमिमध्ये, अष्टास्रभागस्य पिण्डिका, वर्तुलभागो दृश्यः कर्तव्यः। समन्ततः पिण्डिका कर्तव्या। काश्यपशिल्पे लिङ्गविषये मानादिसहितं विविधशिवलिङ्गानां विस्तृतं वर्णनं प्राप्यते। वराहमिहिरेण केवलं निर्देशमात्रः कृतः। वराहमिहिरेण (श्लो. ५६) मातृकाणां गणानां विषये स्वनामदेवानुरूपकृतचिह्नाः कर्तव्या इति स्वल्पं वर्णनं कृतम्। काश्यपेन तु प्रत्येकस्या मातुर्लक्षणसहितं विवरणं कृतम्। यमवरुणकुबेराः- एतेषां वर्णनं वराहमिहिरेण केवलमेकेनैव श्लोकेन कृतमस्ति। वस्तुतस्तु काश्यपशिल्पे विस्तृतं वर्णनं प्राप्यते। यमो दण्डी वर्णितो बृहत्संहितायां, काश्यपशिल्पे तु खड्गखेटकधारितः। वराहमिहिरेण(श्लो. ५७) कुबेरो नरवाहनः कथितः। काश्यपशिल्पे तु कुबेरो मेघवाहनो वर्णितः। वरुणो वराहमिहिरेण हंसारूढो वर्णितः। काश्यपशिल्पे मकरवाहनः सम्यक्तया वर्णितः। वराहमिहिरेण (श्लो. ५८) गणेशो गजमुखो लम्बोदरः कुठारधारी, एकदन्तः, मूलककण्ठ-सुनीलदलकन्दसहितो वर्णितः। एतादृशं वर्णनं काश्यपशिल्पे लम्बोदरत्वं, गजमुखत्वं च समानं, किन्तु कुठारादिकं न वर्णितम्।

अपराजितपृच्छा

भुवनादेवाचार्यविरचितेऽपराजितपृच्छाग्रन्थे २३९ सूत्रेषु विविधश्लोकेषु वास्तुशास्त्रस्यातीव विस्तृतं विवरणं प्राप्यते। वास्तुपदेषु देवतानां विभाजने काश्यपशिल्पेन साकं केषुचिद्देवतानां नामसु तथा क्रमेषु परिवर्तनं दृश्यते। प्रायेण सर्वत्र वास्तुग्रन्थेषु यत्रार्यमायाः स्थानं काश्यपशिल्पे समर्या नामनिर्देशो विचित्रः प्रतिभाति। तथैव गृहक्षतस्य स्थाने

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

च मृषाया नामनिर्देशः। निर्ऋतेर्निर्देशः काश्यपशिल्पे वर्तते,नापराजितपृच्छायाम्। क्वचित् स्थानपरिवर्तनमपि दृश्यते।[514]

अपराजितपृच्छायां (२१२ सूत्रम्, श्लोकाः ३५-३७) गणेशो गजमुखः, त्रिनेत्रः, चतुर्बाहुसमन्वितः, एकदन्तः, व्यालयज्ञोपवीती, मूषकारूढो वर्णितः। दक्षिणहस्तयोः स्वदन्तः परशुश्च, वामहस्तयोरुत्पलं मोदकं च धारयति। काश्यपशिल्पेऽन्यत् सर्वं समानं किन्तु तस्य हस्तयोर्दन्तः, अङ्कुशश्च, वामहस्तयोः पाशः, नागो लघु अक्षमाला वा वर्णिता। तस्य शुण्डे मोदकं वर्णितम्। अपराजितपृच्छायां २१२ सूत्रे सद्योजात-वामदेव-अघोर-तत्पुरुष-मृत्यञ्जय-विजय-किरणाक्ष-अघोरास्त्र-श्रीकण्ठ-महादेव-एतेषां एकादशरुद्राणां स्वरूपवर्णनं ११ तः ३२ श्लोकपर्यन्तं कृतमस्ति। एतेषां विवेचनं काश्यपशिल्पे न प्राप्यते। तथैव द्वादशकलासम्पूर्णस्य सदाशिवमूर्तेर्वर्णनं वर्तते। काश्यपशिल्पे तेषां वर्णनं नास्ति। हरिहरमूर्तेर्वर्णनमपराजितपृच्छायां (३८-३९ श्लो.) वर्तते। पञ्चवक्त्रो त्रिनेत्रो वृषभवाहनःशिवस्तत्र वर्णितः। तस्य दक्षिणे करे वरदमुद्रा तथा अङ्कुशः-दन्तः-परशुः- इत्यायुधानि सन्ति। वामहस्ते कपालं-शराक्षमाला-पाशः-दण्डः इति वर्णनं प्राप्यते। अत्र हरिहरमूर्तेर्वर्णनं कथं भवति विचिन्त्यम्। प्रायेण वृषभवाहनस्य शिवस्य वर्णनं भवेत्। काश्यपशिल्पस्य हर्यर्धहरवर्णनमेतेन साकं साम्यं न दधाति। अपराजितपृच्छायां कार्त्तिकेयस्य वर्णनं ४०-४२ श्लोकेषु प्राप्यते। तत्र केवलं द्वादशभुजधारिणः षड्वक्त्रस्य लोचनत्रयसंयुतस्य कुमारस्य वर्णनं वर्तते। तस्य वामहस्तेषु शरः-शक्तिः-खड्गः-अङ्कुशः-दण्डः-अक्षसूत्रं वर्तते। दक्षिणहस्तेषु शृङ्गं-धनुः-पाशः-खेटः-वरदमुद्रा-कमण्डलुः - एतानि वर्तन्ते। द्विभुजस्य चतुर्भुजस्य वा कार्त्तिकेयस्य वर्णनं यथा काश्यपशिल्पादिषु प्राप्यते न तथात्र। काश्यपशिल्पानुसारं द्वादशभुजयुक्तस्य कार्त्तिकेयस्य दक्षिणहस्तेषु शक्तिः-बाणः-खड्गः-चक्रं-प्रासश्च, एको हस्तः प्रसारितः, वामहस्तेषु पिच्छम्-खड्गः-काकूटकः -धनुः - दण्डः-हलश्च भवति अपराजितपृच्छायां १९६ तः २०६

---

५१४ अपराजितपृच्छा, सूत्रम् ५८.२८-३५ श्लोकः १४०

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

सविस्तरं वर्णनं प्राप्यते। तत्र प्रथमं लिङ्गोत्पत्तिः,लिङ्गार्चनाविधिश्च वर्णिता। रत्नज-धातुज-लोहाष्टकज-मार्तिक-शैलज-बाण-लिङ्गादीनां वर्णनं प्राप्यते। लिङ्गपरीक्षा, शुद्धलिङ्गं, शुभाशुभचिह्नानि, लाञ्छनानि, पार्थिवलिङ्गेषु व्यक्ताव्यक्तलिङ्गानि- एतेषां वर्णनं वर्तते। काश्यपशिल्पेऽपि विविधरत्नादिभिर्निर्मितशिवलिङ्गानां पूजनं, तेषां लक्षणानि तथा निर्माणप्रक्रिया वर्णिता।

अपराजितपृच्छाग्रन्थे २०८ सूत्रे नन्दीश्वरस्य मानसहितं विवेचनं (६ श्लोकतः २० पर्यन्तं) विद्यते। किन्तु काश्यपशिल्पे यन्नन्देर्वर्णनं प्राप्यते, तत्त्वतीव सूक्ष्ममानसहितं वर्ततेऽतीवोपयुक्तं च वर्तते। प्रत्येकावयवस्य काश्यपशिल्पे उक्तं मानं महत्वपूर्णं वर्तते।

अपराजितपृच्छायां त्रिपुरान्तकमूर्तेर्वर्णनं २१३ सूत्रे १६ तः २० श्लोकेषु वर्तते। त्रिपुरान्तक एकवक्त्रो दशभुजः सिंहचर्मपरिधानो वर्णितः। काश्यपशिल्पे तु त्रिपुरान्तकस्य शिवस्य वर्णनं विविधाष्टप्रकारैः कृतं वर्तते। अपराजितपृच्छायां २१३ सूत्रे २१ तः २४ श्लोकेष्वर्धनारीश्वरस्य वर्णनं वर्तते। तत्र त्रिशूलं चाक्षसूत्रं दक्षिणहस्ते, तथा वामहस्ते दर्पणं कमण्डलुश्च वर्णितः। काश्यपशिल्पानुसारं सा मूर्तिर्द्विभुजा-चतुर्भुजा-षड्भुजा वा भवति। हस्तद्वयमूर्तेर्दक्षिणहस्तेऽभयं, वामहस्ते पुष्पं, चतुर्भुजस्य मूर्तेर्दक्षिणहस्ते शूलं, वरदमुद्रा, कपालं वा , वामहस्ते पुष्पं वृषभोपरि प्रसारितः। षड्भुजस्यभयं-परशुः-वह्निर्दक्षिणहस्ते, वामहस्ते कटकं-पुष्पं तथा वृषभोपरि हस्तः प्रसारितो दर्शितः।

अपराजितपृच्छायां (सू.२१४, श्लो. १-९) चतुवक्त्रः, चतुर्भुजः, ब्रह्मा विविधरूपेण - कमलासनः-विरञ्चिः-पितामहः-ब्रह्मारूपेण वर्णितः। चतुर्हस्तेषु पुस्तकं हस्तमाला-स्रुवा-कमण्डलुर्वर्णितः। काश्यपशिल्पे पुस्तकस्योल्लेखो नास्ति, तत्र दक्षिणेऽक्षमाला- स्रुक्स्रुवौ , वामहस्ते कमण्डलुराज्यस्थाली च। अभयवरदौ वा पूर्वहस्तौ प्रकल्पयेत्। अपराजितपृच्छायां २१५ सूत्रे विविधकेशव-नारायण-गोविन्द-माधव-पद्मनाभ-दामोदर-वामनादिविष्णुमूर्तीनां विवेचनं प्राप्यते। तथैव (२१७ सूत्रे श्लो-१ तः ३२ पर्यन्तं) वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धेति चतुर्व्यूहानां तथा विविधद्वादशविष्णुमूर्तीनां वर्णनं प्राप्यते। काश्यपशिल्पे

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ां वर्णनं न प्राप्यते। केवलं चतुर्भुजविष्णुरेव वर्णनमस्ति। अपराजितपृच्छायां चतुर्विंशतिजिनमूर्तीनां (२२१ सूत्रे) तथा नवग्रहमूर्तीनां वर्णनमपि प्राप्यते। न तथा काश्यपशिल्पे। अपराजितपृच्छायां सप्तमातृकाणां (२२३, १२ तः २१ श्लोकपर्यन्तं विस्तृतं वर्णनं वर्तते। काश्यपशिल्पेऽपि सप्तमातृकाणां वर्णनं प्राप्यते। प्रायेण समानं वर्णनं वर्तते।

क्षीरार्णवः

विश्वकर्माप्रणीतक्षीरार्णवग्रन्थे २२ अध्यायेषु ८०० श्लोकेषु विविधप्रासादानां विवेचनं प्राप्यते। तत्र विविधप्रासादाः जगतिलक्षणं,कूर्मशिलानिवेषणं, भित्तिमानं, पीठमानप्रमाणं, प्रासादोदयमानं, द्वारमानं, पीठविचारः, मनण्डोवरवर्णनं, मेरुमण्डोमनण्डोवर्णनं, प्रतिमापीठ-लिङ्गमानं, देवतादृष्टिपदस्थापनं, शिखरवर्णनं, रेखाविचारः, स्तम्भविचारः, मण्डपविचारः, सान्धारप्रासाद, केशरादिप्रासाद, महाप्रासादवर्णनं, एते विविधा विषयाः प्रासादविषयका विविधाध्यायेषु वर्णिताः सन्ति। एते विषयाः काश्यपशिल्पे वर्णिताः किन्तु तत्र विषयसाम्यत्वेऽपि वर्णने नामादिषु भिन्नता प्रतीयते। देवप्रतिमानां वर्णनं यथा काश्यपशिल्पे प्राप्यते विशेषतः शिवप्रतिमा-लिङ्गविषयकं विवेचनं क्षीरार्णवे न प्राप्यते।

रूपमण्डनम्-

सूत्रधारमण्डनेन नैके ग्रन्था वास्तुशास्त्रविषयका रचिताः सन्ति। रूपमण्डनं देवप्रतिमाविषयकः षडध्यायत्मको महत्त्वपूर्णो ग्रन्थः। रूपमण्डने द्वितीयाध्याये ब्रह्मा-नवग्रहाः-दिक्पालाः-एतेषां वर्णनं प्राप्यते। तृतीयाध्याये विविधविष्णुमूर्तीनां तथा दशावतारमूर्तीनां विवेचनं प्राप्यते। चतुर्थाध्याये द्वादशशिवमूर्तीनां उमामहेश्वर-हरिहर-विविधलिङ्गानि-एतेषां विवेचनं वर्तते। रत्नधातुदारुशिलालिङ्गानां मानं वर्णितम्। चलाचलरूपेण लिङ्गस्य द्विविधत्वं वर्णितम्। पञ्चमेऽध्याये गौर्य्यादीनां मूर्तीनां तथा च गणेश-लक्ष्मी-दुर्गा-सप्तमातृका-

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

षष्ठेऽध्याये चतुर्विंशतिजिनमूर्तीनां यक्ष-यक्षिणीनां प्रतिहारिणां वर्णनं वर्तते।

रूपमण्डने इन्द्रश्चतुर्हस्तो गजारूढः सहस्राक्षो वज्रधारी वर्णितः।

वरं वज्राङ्कुशौ चैव कुण्डीं धत्ते करैस्तु यः।

गजारूढः सहस्राक्ष इन्द्रः पूर्वदिशाधिपः।[५१५]

स हस्तैर्वज्र-अङ्कुश-कुण्डी-वरदमुद्रा धारयति। काश्यपशिल्पे इन्द्रो हस्तद्वयान्वितः शक्ति-अङ्कुशधरो वर्तते।

रूपमण्डने हुताशनो मेषारूढः वरदशक्तिमृणालकमण्डलुहस्तो वर्णितः।

वरदः शक्तिहस्तश्च समृणालकमण्डलुः।

ज्वालापुञ्जनिभो देवो मेषारूढो हुताशनः।।[५१६]

काश्यपशिल्पे सप्तहस्तो वर्णितः। मण्डूकोपर्युपविष्टः।

चतुर्हस्तो महिषारूढो यमो रूपमण्डने लेखने पुस्तक-कर्कुट-दण्डधरो वर्णितः।

लेखिनी पुस्तकं धत्ते कुर्कुटं दण्डमेव च।

महामहिषमारूढो यमः कृष्णाङ्ग ईरितः।।[५१७]

हस्तद्वयेषु खड्ग-खेटकधरः काश्यपशिल्पे यमो महिषारूढो वर्णितः।

रूपमण्डने वरुणो नक्रारूढो वर-पाश-उत्पल-कुण्डिकाधारी, चतुर्हस्तो वर्णितः।

---

५१५ रू.म.२/३१
५१६ रू.म.२/३२
५१७ रू.म.२/३३

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

मलं कुण्डीं हस्तैर्बिभ्रत् क्रमाच्च यः।

नक्रारूढः स कर्तव्यो वरुणः पश्चिमाश्रितः।।[५१८]

काश्यपशिल्पे वरुणस्तु मकरारूढो द्विहस्तः पाशधरो वर्णितः।

रूपमण्डने वायुर्मृगारूढो वरदध्वजापताकाकमण्डलुधरो निर्दिष्टः।

वरं ध्वजपताकाश्च कमण्डलुं करैर्दधत्।

मृगारूढो हरिद्वर्णः वायुकोणवायुदिक्पतिः।।[५१९]

काश्यपशिल्पे द्विहस्तो ध्वज-दण्डसहितो वर्णितः।

गदानिधिबीजपुरकमण्डलुधरो गजारूढः कुबेरो रूपमण्डने वर्णितः।

गदानिधिबीजपूरकमण्डलुधरः करैः।

गजारूढः प्रकर्तव्यः सौम्यो यो नरवाहनः।।[५२०]

काश्यपशिल्पे द्विहस्तो वरद-अभयमुद्रा-गदाधरो वर्णितः। मेघवाहनो वर्णितः।

सद्योजात-वामदेव-अघोर-तत्पुरुष-मृत्युञ्जय-किरणाक्ष-श्रीकण्ठकस्वरूप-अहिर्बुध्न-विरूपाक्ष-बहुरूपी-सदाशिव-त्र्यम्बक-इत्यादयो द्वादश शिवमूर्तयः सन्ति। एतासां द्वादशशिवमूर्तीनां वर्णनं काश्यपशिल्पे न वर्तते। तथा च काश्यपशिल्पे चलाचलं चलमचलं च त्रिविधं लिङ्गं वर्ण्यते।

---

५१८ रू.म.२/३५
५१९ रू.म.२/३६
५२० रू.म.२/३७

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...अष्टपत्राङ्गभुजा लक्ष्मीश्चर्तुहस्ता पङ्कज-घृतघट-मातुलिङ्गधारिणी वर्णिता। काश्यपशिल्पे द्विभुजा कमल-श्रीफलधारिणी वर्णिता।

क्षेत्रपालः (५.७४-७५) दिक्वासा घण्टाभूषितश्चतुर्हस्तः कर्त्तिका-डमरु-शूल-कपाल-हस्तो मुण्डमालोपवीतिको वर्णितः। काश्यपशिल्पे राजसादिभेदेन द्वि-चतुः-षड्-अष्टभुजायुक्तो वर्णितः।

मानसारः

मानसारो वास्तुशास्त्रस्याद्वितीयो ग्रन्थो वर्तते। तस्मिन् सप्तत्यध्यायेषु प्रायेण ५१७४ श्लोकेषु वास्तुशास्त्रस्य शिल्पशास्त्रस्य च विविधविषयाणां वर्णनं साङ्गोपाङ्गं प्राप्यते। तस्मिन् द्वितीयेऽध्याये (२०-२७) मानविषयकं विवेचनं प्राप्यते। तस्य विवेचनं पूर्वमेव तुलनात्मककोष्टके प्रदत्तम्। तृतीयाध्याये भूमेः परीक्षणविषये षट्प्राकारा विवर्णिताः। आकार-वर्ण-गन्ध-रूप-शब्द-रस-स्पर्श-इत्यादिभिः क्रमशो भूमेः परीक्षणं कार्यम्।

| वर्णः | आकारः | वर्णः | गन्धः | स्वादः | प्लवः | वृक्षः |
|---|---|---|---|---|---|---|
| ब्राह्मणः | वर्गाकारः | श्वेतः | मधुरः | कषायः | थत्तरः | उदुम्बरः |
| क्षत्रियः | विस्तारः अष्टांशः अधिक-दीर्घता | रक्तः | - | तिक्तः | पूर्वः | पिप्पलः |
| वैश्यः | षष्ठांशाधिका | पीतः | - | आम्लः | पूर्वः | प्लक्षः |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |
| शूद्रः | विस्तारः चतुर्थांशाधिका दीर्घता | कृष्णः | - | कटुः | पूर्वः | वटवृक्षः |

काश्यपशिल्पे केवलं वर्णस्य विचारो भूमिपरीक्षां कृतः। अन्यलक्षणानां विचारो न प्रस्तुतः। मानसारग्रन्थे वास्तुपदविन्यासस्य विचारः सप्तमेऽध्याये प्रस्तुतः। तत्रापि ८१ पदवास्तुविन्यासे काश्यपस्य मानसारस्य च भेदो दृग्गोचरीभवति। अर्यमास्थाने समरी, मृग स्थाने ऋक्, गृहक्षतस्थाने राक्षसः, पितृस्थाने निर्ऋतिः, असुर-शोष-रोगस्थाने शोषः-रोगः-पापक्षयः-एवं प्रकारेण द्वयोर्भिन्नता प्रतीयते। मानसारग्रन्थे उपपीठ-अधिष्ठान-स्तम्भ-प्रस्तर-इत्यादीनां अ. १३-१४-१५-१६ मध्ये वर्णिनमस्ति।

स्तम्भविषये वर्णने तत्र ब्रह्मकान्त-विष्णुकान्त-रुद्रकान्त-शिवकान्त-स्कन्दकान्त-इति भेदा मानसारे वर्णिताः। काश्यपशिल्पेऽपि ब्रह्मकान्त-विष्णुकान्त-रुद्रकान्त-व्यालपादः-शिवच्छन्दादिनां विविधस्तम्भानां विस्तृतं वर्णनं प्राप्यते। नामसादृश्येऽपि वर्णने भिन्नता दृश्यते।

मानसारे एकतलादारभ्य द्वादशतलपर्यन्तं विविधप्रासादानां विवरणमध्यायः १९ तः ३० पर्यन्तं वर्तते। काश्यपशिल्पेऽप्येकतलादारभ्य षोडशतलपर्यन्तं प्रासादानां वर्णनं वर्तते।

मानसारे गोपुरस्य वर्णनं ३३ तमेऽध्याये वर्तते। तत्र द्वारशोभा-द्वारशाला-द्वारप्रसाद-द्वारहर्म्य-महागोपुरम्-इत्यादीनां विवरणं वर्तते। काश्यपशिल्पेऽप्येतेषां सर्वेषां विविध-गोपुराणां वर्णनं भिन्नरूपेण प्राप्यते। एक-द्वि-त्रिभवनस्य कृते द्वारशोभा, द्वि-त्रि-चतुः-भवनस्य कृते द्वारशाला, त्रि-चतुः पञ्च भवनस्य कृते द्वारप्रासादः, चतुः-पञ्च-षड्-भवनस्य कृते द्वारहर्म्य, पञ्च-षड्-सप्त भवनस्य कृते द्वारगोपुरम्-इत्यादीनां वर्णनं वर्तते।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

त्रमूर्तिलक्षणं वर्णितम्। तत्र मूर्तीनां त्रिविधत्वं वर्णितम् ï चित्राङ्गं-अर्धचित्राङ्गं-आभासम्। काश्यपशिल्पेऽपि त्रिविधत्वं चित्रं-अर्धचित्रम्-आभास एवं वर्णितम्। द्वयोः साम्यं प्रतीयते। प्रतिमाया मानसारे चला-अचला-इति द्विविधत्वमेव वर्णितम्। काश्यपशिल्पे चल-अचल-चलाचल-इति त्रिविधत्वं वैशिष्ट्यपूर्णं प्रतिभाति। मूर्तीनां वर्णने केवलं त्रिमूर्तीनामेव वर्णनं प्राप्यते।

मानसारे चतुर्भुजविष्णोर्वर्णने दक्षिणहस्तयोः कटकं-गदा वा तथा वरदमुद्रा वर्णिता। वामहस्तयोश्चक्रं-पाञ्चजन्यशङ्खो वा, अभयमुद्रा वर्णिता। अन्यद् वर्णनं समानम्। काश्यपशिल्पे चतुर्भुजविष्णोः वामहस्तयोर्गदा-पद्मं, दक्षिणहस्तयोः शङ्खश्चक्रम्-इति वर्णितम्।

मानसारे चतुर्हस्तात्मक-चर्मधारिणी-जटायां गङ्गानागयुक्ता-शिवमूतिर्वर्णिता। तस्या दक्षिणहस्तयोः टङ्कः-अभयमुद्रा च, वामहस्तयोर्हरिणं वरदमुद्रा च वर्णिता। वामभागे पार्वती। एतादृशं सुस्पष्टं वर्णनं प्राप्यते। काश्यपशिल्पे तु विविधशिवमूर्तीनां वर्णनं वर्तते। काश्यपशिल्पेऽपि शिवश्चतुर्हस्तोऽभय-वरद-शूल-पाश-सहितो दृश्यते।[५२१]

मानसारे ब्रह्मणो वर्णने स चतुर्मुखः-चतुर्हस्तः-अष्टनेत्रः-अष्टकर्णः वर्णितः। तस्य हस्तेषु वरदमुद्रा-अभयमुद्रा च तथा कमण्डलुः-अक्षमाला च वर्तते। अक्षमाला-कूर्च-कमण्डलु-कुशाश्च तथा वरद-अभयमुद्रा-आज्यस्थाली-स्रुक्-स्रुवाश्च- एवं काश्यपशिल्पे ब्रह्मावर्णने निर्दिष्टमस्ति।

लिङ्गविधाननामके ५२ अध्याये शिवलिङ्गस्य विविधाः प्रकारास्तेषां नाम-अधिष्ठानस्य मानं-जाति-छन्द-विकल्प-आभासेति चतुर्विधलिङ्गप्रकाराः तेषां मानादिकम्, लक्षणानि च स्वयंभुलिङ्गस्य उद्भूत-दैवक-मानुष-आर्ष-गाणव-इति विविधा प्रकाराश्च वर्णिताः सन्ति।

---

५२१ का.शि.४८, १०६-१०७-१०८-१/२

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...ीनां चिह्नानि लक्षणानि च वर्णितानि। तत्र सप्तमातृकानां विवरणमपि प्राप्यते। ५५ तमेऽध्याये जिनमूर्तीनां तथा ५६ अध्याये बौद्धमूर्तीनामपि विचारो मानसारे वर्तते। काश्यपशिल्पे जिन-बौद्धमूर्तीनां विचारो नास्ति।

मानसारे सरस्वती द्विनेत्रा चतुर्हस्ता श्वेतपद्मासना वर्णिता। तस्या दक्षिणहस्तयोः क्रोञ्चो वीणा वा अक्षमाला च, वामहस्तयोः पुस्तकं कुण्डिका च वर्णिता। काश्यपशिल्पे त्रिनेत्रा सरस्वती दक्षिणहस्तयोर्व्याख्यानमुद्रा-अक्षसूत्रम् तथा वामहस्तयोः पुस्तकं कुण्डिका च धारयतीति वर्णितम्।

मानसारे महालक्ष्मीर्द्विहस्ता वर्णिता, वामहस्ते क्षुद्रघण्टिका, दक्षिणहस्ते रत्नपद्मं धारयतीति वर्णितम्। तत्र पार्श्वयोर्गजद्वयं वर्तते -इति विशेषः। काश्यपशिल्पे दक्षिणे हस्ते कमलम्, वामहस्ते श्रीफलम् -इति वर्णनं कृतमस्ति।

निष्कर्षः

एवं प्रकारेण प्रकरणेऽस्मिन् काश्यपशिल्पोक्तविविधविषयाणां वास्तुशास्त्रसम्बन्धिनां तथा विविधमूर्ति-शिवलिङ्ग-शिवप्रतिमाविषयाणां वास्तुशास्त्रस्य बृहत्संहिता-विष्णुधर्मोत्तर-समराङ्गणसूत्रधार-अपराजितपृच्छा-मानसार-नारदशिल्पशास्त्रं-क्षीरार्णव-शिल्परत्नाकर-मानसोल्लास-मयमतं-इत्यादिविविधग्रन्थानां साकं तुलनात्मकेनाध्यनेनेदं स्पष्टं भवति यत् काश्यपशिल्पस्य वर्णनमेतेभ्यो नैकप्रकारेण भिन्नं वैशिष्ट्यपूर्णं प्रायेण विस्तृतं मान-लक्षण-चिह्नादिवैविध्यपूर्णं महत्वपूर्णं च प्रतिभाति। तेन जिन-बौद्ध-नवग्रह-दशावताराः-विविधविष्णुमूर्तय इत्यादीनां यद्यपि न तथा वर्णनं कृतम् तेन मूर्तिवर्णने परिपूर्णता न भवेत् तथापि शैवधर्मदृष्ट्यावश्यकं समग्रं परिपूर्णं च वर्णनं काश्यपस्य वर्तते- इति निश्चप्रचं प्रतिभाति। तथापि तेन सद्योजातादिमूर्तीनां तथा द्वादशरुद्राणां वर्णनं न कृतमिति विचारणीयं भवति।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

वास्तुशास्त्रे त्रिविधाः पद्धतयः प्रासादादिविषये नागर-वेसर-द्राविडाः प्रसिद्धाः सन्ति। तत्तत्पद्धत्यनुसारं समग्रे भारते वास्तुशिल्पानि निर्मितानि दरीदृश्यन्ते। काश्यपशिल्पग्रन्थे द्राविडसम्प्रदायानुसारं वर्णनं सम्प्राप्यते। काश्यपशिल्पं ग्रन्थो वस्तुतोऽंशुमद्भेदागमोक्तविषयाणां साकं साम्यं धारयति। किन्तु तस्य ग्रन्थस्य प्रकाशनमद्यावधि नाभवत्। शैवागमस्य विविधागमग्रन्थानां मध्ये तस्य महत्त्वं वर्तते। काश्यपशिल्पं ग्रन्थोऽपि शैवपरम्परायाः प्रतिपादको ग्रन्थः। तस्य शैवागमेन साकं साम्यं च वर्तते। शैवभक्तानां कृते मूर्त्यादिनिर्माणे विविधं सुसूक्ष्मं पद्धतिपूर्णं विविधमानादिसहितं वर्णनं ग्रन्थेऽत्र प्राप्यते। अतोऽस्य महत्त्वं शैवपरम्परादृष्ट्यातीव वर्तते। शिवस्य प्रासादनिर्माणार्थमनेकविधशिवमूर्तिनिर्माणार्थं लिङ्गपूजा दृष्ट्या तथा च शिवपरिवारदेवतानां ज्ञानार्थमावश्यकी सर्वा सामग्री ग्रन्थेऽस्मिन् प्राप्यते। वास्तुनिर्माणस्य विविधपदानां तेषां देवतानां तत्तत्स्थानगतविविधप्रासादोपकरणानां विवेचनमतीव सूक्ष्मतया वर्णितं ग्रन्थे। अत्र न केवलमेकादिषोडशतलपर्यन्तानां प्रासादानां वर्णनं प्राप्यते, अपि तु विविधतलसम्पन्नानां गोपुराणां च। यतो हि ग्रन्थः शैवसम्प्रदायस्य भवति, अत्र शिवसम्बद्धा एव विविधा विषयाः स्पष्टीकृताः सन्ति। भूम्यादिसम्पादनं प्रासादनिर्माणम्, आयादिविचारः, मन्दिरनिर्माणं, मूर्तिनिर्माणम् - सर्वेऽपि विषयाः शैवसम्प्रदायानुकूला वर्णिताः सन्ति। अत एवास्मिन् ग्रन्थे विविधानां विष्णुमूर्तीनामथवा विविधानां देव्यादिमूर्तीनां, विविधगणेशमूर्तीनां वर्णनं न विशदीकृतम्। काश्यपशिल्पे केवलमेकस्थाने जैनसम्प्रदायस्योल्लेखो वर्तते। किन्तु कुत्रापि जैनसम्प्रदायस्य चतुर्विंशतितीर्थङ्कराणामुल्लेखो मूर्तिवर्णनं वा न प्राप्यते। भारते बौद्धसम्प्रदायोऽप्यतीव प्राचीनो वर्तते। तथापि ग्रन्थकारेण कुत्रापि बौद्धमूर्तीनां विवेचनं न कृतम्। यतो हि ग्रन्थः प्राचीनो वर्तते, अत एव इस्लाम-खिस्तादि-अन्यधर्मीयाणां शिल्पादिविषये तत्प्रभावविषये वा विचारणा नैव सम्भाव्यते।

काश्यपशिल्पे शिवपरिवाराणां विविधदेवतानां परिपूर्णमङ्गाङ्गमानसहितं वर्णनं प्राप्यते। परिवारदेवेषु अनलेश्वरम्, सप्तमातृका, विनायकः, षण्मुखः, ज्येष्ठादेवी, विष्णुः, अश्विनौ,

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

प्सराः, वरुणः, मरुत्, रुद्रः, भास्करः, सरस्वती, लक्ष्मीः – परिवारदेवतानां वर्णनमनन्तरं शिवलिङ्गस्य विविधप्रकाराणां तथा च विविधप्रकारकशिवमूर्तीनां विवरणं प्राप्यते। शिवमूर्तिषु चन्द्रशेखरः, वृषवाहनः, नृतमूर्तिः, गङ्गाधरः, त्रिपुरान्तकः, कल्याणः, अर्धनारीश्वरः, गजहा, पाशुपातः, कङ्कालः, हर्यर्धरः, भिक्षाटनः, चण्डेशः, दक्षिणामूर्तिः, कालहा– स्वरूपाण्येतानि वर्णितानि। शिवस्य सुन्दरमूर्तीनां वर्णनेन साकं काश्यपशिल्पे महर्षिणा केषाञ्चन भयङ्करमूर्तीनां वर्णनमपि कृतमस्ति। वर्णनं कृतेऽप्यनन्तरं निर्माणे निषेधोऽपि विहितः। नन्देर्वर्णनमन्यत्र बहुविस्तरेण न प्राप्यते, काश्यपशिल्पेऽतीव स्पष्टतया सुसूक्ष्मं विस्तारपूर्वकं वर्णनं विहितमस्ति।

एकाशीतिपदेषु पूर्वभागे समरी, पश्चिमे निर्ऋतिः, पापक्षयश्च, बहिर्भाग एकपददेवेषु ऋक् देवतारूपेण वर्णिताः। ते प्रायेणान्यत्र न दृश्यन्ते। काश्यपेन नवचत्वारिंशद् वास्तुपददेवतानां वर्णनं कृतम्।

वास्तुशरीरे देवता

| काश्यपशिल्पम् | | बृहत्संहिता | |
|---|---|---|---|
| ऐशान्यां | शिरः | अग्निः-शिखी | शिरसि |
| कूर्परौ–जानुः | अग्निः, वायुः | आपः | मुखे |
| दितिः, पर्जन्यः | नेत्रम् | अर्यमा | स्तने |
| अदितिः,जयन्तः | कर्णम् | जापवत्सः | ऊरसि |
| आपः | कृकाटिका | पर्जन्यः | नेत्रे |
| आपवत्सः | स्कन्धे | जयन्तः | कर्णे |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | |
|---|---|---|---|
| | | इन्द्रः | दरस्थलः |
| इन्द्रः, इन्द्रजयः | अण्डकाशः | सूर्यः | स्कन्धः |
| इन्द्रजयः | लिङ्गम् | सत्यः,भृशः, अन्तरिक्षम्, अनिलः. पूषा | भुजे |
| निर्ऋतिदिग्भागे | पादौ | सविता, सावित्रः | हस्ते |
| समरी, पृथ्वीधरः | स्तनम् | टववस्वान् | जठरे |
| विवस्वान्, मित्रः | कुक्षि | यमः | ऊरू |
| सावित्रः | ऊध्वोर्हस्ततले | गन्धर्वः | जानुः |
| सावित्रः | ऊरुप्रकोष्ठस्य मध्यभागे | भृगराजः | जङ्घे |
| रुद्रः, रुद्रजयः | वामभागे | मृगः | स्फिगि |
| महेन्द्राद् अन्तरिक्षपर्यन्तं | वामहस्तः | पृथ्वीधरः | वामस्तनः |
| कूर्परि जानौ च | अग्निः | दितिः | वामनेत्रे |
| पूषातो भृङ्गराजपर्यन्तं | जङ्घाया दक्षिणभागः | अदितिः | वामकर्णे |
| दौवारिकतः पापयक्ष्मापर्यन्तं | जङ्घाया दक्षिणेतरे भागे | भुजङ्गः | वाम उरसि |
| वामजानुस्तथा कूर्परि | वायुः | सोमः | वामस्कन्धे |
| नागतो दितिपर्यन्तं | वामभागः | भल्लाटः, मुख्यः, अहिः, रोगः, पापयक्ष्मा, | वामबाहुः |
| – | – | रुद्रः,राजयक्ष्मा | हस्ते |
| – | – | शोषः–असुरः | बाहुमूलं |
| – | – | वरुणः | ऊरू |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | |
|---|---|---|---|
| | | पुष्पदन्तः | जानुः |
| – | – | सुग्रीवः | जङ्घे |
| – | – | दौवारिकः | स्फिगि |
| – | – | शक्रः जयन्तः | मेढ्रे |
| – | – | ब्रह्मा | हृदये |
| – | – | पितरः | पादे |

विविधदेवतानां कोष्टकम्

| काश्यपशिल्पम् | विष्णुधर्मोत्तरपुराणम् | समराङ्गणसूत्रधारः | शिल्परत्नाकरः | मानसोल्लासः |
|---|---|---|---|---|
| नन्दीलक्षणम् | त्रिमूर्तिः | ब्रह्मा | ब्रह्मा | केशवादिचतुर्विंशतिमूर्तिभेदाः |
| अनलेश्वरः | पद्मरूपः | शिवः | ब्रह्मणः | अष्टबाहुहरिः |
| सप्तमातृका | ब्रह्मा | अरण्यश्मशानमहेश्वरः | अष्ट द्वारपालाः | वामनः |
| विनायकः | टवष्णुः | कार्त्तिकेयः | ऋग्वेदस्य स्वरूपम् | श्रीरामः |
| षण्मुखः | महादेवः | बलभद्रः | यजुर्वेदस्य स्वरूपम् | नृवराहः |
| ज्येष्ठादेवी। | नासत्यः | विष्णुः | सामवेदस्य स्वरूपम् | त्रिविक्रमः |
| दुर्गा | शक्रः | महेन्द्रादीशानान्ताः | अथर्ववेदस्य स्वरूपम् | मत्स्यावतारः |
| विष्णुः | यमः | लोकपालाः | नृत्यशास्त्रस्य स्वरूपम् | कूर्मावतारः |
| इन्द्रः | वरुणः | वैवस्वतः | विश्वकर्मणः स्वरूपम् | ब्रह्मदेवः |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | |
|---|---|---|---|---|
| | | ...र: | ऋषे: स्वरूपम् | महादेव: |
| पितर: | विष्णुध्वज: | भरद्वाज: | सूर्य: (द्वादशमूर्तय:) | स्वच्छन्दभैरव: |
| वैवस्वत: | गौरीश्वर: | दक्षादि: | सूर्यस्य अष्टद्वारपालानां स्वरूपम्। | अर्धनारीश्वर: |
| रोहिणी | अग्नि: | अग्नि: | - | उमामहेश्वर: |
| निर्ऋति: | निर्ऋति: | समीर: | - | हरिहर: |
| अप्सरा: | वायु: | सौम्येश: कुबेरो वा | - | स्वामिकार्त्तिक: |
| वरुण: | भैरव: | ईशानदेव: | - | गणेश: |
| ऋषि: | टवष्णु: | राक्षस: | - | काली (कात्यायनी) |
| मरुत् | भूमि: | लक्ष्मी: | - | इन्द्र: |
| रुद्र: | आकाशरूप: | कौशिकी | - | अग्नि: |
| चन्द: | ब्रह्मा | अश्विनौ | - | यम: |
| क्षेत्रपाल: | सरस्वती | अश्विनौ | - | राक्षसेन्द्र: |
| ईश: | शेषरूप: | पिशाचभूतादि: | - | वरुण: |
| भास्कर: | देवीचतुष्टयसहि-तस्तुम्बुरु: | यक्ष: | - | वायु: |
| जनन्त:। | आदित्य: | नाग: | - | कुबेर: |
| अर्क: (सूर्य:) | सोम: | गन्धर्व: | - | ईशान: |
| अभय: | भौमादिग्रहा: | - | - | मातृका |
| गौरी | मनु: | - | - | श्रीमूर्ति: |
| शर्व: | कुमारादि: | - | - | नागमूर्ति: |
| ब्रह्मा | वसुरूप: | - | - | दैत्यदानव: |
| शिव: | देवता: | - | - | पिशाच: |

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | |
|---|---|---|---|---|
| | | | – | वेताल: |
| एकादश: | व्योम: | – | – | क्षेत्रपाल: |
| सरस्वती | नरनारायण:<br><br>कृष्ण: | – | – | कामदेव: |
| लक्ष्मी: | धर्मरूप: | – | – | सूर्य: |
| कुबेर: | वैराग्य: | – | – | चन्द्र: |
| कालाग्नि–रुद्र: | नृसिंह: | – | – | भौम: |
| श्रीकण्ठ: | वराह: | – | – | बुध: |
| नागदेव: | हयग्रीव: | – | – | गुरु: |
| भीम: | पद्मनाभ: | – | – | शुक्र: |
| शिखण्ड: | लक्ष्मी: | – | – | शनि: |
| मरुद्गण: | विश्व: | – | – | राहु: |
| उग्र: | ऐडूक: | – | – | केतु: |
| शनैश्चर: | देवोद्यानम् | – | – | – |
| शिवलिङ्गम् | – | – | – | – |
| सुखासन: | – | – | – | – |
| सोमस्कन्देश्वर: | – | – | – | – |
| देवी | – | – | – | – |
| स्कन्द: | – | – | – | – |
| उमास्कन्द: | – | – | – | – |
| चन्द्रशेखर: | – | – | – | – |
| वृषवाहन: | – | – | – | – |
| नृत्तमूर्ति: | – | – | – | – |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

| | | | | |
|---|---|---|---|---|
| | | | – | – |
| त्रिपुरान्तकः | – | – | – | – |
| कल्याणः | – | – | – | – |
| अर्धनारीश्वरः | – | – | – | – |
| गजहा | – | – | – | – |
| पाशुपातः | – | – | – | – |
| कङ्कालः | – | – | – | – |
| हर्यर्धहरः | – | – | – | – |
| भिक्षाटनः | – | – | – | – |
| चण्डेशः | – | – | – | – |
| दक्षिणामूर्तिः | – | – | – | – |
| कालहा | – | – | – | – |
| लिङ्गोद्भवः | – | – | – | – |

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# षष्ठं प्रकरणम्

## उपसंहारः

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

# षष्ठं प्रकरणम्

## उपसंहार:

### संशोधनप्रयोजनम्

ऋग्वेदो यजुर्वेद: सामवेदोऽथर्ववेद इति चत्वारो वेदा: सन्ति। तेषां षडङ्गानि सन्ति- शिक्षा-कल्प-निरुक्त-व्याकरण-ज्योतिष-छन्दांसि च। प्रत्येकस्य वेदस्योपवेदो वर्तते। यथा ऋग्वेदस्यायुर्वेद:, यजुर्वेदस्य धनुर्वेद:, सामवेदस्य गान्धर्ववेद:, अथर्ववेदस्य स्थापत्यवेदोऽर्थशास्त्रं वा। वास्तुशास्त्रस्य स्थापत्यशास्त्रस्य शिल्पशास्त्रस्य वा महत्त्वं प्राचीनकालादेव वर्तते। आधुनिककालेऽपि शास्त्रमिदं महत्त्वपूर्णं जीवनेऽनिवार्यं च स्थानं दधाति। सर्वाणि शास्त्राणि विश्वस्य कल्याणार्थं प्रवृत्तानि सन्ति। सर्वत्र जगति सर्वे सुखिन: स्वास्थ्यपरिपूर्णा निर्भया: स्वकीयकार्ये रता: स्यु:- इति सर्वेषां शास्त्राणां प्रयोजनमस्ति। वास्तुशास्त्रमपि सर्वजनानां हितार्थं प्रवृत्तमस्ति। तस्य मूलभूतं ज्ञानं प्राप्य लोककल्याणं यथा भवेत् तथा समुपयोग: कर्तव्य:। एतदर्थं शास्त्रस्यास्य मूलग्रन्थानां काश्यपशिल्पादीनामध्ययनं समीक्षा तुलना चावश्यकी भवति। काश्यपशिल्पं यद्यपि वास्तुशास्त्रस्य शिल्पशास्त्रस्याप्रतिमो ग्रन्थो वर्तते तथापि तस्य बहु प्रचारो नास्ति। अत एव तस्य पङ्क्तिश: सुसूक्ष्ममध्ययनं, काश्यपस्य वास्तुशास्त्रे बहुमूल्यप्रदानस्य समीक्षां कृत्वान्यैर्वास्तुशास्त्रस्य ग्रन्थै: साकं तुलनां कर्तुं ममैष प्रयत्न:। तदर्थं मया मूलग्रन्थस्य काश्यपशिल्पस्य प्रकाशितस्य पुस्तकस्य नैकवारमालोडनं कृत्वा तत्रत्यानां वास्तुविचाराणां मूर्तिकलाविषयस्य च बृहत्संहिता-समराङ्गणसूत्रधारादिबहुग्रन्थै: साकं तुलना कृता। तेन च तस्य वैशिष्ट्यमप्रतिमत्वं चावगतम्। प्रबन्धेऽस्मिन् विविधाध्यायेषु च प्रस्तुतम्। विषयस्य सरलीकरणार्थं स्थाने स्थाने मया कोष्टकानि विषयानुरूपं चित्राणि च प्रस्तुतानि सन्ति। यान्यत्यन्तमनिवार्याणि सन्ति। यतो हि तेषामभावे विषयस्य सम्यगाकलनं न स्यात्।

Your complimentary use period has ended. Thank you for using PDF Complete.
PDF Complete
Click Here to upgrade to Unlimited Pages and Expanded Features

पशिल्पं वर्तते। शिल्पवास्तुशब्दयोः समानार्थत्वं प्रतीयते। अत एव प्रथमप्रकरणे प्रस्तावनारूपे मया प्रथमं वास्तुशब्दस्य शिल्पशब्दस्य च स्पष्टीकरणं ससंदर्भं कृत्वा विषयोऽयं विशदीकृतः। अनन्तरं देवानां शिल्पी विश्वकर्मा दानवानां च मयः - एतयोः सम्बन्धी विवेचनं प्रस्तूय वास्तुशास्त्रस्य विविधाचार्याणां विविधग्रन्थानुसारिनामानि प्रदत्तानि। वास्तुशास्त्रस्येतिहासो बहु प्राचीनो वर्तते। वेदादारभ्य पुराणपर्यन्तं विविधेषु प्राचीनसाहित्येषु वास्तुशास्त्रसन्दर्भा अत्र तत्र विकीर्णा दरीदृश्यन्ते। विशालोऽयमितिहासस्तथापि केवलं निर्देशार्थं वेद-ब्राह्मण-उपनिषद्-रामायण-महाभारत-विविधपुराण-साहित्यग्रन्थेषु च ये वास्तुशास्त्रसन्दर्भाः प्राप्यन्ते, तेषां स्वल्पं निदर्शनं कृत्वा प्राचीनत्वं वास्तुशास्त्रस्य प्रदर्शितम्। प्रथमप्रकरणस्योद्देशः केवलं पूर्वभूमिकारूपेण वर्तते। वास्तुशास्त्रस्य नैके ग्रन्था अनन्तरकाले प्रवृत्ताः सन्ति। येषु वास्तुशास्त्रस्य मूर्तिकलायाश्च विषयो विस्तारपूर्वकं वर्णितोऽस्ति। बृहत्संहिता, समराङ्गणसूत्रधारः-मयमतं-मानसारः-विश्वकर्मावास्तुशास्त्रम्-शिल्परत्नाकरः-दीपार्णवः-क्षीरार्णवः-शिल्पदीपकः-मानसोल्लासः-अपराजितपृच्छा-इत्यादयो बहवः सन्ति। तेषु दुर्लक्षितः प्रायेणापठितो ग्रन्थः काश्यपमहर्षिप्रणीतः काश्यपशिल्पनामको ममाध्ययनस्य विषयः।

द्वितीयप्रकरणे काश्यपमहर्षेर्व्यक्तित्वं संस्कृतसाहित्ये प्रदानं च विशदीकृतम्। काश्यपशिल्पं ग्रन्थो महर्षिकाश्यपविरचितोऽस्ति, इति परम्परानुसारं ग्रन्थप्रामाण्येन च स्वीक्रियते। अतः कश्यपस्य काश्यपमहर्षेर्वा वेदादारभ्य यद् वर्णनं तस्य जीवनविषये व्यक्तित्वविषये प्राप्यते, तद्ग्रन्थानामाधारेण प्रस्तुतमत्र। महर्षिः काश्यपो वेदेषु पुराणेषु च बहुप्रसिद्धोऽस्ति। तेन च ज्योतिष -आयुर्वेद-धर्मशास्त्र-भक्तिशास्त्र-व्याकरणादिषु विविधशास्त्रेषु बहुमूल्यं प्रदानं कृतमस्ति। तस्य प्रदानस्य किञ्चिद् दिग्दर्शनं न्यू केटलोगस् केटलोगरम् - इत्यदिग्रन्थानामाधारेण प्रदत्तः। तदनन्तरं काश्यपस्य शिल्पग्रन्थस्य विषये विवेचनं मूलग्रन्थानुसारेण प्रदत्तमस्ति। काश्यपशिल्पग्रन्थश्छन्दोबद्धः ८८ पटलात्मको वर्तते।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

रूपेण संक्षिप्तं विवरणं परिचयात्मकं प्रस्तुतम्। काश्यपशिल्पग्रन्थस्य कालनिर्णयो बहुकठिनस्तथापि तस्य वराहमिहिरकृतोल्लेखानुसारेणान्तरिकप्रमाणानुसारेण च बृहत्संहिता पूर्वकालत्वं प्राचीनत्वं चानुमीयते। दक्षिणभारते प्रायेणास्य प्रादुर्भाव:।

तृतीये प्रकरणे काश्यपशिल्पग्रन्थानुसारेण वास्तुशास्त्रस्य विविधविषयाणां विवेचनं विस्तृतरूपेण मया प्रदत्तम्। समागता विषया: सन्ति- भूमिपरीक्षा, वर्णानुसारं शुभा भूमि:, भूमिकर्षणम्, दिक्परिच्छेदनम्, प्रासादवास्तु, वास्तुपदमण्डलम्, वास्तुपुरुषोत्पत्ति:, वास्तपुरुषस्याङ्गे स्थिता देवता:, प्रथमेष्टका, मण्डप:, भित्ति:, स्तम्भ:, पाषाणस्य वर्गीकरणम्, द्वारस्तम्भ:, उपपीठम्, उपपीठस्य निर्गमनम्, नालप्रतिष्ठा, नालस्थापना, नालमानं, बोधिका, फलिका, वेदिकालक्षणम्, जालकलक्षणम्, जालकस्य षड् प्रकारा:, तोरणम्, वृत्तस्फाटितम्, स्तम्भतोरणविधि:, द्वारतोरणम्, स्तम्भतोरणम्, कुम्भस्थलम्, द्वारविन्यास:, कम्पद्वारम्, प्रस्तरलक्षणम्, गलभूषणलक्षणम्, शिखरलक्षणम्, नासिकालक्षणम्, क्षुद्रनासी, प्रासादलक्षणम्, संख्यावाचकशब्दा:, हस्त:, मानसूत्रलक्षणम्, विकल्पहर्म्यम्, छन्दहर्म्यमानम्, जातिहर्म्यम्, आयादिलक्षणम्, नागरादिविमानम्, नागर:, द्राविड: (प्रथम: प्रकार:), द्राविडविमानस्य द्वितीय: प्रकार:, द्राविडप्रासादस्य तृतीय: प्रकार:, वेसरविमानम्, गर्भविन्यास:, एकतलभवनम्, द्वितलम्, रुद्रकान्तम्, स्वस्तिबन्धम्, कल्याणसुन्दरम्, पाञ्चालम्, विष्णुकान्तम्, विश्वकरम्, मंगलम्, गान्धारम्, मनोहरम्, शिवकान्तम्, कुबेरकान्तम्, त्रितलम्, स्वस्तिकम्, रुद्रकान्तम्, शिवकान्तम्, विष्णुकान्तम्, शुद्धाभिधानम्, विमानाकृति:, ब्रह्मकान्तम्, हस्तिपृष्ठम्, भद्रकोष्ठम्, वृत्तकूटम्, श्रीकण्ठ:, गान्धारम्, श्रीविशालम्, श्रीभोगाढ्यम्, चतुर्भूमि:, सुभद्र:, ब्रह्म, श्रीकण्ठम्, श्रीमण्डनम्, श्रीभवन्तम्, श्रीकान्तं तथा श्रीविशालम्, कूटादिलक्षणम्, पञ्चतलविधानम्, ब्रह्मकान्तम्, भद्रकान्तम्, जनार्दनम्, अतिभद्रम्, सर्वतोभद्रम्, वीरभद्रम्, षड्भूमि:, अम्बुजासनम्, सुशांकरसदनम्, भद्रलीनकम्, शिवभद्रम्, नागेन्द्रम्, सप्तभूमि:,

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

, श्रीप्रियम्, रुद्रकान्तम्, वृत्तभद्रम्, सुवृत्तम्, शिवभद्रम्, भद्रपञ्जरम्, वसुभूमिः, शिवछन्दम्, वागीशम्, अष्टभागम्, पर्वतम्, कैलाससदनम्, नवभूमिः, ललितभद्रकम्, ब्रह्मकान्तम्, प्रादेशम्, सौष्ठिकं तथा श्रीवर्धनम्, सुपद्मम्, कृतवर्धनम्, वृत्तगेहम्, दशभूमिलक्षणम्, एकादशतलम्, ब्रह्मकान्तम्, विजयम्, सर्वार्हकम्, इन्द्रकान्तम्, गणिकाशालकम्, इन्द्रकान्तम्, कर्णविशालम्, द्वादशतलम्, त्रयोदशतलम्, षोडशतलम्, ब्रह्मकान्तम्, सारस्वतगृहम्, प्रादेशम्, श्रीकरम्, पर्वतीकम्, सुशांभवम्, मूर्धेष्टका, पूजाविधिः, मूर्धेष्टका स्तूपिश्च, प्राकारः, तृतीयप्राकारः, प्राकारस्य भित्तिः, उत्तर-प्रस्तरादिः, पदानुसारव्यवस्था, मण्डपलक्षणम्, अन्तराललक्षणम्, आभासमण्डपः, छन्दमण्डपः, जातिमण्डपः, मण्डपस्य स्तम्भाः, मण्डपस्यावयवाः, प्रथमो मण्डपः, द्वितीयो मण्डपः, तृतीयो मण्डपः, चतुर्थो मण्डपः, पञ्चमो मण्डपः, सप्तमो मण्डपः, अष्टमो मण्डपः, नवमो मण्डपः, दशमो मण्डपः, प्रथमो मण्डपः, द्वितीयो मण्डपः, तृतीयो मण्डपः, चतुर्थो मण्डपः, द्वादशमण्डपः, त्रयोदशमण्डपः, चतुर्दशमण्डपः, वर्गाकारो मण्डपः, गोपुरलक्षणम्, गोपुरविस्तार, गोपुरद्वारदीर्घता, गोपुरोच्चता, द्वितलतो सप्ततलपर्यन्तं गोपुरवर्णनम्, गोपुरस्यालंकाराः, गोपुरप्रकाराः, एतेषां विवरणं सचित्रं सकोष्टकं प्रदत्तः।

चतुर्थप्रकरणे मया काश्यपशिल्पानुसारेण मूर्तिकलासन्दर्भे समागता विविधा विषया विवेचिताः। ते विषया यथा- परिवारदेवताः, सप्तमातृकाश्च, प्रतिमालक्षणम्,नन्दीलक्षणम्, अनललक्षणम्, वीरभद्रो विनायको वा, सप्तमातृकालक्षणम्, ब्राह्मी, ईश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, विनायकलक्षणम्, षण्मुखलक्षणम्, ज्येष्ठादेव्या लक्षणम्, दुर्गालक्षणम्, विष्णोर्लक्षणम्, इन्द्रः, अश्विनौ, पितरः, वैवस्वतः/यमः, रोहिणीलक्षणम्, निऋति, अप्सरालक्षणम्, वरुणस्य लक्षणम्, ऋषेः लक्षणम्, मरुत् लक्षणम्, रुद्रस्य लक्षणम्, चन्द्रः, क्षेत्रपालः, राजस-क्षेत्रपालः, ईशः, भास्करलक्षणम्, अनन्तः, अर्कः (सूर्यः), अभयः, गौरी, शर्वः, ब्रह्मा, शिवः, भृगु, एकाक्ष, सरस्वती, लक्ष्मीः, कुबेरः, कालाग्नि रुदः, श्रीकण्ठः,

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

उग्रः, शनैश्चरः, मूर्तिपीठः, लिङ्गलक्षणम्, चलं अचलं चलाचल लिङ्गम् च, शिलालक्षणम्, शिलापूजनम्, लिङ्गमानम्, शिरोवर्तनम्, लिङ्गपूजा, लक्षणोद्धारः, प्रतिमालक्षणम्, शिवस्य विभिन्न मूर्तयः, आयादि, काललक्षणम्, उत्तमदशतालः, नासिका लक्षणम्, मध्यमदशतालविधानम्, अधमदशतालविधानम्, उत्तमं नवतालं विधानम्, मध्यमनवतालविधानम्, अधमनवतालविधानम्, अष्टतालविधानम्, सप्ततालविधानम्, पिण्डिकालक्षणम्, पीठिकालक्षणम्, सकलस्थापनाविधिः, सुखासनमूर्तिः, सोमस्कन्देश्वरः, देवी, स्कन्दः, उमास्कन्दः, चन्द्रशेखरः, वृषवाहनमूर्तिलक्षणम्, नृत्तमूर्तिलक्षणम्, गङ्गाधरमूर्तिः, त्रिपुरान्तकमूर्तिलक्षणम्, कल्याणमूर्तिलक्षणम्, अर्धनारीश्वरलक्षणम्, गजहामूर्तिलक्षणम्, पाशुपतमूर्तिलक्षणम्, कङ्कालमूर्तिलक्षणम्, हर्यर्धहरमूर्तिलक्षणम्, भिक्षाटनमूर्तिलक्षणम्, चण्डेशानुग्रहमूर्तिलक्षणम्, दक्षिणामूर्तिलक्षणम्, कालहामूर्तिलक्षणम्, लिङ्गोद्भवलक्षणम्, वृक्षसंग्रहणम्, वृक्षलिङ्गभेदः, उत्तमवृक्षाः, वृक्षदोषाः, पूजा, शूललक्षणम्, शूलस्थापना, रज्जुबन्धलक्षणम्, मृत्संस्कारलक्षणम्, कल्कसंस्कारलक्षणम्, वर्णसंस्कारः- इत्यादयो मया विवेचिताः।

पञ्चमे प्रकरणे काश्यपानुसारिपूर्वोक्तानां वस्तुशास्त्रविचारणां मूर्तिकलायाश्च विविधविषयाणां ग्रन्थान्तरैः साकं तुलना समीक्षा च प्रस्तुता। द्वयोर्ग्रन्थयोः साम्यवैधर्म्यप्रकटनपुरस्सरं काश्यपशिल्पस्य गुणदोषविवेचनं प्रस्तुतम्। नारदशिल्पो ग्रन्थः प्रायेण काश्यपशिल्पसदृशः किन्त्वप्रकाशितः। तस्य हस्तलिखितानुसारेणाध्ययनं कृतं काश्यपशिल्पेन साकं तुलनां कर्तुं स्वल्पः प्रयत्नः कृतः। तथा च बृहत्संहिता-विष्णुधर्मोत्तरपुराणं-मयमतं-मानसारः-अपराजितपृच्छा-मानसोल्लासः-समराङ्गणसूत्रधारः-रूपमण्डनं-शिल्परत्नाकरः-मानसोल्लासः- एतैः साकं तुलनां कृत्वा द्वयोर्वर्णने साम्यं वैधर्म्यं च प्रतिपादितम्। निष्कर्षरूपेणेदं कथयितुं शक्यते यत् काश्यपशिल्पस्य विवेचनं सुसूक्ष्मं मानसहितं विविधालक्षणायुधादिपरिपूर्णं वर्तते।

Your complimentary use period has ended. Thank you for using PDF Complete.

Click Here to upgrade to Unlimited Pages and Expanded Features

समीक्षण इदं प्रतीयते ï

१. काश्यपशिल्पे प्राधान्येन द्राविडशैल्या प्रासादादीनां विशिष्टं सम्पूर्णं मानसहितमङ्ग-प्रत्यङ्गविवरणयुक्तं विस्तृतं विवेचनं प्राप्यते। क्वचित् क्वचिन्नागर-वेसरादीनां भेदनिर्देशो वर्तते।

२. मुख्यतया शिवप्रासादस्य कृते भूमिचयनादिकमारभ्य विविधतल-प्रासादनिर्माणं विस्तारेण वर्णितम्।

३. सूक्ष्मरूपेण प्रत्येकस्य प्रविभागस्य मानादिसहितं विविधप्रकारैः साकं विशिष्टं विवेचनं प्राप्यते।

४. प्रायेण सर्वत्र शिवस्य लिङ्गरूपेण पूजनं क्रियते। अतो विविधशिवलिङ्गानां वर्णनमत्र वर्तत एव। तेन साकं विविधशिवमूर्तीनां विस्तृतं विवरणं दृश्यते। शिवमूर्तिषु चन्द्रशेखरः, वृषवाहनः, नृतमूर्तिः, गङ्गाधरः, त्रिपुरान्तकः, कल्याणः, अर्धनारीश्वरः, गजहा, पाशुपातः, कङ्कालः, हर्यर्धरः, भिक्षाटनः, चण्डेशः, दक्षिणामूर्तिः, कालहा-स्वरूपाण्येतानि वर्णितानि। प्रायेण नान्यत्र कुत्रापि शिल्पग्रन्थेष्वेतादृशं विस्तृतं सूक्ष्ममानसहितं वर्णनं प्राप्यते।

५. शिवेन साकं परिवारदेवतानामपि लक्षणमानसहितमायुधादिवर्णनपरं विवेचनं प्रशंसनीयमस्ति। परिवारदेवतासु- अनलेश्वरम्, सप्तमातृका, विनायकः, षण्मुखः, ज्येष्ठादेवी, विष्णुः, अश्विनौ, पितरः, वैवस्वतः, रोहिणी, निर्ऋतिः, अप्सराः, वरुणः, मरुत्, रुद्रः, भास्करः, सरस्वती, लक्ष्मीः एतासां वर्णनं वर्तते।

६. शिवस्य वाहनं नन्दी। तस्यापि विशिष्टं वर्णनं प्रत्येकावयवस्य सूक्ष्ममानसहितं यथा काश्यपशिल्पे प्राप्यते तथा नान्यत्र कुत्राप्युपलभ्यते।

७. एवं शिवप्रासादः शिवपरिवारो लिङ्गपूजा नन्दीवर्णनमित्यादिकं सकलं परिपूर्णरूपेण विवर्णितमत्र काश्यपशिल्पे।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

णस्य विषये परिवारदेवतानां निर्माणेऽनिवार्योऽयं ग्रन्थः प्रतिभाति।

९. वृक्षाणां स्त्री-पुंस-नपुंसकलिङ्गत्वेन त्रिविधो भेदः काश्यपेन वर्णितः। आधुनिकवनस्पतिशास्त्रज्ञैर्विचारणीयः स्यात्।

१०. काश्यपशिल्पे चत्वारो मूलवर्णास्तेषां मिश्रणं, विविधाश्च भेदा वर्णितास्त आधुनिक -कलर थैरपी -दृष्ट्या विचारणीयाः।

११. काश्यपशिल्प एकतलादारभ्य षोडशतलपर्यन्तं प्रासादानां विविधतलयुक्तानां गोपुराणाञ्च वर्णनं प्राप्यते। तदस्य वैशिष्ट्यं विविनक्ति। बहुभूमिकप्रसादनिर्माण आधुनिकालेऽपि वैविध्यं रमणीयता सुन्दरता च कथं निर्मातव्येति विचारणीयम्।

तथापि यतो हि काश्यपशिल्पो ग्रन्थोऽतीवप्राचीनः शैवधर्मपरश्च वर्तते। अत एव केचन विचारणीया अंशा निम्नलिखिताः सन्ति।

१. ग्रन्थः पुनः सम्पादनमर्हति। यतो हि प्रकाशितग्रन्थे नैकस्थाने त्रुटितो भ्रष्टोऽशुद्धपाठयुक्तश्च वर्तते। तेनानुवादकरणेऽध्ययने च काठिन्यमनुभूयते। कुत्रचिदनाकलीयोऽस्ति, अपरिपूर्णोऽस्ति।

२. आधुनिककाले वर्णजार्तेविचारो न स्वीक्रियते। वर्णदृष्ट्या भूमिविचारो लिङ्गपूजाविचारश्च विचारमर्हति।

३. मानविषये विविधग्रन्थेषु विभिन्नता प्रतीयते तथा चाधुनिककाले तस्याधुनिकपरिभाषायां परिवर्तनं कृत्वा विचारः करणीयः स्यात्।

४. काश्यपवर्णितविविधवास्तुपददेवताविन्यासे बहुषु पदेषु विभिन्नत्वं प्रतीयते। एकाशीतिपदेषु पूर्वभागे समरी, पश्चिमे निर्ऋतिः, पापक्षयश्च, बहिर्भाग एकपददेवेषु ऋक् देवतारूपेण वर्णिताः। अन्यत्र वास्तुशास्त्रग्रन्थेषु बृहत्संहिता-

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

...स्य वैमत्यं दरीदृश्यते। तस्य विरोधपरिहारः कथं करणीय इति चिन्त्यम्। प्रायेण काश्यपशिल्पस्य प्राचीनत्वमनेन द्योतते।

५. प्रायेण सर्वत्र लिङ्गं चलमचलं वर्णितम्। काश्यपेन चलाचललिङ्गस्य तृतीयस्य विवेचनं कृतं तद् विचारणीयं वर्तते।

६. पाषाणानां पुल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकादिभेदाः किमाधुनिककाले स्वीकार्या भवन्ति?

७. शिवपरिवारे स्कन्दस्य सूसूक्ष्मं वर्णनं वर्तते। प्रायेण गुर्जर-महाराष्ट्रप्रदेशेषु स्कन्दस्य दर्शनं निषिद्धं वर्तते। काश्यपशिल्पस्य प्राचीनत्वमनेन सूच्यते। शिवपरिवारे हनुमतः कच्छपस्य च समावेशोऽर्वाचीनः प्रतिभाति।

८. देवतानां स्वरूपवर्णने बाहुसंख्यासु विविधायुधादिषु च भिन्नता दृग्गोचरीभवति।

९. भूमिपरीक्षायां काश्यपेन केवलं ब्राह्मणादिचतुर्वर्णस्य कृते, चतुर्वणयुक्ताया भूमिर्विवरणं कृतम्। वस्तुतो भूमिपरीक्षायां तस्याः स्वाद-स्पर्श-ध्वनि-प्लवादीनां विचारो न प्रस्तुतः।

१०. आधुनिककाले भूमेः स्वल्पत्वेन नैकगोपुरादिसहितस्यानेकस्तम्भयुक्तस्य विविधमण्डपादिगर्भगृहादिसहितस्य देवप्रसादस्यायोजनं कथं करणीयमिति विचारणीयम्।

११. काश्यपशिल्पस्य प्राचीनत्वेन तत्र चतुर्विंशतिजैनमूर्तीनां तथा केशवादिचतुर्विंशतिविष्णुमूर्तीनां दशावतारमूर्तीनां नवग्रहाणां बौद्धमूर्तीनां च विवरणं न प्राप्यते।

१२. शिवमूर्तिष्वप्येकादशरुद्राणां सद्योजात- तत्पुरुषादीनां पञ्चवक्त्रस्य च विवरणं न प्राप्यते।

१३. मुख्यतया शिवस्यैव वर्णनं तेनान्येषां देवानां देवीनां च केवलमापाततो गौणत्वेन च विवरणं प्राप्यते।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features

इत्थं मम संशोधनं षट्सु प्रकरणेषु विभक्तमस्ति। अन्ते परिशिष्टेषु काश्यपशिल्पस्याध्यायानां विषयानुक्रमणिका श्लोकाश्च,काश्यपशिल्पे वर्णितदेवतानां सूचिः, पारिभाषिकशब्दानां सूचिः- इति विविधाः सूचयः सङ्कलिताः सन्ति। समग्रं ममाध्ययनं विविधवास्तुशास्त्रादिग्रन्थानामाधारेण प्रस्तुतम्। तेषां सूचिः सन्दर्भग्रन्थसूच्यां मया प्रदत्तास्ति।

इदं मम समग्रस्याध्ययनस्य फलितमस्ति। आधुनिककालेऽध्ययनस्योपयुक्तता मया प्रतिपादिता ।ममाध्ययनस्य वैशिष्ट्यं महत्त्वं चेदमेव यत् प्रथममेवैष तुलनया सहितं समीक्षणे प्रयत्नः । प्रथमवारमेवैतादृशं तौलनिकं विवेचनात्मकं चाध्ययनम्। एतेन ममाध्ययनस्य काश्यपविचारस्य च प्रायोगिक्युपयोगिता सिध्यते। तस्य सिद्धान्तानां विवेचनं चिन्तनं कृत्वोपर्युक्ता निष्कर्षाः फलस्वरूपेण मया निर्दिष्टाः। भविष्यत्काले काश्यपशिल्पस्य नवीनहस्तलिखितानामन्यवास्तुग्रन्थानामाधारेण पुनः सम्पादनं कृत्वा गुर्जरभाषायां हिन्दीभाषायामाङ्गलाषायां च यथाशक्यमनुवादं कर्तुं ममेच्छा वर्तते। विविधदेवतामूर्तीनां विविधवास्तुशास्त्रग्रन्थोक्तलक्षणानां विविधायुधबाहुसहितानां वाहनयुतानां तौलनिकमध्ययनं कर्तुं मनीषा सञ्जायते। नारदशिल्पस्यापि सम्पादनेऽनुवादे प्रयत्नं करिष्यामः। केवलमीश्वरेच्छा बलीयसी ।

---

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features






सुखासनमूर्तिः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



सोमस्कन्देश्वरः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



चंद्रशेखरः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



वृषारूढः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



नृत्तमूर्तिः-१ ।

PDF Complete
Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



नृत्तमूर्तिः-२ ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



त्रिपुरान्तकः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



कल्याणमूर्तिः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



अर्धनारीश्वरः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



कङ्कालः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



भिक्षाटनम् ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



दक्षिणामूर्तिः ।

Your complimentary use period has ended. Thank you for using PDF Complete.
Click Here to upgrade to Unlimited Pages and Expanded Features



कालारिः शिवः ।